महामहोपाध्यायनागेशभट्टविरचितः

लघुशब्देन्दुशेखरः

भावबोधिनी-बालबोधिनीव्याख्याद्वयोपेतः

शब्दाधिकारे अजन्तभागः

व्याख्याता सम्पादकश्च

आचार्यः श्रीपाद सत्यनारायणमूर्तिः

राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

तिरुपतिः - 517 507

2005

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - 118

महामहोपाध्यायनागेशभट्टविरचितः

लघुशब्देन्दुशेखरः

पण्डित नदीतीरं सेतुमाधवाचार्यविरचितभावबोधिनीव्याख्यया
आचार्य श्रीपाद सत्यनारायणमूर्तिविरचितबालबोधिनीव्याख्यया च सहितः
(शब्दाधिकारे अजन्तभागः)

व्याख्याता सम्पादकश्च
आचार्यः श्रीपाद सत्यनारायणमूर्तिः

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः - 517 507
2005

लघुशब्देन्दुशेखरः

व्याख्याता सम्पादकश्च
श्रीपाद सत्यनारायणमूर्तिः

प्रकाशनसंवत्सरः - 2005

मुद्रितप्रतयः - 500

प्रकाशकः

आचार्यः का.ई. गोविन्दन्
कुलपतिः

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः 517 507 (आं.प्र)

मूल्यम् : रू 249=00

Mahāmahopādhyāya Nageśa Bhaṭṭā's

LAGHU SABDENDU ŚEKHARAḤ

with

Bhāvabodhini and Bālabodhini Commentaries

Editor & Commentator

Prof. Sripada Satyanarayana Murthy

Professor of Vyakarana and Registrar I/c.

Rashtriya Sanskrit Vidyapeetha

RASHTRIYA SANSKRIT VIYAPEETHA

TIRUPATI - 517 5-7 (A.P)

2005

Laghu Śabdendu Śekharaḥ

Editor & Commentator

Prof. Sripada Satyanarayana Murthy

Year of Publication : 2005

Copies : 500

Published by :

Prof. K.E. Govindan
Vice-Chancellor
Rashtriya Sanskrit Vidyapeetha
(Deemed University)
TIRUPATI - 517 507 A.P.

Price: Rs. 249 = 00

Printed at :

Students Offset, Tirupati. Ph:2260253

आचार्यः का.इ. गोविन्दन्
कुलपतिः
राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः

शुभाशंसनम्

श्रुतिस्मृतिसिद्धेन परमदयालुना परमात्मना सर्वजनोद्धाराय अङ्गोपाङ्गादिविविध-शास्त्राणि तत्तन्महर्षिद्वारा प्रकाशितानीति निर्मत्सरविदुषां स्वानुभवरसिकानां च विदितमेव ।

तत्र शतकोटिपाणिप्रभृतिनिगदितव्याकरणेषु पाणिनिगदितव्याकरणं सर्वज्ञसकलशास्त्रयथार्थमर्मज्ञमहर्षिप्रकाशितं तत्तत्पोषकत्वेन च कात्यायनप्रणीतं वार्तिकं महर्षिपतञ्जलियोगाचार्यप्रणीतं महाभाष्यं च वेदार्थपरिज्ञानप्रयोजनमज्ञानकर्दमकलुषित-जनवाणीपरिशोधने कतकबीजायते । तदुक्तं पतञ्जलिना - 'एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति इति । शब्दयथार्थपरिज्ञानं तदर्थज्ञानं धर्मार्थकाम-मोक्षाणां परमकारणं च, न हि पदज्ञानं विना यथार्थज्ञानं वाक्यार्थज्ञानं च संभवति । तच्च शब्दसाधुत्वासाधुत्वज्ञानं, शीघ्रं वाक्यार्थज्ञानं च व्याकरणादेव भवति वेदरक्षा च । तथा चोक्तं महाभाष्ये रक्षोहागमलघ्वसंदेहाद्यष्टादश प्रयोजनं व्याकरणस्य । तत्र पाणिनिप्रोक्तव्याकरणस्यैव लौकिकवैदिकशब्दसाधुत्वादिज्ञापनेन सर्वस्मात् वरं प्रधानत्वं वेदाङ्गत्वं चेति न पाणिपिहितं मनीषिणां सच्छास्त्रनिपुणविचाररसिकानां पदवाक्यप्रमाण-पारावारपारीणधुरीणानामिति ।

इदं च व्याकरणं श्रीशङ्करप्रसादसमुपलब्धवर्णसमाम्नायमभ्युपगच्छता भगवता वेदाचार्येण ब्रह्मनिष्ठेन पाणिनिना वृद्धिरादैच् इत्यारभ्य अ अ इत्यन्तमष्टाध्याय्यात्मकं निरमायि। अथ पाणिनिमुखकमलविनिस्सृतसुधामधुरमधुझरीमास्वादयितुमशक्ति-मतामाशुबोधाय पदवाक्यप्रमाणपारीणधुरीणो लक्ष्मीधरसूनुः भट्टोजिदीक्षितः सिद्धान्तकौमुदीव्याख्यां कौमुदीमिवानन्दकरीं विद्वज्जनमनोहारिणीं न्यबध्नात् । अस्य

कौमुदीग्रन्थस्य वैयाकरणप्राचीनतमरीतिमनुसृत्य सर्वशास्त्ररत्नमञ्जूषाभूत-लघुशब्देन्दुशेखराख्यां व्याख्यां सर्वशास्त्रविशारदशारदकृपाकटाक्षभूतप्रत्यक्षशङ्कर-पतञ्जलिरूपपदवाक्यप्रमाणपारीणशिवभट्टसतीसुतनागेशभट्टः सर्वशास्त्रोदधिः विरचितानेकग्रन्थराशिः प्रणिनाय ।

तस्याः बह्वर्थगर्भिताया व्याख्यायाः व्याख्याः बह्व्यः दुरवबोधाः इति सुकुमारमतीनां विविदिषूणामन्तेवासिनां क्लेशापनोदनाय महामहोपाध्याय-पेरिसूर्यनारायणशास्त्रि - गोडासुब्रह्मण्यशास्त्रिचरणसेवासमधिगतव्याकरणशास्त्रैः श्रीपाद सत्यनारायणमूर्तिभिः बालबोधिनीनाम्नी टीका व्यरचि । सा च नदीतीरं सेतुमाधवाचार्यविरचिताप्रकाशितटीकया सह पञ्चसन्ध्यन्तभागा 2001 हूण हायने विद्यापीठेनानेन प्राकाश्यं नीता । तस्या अयं द्वितीयो भागः (अजन्तप्रकरणम्) प्रकाश्य विद्वत्करकमलयोः समर्प्यते । अवशिष्टानां भागानामपि क्रमशः श्रीनिवासानुग्रहेण निष्प्रत्यूहं प्रकाशनं भूयादिति आचार्य श्रीपाद सत्यनारायणमूर्तेरीदृशकार्ये भूयसी प्रवृत्तिर्भूयादिति तमेव पद्मावतिजानिं संप्रार्थ्य विरमामि ।

तिरुपति

6-12-2005

उपोद्घातः

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किञ्चन।।

'षडङ्गविदस्तत्तथा धीमहे' इति गोपथब्राह्मणोक्त्या, 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति महाभाष्यवचनेन तथा शिक्षादिवचनैश्च शिक्षादीनि वेदस्य षडङ्गानीति ज्ञायते। उक्तञ्च -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।। (पा.शि. 41,42) इति।

षडङ्गेषु व्याकरणं मुखस्थानीयत्वेन जेगीयते। 'प्रधानञ्च षट्स्वङ्गेषु व्याकरण'मिति पस्पशाह्निके महाभाष्यकाराः। पदसाधुत्वज्ञापनमस्य मुख्यं प्रयोजनम्। ''साधुत्वज्ञानविषया सैषा व्याकरणस्मृति'' (वा.प.ब्रह्मका. 142) रित्यभियुक्तोक्तिरिति मञ्जूषायां नागेशः।

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।

इति शक्तिग्राहकेषु व्याकरणमन्यतमम्। शास्त्रमिदं शब्दानुशासनं, शब्दशास्त्रं, पदशास्त्रमिति व्यवह्रियते।

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ।।

इति सत्सु बहुषु व्याकरणेषु पाणिनीयमेव मूर्धावतंसतया विराजते। पाणिनिः तपसा महेश्वरं सन्तोष्य तदनुग्रहेण चतुर्दशसूत्रीमुपलभ्य लौकिकवैदिकवाङ्मययोः अष्टाध्यायीति नाम्ना व्याकरणं रचयामास। माहेश्वरसूत्रमूलकत्वेन पाणिनीयस्यैव वेदाङ्गत्वमिति नागेशभट्टः। उक्तञ्च शेखरे - 'श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम् । अत्र प्रमाणं - ''येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तम्'' इति शिक्षावचम्' इति । वर्णसमाम्नायस्य श्रुतित्वमनुबन्धवर्णानां सादित्वञ्च नन्दिकेश्वरकृतकाशिकायां स्पष्टीकृतम्। यथा -

नृत्तावसाने नटराजराजो ननाद ढक्कां नव पञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ।।

अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ।। इति।

अष्टाध्याय्याः सूत्रक्रमस्य यत्प्राधान्यं तदन्यत्र दर्शनान्तरीयसूत्रग्रन्थेषु नैव दृश्यते। उत्सर्गापवादं मनसि निधाय सपादसप्ताध्यायीत्वेन त्रिपादीत्वेन च विभागोऽष्टाध्याय्या महत्त्वं ज्ञापयति। प्रत्याहारद्वारा सूत्रप्रणयनमन्यदेकं वैशिष्ट्यं पाणिनिव्याकरणस्य।

अल्पाक्षरमसंदिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ।। इति

सूत्रलक्षणं पाणिनिसूत्रेषु सर्वाङ्गीणतयाऽनुवर्तते।

पाणिनिसूत्रांशपूरकत्वेन कात्यायनेन वार्तिकानि विरचितानि।

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः ।। इति

वार्तिकलक्षणम् । परमकारुणिकेन भगवता पतञ्जलिना सूत्रवार्तिकव्याख्यारूपं महाभाष्यं व्यरचि। व्याकरणसिद्धान्तस्थापने महाभाष्यवचनमेव प्रामाणिकं सर्वेषां वैयाकरणानाम्।

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥ इति

भाष्यलक्षणम् । सूत्रवार्तिकभाष्यत्रयस्य पाणिनीयत्वेन व्यवहारः । दुरूहदुर्ज्ञेय-महाभाष्यार्थप्रतिपादनाय भतृहरिः काण्डत्रयात्मकं वाक्यपदीयं व्यरचयत्। आर्थिकांशाः सुष्ठु प्रतिपादिता अस्मिन् ग्रन्थे। कैय्यटेन महाभाष्यस्य प्रदीपनाम्ना बृहत् व्याख्यानं कृतम्। भाष्यकैयटयोः नागेशस्योद्योतव्यख्या पूर्वपक्षसिद्धान्तभाष्यनिर्णयेऽत्यन्तमुपकरोति । विद्यमानास्वन्यासु व्याख्यासु, महाभाष्यस्य प्रदीपोद्योतद्वयमेव प्रसिद्धम्। अष्टाध्याय्यां प्राचीनाचार्याः केचन स्मृताः। यथा - वा सुप्यापिशलेः, अङ्गार्ग्यगालवयोः, ई चाक्रवर्मणस्य, ऋतो भारद्वाजस्य, त्रिप्रभृतिषु शाकटायनस्य, इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च, गिरेश्च सेनकस्य, अवङ् स्फोटायनस्य, तृषिमृषिकृषेः काश्यपस्य' इति। एवं 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति वार्तिके पौष्करसादिः स्मृतः। एवं सूत्रवार्तिकादिषु

तत्तन्नामस्मरणेऽपि तद्ग्रन्था नोपलभ्यन्ते।

व्याकणस्य महत्त्वं केनचिदुक्तं यथा -

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ॥ इति।

व्याकरणशास्त्रस्य प्रक्रियाव्याकरणम्, आर्थिकव्याकरणमिति द्विधा विभागो दृश्यते।

प्रक्रियाग्रन्थविकासः :- पाणिनीये प्रक्रियाग्रन्थानां मूलमष्टाध्ययीति प्रसिद्धमेव। तस्य बहूनि व्याख्यानानि बहुभिः कृतानि।

वामनजयादित्ययोः वृत्तिग्रन्थः काशिकावृत्तिरिति नाम्ना प्रसिद्धः । तयोः जयादित्यः प्रथमद्वितीयपञ्चमषष्ठानामध्यायानां वृत्तिमकरोत् । इतरेषां चतुर्णां वामन इत्यभियुक्ता इति शब्दरत्ने हरिदीक्षितः। शिष्यबुद्धिवैशद्याय जिनेद्रबुद्धिना काशिकावृत्तेः न्यास इति व्याख्या कृता । हरदत्तमिश्रैः पदमञ्जरी कृता । अध्ययनाध्यापनेषु दक्षिणप्रान्ते प्रकरणग्रन्थत्वेन वैयाकरणसिद्धान्तकौमुदीवत्, उत्तरप्रान्ते न्यासपदमञ्जरीसहिता काशिकवृत्तिः प्रसिद्धतया विलसति।

प्रक्रियाग्रन्थेषु धर्मकीर्तिःरूपावतारं व्यलिखत् । चतुर्दशशताब्दीयो रामचन्द्राचार्यः अष्टाध्यायीसूत्रपाठमनादृत्य पाठकसौकर्याय यथाविषयं प्रक्रियाकौमुदीनाम्ना सूत्रव्याख्यानमकरोत् । पठितृसौकर्याय विषयानुसारेण प्रवृत्तोऽयमेवाद्यो ग्रन्थः । रामचन्द्राचार्यपौत्रो विठ्ठलः ग्रन्थस्यास्य प्रसादव्याख्यां कृतवान् । शेषोपाधिभाज एते आन्ध्रदेशीयाः । षोडशशताब्दीयो नृसिंहपुत्रः शेषश्रीकृष्णः प्रक्रियाकौमुद्याः प्रकाशव्याख्यामरचयत् । शेषकृष्णशिष्यः लक्ष्मीधरभट्टसूनुः भट्टोजीदीक्षितः प्रक्रियाकौमुदीप्रेरणया तामेव सरणिमाश्रित्य वैयाकरणसिद्धान्तकौमुदीं जग्रन्थ ।

विना क्लेशं प्रक्रियासम्पादने इयमत्यन्तमुपकरोति । महाभाष्यसिद्धान्तावलम्बनपूर्वकोऽष्टाध्यायीसूत्रव्याख्यानभूतोऽयं ग्रन्थो विदुषां प्रीतिपात्रमभवत् । अत एवोच्यते-

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः ।
कौमुदी यदि न कण्ठस्था वृथा भाष्ये परिश्रमः ।। इति ।

तत्त्वबोधिनी - बालमनोरमादीनि सन्ति बहूनि व्याख्यानानि ग्रन्थस्यास्य । प्राचीनमतदूषणपूर्वकं वैयाकरणमतस्थापनाय भट्टोजीदीक्षितेन शब्दकौस्तुभम्, प्रौढमनोरमा, वैयाकरणमतोन्मज्जनमिति ग्रन्थरत्नत्रयं विरचितम् । भट्टोजीदीक्षितस्य भ्रातुष्पुत्रः कौण्डभट्टो वैयाकरणभूषणमिति नाम्ना वैयाकरणमतोन्मज्जनस्य व्याख्यामकरोत् यश्चार्थिकव्याकरणे प्रसिद्धो जातः । भट्टोजीदीक्षितपौत्रः, भानोजीदीक्षितपुत्रः, नागेशभट्टगुरुः हरिदीक्षितः प्रौढमनोरमायाः शब्दरत्नव्याख्यानमकरोत् । नागेशभट्ट एव स्वगुरुनाम्ना इमां व्याख्यां विरच्य प्रतिष्ठापितवानिति कश्चन विवादो जागर्ति विमर्शकेषु । तथ्यं तावन्नैव निर्धारितम् ।

नव्यमतप्रतिष्ठापकः, सर्वतन्त्रस्वतन्त्रः हरिदीक्षितशिष्यः सतीशिवभट्टयोस्सुतः नागेशभट्टः प्रक्रियाभागे आर्थिकांशे च बहून् ग्रन्थान् व्यरचयत् । 'महाभाष्यस्योद्योतव्याख्या, लघुशब्देन्दुशेखरः, परिभाषेन्दुशेखरः, वैयाकरणसिद्धान्तलघुमञ्जूषा' इत्यादयः प्रसिद्धाः । न केवलं व्याकरणशास्त्रे, शास्त्रान्तरेष्वपि बहुग्रन्थप्रणेता अयम् ।

व्याकरणशास्त्रे प्राच्यनव्यभेदेन मतद्वयं विलसति । आद्यं तावत् कैयटानुयायिनो भट्टोजीदीक्षितस्य । द्वितीयं नागेशभट्टस्य । महाभाष्यकारस्य पतञ्जलेः हृदयं सम्यग् जानाति वैयाकरणमूर्धन्यो नागेशभट्ट इति वैयाकरणप्रसिद्धिः । वैयाकरणसिद्धान्तकौमुद्याः व्याख्याग्रन्थो

लघुशब्देन्दुशेखरः प्रक्रियाग्रन्थेषु सर्वातिशायी विराजते। अत्र कैयटदीक्षितादीनां प्राचीनानां मतानि पर्यालोच्य, भाष्यविरुद्धानि निरस्य भाष्यारूढः सिद्धान्तः प्रदर्शितः। अष्टाध्यायी-सूत्रार्थनिर्णये ग्रन्थोऽयं महानुपकरोतीत्यत्र नास्ति विप्रतिपत्तिः।

काश्यामेकः काशीनाथ इति सुप्रतिष्ठिताः काशीनाथशास्त्रिणः वाराणसीमागत्य स्वाधीतं व्याकरणं पण्डितगङ्गारामत्रिपाठिनां सविधे परिष्कारपद्धत्या द्रढीकृतवन्तः। प्रायशः १७९०-१८६० मध्यकालिकानामेतेषां बहवः शिष्या आसन्। (१) पण्डित राजारामशास्त्री (२) पण्डित बालरामशास्त्री (३) पण्डित यागेश्वरशास्त्री इत्यादयो मुख्याः। १८०५ - १८७५ मध्यकालिका राजारामशास्त्रिणः काशीराजकीयपाठशालायामध्यापनं चक्रुः। विधवोद्वाहशङ्कासमाधिरिति ग्रन्थ एतैः रचितः। बालसरस्वतीत्युपाधिभूषिता बालशास्त्रिणः काशीनाथशास्त्रिसमीपे व्याकरणमधीत्य तेषामादेशानुसारं राजारामशास्त्रिणां समीपे समग्रं व्याकरणं धर्मशास्त्रञ्चाधीतवन्तः। प्रायशः १८३९-१८८२ मध्यकालिकानां बालशास्त्रिपादानां महती शिष्यपरम्परा आसीत्। तेषु प्रधानाः-

शिवकुमारशास्त्री	१८५७ - १९१८
मानवल्लि गङ्गाधरशास्त्री (आन्ध्रदेशीयः)	१८५३ - १९१३
दामोदरशास्त्री	१८४७ - १९०७
म.म. तात्याशास्त्री (रामकृष्णशास्त्री)	१८४५ - १९१९
स्नेहिरामशास्त्री	१८४८ - १९२३
दण्डिभट्ट विश्वनाथशास्त्री (आन्ध्रदेशीयः)	१८५० - १९३०, इत्यादयः।

यागेश्वर ओझा महाभागाः काशीनाथशास्त्रिणां शिष्याः बालशास्त्रिणां सतीर्थ्याः कञ्चन कालं राजारामशास्त्रिणां समीपेऽपि अध्ययनमकुर्वन्। एते १८२८- १८९९ मध्यकालिकाः परिभाषेन्दुशेखरस्य हैमवतीव्याख्यां रचितवन्तः।

आन्ध्रभूमिः शास्त्रपण्डितानामागारः। आन्ध्रदेशे गोदावरीमण्डले कोनसीमप्रान्ते राज-महेन्द्रवरसमीपे मार्कोण्डपाडुग्रामे चिलुकूरिवंशीयाः श्रोत्रियवराः कोण्डय्यशर्माण आसन्। तेषां चिलुकूरिचतुष्टयमिति नाम्ना प्रसिद्धाः सोमनाथशास्त्रिपापय्यशास्त्रि-

लक्ष्मीनारायणशास्त्रिरामशास्त्रिणः चत्वारः पुत्रा आसन् । ते च चत्वारः भ्रातरः परिभाषेन्दुशेखरस्य वाक्यार्थचन्द्रिका, मनोरमाशब्दरत्नस्य चित्रप्रभाकर्तॄणां सर्वशास्त्रेषु निरङ्कुशप्रज्ञाप्रतिभाशालिनां भागवतुल हरिशास्त्रिणां समीपे व्याकरणशास्त्रं सर्वमध्यैयन्त। ततः परं तृतीयचतुर्थसोदरौ लक्ष्मीनारायणशास्त्रिरामशास्त्रिणौ वाराणसीं गत्वा असाधारण-प्रज्ञापाण्डितीधुरन्धरेभ्यः यागेशपण्डितप्रकाण्डेभ्यः पुनरपि व्याकणशास्त्रं सर्वमधीत्य तत्रत्यसभासु स्वीयप्रज्ञाप्रतिभाप्रदर्शनेन सजातीयपण्डितमध्ये लब्धकीर्तिप्रतिष्ठाः गुर्वनुज्ञया स्वग्राममागमताम् । ततः प्रक्रियाब्रह्मत्वेन प्रख्यातानां सोदरलक्ष्मीनारायणशास्त्रिणां साहाय्येन ते च सोदराः सर्वसभास्वनिरोधं प्रविशन्तः चिलुकूरि चतुष्टयमिति लोकविख्यातिमुपार्जयन्। लक्ष्मीनारायणशास्त्रिणां पुत्राः वरदय्यशास्त्रिणः । तत्पुत्राः लक्ष्मीनारायणशास्त्रिणः पितृभ्य एव सर्वं व्याकरणमधीतवन्तः । लक्ष्मीनारायणशास्त्रिणां दौहित्रौ, वरदय्यशास्त्रिणां स्वस्त्रीयौ श्रीपाद पेरय्यशास्त्रिलक्ष्मीनारायणशास्त्रिणौ लक्ष्मीनारायणशास्त्रिणः पौत्रस्य, वरदय्यशास्त्रि-पुत्रस्य लक्ष्मीनारायणशास्त्रिणः सकाशात् व्याकरणविद्यां प्राप्तवन्तौ । ततः श्रीपाद लक्ष्मीनारायणशास्त्रिणः राष्ट्रपतिस्मानितानां कोम्पेल्ल सुब्बरायशास्त्रिणां समीपे शेखर-महाभाष्यादिकमधीतवन्तः । राष्ट्रपतिपुरस्कृता एते व्याकरणशास्त्राध्यापने एव स्वजीवनयापनं धन्यमिति मन्यामाना असंख्याकान् छात्रान् व्याकणशास्त्रनिष्णातान् अकुर्वन् ।

काशीनाथशास्त्रिणां शिष्येष्वन्यतमाः भागवतुल हरिशास्त्रिणः, पेरि वेङ्कटेश्वर-शास्त्रिणश्च । तत्र हरिशास्त्रिणः पूर्वगोदावरीमण्डलान्तर्गत कोटिपल्लिवास्तव्याः । वेङ्कटेश्वरशास्त्रिणश्च विशाखमण्डलान्तर्गत पुरिटिपेन्ट्ग्रानवास्तव्याः । उभावपि काशीं गत्वा शास्त्रिपादानां समीपे पाणिनीयमधीतवन्तः । विशाखमण्डलस्य विजयनगरसंस्थानाधिपतयः श्रीमन्तः पूषावाड्वंशीयाः विजयरामगजपतिराजाः (१८२६-१८७९) नारायणगजपतिराजस्य (१७९४-१८४५) पुत्राः बहुभाषाकोविदाः बाल्ये काश्यामवसन् । एतेषामादेशानुसारं १८६० वर्षे विजयनगरे संस्कृतकलाशालास्थापनाय अङ्कुरार्पणमभवत् । १८५७ वर्षे आरब्धा संस्कृतपाठशाला महाराजसंस्कृतकलाशालायाः मूलम् । महाराजोऽयं काशीतः एतौ द्वौ पण्डितौ स्वास्थानमानिनाय । काशीस्थपण्डितानां नैजगुणमाश्रित्य व्याख्याद्वयेऽपि चित्रप्रभायां, वाक्यार्थचन्द्रिकायाश्च मूलखण्डनमकार्षुः हरिशास्त्रिणः । चिलुकूरिसोदराः, एवमन्ये च बहवः शास्त्रिपादानां शिष्याः । पेरि वेङ्कटेश्वरशास्त्रिणां प्रथमशिष्यौ रुद्राभट्ल रामलक्ष्मणशास्त्रिणौ । महामहोपाध्याय कलाप्रपूर्ण ताता सुब्रह्मण्यशास्त्रिणः विजयनगर-वास्तव्याः शब्देन्दुशेखरगुरुप्रसादकर्तारः, शब्दरत्नचित्रप्रभायाः लघुटिप्पणीकर्तारश्च रुद्राभट्ल रामलक्ष्मणशास्त्रिणोः शिष्याः ।

ताता सुब्बरायशास्त्रिणः १८६७ शताब्दे विजयनगरसमीपे ओन्टिताटि अग्रहारमिति ग्रामे जनिमलभन्त । पितृपादाः सूर्यनारायणावधानिनः । माता सोमदेवी । पितृपादानां समीपे स्मार्तं, बुलुसु सुब्बय्यशास्त्रिणां समीपे काव्यानि चाधीतवन्तः । ततः द्वादशे वर्षे रुद्राभट्ल बुच्चि लक्ष्मणशास्त्रिणां तथा रामशास्त्रिणामन्तेवासित्वं स्वीकृत्य अष्टवर्षाण्यधीत्य व्याकरणशास्त्रं स्वायत्तीकृतवन्तः ।

पिठापुरं संस्थानपालकाः राजा रामरायबहद्दर्पुत्राः राजा सूर्यरावु बहद्दर्महाभागाः (१८८५-१९६४) आन्ध्रभोज, साहित्यचक्रवर्तिबिरुदभूषिताः । तैरायोजितशास्त्र-तलस्पर्शिपरीक्षासु व्याकरणे सुब्बरायशास्त्रिणः परीक्षाधिकारिणः ।

विजयरामगजपतिः (१८८३-१९२२) विजयनगरसंस्थानाधीशस्य अनपत्यस्य आनन्दगजपतिमहाराजस्य (१८७९-१८९७) दत्तपुत्रः । १८९७ वर्षे आनन्दः परलोकं गतः। ततोऽधिकारविषये ज्ञातिनां विवादेन १९०४ वर्षपर्यन्तं संस्थानं न्यायालयाधीनमासीत् । न्यायालयेन विजयरामराजस्य दत्तनिर्णयविषये धर्मशास्त्रादिभ्यः प्रमाणप्रदर्शनद्वारा सुब्बरायशास्त्रिप्रभृतयः महान्तमुपकारं कृतवन्त इति श्रूयते । १९०४ वर्षतः १९२२ वर्षपर्यन्तं विजयरामराजः संस्थानपालनमकरोत् ।

कलाप्रपूर्ण पेरि वेङ्कटेश्वरशास्त्रिणः शब्देन्दुशेखरगुरुप्रसादशेषकर्तारः, परिभाषेन्दुशेखरस्य नागेशगूढार्थदीपिकाकर्तारश्च ताता सुब्रह्मणश्यशास्त्रिणां प्रियशिष्याः । महामहोपाध्यायाः राष्ट्रपतिपुरस्कृताः पेरि सूर्यनारायणशास्त्रिणः ताता सुब्रह्मण्यशास्त्रिभ्यः मञ्जूषाद्यार्थिकग्रन्थान्, पेरि वेङ्कटेश्वरशास्त्रिभ्यः महाभाष्यादिकञ्च अधीतवन्तः । वैयाकरणभूषणसार - वैयाकरणसिद्धान्तलघुमञ्जूषा - भाट्टरहस्यानां व्याख्यातारः अपरनागेशत्वेन प्रसिद्धा अस्मद्गुरुचरणाः । एतेषां शिष्यपरम्परा भारतदेशे सर्वत्र व्यापृता वर्तते । अस्मद्गुरुचरणाः महामहोपाध्यायाः राष्ट्रपतिपुरस्कृताः शास्त्ररत्नाकरादिबिरुदभूषिताः गोडा सुब्रह्मण्यशास्त्रिपादाः न्यायवेदान्तव्याकरणादिशास्त्रेषु दिगन्तप्रसृमरकीर्तयः ब्रह्मश्री वेमूरि रामब्रह्मशास्त्रिणां शिष्याः सूत्रभाष्यादिबहुग्रन्थव्याख्यातारः बहून् छात्रान् न्यायव्याकरणवेदान्तशास्त्रनिष्णातान् अकुर्वन् । तत्र विश्वनाथगोपालकृष्णशास्त्रि- श्रीपाद सुब्रह्मण्यशास्त्रिप्रभृतयः प्रसिद्धाः ।

सर्वशास्त्राणां शेवधिः काशीपुरीति प्रसिद्धिः । पुरा दाक्षिणात्याः बहवः काशीं गत्वा शास्त्रवैभवभूषिता भूत्वा स्वदेशमागत्य तदध्यापयन्ति स्म । तेष्वन्यतमा आन्ध्रदेशस्य कोनसीमप्रान्तीया नव्यव्याकरणे परिष्कारपद्धतिं विशेषत उपबृंहितवन्तः शब्देन्दु-चन्द्रिकादिव्याख्यातारो दण्डिभट्ट विश्वनाथशास्त्रिणो व्याकरणन्यायाद्यनेकशास्त्रनदीष्णाः।

दण्डिभट्ट विश्वनाथशास्त्रिणः पुँभावसरस्वतीनां बालशास्त्रिपादानां मुख्यशिष्येष्वन्यतमाः । तैर्विरचिताः शब्देन्दुचन्द्रिकादिव्याख्याः परिष्कारपथावलम्बिन्यो विराजन्ते । गोदावरी-मण्डलान्तर्गतकोनसीमप्रान्ते मोडेकुरू ग्रामवास्तव्या एते काशीं गत्वा तत्र व्याकरणादि-शास्त्राण्यधीत्य गुर्वनुज्ञया स्वदेशमागत्य विजयनगराधिपसत्तमात् पूसपाटिवंशसंभूतादानन्दात् जीविकां सम्प्राप्य बहून् छात्रान् शास्त्रनिष्णातानकुर्वन्। अयं १८५०-१९३० मध्यकालिक इति सम्भाव्यते । अनेन च शब्देन्दुचन्द्रिका, परिभाषेन्दुचन्द्रिका, मनोरमाटिप्पणी चेति त्रयः ग्रन्था रचिताः । आद्यौ प्रकाशितौ । तृतीयोऽप्रकाशितः ।

आन्धदेशे प्राच्यगोदावरीमण्डले विराजितपिठापुरं संस्थानस्य पालकेष्वन्यतमः राजा रावु वेङ्कटमहीपतिगङ्गाधररामाराबु बहद्दर्महाभागः (१८४४-१८९०) स्वतः पण्डितः विद्वत्कविपोषकश्च । विश्वनाथशास्त्रिणः एतेभ्यः बहुसम्माननं प्राप्तवन्त इति प्रसिद्धिः । आङ्ग्लेयानां शासनकाले जर्मन्देशीया वेदशास्त्रविज्ञानं स्वायत्तीकर्तुं तेषामनुवादाय स्वदेशागमनाय शास्त्रिपादान् अभ्यर्थयन् । परन्त्वेते तदीयप्रार्थनां निराकुर्वन् । किञ्चित्कालानन्तरं तैः शास्त्रिपादा अपहृता इति किञ्चिदैतिह्यं श्रूयते । तेषां प्रज्ञापाटवेन सन्तुष्टा जर्मन्देशीयाः स्वदेशे एकस्य प्रान्तस्य दण्डिभट्लेति नामकरणं कृतवन्त इति च प्रसिद्धिर्वर्तते। कविसार्वभौमाः श्रीपाद कृष्णमूर्तिशास्त्रिणः स्वीयान्ध्राभ्युदयपद्यकाव्ये विश्वनाथशास्त्रिणां चरितं संग्रहेण प्रावर्णयन् । एते वाराणस्यां शब्दशास्त्रं स्वायत्तीकृत्य मन्त्रशास्त्रेऽपि प्रतिभासम्पन्ना जाताः । वाराणसीतः समागत्य स्वीये मोडेकुरुग्रामे पत्न्या साकं वसन्ति स्म । कदाचित् शास्त्रिपादाः स्वभगिनीं द्रष्टुं पत्न्या साकं गच्छन्ति स्म । ते पुरो गच्छन्ति । पत्नीताननुसरति । किञ्चिद्दूरगमनानन्तरं तस्याः सम्भ्रमो जातः । पतिः कुत्रापि न दृष्टः । रुदन्ती सा पतिमन्विष्यमाणा सर्वान् विचारयति स्म । तत्समये केचन तत्समीपमागत्य 'कैश्चित् वैदेशिकैस्सह गच्छन् भवदुक्ताभिज्ञावान् पुरुषोऽस्माभिः दृष्टः। गन्तुमनिच्छन्तं तं बलान्नयन्ति' इत्यकथयन् । ततस्सा स्वस्थानमेत्य स्वीयेभ्यः वार्तामिमां निवेदितवती । ततः पत्युः वार्तैव न ज्ञाता । किञ्चित्कालानन्तरं जर्मन्देशतः कतिचनवर्षपर्यन्तमज्ञातनाम्ना तस्याः कृते प्रतिमासं किञ्चिद्धनं एम्.ओ. द्वारा आगच्छति स्म । प्रेषकस्य पत्रलेखनेऽपि तस्य प्रत्युत्तरं नासीत् । एवं वर्षचतुष्टयं धनमागतम् । ततः तदपि नासीत् । अनेन जर्मन्देशीया एव शास्त्रिपादानपहृतवन्त इति बन्धुवर्गः निश्चिकायेति।

विश्वनाथशास्त्रिणां शिष्यपरम्परा स्पष्टतया न ज्ञायते । तच्छिष्येष्वन्यतमः कलग वेङ्कटरामशास्त्रीति शब्देन्दुशेखरटिप्पणीं कृतवानिति ज्ञायते । उपलब्धेषु पत्रेषु एवमस्ति-

'दण्डुभट्लेतिगृहनामक विश्वनाथशास्त्रिणां सच्छिष्येण कलगेति गृहनामक वेङ्कटरामशास्त्रिणा कृतायां शेखरटिप्पण्यां संज्ञाप्रकरणप्रारम्भः' इति । सदाशिवः आत्मनः प्रियशिष्य इति ग्रन्थकृता स्वयमेवोक्तम् ।

विजयरामराजपुत्रः विजयनगरसंस्थानपालकः आनन्दगजपतिमहाराजः १८७९-१८९७ मध्यकालिकः । मुडुम्ब नरसिंहाचार्यस्वामि, भागवतुल हरिशास्त्रिप्रभृतयः एतस्य संस्कृतविद्यागुरवः । सर्वविद्यानां पोषणेनैतत्परिपालनकालः स्वर्णयुगत्वेन परिकीर्त्यते । आनन्दगजपतिमहाराजात् आदृताः पण्डिताः दण्डिभट्ल विश्वनाथशास्त्रि, मुडुम्बै नरसिंहाचार्य, पेरि काशीनाथशास्त्रि, इवटूरि नन्दिकेश्वरशास्त्रि, मण्ड चिट्टिकामशास्त्रि, मण्ड लक्ष्मीकामेश्वरशास्त्रि, कोल्लूरि कामशास्त्रि, भागवतुल लक्ष्मीनारायणशास्त्रिप्रभृतयः ।

पाठकसौकर्याय आन्ध्रदेशे सुप्रसिद्धानां पण्डितप्रकाण्डानां केषाञ्चित् परिचयो दीयते।

व्याकरणाचार्याः काशीपण्डितप्रकाण्डाः कन्दुकूरि कृष्णशास्त्रिणः प्राच्यगोदावरी-मण्डलान्तर्गत 'मुनिपल्लि' ग्रामवास्तव्याः गौरमाम्बयज्ञेश्वरशास्त्रिणोः पुत्राः । काश्यां मानवल्लि गङ्गाधरशास्त्रिणां शिष्याः, एते १८६८-१९४४ मध्यकालिकाः । एतेषां महती शिष्यपरम्परा वर्तते । मल्लादिनरसिंहशास्त्री, मल्लादि सूर्यनारायणशास्त्री, मल्लादि कृष्णमूर्तिशास्त्री, प्रयाग वेङ्कटरायशास्त्री, नौडूरि कामेश्वरशास्त्री, भमिडिपाटि अच्युतरामसोमयाजी, कम्भंपाटि सत्यनारायणशास्त्री, चुण्डूरि राममूर्तिशास्त्री, कोम्पेल्ल सत्यनारायणशास्त्री, चिरुकूरि राममूर्तिशास्त्री, पम्मि नरसिंहशास्त्री, कोम्पेल्ल लक्ष्मीपतिदीक्षित इत्यादयः । एतेषां पुत्रौ कन्दुकूरि लक्ष्मीनरसिंहशास्त्रि - भास्करशास्त्रिणौ प्रसिद्धौ विद्वांसौ ।

श्रीपाद वेङ्कटसुब्बरायशास्त्रिणः पेरय्यशास्त्रिणां पुत्राः गोदावरीमण्डलान्तर्गत-मोडेकुर्रुग्रामवास्तव्याः । वद्दि वेङ्कटशास्त्रि, कविसार्वभौम श्रीपादकृष्णमूर्तिशास्त्रिप्रभृतय एतेषां शिष्याः । न्यायवेदान्तादिषु दिगन्तविश्रान्तकीर्तयः कोल्लूरि सोमशेखरशास्त्रिणः न्याये आदिभट्ल राममूर्तिशास्त्रिणां, वेदान्ते देन्दुकूरि नरसिंहशास्त्रिणां शिष्याः । कोल्लूरि राममूर्ति, लक्ष्मणमूर्ति, राणी नरसिंहशास्त्रिप्रभृतयः सोमशेखरशास्त्रिणां प्रधानशिष्याः ।

मानवल्लि गङ्गाधरशास्त्रिणां शिष्याः मञ्जिपूडि वेङ्कटशास्त्रिणः, तुलसि सूर्यनारायणावधानिनः, नोरि सुब्रह्मण्यशास्त्रिणः व्याकरणादिशास्त्रेषु पारङ्गताः बहून् शिष्यान् शास्त्रनिष्णातान् अकुर्वन् । ताता सुब्रह्मण्यशास्त्रिणां शिष्येष्वन्यतमाः जयन्ति भगीरथशास्त्रिणः शब्दशास्त्राम्बुधिं चुलुकीकृतवन्तः । एतेषां पाण्डित्यविषये किञ्चिदैतिह्यं पण्डितलोके श्रूयते। आन्ध्रदेशे दिवाकर्ल तिरुपतिशास्त्रि - चेल्लपल्लि वेङ्कटशास्त्रिणावुभावपि मिलित्वा

तिरुपतिवेङ्कटकवित्वेन प्रसिद्धौ । साहितीसरस्वतीपुत्रावेतौ संस्कृतान्ध्रभाषयोरवधानधुरन्धरौ। कदाचिदेतयोरवधाने समस्यापूरणे बेल्लंकोण्ड रामरायकवीन्द्राः पृच्छका आसन् । तत्सन्दर्भे ''पश्यापश्यौ न पश्यतः'' इति तैः समस्या दत्ता । पश्यापश्येत्यत्र पदसाधुत्वविषये तिरुपतिवेङ्कटकविभिः आक्षेपः प्रदर्शितः । तत्काले तत्परिहारो न जातः । अनन्तरमस्याः समस्यायाः परिहाराय तिरुपतिवेङ्कटकविवर्गः ताता सुब्बरायशास्त्रिमहाभागान्, बेल्लंकोण्डवर्गीयाः जयन्ति भगीरथशास्त्रिपादांश्चाश्रितवन्तः । पत्रिकामुखेन वादविवादः प्रवृत्तः। प्रतिवादिनः स्वगुरव इति ज्ञात्वा भगीरथशास्त्रिणः स्ववादमज्ञातनाम्ना प्रकटितवन्तः । एवं कतिचनमासपर्यन्तमयं वादः पत्रिकायामनुवर्तते स्म । किञ्चित्कालानन्तरं सिद्धान्तव्यास आगामिपत्रिकायामागमिष्यतीति भगीरथशास्त्रिभिः प्रकटितः । तद्दृष्ट्वा ताता सुब्रह्मण्यशास्त्रिणः 'एतादृशपाण्डित्यप्रकर्षः भगीरथस्यैव सम्भवति नान्यस्य । भगीरथवदयं भगीरथः व्याकरणगङ्गां पृथिवीमानीतवान्' इति निश्चित्य भगीरथशास्त्रिणां स्वग्रामं द्राक्षाराममागत्य तैस्साकं विचार्य वादस्यास्य इतः परमनुवृत्तिर्मास्त्विति संयुक्तरूपेण निर्धार्य 'वादोऽयं पश्यां पुश्यां जात' इति प्रकटितवन्तः । तदारभ्य, यत्र तत्त्वस्य निर्धारणं न भवति तत्र पश्यां पुश्यामिति पदव्यवहारः आन्ध्रदेशे तेलुगुभाषायां प्रसिद्धो जात इति पण्डितोक्तिः। कोम्पेल्ल लक्ष्मीनरसिंहशास्त्रि, जयन्ति सूर्यनारायणशास्त्रिप्रभृतय एतेषां शिष्याः । जयन्ति सूर्यनारायणशास्त्रिणामग्रजाः जयन्ति भगीरथशास्त्रिणः । उप्पुलूरि दक्षिणामूर्तिशास्त्रि, कोम्पेल्ल सुब्बरायशास्त्रि, महेन्द्रवाड सुब्बरायशास्त्रि, चिर्रावूरि अनन्तपद्मनाभशास्त्रि, कूचि राममूर्तिशास्त्रिप्रभृतयः जयन्ति सूयनारायणशास्त्रिणां मुख्यशिष्याः । वेदुल सूर्यनारायणशास्त्रि, वारणासि सुब्रह्मण्यशास्त्रियतिराजसम्पत्कुमाराचार्यप्रभृतयः ताता सुब्बरायशास्त्रिणां शिष्याः प्रसिद्धाः वैयाकरणाः। तातासुब्बरायशास्त्रिणां शिष्यपरम्परायां अप्पल जोगन्नशास्त्रि, अप्पल सोमेश्वरशर्म, कर्रि श्रीराममूर्तिशास्त्रि, श्रीभाष्यम् अप्पलाचार्य, कर्रि रामानुजाचार्य, आकेल्ल शेषाद्रिशास्त्रिप्रभृतयोऽपि प्रसिद्धाः पण्डिताः । सम्पत्कुमाराचार्याणां महती शिष्यपरम्परा श्रूयते । तेषु प्रसिद्धाः खण्ड्रिक शेषावधानिप्रभृतयः । शेषावधानिनां शिष्याः श्रिष्टि साम्बमूर्तिशास्त्रिणः प्रक्रियाव्याकरणे विशिष्यासाधारणप्रतिभासम्पन्नाः । तच्छिष्याः श्रिष्टि सीतारामशास्त्रिप्रभृतयो विलसन्ति । कोम्पेल्ल सुब्बरायशास्त्रिणां शिष्येषु मुख्याः वेदान्तव्याकरणालङ्कारशास्त्रेषु कृतभूरिपरिश्रमः महामहोपाध्यायाः, राष्ट्रपतिपुरस्कृताः, बहुग्रन्थप्रणेतारः पुल्लेल श्रीरामचन्द्रुडु महाभागाः विराजन्ते । एवं बहवो व्याकरणादिशास्त्रपण्डिता आन्ध्रदेशे आसन्। गोदावर्यादिमण्डलान्तर्गतानां केषाञ्चिदेव स्मरणं कृतमत्र । अन्ध्रदेशीयानां सर्वेषां वैयाकरणानां परिचयो महान् प्रबन्धो भवति ।

ग्रन्थस्थाः केचन विशेषाः स्थालीपुलाकन्यायेन निर्दिश्यन्ते -

1. प्रातिपदिकसंज्ञाविधायकसूत्रद्वये ऐक्यसम्पादनायार्थवत्त्वपरिष्कारः ।
2. समासग्रहणकृतनियमशरीरे विशेषप्रदर्शनम् ।
3. प्रत्ययः, परश्चेति अधिकारसूत्रद्वयव्याख्याने विशेषाः ।
4. प्रातिपदिकाधिकारस्य सार्थक्यम् ।
5. मनोरमोक्तङ्याब्ग्रहणफले अस्वारस्यप्रदर्शनम् ।
6. एकशेषस्य तन्त्रेण गतार्थता अस्ति वा न वेति विचारः ।
7. एङ्ह्रस्वादिति सूत्रे अन्याक्षिप्तस्यान्यत्रान्वय इति विशेषप्रदर्शनम् ।
8. आदर्शेनेत्यादौ णत्ववारणे वार्तिकभाष्यमतभेदः ।
9. नामीत्यस्य स्थाने आमीति न्यासः कर्तुं शक्यते वा न वेति विचारः ।
10. अनुबन्धयोग्यार्थकत्वमनुबन्धत्वम् ।
11. सर्वादिगणे उभशब्दपाठविचारः, तत्प्रत्याख्यानप्रकारश्च ।
12. विभक्त्यादेशेभ्यः परत्वाज्जरसिति मतविचारः ।
13. पद्दन्नोमासित्यत्र पदादीनां प्रकृत्यन्तरत्वं, न त्वादेशत्वम् ।
14. आतो धातोरित्यत्र धातुग्रहणमाबन्तनिवृत्तिमात्रफलकम् ।
15. सुसखिशब्दविचारः ।
16. प्रत्ययलक्षणसूत्रस्य स्थानिवत्सूत्रेण गतार्थता अस्ति वा न वेति विचारः ।
17. नित्यस्त्रीत्वपरिष्कारः ।
18. गोत इति तपरकरणविषये विचारः ।
19. उत्तरपूर्वेत्यत्र विग्रहे विशेषः ।
20. याडाप इत्यादौ आकारप्रश्लेषविचारः ।
21. ङिति ह्रस्वश्चेति सूत्रार्थविचारः ।
22. सन्निपातशब्देन सन्निपातलक्षणपरिभाषायां निमित्तनिमित्तिनोः सम्बन्धवत् विशेषणविशेष्ययोः सम्बन्धोऽपि गृह्यते ।

एवं बहुविशेषभूषितोऽयं ग्रन्थः प्रक्रियाव्याकरणग्रन्थान् सर्वानप्यतिशय्य वैयाकरणकुले राराज्यते । यद्यपि प्रसादगुणभूयिष्ठा महाभाष्यकाराणां शैली, सर्वं मनोदर्पणे प्रतिबिम्बत

इवाभाति तथापि तत्रत्यं किमेकदेशिभाष्यं ? किं सिद्धान्तिभाष्यमिति. विना नागेशग्रन्थान् ज्ञातुं न प्रभवाम इत्यत्र नास्ति संशीतिलेशः।

ग्रन्थस्यास्य सन्ति बहूनि व्याख्यानानि। मुद्रितेषु तेषु अभिनवचन्द्रिका, चिदस्थिमाला, ज्योत्स्ना, सदाशिवभट्टी, चन्द्रकला गुरुप्रसादप्रभृतीनि परां प्रसिद्धिं भजन्ते। सत्सु बहुषु व्याख्यानेषु नव्यांशस्फोरकत्वेन न ह्येकेनान्यस्य गतार्थता वर्तते।

अत एवामुद्रितव्याख्याप्रकाशने दृष्टिः सारिता। दक्षिणप्रान्ते विशिष्य आन्ध्रदेशे नव्यवैयाकरणपरम्परा प्रधानतः द्विधा दृश्यते। एका तावत् विजयनगरसंस्थानपण्डितानां महामहोपाध्याय ताता सुब्बरायशास्त्रिणां सच्छिष्यपरम्परा। तत्र प्रसिद्धाः बहुग्रन्थकर्तारः वैयाकरणशेखराः पेरि वेङ्कटेश्वरशास्त्रिणः, महामहोपाध्यायाः पेरि सूर्यनारायणशास्त्रिणश्च। लघुशब्देन्दुशेखरस्य स्वरसन्धिपर्यन्तं ताता सुब्बरायशास्त्रिणां गुरुप्रसादव्याख्या पण्डितलोकमण्डिता विराजते। कारकान्तशेखरस्य पेरि वेङ्कटेश्वरशास्त्रिणां गुरुप्रसादशेषः सुप्रसिद्धः। वैयाकरणभूषणसार - वैयाकरणसिद्धान्तलघुमञ्जूषा - भाट्टरहस्यानां व्याख्यातारः, अपरनागेशत्वेन प्रसिद्धाः प्रथितयशस्काः महामहोपाध्याय पेरि सूर्यनारायणशास्त्रिणोऽस्मद्-गुरुचरणाः। एतेषां शिष्या उपशिष्याश्च वैयाकरणास्सर्वत्र भारते प्रसिद्धाः।

अन्या तावत् महामहोपाध्यायः वैयाकरणकेसरी इत्यादिबिरुदभाजां श्रीमुष्णं सुब्बरायाचार्याणां शिष्यपरम्परा। दक्षिणापथे प्रायशः बहवो वैयाकरणाः एतेषामाचार्यवर्याणां शिष्यप्रशिष्यपरम्परायामन्तर्गताः। अनेके तच्छिष्याः महामहोपाध्यायबिरुदमपि प्राप्तवन्तः। सुब्बरायाचार्याणां शिष्येषु विख्याताः स्वपुत्राः महामहोपाध्याय श्रीमुष्णं सेतुमाधवाचार्याः। तिरुपतिक्षेत्रवासिन एते व्यासपाणिनिभावनिर्णयादिबहुग्रन्थप्रणेतारः। सुब्बरायाचार्याणां शिष्येषु निर्देशार्हाः कुम्भकोणं वास्तव्याः पण्डित नदीतीरं (थँ) सेतुमाधवाचार्याः। तत्कृता लघुशब्देन्दुशेखरस्य भावबोधिनीति व्याख्या अमुद्रिता अडयार्ग्रन्थालये उपलभ्यते। अडयार्ग्रन्थसूच्यां भावबोधिनीव्याख्या नदीतीरं सेतुमाधवाचार्यकृतित्वेन निर्दिष्टा वर्तते। प्रायशः सदाशिवभट्टी-चिद्‌मी-चन्द्रकलाख्यव्याख्यात्रयप्रभावोऽत्र दृश्यते। व्याख्येयं व्याकृतिविद्याबुभुत्सूनां कृतेऽत्यन्तमुपकरोतीत्यस्माकं विश्वासः।

विद्यमानासु बह्वीषु व्याख्यासु तासामतिगहनतया दुरूहतामालोच्य, मूलादति-

रिच्यमानशास्त्रीयविषयज्ञानाय स्पष्टतया मूलग्रन्थावबोधनं प्रथमं सोपानमिति च विचार्य विविदिषूणां छात्राणां विदुषां च सरलतयाऽवबोधाय शेखरग्रन्थस्य अजन्तभागस्य बालबोधिनीव्याख्या ग्रथिताऽस्माभिः । सम्पादितभावबोधिनीव्याख्या तथा ग्रथित-बालबोधिनी चेति व्याख्याद्वयं वैयाकरणानामन्येषाञ्च कृते महते उपकाराय कल्पत इति विश्वसिमः।

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ।।

इत्यभियुक्तोक्तिमनुस्मरन्तः पण्डिताः यद्यत्र गुणलेशः स्यात्तदा तं परिगृह्य पुरुषबुद्धिसहजान् भ्रमप्रमादादिदोषान् परित्यज्य मामनुगृह्णन्त्विति सविनयमभ्यर्थये।

श्रीपाद सत्यनारायणमूर्तिः

❖ ❖ ❖

कृतज्ञतासमर्पणम्

पण्डितप्रवरैः नदीतीरं सेतुमाधवाचार्यैः विरचितायाः लघुशब्देन्दुशेखरव्याख्यायाः भावबोधिन्यास्तथा स्वीयव्याख्यायाः बालबोधिन्याश्च विद्यापीठस्य प्रकाशनमालायां मुद्राप्य प्रकाशनेऽनुमतिं प्रदाय उपकृतवद्भ्यः न्यायवेदान्तादिशास्त्रपारङ्गतेभ्यः विद्यापीठस्य कुलपतिपदं विभूषयद्भ्यः **आचार्य का.ई. गोविन्दन्** महोदयेभ्यः स्वीयमाधमर्ण्यमाविष्करोमि ।

ग्रन्थस्यास्य प्रकाशने साहाय्यमाचरितवद्भ्यः विद्यापीठस्यास्य अधिकारिभ्यः हार्दं कार्तज्ञ्यं विनिवेदयामि ।

व्याकरणशास्त्रमध्याप्य मामनुगृहीतवद्भ्यः वैयाकरणकेसरिभ्यः पदवाक्यप्रमाणापारीणेभ्यः यशःकायेभ्यः महामहोपाध्याय **पेरि सूर्यनारायणशास्त्रि**वर्येभ्यः साष्टाङ्गप्रणामा विधीयन्ते । न्याय-व्याकरणशास्त्रद्वयमपत्यनिर्विशेषमध्याप्य मामनुगृहीतवन्तः मद्गुरुचरणाः पण्डितरत्नाः न्यायवेदान्तव्याकरणादिष्वप्रतिहतप्रकटितवैदुष्याः शमदमाद्यनन्तगुणविभूषिताः, अनवरताध्यापनैकरताः यशःकायाः महामहोपाध्याय **गोडा सुब्रह्मण्यशास्त्रि**चरणाः । सुतनिर्विशेषं मामनुपालयति स्म अस्मद्गुरुपत्नी **अन्नपूर्णास्वरूपिणी** यशःकाया । तयोः विद्यादातृदम्पत्योः मनसा वाचा कर्मणा साष्टाङ्गप्रणामान् समर्प्य आत्मानं धन्यं सम्भावयामि ।

पित्रोः परिपक्वपुण्यफलं भुञ्जानोऽहं जनिविद्यादात्रोः तयोः पादपद्मानि निरन्तरं भजे । ग्रन्थस्यास्य टङ्कनं कार्यं कृतवतोः ए.पि.मुरलि-जे.एल्. श्रीनिवासयोः धन्यवादं वितरामि । भगवतः श्रीनिवासस्यानुग्रहेण प्रबन्धोऽयं विदुषां महान्तमुपकारमादध्यादित्याशासे ।

बुधजनविधेयः

श्रीपाद सत्यनारायणमूर्तिः

विषयसूची

क्र.सं.	विषयः	पृष्ठसंख्या
	अजन्तपुँलिङ्ग प्रकरणम्	
1.	अर्थवदधातुः	1
2.	कृत्तद्धितसमासाश्च	14
3.	प्रत्ययः	22
4.	परश्च	25
5.	ङ्याप्प्रातिपदिकात्	28
6.	स्वौजसमौट्	40
7.	विभक्तिश्च	41
8.	द्व्येकयोः	43
9.	बहुषु बहुवचनम्	44
10.	सरूपाणामेकशेष एकविभक्तौ	45
11.	चुटू	54
12.	न विभक्तौ	55
13.	अतो गुणे	56
14.	एकवचनं सम्बुद्धिः	56
15.	एङ्ह्रस्वात्	57
16.	अमि पूर्वः	64
17.	लशक्वतद्धिते	64
18.	तस्माच्छसः	64
19.	अट्कुप्वाङ्	66
20.	पदान्तस्य	68
21.	यस्मात् प्रत्ययविधिः	71
22.	टाङसिङसाम्	75
23.	सुपि च	75
24.	ङेर्यः	76
25.	बहुवचने झल्येत्	79
26.	वावसाने	79
27.	ह्रस्वनद्यापः	83
28.	नामि	85
29.	अपदान्तस्य मूर्धन्यः	95
30.	आदेशप्रत्यययोः	95
31.	सर्वादीनि सर्वनामानि	96
32.	जसः शी	103
33.	सर्वनाम्नः स्मै	107
34.	ङसिङ्योः	107
35.	आमि सर्वनाम्नः	107
36.	उभशब्दपाठः	109
37.	न बहुव्रीहौ	128
38.	सर्वादिसूत्रार्थः	132
39.	तृतीयासमासे	139
40.	विभाषा जसि	139
41.	जराया जरस्	144
42.	पद्दन्नोमास्	150
43.	सुडनपुंसकस्य	152
44.	स्वादिषु	152
45.	यचि भम्	152
46.	आडारादेका संज्ञा	153

क्र.सं.	विषयः	पृष्ठसंख्या
47.	अल्लोपोऽनः	157
48.	पद्दन्नोमास्	162
49.	आतो धातोः	166
50.	शेषो घ्यसखि	171
51.	आङो ना	174
52.	घेर्ङिति	174
53.	अच्च घेः	178
54.	हल्ङ्याप्	181
55.	सुसखिशब्दः	184
56.	पतिः समास एव	191
57.	बहुगणवतु	193
58.	प्रत्ययस्य लुक्	201
59.	षड्भ्यो लुक्	202
60.	प्रत्ययलोपे	203
61.	न लुमताङ्गस्य	207
62.	त्रेस्त्रयः	216
63.	यू स्त्र्याख्यौ	220
64.	अम्बार्थनद्योः	223
65.	अचि श्नुधातुभ्रुवाम्	229
66.	एरनेकाचः	231
67.	गतिकारकेतरपूर्वपदस्य	233
68.	न भूसुधियोः	238
69.	अप्तृन्तृच्	243
70.	विभाषा तृतीयादिषु	245
71.	ऋत उत्	247
72.	गोतो णित्	258
73.	रायो हलि	261

क्र.सं.	विषयः	पृष्ठसंख्या
	अजन्तस्त्रीलिङ्गप्रकरणम्	
74.	औङ आपः	262
75.	आङि चापः	262
76.	सर्वनाम्नः स्याट्	264
77.	विभाषा दिक्समासे	266
78.	अतिखट्वाय	271
79.	व्रश्चभ्रस्ज	279
80.	ङिति ह्रस्वश्च	282
81.	त्रिचतुरोः स्त्रियां	293
82.	नेयङुवङ्	301
83.	वामि	302
84.	स्त्रियाश्च	307
	अजन्तनपुंसकलिङ्गप्रकरणम्	
85.	अतोऽम्	310
86.	यस्येति च	312
87.	नपुंसकस्य	313
88.	अद्ड्डतरादिभ्यः	314
89.	सान्तमहतः	316
90.	ह्रस्वो नपुसके	318
91.	इकोऽचि विभक्तौ	319
92.	तृतीयादिषु	320
93.	अस्थिदधि	321
94.	एच इक्	325
95.	ग्रामणिकुलम्, ग्रामणिपुत्रः	327

महामहोपाध्याय नागेशभट्टविरचितः

लघुशब्देन्दुशेखरः

(अजन्तभागः - भावबोधिनी-बालबोधिनीव्याख्याद्वयोपेतः)

अजन्तपुँल्लिङ्गप्रकरणम्

स्वादिविधौ प्रातिपदिकधिकारात्तां सञ्ज्ञामाह - अर्थवदिति । अधातुरित्यादिः पर्युदासो लाघवात् । प्रत्ययान्तमिति । आवर्तितेऽप्रत्ययपदे प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम् । 'सञ्ज्ञाविधा' विति निषेधस्तु प्रत्ययस्य यत्र सञ्ज्ञा तद्विषय इति भावः।

भावबोधिनी : अर्थवदधातुः । स्वादिसन्धौ निरूपिते उपस्थितस्य प्रातिपदिकत्व-स्योपक्षानर्हत्वरूपप्रसङ्गसङ्गतिः प्रातिपदिकसंज्ञानिरूपणे इति सूचयति स्वादिविधाविति। तां संज्ञामिति । तत्संज्ञाप्रतिपादकसूत्रमित्यर्थः । अत एवार्थवदित्यनेनाभेदोपपत्तिः । एतेन संज्ञायाः पाणिनिनोक्तेरिदमसङ्गतमित्यपास्तम् । वस्तुतस्तु संज्ञाप्रतिपादक-शब्दोच्चारणस्य दीक्षितेऽपि संभवात् यथाश्रुतमेव साध्वित्यन्ये । तन्न । अत्र पक्षेऽपि संज्ञामित्यस्य तत्प्रतिपादकशब्दे लक्षणाया आवश्यकत्वेनाविशेषात् । यद्यपि ङ्याप्प्रातिपदिकाधिकारादिति वक्तव्यं तथापि तयोरन्यार्थतया वक्ष्यमाणत्वात् प्रातिपदिकमात्रोपादानमिति बोध्यम् । तद्विधावपि प्रातिपदिकाधिकाराच्च । इत्यादिरिति। आदिना प्रत्यय इत्यस्य परिग्रहः । आवर्तित इति । तत्सौकर्यायैव नञ्द्वयोपादानम् । अन्यथा अर्थवदधातुप्रत्यय इत्येव वदेदिति भावः । आवृत्तिश्च पररीत्या, स्वमते प्रत्ययपर्युदासाभावादिति बोध्यम् । प्रत्ययस्य यत्र संज्ञेति । नन्वेवं षः प्रत्ययस्येत्यत्र निषेधाप्राप्त्या तदन्तविधिना षट् खण्डयतीत्यादेरेव षस्येत्वं स्यात् । किञ्च तद्धितश्चासर्वविभक्तिरित्यत्र केवलस्य संज्ञायां प्रयोजनाभावेन तद्धितपदे तदन्तविधिना तदन्तस्य संज्ञेति निषेधाप्राप्त्या विभक्तिपदे तदन्तविध्यापत्तिः । प्रत्यासत्त्या यस्य प्रत्ययस्य यत्र संज्ञा तस्यैव संज्ञोद्देश्यभूतस्य तदन्तपरत्वनिषेधप्रवृत्तेश्च । एवमेव कृदतिङित्यत्र तिङ्पदे तदन्तविध्यापत्तेश्च । तस्मात् यथाश्रुत एवार्थो वाच्यः । प्रकृते तु आवृत्तिसामर्थ्यादेव न तदन्तविधिनिषेध इति वक्तुं युक्तमिति चेन्न । प्रत्ययस्य प्रत्ययावयवस्य वा यत्र संज्ञेत्यर्थाङ्गीकारेणादोषात् । द्वितीये सर्वपदसामर्थ्यादेव न तदन्तविधिः । तद्धि सर्वविभक्त्यन्तभिन्न इत्यर्थसम्पादकं सत् प्राग्दिशीयविभक्त्यन्तानां

यत्र तत्रेत्यादीनामव्ययत्ववारकमिति वाच्यम् । सामान्यभेदविवक्षया अविभक्तिपदेनैव तद्वारणसंभवेन तद्वैयर्थ्यात् । कृदतिङ् इत्यस्य त्वधिकारत्वेन कृत्प्रदेशेऽतिङ एव कृत्संज्ञाप्राप्त्या तस्यैव तन्निषेधस्य कर्तव्यतया न तदन्तविधिरित्याशयात् । यद्यपि व्यतिसे इत्यत्र से इति तिङन्तस्य थासस्से इत्यनेनैकवाक्यतया प्राप्तिरस्ति तथापि तस्य कृत्संज्ञायां दोषाभावेन तदर्थं तदन्तविधिरनपेक्षित इति बोध्यम् ।

बालबोधिनी : स्वादिसन्धिमुक्त्वा तत आदौ प्रातिपदिकसंज्ञाकल्पने स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गसङ्गतिं ध्वनयितुमाह स्वादिविधाविति । तां संज्ञामिति । यद्यनेन प्रातिपदिकसंज्ञा गृह्यते तर्हि तदुत्तरमुपात्तेनार्थवदित्यनेनाभेदान्वयो न स्यात् । अतः संज्ञामित्यस्य तत्प्रतिपादकसूत्रे लक्षणा वक्तव्या । प्रातिपदिकसंज्ञाविधायकं सूत्रमित्यर्थः । न च ङ्याप्प्रातिपदिकादिति स्वादिविधावधिकृते सूत्रे ङ्यापोः प्राथम्यात् सूचीकटाहन्यायाच्च स्त्रीप्रत्ययप्रकरणमेवादौ निरूपणीयमिति वाच्यम् । भाष्ये ङ्याब्ग्रहणस्यान्यथासिद्धिं कृत्वा प्रत्याख्यानात्, तद्विधावपि प्रातिपदिकाधिकाराच्च प्रथमं तां संज्ञामाहेति भावः । इत्यादिरिति । आदिनाऽप्रत्यय इत्यस्य संग्रहः । पर्युदास इति । पर्युदासस्तु स विज्ञेयो यत्रोत्तरपदेन नञ् इति तत्स्वरूपम् । लाघवादिति । प्रसज्यप्रतिषेधे अध्याहृतक्रियायां नञोऽन्वयात् वाक्यभेदः, असमर्थसमासकल्पना च स्यादिति गौरवम् । पर्युदासे तु तदुभयानाश्रयणप्रयुक्तलाघवमस्तीति भावः । नञ आरोपितत्वार्थकत्वेनाधातुरित्यस्य आरोपितो धातुरिति वाच्यार्थः । धातुभिन्न इति फलितार्थः । अप्रत्यय इत्यनेन प्रत्ययभिन्नं प्रत्ययान्तभिन्नञ्चेति अर्थद्वयलाभप्रकारमाह आवर्तित इति। अप्रत्ययपदमावर्त्यते। तत्र प्रथमाप्रत्ययपदैकदेशप्रत्ययांशे प्रत्ययग्रहणपरिभाषया तदन्तविधिः । ननु संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति परिभाषया संज्ञाविधौ तदन्तविधिनिषेधात् प्रकृते प्रातिपदिकसंज्ञाविधौ कथं तदन्तविधिरित्यत आह संज्ञाविधाविति। प्रत्ययस्येति । संज्ञाविधौ प्रत्ययग्रहणे इत्युक्तत्वेन धर्मिग्राहकमानात् प्रत्ययत्वेन प्रत्ययस्य यत्र संज्ञा तद्विषये एवैतत्परिभाषाप्रवृत्तिरिति प्रकृते प्रातिपदिकसंज्ञाया अर्थवदुद्देश्यकत्वेन प्रत्ययोद्देश्यकत्वाभावेन न तन्निषेधप्रवृत्तिरिति भावः । ननु प्रत्ययोद्देश्यकसंज्ञाविधावेव तदन्तविधिनिषेधकपरिभाषाप्रवृत्तिस्वीकारे प्रत्ययादेः षकारस्येत्वविधायकस्य 'षः प्रत्ययस्य' इत्यस्य प्रत्ययोद्देश्यकत्वाभावेन निषेधाप्राप्त्या तदन्तविधौ षट् इत्यादौ प्रत्ययान्तस्यादेरित्वापत्तिः। एवमेव कृदतिङ् इत्यत्रापि तदन्तविधिनिषेधाप्रवृत्तौ तिङ्पदे तदन्तविध्यापत्तिः । एवं तद्धितश्चासर्वविभक्तिरित्यत्रापि निषेधाप्रवृत्तौ विभक्तिपदे तदन्तविध्यापत्तिरिति यत्र संज्ञेति मूलमयुक्तमिति चेन्न । आद्ये षः

प्रत्ययस्येत्यत्रोपदेशपदानुवृत्त्या प्रत्ययान्ते उपदिश्यमानत्वासम्भवेन न तत्र तदन्तविधिः । कृदतिङ् इति सूत्रे धातोरित्यधिक्रियते । धातुविहिततिङ्भिन्नप्रत्ययस्य कृत्संज्ञेति तदर्थः । यदि तत्र तदन्तविधिः स्यात्तर्हि तिङन्तस्य धातोर्विहितत्वाभावेन कृत्संज्ञाया प्राप्त्यभावेन तद्वारणाय कृतमतिङ्ग्रहणं व्यर्थं स्यादिति द्वितीयस्थले न दोषः। तृतीयस्थले असर्वेति सर्वपदसामर्थ्यादेव असर्वविभक्तिरित्येतद्घटकविभक्तिपदे न तदन्तविधिः । अन्यथा अवयवकात्स्नर्यबोधकसर्वपदविशेषणवैयर्थ्यापत्तेः । केवलप्रत्ययस्य संज्ञायां प्रयोजनाभावेन संज्ञाविधावपि तद्धितपदे तदन्तलाभ इति बोध्यम् । प्रत्ययस्य यत्र संज्ञेति ग्रन्थव्याख्याने 'अन्ये तु कृदतिङ्, षः प्रत्ययस्य, तद्धितश्चासर्वविभक्तिरित्यादावपि निषेधप्रवृत्ते-रिष्टत्वेनायुक्तमेतदिति विषमपदविवृतिकाराः ।

अत्र सूत्रे उत्तरसूत्रे चार्थवत्त्वम् एतत्सञ्ज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वम् । अन्यथाऽधातुरिति पर्युदासेन व्याख्यानादर्थवत्त्वेनैव सादृश्यग्रहणेन सिद्धेरुत्तरसूत्रे कृदादीनामनर्थकानामप्रसिद्धेस्तद्वैयर्थ्यं स्यात्।

भावबोधिनी : ननु पूर्वोत्तरसूत्रयोः एकरूपार्थवत्वलाभाय प्रत्ययपर्युदासस्य चाकर्तव्यत्वलाभाय चार्थवत्त्वं परिष्करोति एतत्संज्ञाफलभूतेति । फलीभूतेति क्वाचित्कोऽपपाठः च्वेः संभवाभावात् । ओदनं पचतीत्यादावेव ओदनं पचेति समुदायस्यार्थवत्त्वेन प्रातिपदिकत्ववारणायैतत्संज्ञाफलभूतेति । तस्य तिङपेक्षयैवार्थ-बोधकत्वात् । न चैतत्संज्ञाफलभूतविभक्तिसमभिव्याहारापेक्षयेति विवक्षणान्नोक्तदोष इति वाच्यम् । दधिमध्वित्यादावव्याप्तेः । तद्वारणायेतरसमभिव्याहारानपेक्षयेति नञ्द्वयप्रवेशस्यावश्यकत्वात् । न च सुबितरसमभिव्याहारानपेक्षयेति निवेशेन ओदनं पचेत्यत्र दोषाभावेनैतत्संज्ञेति व्यर्थमेवेति वाच्यम् । राज्ञः पुरुष इत्यादौ पुरुषान्तस्य प्रातिपदिकत्वापत्तेः । न च समासग्रहणकृतनियमेन व्यावृत्तिः । समासभिन्नस्य स्वातन्त्र्येण प्रयोगार्हपूर्वोत्तरभागघटितसमुदायस्यैव तेन व्यावृत्तेः । अत्र पुरुषेत्यस्य स्वातन्त्र्येण प्रयोगानर्हत्वात् । एतेन एतत्संज्ञेति व्यर्थं शब्दरत्ने अदर्शनादित्यपास्तम् । प्रयोजनानुरोधेन तत्र तस्य पूरणीयत्वात् । केवलस्य प्रत्ययस्य शास्त्रे शास्त्रकल्पि-तार्थोपस्थापकत्वात् प्रातिपदिकत्ववारणाय लोक इति । पौरुषेयप्रयोग इत्यर्थः । अत्र बोधशब्द उपस्थितिपरः, न शाब्दबोधपरः, क्रियां विना तदसम्भवेनासम्भवापत्तेः ।

न च प्रत्ययेनार्थोपस्थितौ प्रकृतिसमभिव्याहारस्य कारणत्वे मानाभावेन तत्राव्याप्तिः तदवस्थैवेति वाच्यम् । स्वस्वार्थोपस्थितिं प्रति स्वस्वप्रयोगप्रयोजकयोः

प्रकृतिप्रत्यययोः कारणत्वे अन्वयव्यतिरेकस्यैव मानत्वात् । नन्वेवंविधार्थवद्ग्रहणे खट्वशब्दस्य संज्ञानापत्तिः, विभक्तीतरटाबपेक्षयैवार्थबोधकत्वात् । न च टाब्विधानं व्यर्थम् । अनियतलिङ्गे अश्वादौ चारितार्थ्यात् । विभक्तीतरवाचकविवक्षणेऽपि इन्दाश्चकारेत्यादौ इन्दामित्यस्य संज्ञानापत्तिः । चकारेत्येतदपेक्षयैव लोकेऽर्थबोधकत्वात्। यदि विभक्तीतरो वाचकः प्रत्ययो विवक्ष्यते तदा पञ्चनावप्रिय इत्यादौ पञ्चनावेत्यस्य संज्ञापत्तिः । प्रियशब्दापेक्षया तस्यार्थबोधकत्वेऽपि प्रियस्याप्रत्ययत्वात् प्रत्ययेऽतिव्याप्तिश्च । यदि च विभक्तीतरः स्वगतवृत्त्याश्रयो विवक्ष्यते तदा प्रियशब्दस्य स्वगतसमासवृत्त्याश्रयत्वेन दोषाभावेऽपि हरिष्वित्यादौ प्रत्ययस्य संज्ञापत्तिर्दुर्वारा । प्रकृत्यपेक्षया तस्यार्थबोधकत्वेऽपि प्रकृतेः स्वगतवृत्त्याश्रयत्वाभावात् । न चात्र स्वशब्देन गृह्यमाणे प्रत्यये न कापि वृत्तिः प्रसिद्धेति वाच्यम् । समभिव्याहारानपेक्षत्वस्य समभिव्याहारापेक्षत्वाभावरूपस्य विशिष्टाभाववत् स्वगतवृत्त्याश्रयत्वरूपविशेषणाभावेन सुलभत्वात् । एवं हारिद्रविण इत्यत्र णिनन्तेऽतिव्याप्तिश्च । तस्य स्वगततद्धितवृत्त्याश्रयाध्येत्रणपेक्षयैवार्थबोधकत्वात् । यदि तु वृत्तिपदं परित्यज्य विभक्तीतरस्वगतसंज्ञाश्रय इति विवक्ष्यते तदा हरिष्वित्यादौ प्रकृतेः स्वगतपदसंज्ञाश्रयत्वेन हारिद्रविण इत्यादौ णिनन्ते कस्यापि संज्ञाया अभावेनोक्तरीत्या विशिष्टाभावमादाय दोषद्वयाभावेऽपि पञ्चनावप्रिय इत्यत्र प्रियशब्दस्य स्वगतसंज्ञाश्रयत्वेन दोषाभावेऽपि, एवं कुम्भकारेत्यत्र कुम्भेत्यस्य स्वगतसमाससंज्ञाश्रयत्वेन कारेत्यस्य प्रातिपदिकत्वाभावेन शेखरग्रन्थानुकूल्येऽपि तथा द्रष्टुं याति, भुक्त्वा व्रजतीत्यादौ यातीत्यादेः स्वनिष्ठसंज्ञाश्रयत्वाभावेन द्रष्टुमित्यादेः प्रातिपदिकत्वे सिद्धेऽपि स्नात्वा कालक इत्यादौ स्नात्वेत्यादेः प्रातिपदिकत्वानापत्तिः । तस्य स्वगतसमाससंज्ञाश्रय-कालकाद्यपेक्षयैवार्थबोधकत्वात् । एवं प्राच्छर्क इत्यादौ प्रादेः प्रातिपदिकत्वानापत्तिः । तस्य स्वगतसमाससंज्ञाश्रय ऋच्छकाद्यपेक्षयैवार्थबोधकत्वादिति चेन्न । समासार्थं स्नात्वेत्यादेः सुबन्तस्यावश्यकत्वेन ततः पूर्वमेव प्रातिपदिकसंज्ञाप्रवृत्तेः । तस्याश्च दशायां कालकादेः स्वगतसंज्ञानाश्रयत्वात् । एवमेव मूलकेनोपदंशमित्यदौ उपदंशमित्यादेः प्रातिपदिकत्वं बोध्यम् । मूलकेनेत्यादेः समाससंज्ञातः पूर्वं स्वगतसंज्ञानाश्रयत्वात् । ननूत्तरसूत्रेऽप्येवंविधार्थवत्वस्यैव वक्तव्यतया तद्धितान्तसमासयोः प्रातिपदिकत्वानापत्तिः। अलौकिकप्रक्रियावाक्य एव प्रातिपदिकत्वस्य वक्तव्यतया तस्य लोके सर्वार्थबोधकत्वाभावादिति चेन्न । अलौकिकप्रक्रियावाक्ये स्वप्रकृतिकपरिनिष्ठितनिष्ठेदृशार्थवत्त्वमारोप्य प्रातिपदिकत्वं निर्वाह्यमित्याशयात् । अत्रान्योऽपि प्रकारो ग्रन्थान्तरादौ बोध्यः । अत्रेदं

चिन्त्यम् । ओदनं पचति राज्ञः पुरुष इत्यादौ ओदनं पचादेः निरुक्तार्थवत्त्वव्यावृत्तये एतत्संज्ञेति विशेषणमित्युक्तम् । दत्तेऽपि तस्मिन् विशेषणे स्वगतसंज्ञाया अप्रसिद्ध्या उक्तरीत्या विशिष्टाभावमादाय निरुक्तार्थवत्त्वप्राप्त्या विशेषणं व्यर्थमेवेति प्रातिपदिकत्वं दुर्वारमिति च ।

नन्वेवमपि गोचेत्यत्र 'अच्' इत्यस्यार्थवत्त्वानापत्तिः । गो इत्यस्य स्ववृत्तिसमाससंज्ञाश्रयत्वात् । ततश्चाप्रातिपदिकत्वेनासुबन्ततयाऽपदत्वेन परपदस्थाजादेशाभावेन न पदान्तनिषेधाप्रवृत्त्या अल्लोपस्य स्थानिवत्त्वेनावादेशापत्तिरिति चेन्न । गतिकारकोपपदानामित्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समास इति न पदान्तसूत्रशेखरोक्तेः समासार्थं तस्य सुबन्तत्वावश्यकतया ततः पूर्वमेव प्रातिपदिकत्वप्रवृत्तेः । तस्यां दशायां गो इत्यस्य स्वगतसंज्ञानाश्रयत्वेन निरुक्तार्थवत्त्वस्य सूपपादत्वात् । न चोत्तरपदत्वे चेति निषेधः शङ्क्यः । उत्तरपदस्याजित्यस्यावादेशं प्रति कार्यित्वाभावात् । न चैवमपि पञ्चकिशोरीप्रिय इत्यत्र पञ्चकिशोरीत्यस्य गोस्त्रियोरिति ह्रस्वापादनपरभाष्यासङ्गतिः । पञ्चनावप्रिय इत्यत्रेव निरुक्तार्थवत्त्वाभावेनाप्राति–पदिकत्वादिति वाच्यम् । संज्ञात्वे दिक्संख्येति, तदभावे व्यक्तीकरणार्थात् पञ्चेरचि टापि पञ्चा । सा च सा किशोरीति विशेषणं विशेष्येणेति समासानन्तरमेव तत्र बहुव्रीह्यङ्गीकारेण ततः पूर्वमेव विशेषणसमासप्रयुक्तप्रातिपदिकत्वप्रवृत्तेः । युक्तञ्चैतत् । अन्यथा बहुपदबहुव्रीहिणा उत्तरपदद्विग्वङ्गीकारे प्रत्येकं शास्त्रीयोपसर्जनत्वेऽपि पञ्चकिशोरीति समुदायस्य तदभावेन तस्य ह्रस्वापादकपरं भाष्यमसङ्गतं स्यात् । तत्र शास्त्रीयोपसर्जनत्वनिवेशादेवाचारक्विबन्तादिप्रकृतिककर्तृक्विबन्तकुमारीशब्देन ह्रस्वः समासरूपप्रातिपदिकस्येति निवेशात् तद्वारणे तु तथाविधपरमकुमारीशब्दे फलं बोध्यम्। तथा यस्य प्रातिपदिकस्य ह्रस्वः चिकीर्ष्यते तदर्थं प्रति लौकिकोपसर्जनत्वस्यापि निवेशात् न पञ्चकिशोरीप्रिय इत्यादौ ह्रस्व इति ज्ञेयम् । अन्यथा पारिभाषिकार्थवत्त्वाग्रहणे। तद्वैयर्थ्यम् अर्थवत्पदवैयर्थ्यम् ।

बालबोधिनी : प्रातिपदिकसंज्ञाविधायकसूत्रद्वये ऐक्यसम्पादनायार्थवत्त्वं परिष्कर्तुमाह अत्र सूत्रेति । अर्थवत्सूत्र इत्यर्थः । उत्तरसूत्रे = कृत्तद्धितसूत्रे । पारिष्कृतमर्थवत्त्वमाह एतत्संज्ञेति । पारिष्कृतस्य स्वीकारेण प्रत्ययपर्युदासस्यावश्यकता नास्तीत्यग्रे स्पष्टं भवति। एतत्संज्ञाफलभूतेति । प्रातिपदिकसंज्ञाफलभूतेत्यर्थः । च्वेरसम्भवात् फलीभूतेत्यपपाठः। वास्तविकाभूतस्यारोपतितद्भावे एव च्विरिति बोध्यम् । चिकीर्षितप्रातिपदिकसंज्ञासाध्या

या विभक्तिरिति फलितार्थः । यथा डित्थादीनां प्रातिपदिकसंज्ञासाध्यविभक्तीतरानपेक्षया अर्थबोधजनकत्वेनार्थवत्त्वात् प्रातिपदिकत्वं सिध्यति । एतत्संज्ञाफलभूतेति विभक्तिविशेषणेन तिङः तद्धितविभक्तेश्च व्यावृत्तिः । अन्यथा देवदत्तः पचति, देवदत्तो गार्ग्य इत्यादौ देवदत्तः पचेति समुदायस्य, देवदत्तो गार्ग्य इति समुदायस्य च तिङ्तद्धितविभक्तीतरसमभिव्याहारानपेक्षयैवार्थबोधकत्वेनार्थवत्त्वात् प्रातिपदिकत्वापत्तिः। दत्ते च तद्विशेषणे तयोः प्रातिपदिकसंज्ञासाध्यत्वाभावेन, एतत्संज्ञाफलभूतविभक्तीतरत्वेन तदपेक्षयैवार्थबोधकत्वान्न दोषः ।

नन्वेतत्संज्ञाफलकविभक्तिसमभिव्याहारापेक्षयाऽर्थबोधजनकत्वमित्येवास्तु लाघवात् । कुतो नञ्द्वयप्रवेश इति चेन्न । दधि मधु लिडित्यादौ विभक्त्यनपेक्षत्वेन प्रातिपदिकत्वानापत्त्याऽव्याप्तिः स्यात् । तद्वारणाय नञ्द्वयघटितं लक्षणमुक्तम् । लोके इत्यनेन प्रसिद्धिसूचकेन कल्पितत्वव्यावृत्तिः । अन्यथा प्रत्ययानां शास्त्रकल्पितार्थवत्त्वेन प्रकृत्यनपेक्षयाऽर्थबोधजनकत्वात् प्रातिपदिकत्वापत्तिः । तन्निवेशे च लोके तस्य तथाऽर्थबोधाजनकत्वान्न दोषः ।

नन्वेवंविधार्थवत्त्वस्वीकारे खट्वा, गौरी, रमेत्यादौ टाप्प्रत्ययप्रकृतेः खट्व, गौर, रमेत्यादेः चिकीर्षितप्रातिपदिकसंज्ञाफलभूतविभक्तीतरटाप्ङीबादिसमभिव्याहारापेक्षयैवार्थ-बोधजनकत्वात् प्रातिपदिकत्वानापत्तिः । एधाञ्चक्रे इत्यादावामन्तस्य एधामित्यस्य चक्रेपदसमभिव्याहारापेक्षयैवार्थबोधजनकत्वादर्थवत्त्वाभावेन प्रातिपदिकत्वं न स्यात् । तथा सति ततस्सुबनुत्पत्त्या पदत्वाभावेन तिङ्ङतिङ इति निघातानापत्तिः, वा पदान्तस्येति परसवर्णानापत्तिश्च ।

किञ्च मूलकेनोपदंशमित्यादौ सोपपदके, उपदंशमिति णमुलन्तस्य मूलकेनेत्युप-पदसमभिव्याहारापेक्षयैवार्थबोधकत्वेनार्थवत्त्वानापत्तिः । तृतीयान्ते करणे उपपदे उपपूर्वकदंशेः 'उपदंशस्तृतीयायाम्' इति णमुल् । उपदंशस्तृतीयायामित्यादीन्युपपदानि अमन्तेनाव्ययेन सह वा समस्यन्ते इत्यर्थकेन 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति सूत्रेण वा समासे मूलकोपदंशमिति भवति । तदभावे मूलकेनोपदंशमिति व्यस्तं रूपम् । अत्र प्रागुक्तरीत्या णमुलन्तस्यार्थवत्त्वाभावे प्रातिपदिकत्वानापत्तौ सुबनुत्पत्त्या पदत्वाभावेनापदं न प्रयुञ्जीतेति तस्य प्रयोगानापत्तिः ।

पक्त्रिममित्यादौ 'पक्त्रि' इत्यस्य प्रातिपदिकसंज्ञाफलभूतविभक्तीतरमबपेक्षयैवार्थ-बोधकत्वेनार्थवत्त्वं न स्यात् । एवं सांकूटिनमित्यत्र संकूटिन् इत्यस्य

विभक्तीतराणपेक्षयार्थबोधकत्वेनार्थवत्त्वानापत्तिः । निभसङ्काशादीनामुत्तरपद एव प्रयुज्यमानानां पूर्वपदापेक्षत्वेन, उपसर्गाणां धात्वपेक्षत्वेनाव्याप्तिरिति चेन्न । लक्षणघटकविभक्तिपदं प्रत्ययमात्रोपलक्षणम् । प्रातिपदिकसंज्ञाप्रयोज्यप्रत्ययेतरसमभि-व्याहारानपेक्षया लोकेऽर्थबोधजनकत्वमर्थवत्त्वम् । तदितरश्च प्रत्ययप्रकृत्येतदन्यतरं ग्राह्यम् । खट्वा गौरीत्यादौ खट्वादीनां टाबपेक्षयार्थबोधजनकत्वेऽपि तस्य टापः प्रातिपदिक-संज्ञाप्रयोज्यप्रत्ययत्वेन तदितरप्रत्ययत्वाभावात् तदपेक्षायामपि नार्थवत्त्वहानिः । एवमेधाश्चक्रे, मूलकेनोपदंशमित्यादौ चक्रे इत्यादीनां प्रातिपदिकसंज्ञाप्रयोज्य-प्रत्ययेतरप्रत्ययत्वाभावात् तदपेक्षायामपि नाव्याप्तिः । केवलप्रत्ययस्यार्थवत्त्ववारणाय प्रकृतिपदनिवेशः । देवदत्तो गार्ग्य इत्यत्र देवदत्तो गार्ग्य इत्येतन्निष्ठचिकीर्षितप्राति-पदिकसंज्ञाप्रयोज्यप्रत्ययेतरगार्ग्यशब्दोत्तरसुबपेक्षयाऽर्थबोधकत्वेन न यञन्तस्य प्रातिपदिक-त्वापत्तिः । अधिकं तावत् सदाशिवभट्टीय-विषमपदविवृत्ति-गुरुप्रसादादिभ्यो ग्राह्यमित्यलम् ।

पारिष्कृतार्थवत्त्वस्वीकारे मानमाह अन्यथेति । पारिष्कृतार्थवत्त्वानङ्गीकार इत्यर्थः। व्याख्यानादिति । बहुलक्ष्यसंस्कारानुरोधमूलकादित्यर्थः । अधातुरिति प्रत्ययान्त-पर्युदासस्याप्युपलक्षणम् । न तु प्रत्ययपर्युदासस्य । विकरणादीनामनर्थकप्रत्ययानां दर्शनात्। सिद्धेः = अनर्थकव्यावृत्तिसिद्धेः । तेनार्थवत्त्वं फलितम् । न केवलमाद्यसूत्रे एवानर्थकव्यावृत्तिसिद्धिः किन्तु कृत्तद्धितसूत्रेऽपीत्याह उत्तरसूत्रे इति । तद्वैयर्थ्यम् = अर्थवत्पदवैयर्थ्यम् । अयं भावः । पारिष्कृतार्थवत्त्वानङ्गीकारे अर्थवत्सूत्रे कृत्तद्धितसूत्रे च प्रकारान्तरेणानर्थकव्यावृत्तिसिद्ध्या अर्थवद्ग्रहणं व्यर्थं स्यात् । तथाहि - अधातुरिति धातुभिन्नो धातुसदृश इति पर्युदासेन व्याख्यायते । सादृश्यञ्चार्थवत्त्वेनैव तेनैवानर्थकव्यावृत्तिसिद्धौ तदर्थं कृतमर्थवद्ग्रहणं व्यर्थं स्यात् । एवं कृत्तद्धितसूत्रेऽपि कृदादीनामनर्थकानामप्रसिद्ध्या न तद्व्यावृत्त्यर्थमपि अर्थवद्ग्रहणमावश्यकमिति तद्वैयर्थ्यं स्पष्टमेवेति तत्सार्थक्याय पारिष्कृतमर्थवत्त्वं स्वीकार्यम् । तथा चार्थवद्ग्रहण-सामर्थ्यादुक्तार्थलाभ इति तात्पर्यम् ।

न च नञिवयुक्तन्यायानित्यत्वज्ञापनार्थं तत्, तदनित्यत्वज्ञापने भाष्यसम्मतदृढतर-फलाभावात् । 'अहन्' 'काण्डे' इत्यादावेतत्साध्यविभक्त्यनपेक्षत्वेऽपि तदितरानपेक्षत्वम-स्त्येवेति तत्पर्युदासः सार्थकः । न च तत्केवलप्रत्ययस्य । तदुक्तं - 'सङ्ख्याया अतिशदन्ताया' इति सूत्रे भाष्ये- 'न हि लोके केवलेन प्रत्ययेनार्थो गम्यते, केन तर्हि ? सप्रकृतिकेने'ति । हरिरप्याह-

'धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते।
कृत्तद्धितानामर्थश्च केवलानामलौकिकः॥
प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते ।' इति

अत एव पदसञ्ज्ञासूत्रेऽन्तग्रहणस्य **सञ्ज्ञाविधौ तदन्तविध्यभावज्ञापकत्वे 'कृत्तद्धितेति सूत्रेऽन्तग्रहणं कर्त्तव्यं? न कर्त्तव्यम् - अर्थवदिति वर्त्तते, कृत्तद्धितान्तश्चैवार्थवत्, न केवलाः कृतस्तद्धिता वा' इति भाष्यमुपादाय- 'शास्त्रीयार्थग्रहणेऽर्थवद्ग्रहणानुवृत्तिवैयर्थ्येन तदनुवृत्तिसामर्थ्याल्लौकिकार्थप्रत्यासन्नोऽभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते स आश्रीयते' इति कैयटेनोक्तम् । 'लौकिकं यत्पदं तदर्थस्य प्रत्यासन्नः शास्त्रकृत्कल्पितस्वादिप्रकृतेरर्थः प्रत्ययान्तेषु= सुबन्तेषु योऽभिव्यक्ततरो लक्ष्यते बोद्धृभिः स' इत्यन्वयः।**

भावबोधिनी : सार्थक्यमाशङ्क्य निषेधति न चेति । अनित्यत्वेति । तत्फलं तु वेः स्कन्देरनिष्ठायामित्यस्य तिङन्तेऽपि प्रवृत्तिः । न्यायप्रवृत्तौ तु कृत्स्वेव स्यादिति तद्भावः। भाष्यसम्मतेति । कृत्स्वेव तत्प्रवृत्तेः भाष्योक्तत्वादिति भावः । न चानित्यत्वा- देवानल्वधावित्यादौ न्यायाप्रवृत्तिरिति वाच्यम् । नञुपादानस्थले प्रसज्यप्रतिषेधोऽयमित्यभियुक्तवचनेनैव पक्षद्वयाश्रयणस्य वैवक्षिकत्वोक्तेः । तदाह दृढतरेति । अनन्यथासिद्धेत्यर्थः । नन्वेतत्संज्ञाफलभूतविभक्त्यपेक्षयैवास्तु किं नञ्द्वयप्रवेशेनेत्यत आह अहन्निति । तत्पर्युदासः धातुप्रत्ययान्तपर्युदासः । अयमेव नञ्द्वयप्रवेशे ज्ञापकमिति भावः । फलन्तु दधि मध्वित्यादौ प्रागेवोक्तम् । न चेति । न हीत्यर्थः । तत् निरुक्तार्थवत्त्वम् । यद्यपि इः, इयान्, व्यतिसे इत्यादौ केवलप्रत्ययस्याप्युक्तार्थवत्वमस्ति तथापि आद्ययोः तद्धितान्तत्वेन प्रातिपदिकत्वमिष्टम्। अन्त्ये तु प्रत्ययान्तपर्युदासेन व्यावर्त्यस्य केवलस्य प्रत्ययस्याप्युक्तार्थवत्त्वमस्ति तथापि आद्ययोस्तद्धितान्तत्वेन प्रातिपदिकत्वमिष्टम् अन्त्ये तु प्रत्ययान्तपर्युदासेन व्यावर्त्यम्। तथा च प्रातिपदिकत्वालक्ष्यस्य प्रत्ययान्तपर्युदासव्यावर्त्यस्य केवलस्य प्रत्ययस्येदृशार्थवत्त्वं नेति तात्पर्यम् । तत् = ईदृशार्थवत्त्वाभावरूपं प्रमेयम् । विशुद्धानां प्रत्ययरहितानां, केवलानां प्रत्ययसमभिव्याहृतानाम् । अलौकिकः लोके प्रतीयमानो नेत्यर्थः । विभक्तेः विभक्त्युत्पत्तेः प्रागित्यर्थः । तदन्तस्य कृत्तद्धितान्तस्य । तथैवार्थः= लौकिकार्थः । अत एव = सूत्रद्वयेऽपि ईदृशार्थवत्त्वस्याभिमतत्वादेव । पदसंज्ञासूत्रे = सुप्तिङन्तसूत्रे । वैयर्थ्येनेति । तादृशार्थस्याव्यभिचरितत्वादिति भावः । लौकिकार्थेति। विभक्त्यन्तार्थो लौकिकः इतरनैरपेक्ष्येण लोके प्रतीयमानत्वात् । कृत्तद्धितान्तार्थस्तु

विभक्तिमात्रापेक्षया प्रतीयमानत्वात् लौकिकार्थप्रत्यासन्नः । कृत्तद्धितार्थस्तु स्वप्रकृतिविभक्त्युभयापेक्षया प्रतीयमानत्वात् विप्रकृष्ट इति बोध्यम् ।

बालबोधिनी : अर्थवद्ग्रहणस्यात्र सूत्रे एव साफल्यमाशङ्कते न चेति । नञिवयुक्तेति । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिरिति न्यायः । नञ्युक्तमिवयुक्तं वा यद्वर्तते तत्र तस्माद् भिन्ने तत्सदृशेऽधिकरणे = द्रव्ये कार्यं विज्ञायते । हि यतः तथार्थावगतिरस्ति । न ह्यब्राह्मणमानयेत्युक्ते लोष्ठमानीय कृती भवतीत्यर्थः । तत् = अर्थवत्पदम् । नञिवयुक्तन्यायस्यानित्यत्वज्ञापनेनैवार्थवद्ग्रहणस्य सार्थक्यात् पारिष्कृतार्थवत्त्वस्वीकारे तद्ग्रहणमकिञ्चित्करमिति वक्तुं न शक्यते । तदनित्यत्वज्ञापने फलाभावात् । ननु नञिवयुक्तन्यायस्यानित्यत्वज्ञापनेन क्वचित् सादृश्यानाश्रयणपूर्वकं भेदमात्रमाश्रीयते । तथा च अनचीत्यस्य अज्भिन्ने इत्यर्थस्वीकारेण पर्युदासेनैवावसानेऽपि द्वित्वसिद्धौ गुरुभूतप्रसज्यप्रतिषेधो नाश्रयणीय इति फलमस्त्येव । एवं तदनित्यत्वफलं वेः स्कन्देरनिष्ठायाम् इत्यनेन विहितषत्वस्य तिङन्तेष्वपि प्रवृत्तिः । अन्यथा निष्ठासदृशेषु कृत्स्वेव प्रवृत्तिः स्यादिति यत्किञ्चित् फलमस्त्येवेति तदभावोक्तिरयुक्तेत्यत आह भाष्येति । अनचि चेत्यवसाने द्वित्वसिद्धये तथाऽन्यत्र च भाष्ये प्रसज्यप्रतिषेध एवाश्रितः नत्वेतदनित्यत्वमिति भावः ।

नन्वेतत्संज्ञाफलभूतविभक्त्यपेक्षयाऽर्थबोधजनकत्वमर्थवत्त्वमित्येवास्तु । तेनैवेष्टसिद्धौ नञ इतरपदस्य (नञ्द्वयस्य) चोपादानं व्यर्थमित्यत आह अहन्निति । एतत्साध्येति । प्रातिपदिकसंज्ञासाध्येत्यर्थः । तदितरेति । विभक्तीतरेत्यर्थः । तत्पर्युदासः= धातुप्रत्ययान्तपर्युदासः । अयं भावः । हन्धातोः लङि प्रथमपुरुषैकवचने हल्ङ्याबिति तिपो लोपे अहन् इति । तस्य प्रातिपदिकसंज्ञावारणाय अधातुरिति धातुपर्युदासः कृतः । एवं काण्डे इत्यादिप्रत्ययान्तस्य प्रातिपदिकत्ववारणाय प्रत्ययान्तपर्युदासः । यदि नञ्द्वयं परित्यज्य प्रातिपदिकसंज्ञाफलभूतविभक्त्यपेक्षया लोकेऽर्थबोधजनकत्वमर्थवत्त्वमिति परिष्क्रियते तर्हि अहन्, काण्डे इत्यादीनां प्रातिपदिकसंज्ञाफलभूतविभक्त्यनपेक्षयैवार्थबोधकत्वेन तदपेक्षाया अभावात् पारिष्कृतार्थवत्त्वाभावेनैव प्रातिपदिकसंज्ञाया व्यावृत्तिसम्भवे तदर्थं कृतं धातुप्रत्ययान्तपर्युदासद्वयं व्यर्थं स्यात् । तत्सार्थक्याय पारिष्कृतार्थवत्त्वशरीरे नञ्द्वयप्रवेशः कृतः । तन्निवेशे च एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षयाऽर्थबोधकत्वेन अहन्, काण्डे इत्यादीनामर्थवत्त्वात् प्राप्तप्रातिपदिकसंज्ञावारणाय, धातुप्रत्ययान्तपर्युदासस्सार्थक इति । न च नञ्द्वयप्रवेशः,

अधातुरित्यादिपर्युदासश्च मास्त्विति वाच्यम् । दधि, मध्वित्यादौ विभक्तेर्लुका लुप्तत्वेन तदनपेक्षणात् प्रातिपदिकत्वानापत्तिः ।

अलुप्तप्रकृतिकस्य केवलप्रत्ययस्य पारिष्कृतार्थवत्त्वाभावेनैव प्रातिपदिकत्व-व्यावृत्त्या अप्रत्यय इति प्रत्ययपर्युदासो व्यर्थ इत्यत आह न चेति । न हीत्यर्थः । तत् = पारिष्कृतार्थवत्त्वम् । केवलप्रत्ययस्येति । अलुप्तप्रकृतिकस्येत्यादिः । अत एव इः, इयान् इत्यादौ अर्थवत्त्वसत्वेऽपि न क्षतिः । प्रत्ययस्य निरुक्तार्थवत्त्वाभावे भाष्यं प्रमाणयति तदुक्तमिति । भर्तृहरिवचनमपि प्रमाणयति धात्वदीनामिति । विशुद्धानां = प्रत्ययरहितानां केवलानां धात्वादीनां लौकिकः = लोके प्रतीयमानो न भवति । प्राग्विभक्तेः = विभक्त्युत्पत्तेः प्राक् = पूर्वभागे तदन्तस्य = कृत्तद्धितान्तस्य तथैवार्थः = धात्वदीनामिव लौकिकोऽर्थः न विद्यत इति कारिकार्थः ।

सूत्रद्वयेऽपि पारिष्कृतार्थवत्त्वं ग्राह्यमित्यंशं द्रढयति अत एवेति । सूत्रद्वये निरुक्तार्थवत्त्वस्याभिमतत्वादेवेत्यर्थः । पदसंज्ञासूत्रे = सुप्तिङन्तं पदमिति सूत्रे । ज्ञापकत्वे इति । सति सप्तमी । वर्तते = अनुवर्तते । शास्त्रीयार्थः = कल्पितप्रकृतिप्रत्ययाद्यर्थः। वैयर्थ्येनेति । कृत्तद्धितयोः शास्त्रीयार्थस्याव्यभिचरितत्वादिति भावः । तदनुवृत्तीति । अर्थवद्ग्रहणानुवृत्तीत्यर्थः । लौकिकार्थेति । विभक्त्यन्तार्थो हि लौकिकः, सर्वथेतरनैरपेक्ष्येण लोके प्रतीयमानत्वात् । कृदन्तार्थस्तु विभक्तीतरानपेक्षया प्रतीयमानत्वात् प्रत्यासन्नः । कृत्तद्धितार्थस्तु स्वप्रकृतिविभक्त्युभयापेक्षयैव कृदादेः प्रतीयमानत्वात् विप्रकृष्ट इति ज्ञेयम्। लौकिकार्थः = विभक्त्यन्तार्थः, तत्प्रत्यासन्नः = कृदन्तार्थः । लक्ष्यत इति । सुपो द्योतकत्वेन तत्समभिव्याहारे स प्रतीयते न तु तद्रहिते इत्यर्थः ।

यत्तु प्रत्ययान्तेष्वित्यस्य कृदाद्यन्तेष्वित्यर्थ इति, तन्न, तावन्मात्रेण कस्याप्यर्थस्याभिव्यक्तेरप्यभावेनाभिव्यक्ततरत्वस्य सुतरामभावात्। अर्थवत्सूत्रेऽप्येवमेवेति

'अनुवृत्तिसामर्थ्या' दित्यनेन सूचितम् , अन्यथा 'तत्सामर्थ्या'दित्येव वदेत् । पूर्वसूत्रे यादृशार्थवत्त्वग्रहोऽत्राप्यनुवृत्तिसामर्थ्यात्तादृशार्थवत्त्वस्यैव ग्रहः, शास्त्रीयार्थग्रहणे तु तदनुवृत्तिः व्यर्था स्यादिति तद्भावः ।

भावबोधिनी : तावन्मात्रेण विभक्त्यसमभिव्याहृतेन । लोक इति शेषः । अभावेनेति । न केवलेति न्यायेन तन्मात्रस्य प्रयोगाभावादिति भावः । एवमेवेति । ईदृशार्थवत्त्वमेवेत्यर्थः।

बालबोधिनी : विवरणकाराद्युक्तिं खण्डयति यत्त्विति । प्रत्ययान्तेष्विति कैयटवचनस्य

सुबन्तेष्वित्यर्थः । न तु कृदाद्यन्तेष्विति । तावन्मात्रेण = विभक्त्यसमभिव्याहृतेन कृदाद्यन्तमात्रेण लोके न कस्याप्यर्थस्य प्रतीतिः । तावन्मात्रप्रयोगाभावादिति भावः। एवमेव= निरुक्तार्थवत्त्वमेव । अन्यथा = पूर्वसूत्रे पारिष्कृतार्थवत्त्वानङ्गीकारे । अधातुरिति पर्युदासेनैवार्थवत्त्वलाभे पुनरर्थवद्ग्रहणसामर्थ्यादित्येव वदेत् । न तु तदनुवृत्तिसामर्थ्यादिति। तेन पूर्वसूत्रे तथोत्तरसूत्रे च निरुक्तार्थवत्त्वमेव ग्राह्यमिति फलितम् । पूर्वसूत्रे = अर्थवत्सूत्रे। अत्रापि = कृत्तद्धितसूत्रेऽपि । तदनुवृत्तिः = अर्थवद्ग्रहणानुवृत्तिः । व्यर्थेति । कृदादीनां तदन्तानाञ्च शास्त्रीयार्थाव्यभिचरितत्वादिति भावः । तद्भावः = भाष्यकैयटाशयः । अर्थवत्पदेन शास्त्रीयार्थस्य ग्रहणमिति मते पर्युदासेनैव निरर्थकव्यावृत्तौ व्यावर्त्यान्तरालाभेनार्थवद्ग्रहणं व्यर्थं स्यात् । पारिष्कृतार्थवत्त्ववादिनो मते तु प्रत्ययस्य देवदत्तो गार्ग्य इत्यादिरूपव्यावर्त्यसत्वेन तद्ग्रहणस्य सामर्थ्याभावात् अनुवृत्तिपर्यन्तानुधावनं सङ्गच्छत इति भावः ।

किञ्च पूर्वसूत्रे सामान्यतोऽर्थवत्त्वग्रहणे न किञ्चित्फलं, प्रत्ययेष्वतिव्याप्तिदानातिरिक्तम्। अत एव तद्धितग्रहणस्य नियमार्थत्वाश्रयणेन 'ह्रस्वो नपुंसके यत्तस्ये'ति न्यासेन 'काण्डे' इत्यादौ ह्रस्ववारणात्फलाभावेन वा भाष्योक्ते तत्प्रत्याख्याने 'पञ्चनावप्रिय' इत्यादौ 'पञ्चनावे' त्यस्यानेन न प्रातिपदिकत्वं, नाप्युत्तरसूत्रेण। प्रातिपदिकत्वे तु टाबापत्तिः। एवञ्च प्रत्ययस्य प्राप्तिरेव नेति केवलप्रत्ययपर्युदासो विफलः।

भावबोधिनी : सामान्यत इति । शक्तिलक्षणान्यतरसम्बन्धेनापारिभाषिकार्थवत्त्वग्रहणे इत्यर्थः । सूत्रद्वये उक्तार्थवत्त्वग्रहणे फलमाह अत एवेत्यादिना नाप्युत्तरसूत्रेणेत्यन्तेन । नियमार्थत्वेति । प्रत्ययान्तस्य चेत् तद्धितान्तस्यैवेति नियमाकारः । प्रत्ययान्तपर्युदासत्यागे उपायान्तरमाह ह्रस्व इति । प्रातिपदिकग्रहणसामर्थ्यात् प्रातिपदिकार्थमात्रवृत्तेः ह्रस्व इत्यर्थात् विभक्त्यर्थविशिष्टार्थबोधकत्वात् प्रकृते न ह्रस्व इति भावः । अत्र पक्षे तद्धितग्रहणं न कार्यमिति तात्पर्यम् । तत्प्रत्याख्याने = प्रत्ययान्तपर्युदासप्रत्याख्याने । अस्यानेनेत्यनेनान्वयः ।

नियमशास्त्राणां विधिमुखेन प्रवृत्तिमभ्युपेत्याह नापीति । टाबापत्तीति । न चात्र गोस्त्रियोरिति ह्रस्वः शङ्क्यः । पञ्चनावेति समुदायस्य शास्त्रीयोपसर्जनत्वाभावात् । लौकिकमपि न । यस्य ह्रस्वः तदर्थं प्रत्येव तदङ्गीकारात् । न च नव्यमते टचः समासावयवत्वेन अकारान्तोत्तरपदेत्यस्याप्राप्त्या स्त्रीत्वमेव नेति वाच्यम् । टचः स्वार्थिकत्वेन तद्विशिष्टस्य परवल्लिङ्गमित्यनेन तत्सम्भवात् परहीत्यापादनसम्भवाच्च ।

स्वार्थिकाः प्रत्यया इति त्वगतिकगतिरिति भावः । ङीबापत्तिरिति क्वाचित्कोऽपपाठः । उपसर्जनत्वेन तदप्राप्तेः । यस्मात् ङीप् तदर्थं प्रत्यनुपसर्जनत्वात् तदापादानं युक्तमिति केचित् । न च सन्निपातपरिभाषया टाब्ङीपोर्वारणं द्विगुसंज्ञाद्वारा उत्तरपदानन्तर्य-निमित्तकस्य टचः तदविघातकत्वादिति वाच्यम् । कृन्मेजन्त इति सूत्रभाष्यप्रामाण्येन परम्परया सन्निपातविघातकत्वग्रहणेऽपि सन्निपातलक्षणविधौ साक्षात् सन्निपातस्यैव ग्रहणेन तादृशस्य टचः उत्तरपदानन्तर्यनिमित्तकत्वानङ्गीकारात् । साक्षान्निमित्तद्विगुत्वस्य तु न किञ्चिदपि विरोध इति भावः ।

न च पञ्चनौ इत्यस्याप्रातिपदिकत्वे टजेव दुर्लभ इति वाच्यम् । समासान्तविधौ प्रातिपदिकाधिकाराभावस्य वक्ष्यमाणत्वात् । यदि त्वविशेषादुभयत्रापि यथाकथञ्चित् सन्निपातग्रहणात् क्वचित् साक्षात् इत्यस्याश्रयणाद्वा पञ्चनावेत्यादौ न दोष इत्युच्यते तदा ओदनं पचेति प्रागुक्तप्रयोजनं परिष्कारस्येति बोध्यम् । विषम्यान्तु परिष्कारानङ्गीकार एव ज्यायानित्युक्तम् ।

बालबोधिनी : ननु पूर्वसूत्रे निरुक्तार्थवत्त्वग्रहः न कैयटाभिमतः, अन्यथाऽर्थाधिकारादित्येव वदेत् । किञ्च अर्थवद्ग्रहणसामर्थ्यस्य तदनुवृत्तिप्रयोजकत्वेऽपि तदन्तविध्यप्रयोजकत्वेन च कैयटेन तत्सामर्थ्यादिति नोक्तमित्यरुचेराह किञ्चेति । पूर्वसूत्रे= अर्थवत्सूत्रे । सामान्यतोऽर्थवत्त्वग्रहः = शास्त्रीयार्थग्रहः । वृत्त्यार्थबोधकत्वरूपेत्यर्थः । प्रागुक्तभाष्य-कैयटाभ्यामुत्तरसूत्रे पारिष्कृतार्थवत्त्वस्यैव ग्रहणमिति सिद्धेऽर्थाधिकारानुरोधात् पूर्वसूत्रेऽपि तस्यैवाङ्गीकार्यतया, न्यायप्राप्तस्य तस्य परित्यागपूर्वकं सामान्यतोऽर्थवत्त्वग्रहणे प्रत्ययेष्वतिव्याप्तिदानातिरिक्तमन्यत् किमपि तस्य नास्ति । प्रत्ययानामपि शास्त्रीयार्थवत्त्वेन तेषां प्रातिपदिकत्वापत्तिरिति तद्वारणाय प्रत्ययपर्युदासः कार्य इति भावः ।

सूत्रद्वयेऽपि निरुक्तार्थवत्त्वाङ्गीकारे फलमाह अत एवेत्यादिना नाप्युत्तरसूत्रेणेत्यन्तेन अत एव = उक्तरीत्या अर्थवत्सूत्रे कृत्तद्धितसूत्रे च पारिष्कृतार्थवत्त्वाङ्गीकारादेव । तद्धितग्रहणस्येति । कृत्तद्धितेति सूत्रस्थस्येत्यर्थः । नियमेति । प्रत्ययान्तस्य चेत् तर्हि कृत्तद्धितान्तस्यैवेति नियमाकारः। कृद्ग्रहणस्य नियमार्थत्वं तु न, भिद् छिदित्यादौ धातुपर्युदासात् सञ्ज्ञाया अप्राप्तेस्तस्य विध्यर्थत्वादिति प्रदीपकृतः । प्रत्ययान्तपर्युदासप्रत्याख्याने भाष्ये पक्षद्वयं दृश्यते । तत्र ह्रस्वो नपुंसके यत्तस्य इति न्यासपक्षे तत्प्रत्याख्याने इत्यस्य 'अनेन न प्रातिपदिकत्वम्' इत्यनेनान्वयः, नाप्युत्तरसूत्रेणेत्यनेन । तत्प्रत्याख्याने = प्रत्ययान्तपर्युदासप्रत्याख्याने । अनेन = अर्थवत्सूत्रेण । उत्तरसूत्रेणेति ।

तद्धितान्तत्वात् समासत्वाच्च प्राप्तमिति शेषो बोध्यः । अयं भावः । सूत्रद्वयेऽपि पारिष्कृतमर्थवत्त्वं ग्राह्यमिति अत एवेत्यादिग्रन्थेन द्रढयति । तथा हि - कृत्तद्धितेति सूत्रे तद्धितग्रहणस्य ''प्रत्ययान्तस्य चेत् कृत्तद्धितान्तस्यैवेति नियमार्थत्वमाश्रित्य भाष्ये अप्रत्ययग्रहणं प्रत्याख्यातम् । अत्र पक्षे प्रत्ययान्तपर्युदासाभावेऽपि नियमशरीरानन्तर्गततया काण्डे इत्यादीनां प्रातिपदिकत्वानापत्त्या ह्रस्वो नपुंसकेति ह्रस्वापत्तिर्नास्ति । प्रत्ययान्तपर्युदासप्रत्याख्याने अयमेकः प्रकारः । अथवा काण्डे इत्यादीनां प्रत्ययान्तानां प्रातिपदिकसंज्ञासत्त्वेऽपि 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यस्य स्थाने 'ह्रस्वो नपुंसके यत्तस्य' इत्येव सिद्धे प्रातिपदिकग्रहणेन सत्त्वप्रधानप्रातिपदिकानामेव ह्रस्व इत्यादिरीत्यार्थाङ्गीकारेण ह्रस्वो वारयितुं शक्यते । काण्ड इत्यस्य सत्त्वप्रधानत्वेऽपि विभक्त्यन्तस्य शक्तिसंख्याप्रधानत्वेन लिङ्गयोगाभावात् काण्डे इत्यस्य सत्यामपि प्रातिपदिकसंज्ञायां ह्रस्वो नपुंसके इति ह्रस्वापत्तेरभावेन प्रातिपदिकसंज्ञानिषेधे फलाभावेन प्रत्ययान्तपर्युदासो व्यर्थ इति तत्प्रत्याख्याने द्वितीयः प्रकारः । एवमुक्तरीत्याऽप्रत्ययग्रहणं द्विधा प्रत्याख्यातं भाष्यकृता । तत्राद्यपक्षे ''तद्धितग्रहणस्य नियमार्थत्वाश्रयणेन भाष्योक्ते तत्प्रत्याख्याने पञ्चनावप्रिय इत्यादौ पञ्चनावेत्यस्यानेन न प्रातिपदिकत्वं नाप्युत्तरसूत्रेणे''ति ग्रन्थो योजनीयः । द्वितीयपक्षे 'तत्प्रत्याख्याने पञ्चनावप्रिय इत्यादौ पञ्चनावेत्यस्यानेन न प्रातिपदिकत्वम्' इति ग्रन्थयोजना । तत्र नाप्युत्तरसूत्रेणेत्यस्यासम्बन्धः । तथा हि - तत्राद्यप्रत्याख्यानपक्षे नियमशास्त्राणां विधिमुखेन प्रवृत्तिरिति सिद्धान्तपक्षे अर्थवत्तद्धितान्तस्य प्रातिपदिकसंज्ञेत्युत्तरसूत्रस्यार्थो लभ्यते । तत्र यदि शास्त्रीयार्थः स्वीक्रियते तर्हि पञ्चनावप्रिय इत्यादौ पञ्चनावेत्यस्य तादृशतद्धितान्तत्वात् प्रातिपदिकत्वापत्तिः । तद्वारणाय पारिष्कृतार्थवत्त्वं स्वीकार्यम् । तथा च तत्साजात्येनैव पूर्वसूत्रे संकोचस्य कर्तव्यतया पारिष्कृतार्थवत्प्रत्ययान्तारिक्तस्यार्थवतः प्रातिपदिकसंज्ञेत्यर्थो लभ्यते । पञ्चनावेत्यस्य पारिष्कृतार्थवत्प्रत्ययान्तारिक्तत्वात् शास्त्रीयार्थवत्त्वाच्च प्रातिपदिकत्वापत्तिरिति तद्वारणाय तत्रापि निरुक्तार्थवत्वमेव ग्राह्यमिति सिद्धम् । द्वितीयप्रत्याख्यानपक्षे प्रत्ययान्तपर्युदासाभावेन अर्थवत्सूत्रे पारिष्कृतार्थवत्त्वानङ्गीकारे पञ्चनावेत्यस्य प्रातिपदिकत्वापत्तिः । प्रत्ययान्तपर्युदासपक्षे तदनापत्तिरिति आरम्भप्रत्याख्यानयोः फलभेदः स्यादिति तदैक्याय पारिष्कृतार्थवत्त्वमाश्रयणीयम् । एवं पञ्चनावेत्यस्य तद्धितान्ततया प्राप्तप्रातिपदिकत्ववारणायोत्तरसूत्रेऽपि तादृशार्थवत्त्व-मेवाश्रयणीयमिति सिद्धम् । स्पष्टश्चैतत् विषमपदविवृतिगुरुप्रसादादिषु । अधिकं तावत्तत एवावगन्तव्यम् ।

टाबापत्तिरिति । पञ्चनावेति टजन्तस्य 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्रियां वर्तनात् प्रातिपदिकत्वे टाबापत्तिः । टजन्तस्योपसर्जनतया टिड्ढाणञिति, द्विगोरिति वा ङीपोऽप्राप्तिः । ङीबापत्तिरिति त्वपपाठः । ननु पञ्चनावेत्यस्य सत्यप्यर्थवत्त्वे न क्षतिः । उत्तरपदपरकत्वं निमित्तीकृत्य जायमाना तत्पुरुषसंज्ञा, टच्प्रत्यये सति तद्धितान्तत्वेन प्रातिपदिकसंज्ञाद्वारा टाबादेरानन्तर्यविघातकस्यानिमित्तं स्यादिति सन्निपातपरिभाषया वारणसम्भवादिति चेन्न । अलौकिके एव प्रक्रियावाक्ये समासान्ताः प्रवर्तन्त इति सिद्धान्तात् पञ्चन् जस् नौ जस् इत्यवस्थायामेव बहुव्रीहिसंज्ञासमकालमेव टच्प्रवृत्त्या ततस्तद्धितान्तत्वेन प्रातिपदिकत्वोत्तरपदहेतुकद्विगुत्वयोः प्राप्तावपरनिमित्तकत्वेनान्तरङ्गत्वात् द्विगुसंज्ञायाः प्राक् प्रातिपदिकत्वे तथैवान्तरङ्गत्वाट्टाप् स्यात् । कृन्मेजन्त इति सूत्रस्थभाष्यप्रामाण्येन परम्परया सन्निपातविघातकत्वग्रहणेऽपि सन्निपातलक्षणविधौ साक्षात् सन्निपातस्यैव ग्रहणसम्भवेन टच उत्तरपदानन्तर्यनिमित्तकत्वानङ्गीकारात् । साक्षान्निमित्त-द्विगुत्वस्य तु न किञ्चिदपि विरोध इति बोध्यम् । स्पष्टञ्चैतत् सदाशिवभट्टीयादिषु ।

तथा चोक्तरीत्या पञ्चनावेत्यत्र प्रातिपदिकसंज्ञावारणाय सूत्रद्वये पारिष्कृतार्थवत्त्वस्य सिद्धान्तितत्वेन तेनैव प्रत्ययस्य प्रातिपदिकत्वव्यावृत्तिसम्भवे प्रत्ययपर्युदासो विफल इत्याह एवञ्चेति । निरुक्तार्थवत्त्वग्रहणे चेत्यर्थः । प्राप्तिरेवेति । प्रातिपदिकसंज्ञाया इति शेषः ।

'दश दाडिमानि षडपूपाः' इत्यादि निरर्थकपदसमुदायव्यावृत्तिरर्थवद्ग्रहणस्य फलम्। तत्र हि 'सुपो धात्वि'ति लुगापत्तिरिति भाष्ये स्पष्टमिति दिक् ।

बालबोधिनी : निरर्थकेति । निरर्थको यः पदसमुदाय इत्यर्थः । पदार्थानां समन्वयस्यैव वाक्यशक्यत्वेन तदभावात् समुदायस्य निरर्थकत्वमिति बोध्यम् । ननु तस्य प्रातिपदिकत्वे का क्षतिरत आह तत्र हीति । समासग्रहणकृतनियमेन निरर्थकपदसमुदायस्य व्यावृत्तिर्न भवति । तस्य नियमस्यार्थवत्समुदायविषयकत्वात् । अत एव 'अर्थवत्समुदायानां समासग्रहणं नियमार्थम्' इत्युक्तमर्थवत्सूत्रे भाष्ये ।

पूर्वसूत्रेणेति। 'प्रत्ययग्रहणे यस्मा'दिति प्रत्ययान्तत्वाभावादिति भावः। नियमस्य सजातीयविषयत्वात्साजात्यं दर्शयितुमाह- पूर्वो भाग इति। एतेन यत्तच्छब्दार्थयोरननुगतत्वेन शब्दानुगमस्याप्रयोजकत्वेन व्यवच्छेद्यानुगमेऽपि क्षत्यभावेन 'यत्र सङ्घाते' इत्यादि व्यर्थमेवेत्यपास्तम् ।

भावबोधिनी : कृत्तद्धितसमासाश्च । ननु राजन् +अस्, पुरुष + स् इत्यादेः

प्रत्ययान्तत्वात् न पूर्वेण प्राप्तिरित्यत आह प्रत्ययग्रहण इति । सजातीयविषयकत्वात् सङ्ग्राह्यसमानधर्मव्यवच्छेदकत्वादित्यर्थः । खण्डनकृन्मतं दूषयति एतेनेति । सङ्ग्राह्यव्यवच्छेद्ययोः साजात्यप्रदर्शनमात्राभिप्रायकत्वेनेत्यर्थः । यत्तच्छब्देति । तयोर्बुद्धिस्थपरामर्शकत्वेन यदा समासो बुद्धिस्थः तदा तस्यैव यत्र तस्येति पदाभ्यां ग्रहणमिति न व्यवच्छेद्यवाक्यग्रहः । यदा तु वाक्यं बुद्धिस्थं तदा ताभ्यां तस्यैव ग्रह इति न समासग्रह इति तद्भेदस्य समासेऽभावादसङ्गतिरिति भावः । अननुगतत्वेन = अनुगतधर्माबोधकत्वेन । अर्थाननुगमेऽपि शब्दानुगमोऽस्त्येवेत्यत आह शब्दानुगमस्येति। आनुपूर्व्यैक्यमेव तदनुगमो वाच्यः । अर्थाननुगमे सोऽकिञ्चित्कर इति भावः । ननु सर्वनाम्नां बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तिस्वीकारात् शक्यतावच्छेदकानां घटत्वपटत्वादीनामननुगमेऽपि तन्निष्ठस्यावच्छेदकत्वरूपस्य शक्यतावच्छेदकतावच्छेदकस्यैक्यादनुगतव्यवहार इत्यत आह व्यवच्छेद्येति । क्षत्यभावेनेति । सङ्ग्राह्यस्यैव विवक्षितधर्मत्वेन बोधनीयतयाऽननुगमे सोऽशक्य इति भावः । अपास्तमिति । अननुगमेऽपि पदसंज्ञकपूर्वभागघटितत्वेन समासवाक्ययोः साजात्यसंभवात् बहुपटव इत्यादेः प्रातिपदिकत्ववारणाय व्यवच्छेद्यानुगमस्यावश्यकत्वाच्च तदयुक्तमिति भावः ।

<u>बालबोधिनी :</u> कृत्तद्धितसमासाश्च । पूर्वसूत्रेणेति । राजन् + अस्, पुरुष + स् इत्यादौ समासे तस्य धातुप्रत्ययप्रत्ययान्तभिन्नतयाऽर्थवत्सूत्रेणैव प्रातिपदिकत्वसिद्ध्या समासग्रहणं नियमार्थम् । ननु राजन् + अस्, पुरुष +स् इत्यादेः प्रत्ययान्ततया पूर्वेण प्रातिपदिकसंज्ञाऽप्राप्त्या विध्यर्थमेव समासग्रहणमित्यत आह प्रत्ययग्रहणे इति । प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषया तदादेरित्युपस्थित्या समासस्य प्रत्ययान्ततदादित्वाभावात् पूर्वसूत्रेणैव सिद्धौ समासग्रहणं नियमार्थमिति भावः ।

यत्र सङ्घाते पूर्वो भागः पदमित्यादिनियमशरीरलाभप्रकारमाह नियमस्येति । सजातीयविषयत्वादिति । सजातीयानां नियमः कार्यः ।अन्यथाऽतिप्रसङ्गापत्तिरिति भावः। मनोरमाखण्डनकृच्चक्रपाणिशेषोक्तदूषणमुद्धर्तुमाह एतेनेति । संग्राह्यव्यवच्छेद्ययोः साजात्यप्रदर्शनमात्राभिप्रायकत्वेनेत्यर्थः । यत्तच्छब्दार्थयोः = यत्तच्छब्दजन्यधीविशेष्ययोः। अननुगतत्वेन = अनुगतधर्माबोधकत्वेन । त्यदादीनां बुद्धिस्थपरामर्शकत्वेन तेषामानन्त्यादननुगतत्वमिति भावः । नन्वर्थाननुगमेऽपि यत्र तस्येत्येतद्रूपः शब्दानुगमोऽस्त्येवेत्यत आह शब्दानुगमस्येति । अप्रयोजकत्वेनेति । अर्थस्यैव नियमशरीरे प्रविष्टत्वेनार्थाननुगमे शब्दानुगमस्याकिञ्चित्करत्वमिति भावः ।

ननु त्यदादीनां बुद्धिविषयतावच्छेदकत्वोपलक्षिते शक्तिस्वीकारेण शक्यानां घटपटादीनां, तदवच्छेदकानां घटत्वपटत्वादीमानन्त्येऽपि बुद्धिविषयतावच्छेदकत्वरूपस्य शक्यतावच्छेदकतावच्छेदकस्यैक्यादनुगमोऽस्त्येवेत्यत आह व्यवच्छेद्याननुगमेऽपीति । समासकृतनियमस्य फलं वाक्यस्य प्रातिपदिकत्ववारणमिति व्यवच्छेद्यं वाक्यमित्यर्थः । संग्राह्यस्यैवानुगमः । यथा सास्नादिमत्त्वं गोर्लक्षणमित्यत्र संग्राह्याणां सकलगो-व्यक्तीनामनुगमः । व्यवच्छेद्यमहिष्यादिकन्तु न कोऽप्यनुगमयति । तथा च भगवान् पाणिनिः सङ्ग्राह्यान् साधुशब्दानेवानुगमयति नासाधुशब्दानिति स्पष्टं विषमपदविवृतौ । अपास्तमिति। समाससाजात्यप्रदर्शनार्थमेव यत्र सङ्घात इति मूलस्य प्रवृत्तत्वेनानुगम-स्यासम्भवेऽप्यनुपयोगेऽपि न क्षतिरिति भावः ।

पदशब्देनात्र स्वतन्त्रेणापि प्रयोगार्हमर्थवद्गृह्यते। अत एव 'अर्थवत्समुदायानां समासग्रहणं नियमार्थ'मित्युक्तमत्र भाष्ये। ''भाष्ये 'सुबन्ताना'मित्यनेन भेदसंसर्गद्वारकार्थवन्त उपलक्ष्यन्ते'' इति कैयटेन स्पष्टमेवोक्तम् । तेन 'गवित्ययमाहे'त्यादौ 'गो' इत्यादीनां सुबन्तत्वाभावेऽपि न समुदायस्य प्रातिपदिकत्वम्, अनुकरणस्यानितिपरस्यापि प्रयोगसत्त्वेन तावन्मात्रस्यापि पृथक्प्रयोगार्हत्वात् । 'बहुपटव' इत्यादौ प्रतिपदिकत्वसिद्धये 'स्वातन्त्र्येणे'ति । तत्र 'पूर्व' इत्याक्षिप्तपरेषामपि स्वातन्त्र्येण प्रयोगार्हार्थवतामेव ग्रहणात् 'पुत्रकाम्ये'त्यादौ न दोषः । अत एवाङ्गसञ्ज्ञासूत्रे भाष्ये- प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहण'मिति परिभाषायाः फलनिरूपणावसरे - 'देवदत्तो गार्ग्ये'ति समुदायस्य यञन्तत्वेन प्राप्तप्रातिपदिकसञ्ज्ञाऽभावः फलत्वेनोक्तः । यथाश्रुतमूलोक्तनियमे तु नियमेनैव तत्र तदप्राप्त्या भाष्यासङ्गतिः स्पष्टैव । एतेन 'वृषण्वसु'रित्यादौ पूर्वभागस्य भत्वात्पूर्वो भागः पदमित्ययुक्तमित्यपास्तम् ।

भावबोधिनी : अत एव = अर्थवतो ग्रहणादेव । ननु भाष्ये वाक्ये संज्ञावारणाय अर्थवत्समुदायानामिति नियममुक्त्वा बहुपटव इत्यादौ दोषमाशङ्क्य सुबन्तानामिति नियम उक्तः, न तु स्वातन्त्र्येण प्रयोगार्हेतीत्यत आह भाष्ये सुबन्तानामिति । तथा च सुबन्तानामिति भाष्येण पूर्वोक्तनियमशरीरे स्वातन्त्र्येण प्रयोगार्हेति विशेषणं देयमित्युक्तमिति भावः । भेदसंसर्गेति । समासयोग्यानां पदानां पृथक् प्रयोगे सतीति शेषः । भेदसंसर्गः इतरसंसर्गाकाङ्क्षा स्वस्वामिभावादिसंसर्गाकाङ्क्षेति यावत् । सः द्वारभूतो यस्य विशिष्टार्थवत्वस्य तद्वत इत्यर्थः । अर्थवत्समुदायपदं तन्त्रेण षष्ठीतत्पुरुषकर्मधारयाभ्यामर्थवतां योऽर्थवान् समुदायस्तत्परमिति शब्दरत्ने उक्तम् ।

कर्मधारयमात्रविवक्षायामर्थवान् यस्समुदायः तस्य चेत् समासस्यैवेति नियमापत्त्याऽव्युत्पन्नस्य डित्थेत्यादिसमुदायस्य पूर्वसूत्रेण संज्ञा न स्यात् । अतः षष्ठीतत्पुरुष आवश्यकः । तावन्मात्रोक्तौ त्वनर्थको योऽर्थवतां समुदायः दशदाडिमानि षडपूपा इत्यादिः, तस्यार्थवद्ग्रहणस्य व्यावर्त्यत्वोक्तिः भाष्योक्ता ऽ संगता स्यात् नियमेनैव व्यावृत्तेः । अतः कर्मधारयोऽप्यावश्यकः । समासग्रहणस्य नियामकत्वानुपपत्तिश्च मिश्रग्रन्थे कथिता बोध्या । अर्थवान् समासः प्रातिपदिकसंज्ञक इत्यर्थो वाच्यः । तस्य च पूर्वेण सिद्ध्या समासग्रहणं नियमार्थं भवति । अन्यथा अनर्थकेऽसमर्थसमासे पूर्वसूत्राप्राप्तप्रातिपदिकत्वविधायकं स्यात् । तथा चार्थवतां योऽर्थवत्समुदायः तत्त्वेन समासवाक्ययोः साजात्यनिवेशाय कर्मधारयोऽप्यावश्यक इति तत्रोक्तम् । असमर्थसमासस्य तु धर्मिग्राहकमानादेव प्रातिपदिकत्वं मनोरमोक्तमनुसन्धेयम् । तेन = मूलकृदुक्तनियमशरीरघटकपदशब्दस्य यताश्रुतार्थं विहाय स्वातन्त्र्येण प्रयोगार्हार्थवत्परत्वकथनेन । सुबन्तत्वाभावेऽपि नियमघटकविशेषणासिद्धिं परिहरति अनुकरणस्येति । अनुकरणञ्चानिति परमित्युक्तेरिति भावः । प्रातिपदिकत्वसिद्धय इति । अन्यथा जसो लिङ्गाभावात् चितस्सप्रकृतेरित्यादावकाराकार उदात्तः स्यात् । विभाषा सुप इत्युक्त्या सुबन्तस्यैव प्रकृतित्वात् प्रातिपदिकत्वेन लुकि तु ककाराकार उदात्त इति भावः । तत्रेति । नियमशरीरे इत्यर्थः । न दोष इति । प्रातिपदिकासिद्धित्वरूपो दोषो नेत्यर्थः । न चाकारप्रत्ययान्तस्य कृदन्तत्वेन प्रातिपदिकत्वात् टाप्सिद्धिरिति वाच्यम् । मूलकेनोपदंशमित्यत्रेव परत्वान्नियमेन बाधापत्तेरिति भावः । अत एव = उक्तस्यैव नियमस्याभिप्रेतत्वादेव । यञन्तत्वेन = यञ्रूपतद्धितान्तत्वेन ।

ननु सुपः प्राग्वर्तिनः देवदत्तो गार्ग्येति समुदायस्य तद्धितान्तत्वेऽपि प्राचीनरीत्या एकार्थीभावेनार्थवत्त्वाभावात् नवीनरीत्या एतत्संज्ञेति निरुक्तार्थवत्त्वाभावान्न प्रातिपदिकत्वप्राप्तिरिति चेन्न । अर्थवत्त्वापर्यालोचनया तत्प्रवृत्तेः । असङ्गतिः स्पष्टैवेति। नन्विदमापादनमसङ्गतम् । आपाद्यायामसङ्गतेरिष्टत्वात् । तथा हि प्रत्यय-ग्रहणपरिभाषामङ्गीकृत्य तद्धितान्तत्वप्रयुक्तप्रातिपदिकत्ववारणेऽपि अर्थवत्सूत्रप्राप्तस्य तस्य दुर्वारत्वात् । न च निरुक्तार्थवत्त्वाभावात्तेनाप्राप्तिः । तादृशार्थवत्त्वस्योत्तरसूत्रेऽपि सत्वेन तेनाप्राप्तेः । किञ्च प्रत्ययग्रहणपरिभाषादशायां समासस्य प्रत्ययान्तत्वेन पूर्वसूत्राप्राप्तप्रातिपदिकत्वविधायकत्वेन समासग्रहणस्य नियमार्थत्वानुपपत्त्या नियमेनैव तत्र तदप्राप्त्येत्युक्तिरसङ्गता । तथा चाप्राप्तप्रातिपदिकत्ववारणं फलत्वेन

मन्यमानस्यैकदेशिन उक्तिरिति चेत् सत्यम्, भट्टग्रन्थे तस्य सिद्धान्तिभाष्यत्वोपपादनात् तद्ग्रन्थस्य बहुत्वान्नात्र लेखनम् । विषम्यामेतद्भाष्यं दूषयित्वा विलक्षणो नियम उक्तः स तत एवावसेयः । एतेन = पदशब्दस्य स्वातन्त्र्येणेत्यद्यर्थकथनेन। अयुक्तमिति। पदसंज्ञकपूर्वभागघटितत्वस्य नियमबोधकसमासपदवाच्यतावच्छेदकसमासत्व-व्यापकत्वादयुक्तमिति भावः । स्वोक्तनियमघटकधर्मस्य तु समासत्वव्यापकत्वमस्तीति भावः ।

ननु कुम्भकार इत्यादौ समासे कार इत्यादेः कुम्भ इत्याद्यपेक्षयैव प्रयोगात् नव्यमतेऽपि स्वातन्त्र्येण प्रयोगार्थवत्पूर्वोत्तरभागघटितार्थवत्समुदायस्य समासव्यापकत्वं नेति साम्यमेवेति चेदत्र केचिदित्थं नियमनिष्कर्षमाहुः। स्वनिष्ठप्रकृतित्वनिरूपक-प्रत्ययप्रकृत्यन्यतर समभिव्याहारापेक्षप्रयोगार्हार्थवत्पूर्वोत्तरभागघटितस्यार्थवत्समुदायस्य चेद्भवति तर्हि समासस्यैवेति । शिवरामइत्यादिसंज्ञाशब्देऽत्यन्तरूढे असमासे प्रातिपदिकत्वाय अर्थवत्त्वेन पूर्वोत्तरभागौ विवक्षितौ । यद्वा प्रयोगार्हत्वमर्थ-वत्त्वाविनाभाव्यमिति पूर्वोत्तरभागयोरर्थवत्त्वं स्वरूपकीर्तनपरमेव, अर्थबोधायैव प्रयोगानुसरणात् । कुम्भकार इत्यादौ कार इत्यादेरुत्तरभागस्योपपदापेक्षया प्रयुज्यमानत्वात् पञ्चनावप्रिय इत्यादौ पञ्चनावेत्यादेः पूर्वभागस्य प्रियाद्यपेक्षयैव प्रयुज्यमानत्वात् नियमघटकधर्मस्य समासत्वव्यापकत्वाय मूलकेनोपदंशमित्यादावति-व्याप्तिवारणाय बहुपटवः, पुत्रकाम्येत्यादावव्याप्तिवारणाय च प्रत्ययप्रकृत्यन्यतर-सम्बन्धित्वेन समभिव्याहारो विशेषितः । एवमपि कुम्भकारादावुत्तरभागस्य समुदायप्रकृतिकसुप्प्रत्ययापेक्षयैव प्रयोगात् । तथा सांकूटिनमित्यत्र कूटिन्नित्यस्य समुदायप्रकृतिकाणपेक्षयैव प्रयोगात् नियमघटकधर्मस्य समासत्वव्यापकत्वानुपपत्तिः । तद्वारणाय स्वनिष्ठप्रकृतित्वनिरूपकत्वेन प्रत्ययो विशेषितः । न हि स्वणौ तादृशाविति। प्रकृतिप्रत्ययभावानापन्नेति प्राचीनोक्तनियमोऽप्ययुक्तः । अव्युत्पन्नडित्थादि-शब्देष्वव्याप्तेः । पुत्रकाम्येत्यादावव्याप्तेश्च । काम्यजप्रत्ययोभयघटितसमुदायस्य पुत्रनिष्ठप्रकृतित्वानिरूपकत्वादिति भावः ।

बालबोधिनी : ननु यत्र सङ्घाते पूर्वो भागः पदमुत्तरस्तु प्रत्ययो न तस्य चेद्भवति तर्हि समासस्यैवेति नियमाङ्गीकारे गवित्ययमाहेत्याद्यनुकरणस्थले समुदायस्य प्रातिपदिकत्वापत्तिः । अनुकार्यानुकरणयोरभेदविवक्षया अनुकरणस्य गो इत्यादेः सादृश्यवशादनुकार्योप-स्थापकत्वेऽपि वृत्त्या तदनुस्थापकत्वादर्थबोधकत्वाभावेन नैरर्थक्यात् प्रातिपदिकत्वाभावेन

सुबनुत्पत्त्या पदत्वाभावेन नियमशरीराप्रविष्टतया समासकृतनियमेन व्यावृत्त्यभावात् गवितीति समुदायस्य प्रातिपदिकत्वापत्तिः । वृष = वर्षकं वसु यस्य स वृषण्वसुः । वृषा अश्वो यस्य स वृषणश्वः । इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपे प्राप्ते 'वृषण्वस्वश्वयोः' इति वार्त्तिकेन भत्वविधानाद् वार्यते । लोके वृषवसुः, वृषाश्वः । अत्र वृषण्वसुरित्यादिसमासे पूर्वभागस्य भत्वात् तत्साजात्येन पूर्वो भागः पदमित्यर्थालाभश्चेत्यत आह पदशब्देनेति । स्वातन्त्र्येणापीति । अपिः पारतन्त्र्यसमुच्चायकः । अनुकरणञ्चानितिपरमिति इति रहितस्यापि अनुकरणस्य स्वातन्त्र्येण प्रयोगार्हत्वेन नियमशरीरप्रविष्टतया न दोषः ।

उक्तार्थस्वीकारे भाष्यसम्मतिमाह अत एवेति । पदशब्देनात्र स्वातन्त्र्येण प्रयोगार्हार्थवतो ग्रहणादेवेत्यर्थः । नन्वर्थवत्सूत्रभाष्येऽर्थवत्समुदायानां समासग्रहणं नियमर्थमित्युक्त्वा तत्पक्षे बहुपटव इत्यादौ दोषमाशङ्क्य सुबन्तानां समुदायस्य समासग्रहणं नियमार्थमिति प्रकारान्तरेण नियमशरीरं दर्शितम् । न तत्र स्वातन्त्र्येण प्रयोगार्हमिति विशेषणं निविष्टमिति शङ्कायामाह भाष्ये इति । कृत्तद्धितसूत्रे भाष्ये इत्यर्थः । भेदसंसर्गद्वारकेति । समासयोग्यपदानां राज्ञः पुरुष इत्यादीनां वाक्ये विभागेनापि प्रयोगे सति इतरसंसर्गाकाङ्क्षा= स्वस्वामिभावादिसंसर्गाकाङ्क्षा भेदसंसर्गः । स द्वारभूतो यस्य विशिष्टार्थवत्त्वस्य तद्युक्ता इत्यर्थः । समासेऽपि वाक्यीयेनैव तेन विशिष्टार्थवत्त्वम् । न हि प्रकृतिप्रत्ययोर्विभागेन प्रयोगः, परश्चेति वचनात् । तेनार्थवत्समुदाय इति फलितम् ।

पदशब्दस्य निरुक्तार्थकरणेनानुकरणस्थले न दोष इत्याह तेनेति । सुबन्तत्वाभावेऽपीति । सुबन्तत्वप्रयुक्तपदत्वाभावेऽपीत्यर्थः । समुदायस्य = गवितीत्यस्य । अनितिपरस्यापीति । अनुकरणञ्चानितिपरमित्युक्तेरिति भावः । तावन्मात्रस्य = इति रहितस्य । ननु प्रयोगार्हेत्येव भवतु, स्वातन्त्र्येणेति विशेषणं किमर्थमित्यत आह बहुपटव इति । विभाषा सुपो बहुच् पुरस्तात् । ईषदूनः पटुर्बहुपटुः बहुचः स्वातन्त्र्येण प्रयोगार्हार्थवत्त्वाभावेन नियमशरीराप्रविष्टतया न समासकृतनियमेन व्यावृत्तिरिति प्रातिपदिकसंज्ञा सिध्यति ।

यत्र सङ्घाते पूर्वो भागः पदमिति नियमशरीरे यथा पूर्वभागस्य स्वातन्त्र्येण प्रयोगार्हार्थवतो ग्रहणं तथा पूर्वत्वस्य साकाङ्क्षत्वात् तेनाक्षिप्तपरस्यापि स्वातन्त्र्येण प्रयोगार्हार्थवत एव ग्रहणमित्याह तत्रेति । नियमशरीरे इत्यर्थः । एवञ्च स्वातन्त्र्येण प्रयोगार्हाणामर्थवतां समासग्रहणं नियमार्थमिति फलितम् । समुदायघटका भागाः स्वातन्त्र्येणापि प्रयोगार्हा अर्थवन्तो गृह्यन्त इति तात्पर्यम् । न दोष इति । अप्रत्ययादित्यनेन

काम्यजन्तादप्रत्यये टापि पुत्रकाम्येत्यादौ समुदाये पूर्वभागस्य स्वातन्त्र्येण प्रयोगार्हत्वेऽप्युत्तरभागभूतकाम्यजप्रत्यययोः तत्त्वाभावान्नियमानन्तर्गततया समासकृत-नियमेन न व्यावृत्तिरिति न प्रातिपदिकत्वभङ्ग इति भावः ।

अत् एव = पूर्वोत्तरभागयोः स्वातन्त्र्येण प्रयोगार्हार्थवत्त्वं निवेश्य नियमाङ्गीकारादेव। यञन्तत्वेन = गार्गादिभ्यो यञिति यञ्रूपतद्धितान्तत्वेन । प्राप्तप्रातिपदिकसंज्ञेति । तद्धितान्तत्वात् कृत्तद्धितेति सूत्रेणेत्यर्थः । निरुक्तनियमानङ्गीकारे भाष्यविरोधमाह यथाश्रुतेति यत्र सङ्घाते पूर्वो भागः पदमुत्तरस्तु प्रत्ययो नेति मूलोक्तनियमाङ्गीकारे देवदत्तो गार्ग्येति समुदायस्य नियमशरीरप्रविष्टतया समासनियमेनैव व्यावृत्तिसम्भवे प्रत्ययग्रहणपरिभाषायाः फलप्रदर्शनमसङ्गतं स्यात् । निरुक्तनियमाङ्गीकारे तूत्तरभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावेन न नियमकोटिप्रविष्टत्वमिति प्रत्ययग्रहणपरिभाषाफलप्रदर्शनं भाष्यकृत्कृतं सङ्गतं स्यादिति भावः ।

भाष्यासङ्गतिः स्पष्टैवेति प्रतीकमादाय 'इदमयुक्तम्, तद्धितान्तत्वप्रयुक्त-प्रातिपदिकसंज्ञायास्तदादिनियमाश्रयणेन वारणेऽप्यर्थवत्सूत्रेण तस्या दुर्वारत्वात्। किञ्च तदादिनियमाभावे देवदत्तो गार्ग्येति समुदायस्य तद्धितान्तत्वेन प्रातिपदिकत्वमापादितं भाष्ये। तदानीं च न समासग्रहणस्य नियमार्थत्वम् । समासस्य प्रत्ययान्तत्वात्, तदादिनियमस्य चाभावात् । किन्तु विध्यर्थमेव । तथा च देवदत्तो गार्ग्येति समुदायस्य सूपपन्नं प्रातिपदिकत्वापादनमिति विषमपदविवृतिकाराः राघवेन्द्राचार्याः । वस्तुतस्तु प्रत्ययग्रहणपरिभाषाप्रयोजनत्वकथनपरभाष्यस्य 'अर्थवदन्तं यत् कृत्तद्धितान्तम्' इत्यर्थाश्रयणेन प्रवृत्ततया देवदत्तो गार्ग्येत्यस्यार्थवद्गार्ग्यान्तत्वेन प्राप्तसंज्ञायाः प्रत्ययग्रहणपरिभाषया वारणमिति भाष्याशयो वर्णनीयः । तथाहि - अर्थवदित्यस्य पूर्वत्र क्लृप्तार्थकस्य कृत्तद्धितयोर्विशेषणसामर्थ्याच्छब्दरूपं विशेष्यमध्याहृत्य तदन्तविधौ कृत्तद्धितान्तेत्यर्थेऽर्थवदित्यस्य तद्विशेषणात् तदंशेऽपि तदन्तविधावर्थवदन्तं यत्कृत्तद्धितान्तमित्यर्थात् निरुक्तसमुदायस्य अर्थवद्गार्ग्यशब्दान्तत्वेन, परिभाषार्थतः प्राक् तद्धितान्तत्वेन च तत्प्राप्तिरिति, तत्परिभाषोत्तरन्तु विशिष्टस्यार्थवदन्तत्वेऽपि तद्धितान्तत्वाभावान्न दोष इति तदाशय इति गुरुप्रसादकाराः । अधिकं तावत्तत एव ज्ञेयम्।

एतेन = पदशब्दस्य स्वातन्त्र्येणेत्याद्यर्थस्वीकारेण ।

वाक्यस्य नेति । प्रातिपदिकत्वे हि सुपः श्रवणानापत्तिः । 'पिण्डीमित्यादौ वाक्यैकदेशप्रयोगेऽलुक्समासे चाङ्गाधिकारविहितसुप्प्रत्ययनिमित्तककार्याणां सुबादेशानाञ्च चारितार्थ्यं, विकल्पेन समासविधानञ्च स्वराद्यर्थमिति भावः ।

शशशृङ्गदिपदानाञ्च बौद्धे शशशृङ्गादौ शक्तिरिति पूर्वेणैव प्रातिपदिकत्वं सिद्धम् । स्वप्नाद्यनुरोधेन च बौद्धपदार्थस्याऽऽवश्यकत्वम् । अक्षौहिणीरथन्तरादिपदेषु अवयवानामत्यन्तनिरर्थकानामप्यन्यत्र दृष्टार्थारोपेण प्रातिपदिकत्वसुबुत्पत्त्यादिना यथाकथञ्चित्साधुत्वान्वाख्यानं बोध्यम् ।

भावबोधिनी : ननु सुम्मात्रस्य लुकि तत्सम्बन्धिकार्यमात्रवैयर्थ्यमित्यत आह पिण्डीमित्यादाविति । न च धातुसाहचर्यात् प्रातिपदिकावयवस्यापि वृत्तावेव लुगिति वाच्यम् । मूलकेनोपदंशमित्यादौ लुको दुर्वारत्वादिति भावः । ननु वाक्येऽपि लुक् चेत् तस्य समासतुल्यत्वापत्त्या विकल्पेन समासविधानं व्यर्थमत आह विकल्पेनेति । अत्रादिना विशेषणायोगपरिग्रहः । ननु शशशृङ्गादिपदानामर्थाभावात् प्रातिपदिकत्वं न स्यादत आह शशशृङ्गादिपदानामिति । अक्षौहिण्यादिशब्दे समासानुपपत्तिमाशङ्क्याह अक्षौहिणीति। असमर्थसमासस्य तु धर्मिग्राहकमानादेव प्रातिपदिकत्वं मनोरमोक्तं ध्येयम् ।

बालबोधिनी : समासकृतनियमव्यावृत्तिफलमाह वाक्यस्य नेति । तस्य प्रातिपदिकत्वे दोषमाह प्रातिपदिकत्वे हीति । नन्वङ्गाधिकारविहितसुप्प्रत्ययनिमित्तककार्याणां सुबादेशानाञ्च वैयर्थ्यापत्त्या वाक्यस्य प्रातिपदिकत्वेऽपि तदवयवसुपां लोपो न भवतीत्यत आह पिण्डीमिति । विकल्पेनेति । विकल्पेन समासविधानस्य स्वराद्यर्थत्वेन, समासे इव वाक्येऽपि सुपो लुक् स्यात्तर्हि उभयोरानुपूर्व्या ऐक्यात् समासविकल्पविधानमनुपपन्नमिति शङ्काया अवकाशो नास्ति ।

ननु निरर्थकशशशृङ्गादिसमासस्यार्थवत्त्वाभावेन पूर्वसूत्रेण प्रातिपदिकत्वाप्राप्ता समासग्रहणं विध्यर्थमेव स्यान्न तु नियमार्थमिति शङ्कायामाह शशशृङ्गादिपदानाञ्चेति । बौद्धार्थवादिनो वैयाकरणा इति बोध्यम् । बौद्धे = बुद्धिसत्तासमाविष्टे । ननु केवलबुद्धिसत्तासमारूढं मास्त्वतिरिक्तं शशशृङ्गादि, अन्यथाख्यातिवादाभ्युपगमात् प्रसिद्धशृङ्गे शशीयत्वग्रहेण तद्बुद्धेरन्यथासिद्धत्वादत आह स्वप्नाद्यनुरोधेनेति । तत्रानुभूतपदार्थानां न व्यावहारिकत्वं, प्रबोधेऽप्युपलम्भापत्तेः । व्यावहारिकसत्तायामेव घटादीनां प्रबोधोत्तरमप्युपलम्भो भवति । तथा च स्मृतिः -

विप्र पृथिव्यादिचित्तस्थं न बहिस्स्थं कदाचन ।
स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयते ॥ इति ।

योगवासिष्ठे उपशमप्रकरणे गाधिम्प्रति विष्णूक्तिरियम् । हे विप्र पृथिव्यादिजाग्रद्रूपं, चित्तस्थं= बौद्धं, चित्तस्यैव जगन्निदानत्वात् । बहिस्तु नासीदित्यर्थः । स्वप्नभ्रममदाद्यवस्थासु अयमर्थः सर्वैरनुभूयते । स्वप्नादिषु बाह्यस्याभावेन चित्तगतस्यैव प्रपञ्चस्य परिस्फुरणमिति भावः । तदुक्तं तदस्यास्त्यस्मिन्निति सूत्रे न सत्तापदार्थो व्यभिचरतीति भाष्यव्याख्यावसरे कैयटे 'यदि तु वृक्षादीनां बाह्यसत्तासमाविष्टं वस्तु वाच्यं स्यात्ततो वृक्ष इत्यस्मात् सत्तावगमादस्तीत्यस्य गतार्थत्वात् प्रयोगो न स्यात्, सतो जन्मविरोधात् । बौद्धसत्तायां ते दोषा नावतरन्ति, बुद्धिसत्तासमाविष्टस्य बहिः सत्वासत्वजननप्रतिपादनाय अस्ति नास्ति जायत इति प्रयोगा'दिति । ननु अक्षौहिणीरथन्तरादिशब्देष्ववयवानां नैरर्थक्यात् प्रातिपदिकत्वानापत्तौ सुबनुत्पत्त्या अक्षाणामूहनीत्यादिरूपेण षष्ठीसमासादेरप्रसङ्ग इत्यत आह अक्षौहिणीति । अन्यत्रेति । अक्षांश्छिनत्ति, अक्षान् दीव्यतीत्यादावित्यर्थः । तादृशार्थबोधकत्वम् अक्षौहिणीत्यादाववयवानामक्षादीनां साधुत्वार्थं कल्पनेन प्रातिपदिकत्वादिकमुपपादनीयमिति भावः ।

अधिकारोऽयमिति । सञ्ज्ञाऽधिकार इत्यर्थः । सञ्ज्ञात्वावगमस्तु व्याख्यानात् । विकारागमानान्तु न तत्सञ्ज्ञा, 'प्रत्यय' इति महासञ्ज्ञया स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकस्यैव तत्सञ्ज्ञकत्वात् । स्वप्रकृत्यर्थत्वञ्च-धातुपाठकोशादौ तमुच्चार्य्य बोधितत्वम् । अत एव नभवधाद्यादेशानां न सञ्ज्ञा । तेषां स्थान्यर्थेनैवार्थवत्त्वं, न तु स्वार्थोऽस्ति ।

अत एव कोशादौ तदर्थाकथनम् । एतदर्थमेव भाष्ये 'स्वीयमर्थं प्रत्याययन्ती'ति विग्रहे 'स्वीय' पदोपादानम् । भाष्यप्रामाण्याच्च तदर्थान्तर्भावेण प्रत्ययशब्दस्य वृत्तिः ।

<u>**भावबोधिनी :**</u> ननु प्रत्ययशब्दस्यैवाग्रिमसूत्रैर्विधानापत्तिरत आह संज्ञाधिकार इति। एवञ्चाशब्दसंज्ञेति निषेधान्न स्वरूपोपस्थितिरिति भावः । व्याख्यानादिति । विधेयसामानाधिकरण्यात् तत्त्वसिद्धिरिति भावः । भावाभावरूपविकारादीनां संज्ञित्वं वारयति विकारागमानामिति । स्वस्वप्रकृत्यर्थेति । स्वार्थप्रत्यायकत्वं ण्वुलादौ स्वीयप्रकृत्यर्थप्रत्यायकत्वमत्यन्तस्वार्थिकादौ बोध्यम् । ननु यस्मिन्नर्थे यस्य विधानं तस्य तदर्थकत्वं युक्तम् । न चैतत् प्रकृतेस्सम्भवति । अर्थविशेषविधानादित्यत आह स्वप्रकृत्यर्थत्वञ्चेति । तं = प्रकृतिभूतशब्दम् । अत एव = स्वार्थप्रत्यायकत्वाभावादेव। नाभिनभञ्च, हनश्च वधः, विरागविरागञ्चेत्यादीनामित्यर्थः । स्थान्यर्थेनैवेति । अत एव तेषामादेशत्वमिति बोध्यम् । न त्विति । अत एव लोके नाभिर्हितमित्येव नभ्यशब्दाद्बोधो न तु नभहितमिति नभशब्दप्रकारकबोध इति बोध्यम् । उक्तार्थे भाष्यं प्रमाणयति

एतदर्थमेवेति । विकारागमादेशानां प्रत्ययसंज्ञाव्यावृत्त्यर्थमेवेत्यर्थः । इति विग्रह इति । इत्यर्थकविग्रह इत्यर्थः । एतेन भाष्ये स्वमर्थं प्रत्याययन्तीत्येव विग्रहदर्शनादिदमयुक्त-मित्यपास्तम् । तदर्थेति । स्वपदार्थेत्यर्थः ।

बालबोधिनी : प्रत्ययः । अधिकारोऽयमिति । स्वस्थले प्रयोजनाभावेऽपि स्वोत्तरवर्तिविधिशास्त्रैकवाक्यतापन्नत्वेन लक्ष्यसंस्कारकवाक्यार्थबोधजनकत्वमधिकारत्वम् । ननु प्रत्यय इत्यस्य शुद्धाधिकारत्वे स्वं रूपमिति शास्त्रबलेनोत्तरसूत्रैः प्रत्ययशब्दस्य विधानापत्तिरत आह संज्ञाधिकार इति । संज्ञात्वेनाधिकार इत्यर्थः । वक्ष्यमाणसनादिष्वस्याधिकारात् प्रत्ययसंज्ञकः सन् भवतीत्यर्थो लभ्यते । सन्प्रत्यय इति फलितार्थः । ननु 'अदेङ्गुणः, दाधाघु' इतिवत् संज्ञ्यनिर्देशात् कथं प्रत्यय इत्यस्य संज्ञात्वावगतिरित्यत आह संज्ञात्वावगम इति । व्याख्यानादिति । उत्तरसूत्रेषु प्रत्यय इति प्रथमान्तपदस्योपस्थितौ विधेयसामानाधिकरण्याद्विध्येकवाक्यतयाऽन्वयमूलकाद्-व्याख्यानादित्यर्थः ।

ननु प्रत्यय इति संज्ञात्वेनोत्तरत्राधिक्रियत इत्युच्यते तर्हि विकारागमेष्वपि तदधिकारात् तेषामपि प्रत्ययसंज्ञा कुतो नेत्यत आह विकारेति । विकारशब्देनात्र भावरूपादेशः, लोपस्य तदसम्भवात् । तत्संज्ञा = प्रत्ययसंज्ञा । तत्र हेतुमाह प्रत्यय इति । महासंज्ञयेति । प्रत्यय इति महासंज्ञयाऽन्वर्थत्वं विज्ञायते । अन्तर्भावितण्यर्थकः प्रत्ययशब्दः कर्तृसाधनपरः कर्मसाधनपरश्चोभयविधो दृश्यते । उभयोरपि तन्त्रेण निर्देशः । प्रत्याययतीति प्रत्यय इति कर्तृव्युत्पत्त्या स्वार्थप्रत्यायकानां धातुविहितसनादीनां संग्रहः । प्रत्याय्यते प्रकृत्या बोध्यत इति प्रत्यय इति कर्मव्युत्पत्त्या स्वार्थिकप्रत्ययसंग्रहः । तदेवाह स्वस्वप्रकृतीति । तत्र स्वार्थप्रत्यायकत्वमिच्छार्थकसनादीनाम्, स्वप्रकृत्यर्थप्रत्यायकत्वमत्यन्तस्वार्थिकानां कादीनामिति बोध्यम् । तमुच्चार्य = अर्थबोधकशब्दमुच्चार्य । कोशादावित्यादिपदेन निरुक्तनिघण्टुसंग्रहः ।

अत एव = स्वार्थप्रत्यायकत्वाभावादेव । नभेति । नाभि नभश्च, हनश्च वधः, विराग विरागश्चेत्यादीनामित्यर्थः । अत एव = स्थान्यर्थेनार्थवत्त्वेन स्वार्थाभावादेव । स्वार्थः= स्वीयोऽर्थः । एतदर्थमेव = स्थान्यर्थप्रत्यायकनभादेः प्रत्ययत्वव्यावृत्त्यर्थमेव । तदर्थान्तर्भावेण = स्वशब्दार्थान्तर्भावेण ।

यत्तु विकारागमादेशानां देशांशे निराकाङ्क्षत्वात् 'परश्चे'त्यस्यानुपस्थितौ तत्सन्नियोगशिष्टप्रत्ययसञ्ज्ञाया अप्रवृत्तिरिति, तन्न । श्नमकज्बहुष्वप्रवृत्त्यापत्तेः । किञ्च

'लविषीये'त्यत्र विशेषविहितत्वात्परत्वाच्च पूर्वं सीयुटि ततो लादेशे प्रत्ययसञ्ज्ञासन्नियोगेनेटो विधीयमानमाद्युदात्तत्वं सीयुट एव स्यादत आगमानुदात्तत्वं वक्तव्यमिति 'आद्युदात्तश्चे'तिसूत्रस्थभाष्यकैयटासङ्गतिः । लस्थानिकत्वेन देशांशे निराकाङ्क्षत्वेन 'परश्चे'त्यस्याप्रवृत्तौ 'प्रत्यय' इत्यस्याप्यप्रवृत्तौ तत्सन्नियोगकथनासङ्गतेरिति दिक् ।

भावबोधिनी : प्राचोक्तं खण्डयति यत्तु विकारेति । विकार एकदेशस्थानिकादेशः, आदेशः सर्वस्थानिक इति भेदः । एतेनोभयोपादानं व्यर्थमित्यपास्तम् । ननु तृणह इमिति निर्देशात् न यासयोरिति ज्ञापकात् श्नमकचोर्न दोषः । बहुचश्चित्वेन प्रत्ययत्वाभावेऽपि अदोषेण वेत्यरुचेराह किञ्चेति । विशेषविहितत्वस्यानवकाशत्वे सत्येव बाधप्रयोजकत्वं सीयुटश्च लादेशप्रवृत्त्युत्तरमपि चारितार्थ्यमस्तीत्यत आह परत्वादिति। न च लादेशाप्राप्तियोग्ये इटोऽचारितार्थ्येनापवादत्वे स्थिते परत्वोक्तिरसङ्गतेति वाच्यम्। प्रकृते लादेशशब्दितेडप्राप्तियोग्ये चारितार्थ्यमित्याशयात् । यद्वा आद्युदात्तश्चेति सूत्रापेक्षया परत्वादित्यर्थः । न च सीयुटा व्यवधानादिट्प्रत्ययो न स्यादिति वाच्यम् । धातोरित्यस्य विहितविशेषणत्वाङ्गीकारात् । प्रत्ययसंज्ञासन्नियोगेनेति । न चेटः स्थानिवत्त्वेनैव प्रत्ययत्वसिद्धेः लादेशविषये प्रत्यय इत्यस्यासम्बन्ध एवास्त्विति वाच्यम् । अधिकारलब्धस्य तस्यासम्बन्धे मानाभाव इत्याशयात् । लस्थानिकेति । इट इत्यादिः। तत्सन्नियोगेनेति । आद्युदात्तश्चेति सूत्रस्येत्यादिः । अधिकं भट्टग्रन्थे बोध्यम् ।

बालबोधिनी : प्राचोक्तिं खण्डयति यत्त्विति । विकारः = एकदेशस्थानिकः । हनस्तचेत्यादिः । आदेशः = सर्वस्थानिकः । नाभिनभश्चेत्यादिः । स्थानषष्ठीबलाल्लिङ्गाच्च विकारादीनां देशांशे निराकाङ्क्षत्वात् परश्चेत्यस्यानुपस्थितौ सन्नियोगशिष्टानामिति न्यायात् तत्सन्नियोगशिष्टप्रत्ययसंज्ञाया अप्रवृत्तिरिति प्राचीनाः । तत्खण्डयति तन्नेति । 'रुधादिभ्यः श्नम्' इति श्नमि मित्वेन, 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यकचि प्राक्टेर्ग्रहणेन, 'विभाषा सुपो बहुच् पुरस्तात्' इति बहुचि पुरस्ताद्ग्रहणेन देशविशेषे निराकांक्षतया परश्चेत्यस्याप्रवृत्तौ तत्सन्नियोगशिष्टप्रत्ययसंज्ञाया अप्यप्रवृत्त्यापत्तिरिति भावः ।

ननु 'तृणह इम्' इति निर्देशात् श्नमः, (प्रत्ययत्वेन तदवयवस्य नकारस्य णत्वं सिद्धम्) 'न यासयोः इति ज्ञापकात् प्रत्ययबाधकतयाऽकज्विधानाच्च तस्य प्रत्ययत्वं सिध्यति । बहुचः चित्वेन प्रत्ययत्वाभावेऽपि न दोष इत्यरुचेराह किञ्चेति । लवीषियेति । लूञ्धातोरात्मनेपदे आशीर्लिङि उत्तमपुरुषैकवचनम् । लादेशात्पूर्वं सीयुटः प्रवृत्तौ विशेषविहितत्वात् परत्वादिति हेतुद्वयं दर्शितम् । विशेषविहितत्वस्य कृते चारितार्थ्येऽपि

बाधकताप्रयोजकत्वं, तक्रकौण्डिन्यन्यायवदित्युच्यते तर्हि प्रथमहेतुः । विशेषविहितत्वस्य कृतेऽप्यचारितार्थ्यं यत्र तादृशे माठरकौण्डिन्यायविषये एव बाधकताप्रयोजकत्वं, सीयुटश्च लादेशप्रवृत्त्युत्तरमपि चारितार्थ्यादिति विभाव्यते तर्हि परत्वादिति द्वितीयहेतुः । इट इति । उत्तमपुरुषैकवचनस्येत्यर्थ । लस्थानिकेति । इट इत्यादिः । तत्सन्नियेगेनेति । आद्युदात्तश्चेति सूत्रस्येत्यादिः ।

ननु आद्युदात्तश्च (3-1-3) इति सूत्रे 'अवचने हि सीयुडादेराद्युदात्तत्वम्'इति सीयुडागमे प्रयोजनोपपादनवार्त्तिकव्याख्यावसरे ''अक्रियमाणे हि आगमानुदात्तत्वे क्रियमाणेऽपि प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वे सीयुडादेर्लिङ आद्युदात्तत्वं प्रसज्येत । लविषीय पविषीय'' इति भाष्यम् । तच्च लिङ्वधावुपस्थिताद्युदात्तश्चेत्यस्य विधानकाले लिङोऽनच्कत्वेनाप्रवृत्तावपि सीयुटि कृते तद्विशिष्टस्य यदागमन्यायेन लिङ्त्वात् सीयुटः प्राप्नोतीत्याशयकमित्यादेशविधौ प्रत्ययपदासम्बन्धेऽपि न तद्भाष्यासङ्गतिरतः कैयटासङ्गतिमाह कैयटेति । इदमत्र तत्रत्यं कैयटव्याख्यानम् - ''अत्र विशेषविहितत्वाद्वा परत्वाद्वा पूर्वं सीयुट् क्रियते पश्चाल्लादेशः, तत्र प्रत्ययाद्युदात्तत्वं क्रियमाणं सीयुट एव स्यात् । आगमा अनुदात्ता इति सीयुटोऽनुदात्तत्वे सति इटोऽदित्यकारस्योदात्तत्वं सिद्ध्यतीत्यर्थ'' इति ।

परश्च। 'गुप्तिज्किद्भ्य' इत्यादावपादानत्वासम्भवाद्दिग्योगलक्षणा पञ्चमी। तत्र परः पूर्वो वेत्यत्रानियमेनाध्याहारे प्रसक्ते 'पर एवे'ति नियमार्थमिदम् । 'गापोष्टक्'-इत्यादावपि षष्ठ्यर्थ आनन्तर्यं पूर्वपरसाधारणमित्यनियमोऽस्त्येव। अत्र 'तस्मा'दिति परिभाषोत्तराङ्गविकला प्रवर्तत इत्यव्यवहिता एव प्रत्ययाः।

भावबोधिनी : असम्भवादिति । विश्लेषावधित्वाभावादिति भावः । ननु षष्ठीनिर्देशस्थले आदेशत्वापत्तिरित्यत आह गापोरिति । प्रत्ययाधिकारपाठबलात् ठगादौ प्रत्ययत्वबुद्ध्या आदेशत्वबुद्धिनिवृत्तेः न षष्ठीस्थान इत्यस्य प्रवृत्तिरिति भावः । षष्ठ्यर्थ इति । षष्ठ्यर्थसम्बन्धिनिरूपकमित्यर्थः । आनन्तर्यमिति । अध्याहृतानन्तरपदबोध्य-मित्यर्थः । अत्र = प्रत्ययविधायके । उत्तराङ्गेति । उत्तरस्येत्यंशहीनेत्यर्थः ।

बालबोधिनी : परश्च । अपादानत्वासम्भवादिति । गुपादिभ्यः सनादिर्भवतीत्यर्थेनायातीत्यर्थाभावेन विश्लेषावधित्वाभावादपादानत्वं न सम्भवतीति अपादाने पञ्चमीति पञ्चम्या अप्राप्तिरिति भाव । दिग्योगलक्षणेति । 'अन्यरादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति दिग्योगलक्षणा पञ्चमी । तत्र = तस्यां

पञ्चम्यां सत्याम् । तदन्यथानुपपत्त्या तदुपपत्तये दिग्वाचकयोः पूर्वपरशब्दयोर-नियमेनाध्याहारप्रसङ्गे पर एवेति नियमार्थमिदम् ।

ननु 'गोपोष्टक्' इत्यत्र गोपोरित्यस्य षष्ठ्यन्तत्वेन पञ्चम्यभावात् तत्र तस्य परविध्यर्थमेवेदं सूत्रमिति.कथमस्य नियमार्थत्वमित्यत आह गापोरिति । षष्ठ्यर्थ इति । षष्ठ्यर्थ आनन्तर्यमिति तु न युक्तम् । ग्रन्थकृता तन्निराकृतत्वात् । अतः बौद्धैकदेशाधारकस्थित्याश्रयत्वरूपषष्ठ्यर्थसम्बन्धनिरूपकाध्याहृतानन्तरादिपद-बोध्यानन्तर्यमित्यर्थः । तस्य पूर्वपरसाधारण्यादनियमे प्रसक्ते नियमार्थमेवेति भावः । नन्वेवं प्रत्ययानां पूर्वत्ववारणेऽपि व्यवहितत्ववारकमुपायमाह अत्रेति । तत्तत्प्रत्ययविधायके गुप्तिज्किद्भ्य इत्यादावित्यर्थः । परत्वस्य सिद्धत्वादाह उत्तराङ्गविकलेति । उत्तरस्येत्यंशरहितेत्यर्थः । तथा चाव्यवहितत्वांशमात्रप्रवृत्तौ बाधकाभावेन प्रत्यया अव्यवहिता भवन्तीति सिद्धम् ।

न चैवं षष्ठ्यंशविकलं सम्पूर्णं सूत्रमुपतिष्ठतां, किं 'परश्चे' त्यनेनेति वाच्यं,प्रकृत्यर्थमात्रविवक्षायां केवलप्रकृतेः-पच् पत् इत्यादेः प्रयोगो मा भूदिति प्रत्ययः परो भवत्येवेति नियमार्थत्वात् । तेन न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः इति सिद्धम् । अनुकरणे तु अभेदविवक्षयाऽर्थवत्त्वाभावात्प्रातिपदिकत्वाभावेन प्रकृतित्वाभावात् 'गवित्ययमाहे'त्यादौ नानुपपत्तिः । प्रकृतित्वञ्च प्रत्ययविधावुद्देश्यताव-च्छेदकाक्रान्तत्वम् ।

बालबोधिनी : शङ्कते न चेति । एवमिति । प्रत्ययविधायके अधिकारात् परश्चेत्यंशस्य सिद्ध्याऽव्यवहितत्वांशलाभाय तस्मादिति परिभाषाप्रवृत्त्यङ्गीकारे इत्यर्थः । षष्ठ्यंशविकलमिति । उत्तरस्येतिपदघटकषष्ठ्यंशरहितमित्यर्थः । एवञ्च प्रथमां स्वीकृत्य प्रत्ययैस्सामानाधिकरण्यमिति भावः । तथा च तस्मादिति परिभाषयैव उत्तरांशसिद्धौ परश्चेति सूत्रं व्यर्थमिति शङ्कितुराशयः । समाधत्ते प्रकृत्यर्थेति । तत्फलमाह तेनेति । ननूक्तरीत्या केवलप्रकृतिप्रत्यययोः प्रयोगाभावे सिद्धे गवित्ययमाहेत्याद्यनुकरणानां प्रयोगानुपपत्तिरिति शङ्कायामाह अनुकरणे त्विति । अभेदविवक्षयेति । अनुकार्यानुकरणयोरिति शेषः । प्रातिपदिकत्वाभावेनेति । स्वाद्यनुत्पत्त्येति शेषः । प्रकृतित्वाभावादिति । न केवला प्रकृतिरिति निषेधाप्रवृत्तिरिति भावः । अनुकरणस्य प्रकृतित्वाभावद्रढीकरणाय तत्परिष्करोति । प्रकृतित्वञ्चेति । ङ्याप्प्रातिपदिकादित्यधिकारेण तत एव स्वाद्युत्पत्त्याऽनुकरणस्य तद्व्यतिरिक्तत्वेन न तदुद्देश्यतावच्छेदकाक्रान्तं भवतीत्यर्थः ।

अयं न्यायः शास्त्राबोधितान्यतरप्रयोगविषयः,अत एव 'लिट्,' 'इया'नित्यादौ न दोषः। अत्र प्रकृतिविशेषोद्देशेनैव प्रत्ययानां विधाना'न्नापि केवल' इत न्यायमूलकम्। एतन्मूलकमेव पठ्यते 'अपदं न प्रयुञ्जीते' ति।अपरिनिष्ठितमिति तदर्थः। परिनिष्ठितत्वञ्च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वम् । निहते तिङन्तादवव्याप्तिवारणाय अप्रवृत्तेति। वैकल्पिकेडागमोद्देश्यतावच्छेदकाक्रान्ते 'सेद्धे'त्यादावव्याप्तिवारणाय 'नित्येती' ति दिक् ।

<u>**भावबोधिनी :**</u> अयं न्यायः = न केवलेति न्यायः । न दोष इति । अन्यतरप्रयोगस्य शास्त्रबोधितत्वादिति भावः । ननूक्तनियमेन प्रकृतिमात्रप्रयोगवारणेऽपि न प्रत्ययमात्रप्रयोगव्यावृत्तिरत आह अत्रेति । शास्त्रे इत्यर्थः । नापि केवल इति । अंश इति शेषः । एतन्मूलकमिति । विशिष्टन्यायमूलकमित्यर्थः । प्रातिपदिकार्थेति सूत्रैकवाक्यतया स्वादिसूत्रस्य विधायकत्वेन तिङन्तस्याप्रातिपदिकत्वान्न प्रथमा आपादयितुं युक्तेति केचित् ।

नन्वपरिनिष्ठितेति निषेधस्य व्यापकतया प्रकृतिप्रत्ययमात्रविषयकव्याप्य न केवलेति न्यायमूलकत्वं नोपपन्नमिति चेन्न । एकदेशानुमत्या तन्मूलकत्वोक्तेः ।

<u>**बालबोधिनी :**</u> नन्वेवं सति लुप्तप्रकृतिकस्य इः, इयानित्यादिप्रत्ययस्य, दधिमध्वादीनां लुप्तप्रत्ययानाञ्च प्रयोगानुपपत्तिः, न केवलेति न्यायविरोधादत आह अयमिति । न केवलेति न्यायं इत्यर्थः । अन्यतरेति । प्रकृतिप्रत्ययान्यतरेत्यर्थः । अत्र = शास्त्रे । विधानादिति । केवलप्रत्ययप्रयोगासम्भवादिति शेषः । नापि केवल इति । तदंश इत्यर्थः । न्यायसिद्ध एवेति भावः । एतन्मूलकमेव = न केवलेति न्यायमूलकमेव । अपदं व्याचष्टे अपरिनिष्ठितमिति । तथा च गवितीत्यादावनुकरणे न दोषः । अभावबुद्धिं प्रति प्रतियोगिज्ञानस्य कारणत्वेन परिनिष्ठितपदार्थं व्याचष्टे परिनिष्ठितत्वञ्चेति । अप्रवृत्तो यो नित्यविधिः तस्य यदुद्देश्यतावच्छेदकं तदनाक्रान्तत्वम् । 'अप्रवृत्तत्वञ्च प्रतिबन्धकाप्रतिहतप्रवृत्तिकत्वम् । तेन लिडित्यादौ ण्वुलाद्युद्देश्यतावच्छेदक-धातुत्वाक्रान्तत्वेऽपि नाव्याप्तिः । हरी एतावित्यादौ च न सा । प्रतिबन्धकत्वञ्च निहते तिङन्ते लक्ष्ये लक्षणस्येति न्यायः, लिडादावुक्तार्थानामित्यपवादविषयता वा प्रकृतिभावश्चेति रीत्या तत्र तत्रानेकविधं यथा सम्भवं बोध्य'मिति सदाशिवभट्टीये स्पष्टम्। निहते तिङन्तादाविति । तिङ्ङतिङः (8-1-28) । अतिङन्तात् पदात्परं तिङन्तं निहन्यते। यथा अग्निमीले । सर्वानुदात्तो निघात इति वैयाकरणानां व्यवहारः ।

ङ्याप्प्रातिपदिकात् । समाहारद्वन्द्वः। ननु 'परश्चे'त्यनेन प्रकृतेराक्षेपात्प्रातिपदिकाधिकारो व्यर्थः। तिङन्तात्तु न द्वितीयादिः, सङ्ख्याऽभावात् । सङ्ख्यायास्तिङोक्तत्वाच्च। धातुभ्यस्तु न, तिङामपवादत्वात् । 'तस्ये'त्यादिसमर्थविभक्तिनिर्देशात् , तमब्विधौ 'तिङश्चे'ति ज्ञापकाच्च न तेभ्यस्तद्धितव्यावृत्त्यर्थ इति चेन्न।तदभावे स्वार्थद्रव्यलिङ्गसङ्ख्याकारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतापत्यादियोग इति कुत्सिते इति सूत्रभाष्योक्तन्यायेन, तस्यापत्यमित्यादौ तत्सम्बन्ध्यपत्यमित्याद्यर्थे प्रथमोच्चारितबोध्यात्प्रत्यय इत्यर्थस्य सत्त्वेन च सार्थकतद्धितानां सुबन्तादुत्पत्त्या अनुदात्तादेरित्यस्य प्राधान्यादुपस्थितसुबन्तविशेषणत्वापत्तौ सर्वस्य विकारः सार्व इत्यत्राञनापत्तेः, सर्वस्य सुपीत्याद्युदात्तत्वात् । तदधिकारसामर्थ्यात्तु प्रातिपदिकस्यैव तद्विशेषणमिति न दोषः, सर्वशब्दस्योञ्छादिपाठेनान्तोदात्तत्वात् । स्पष्टञ्चेदमत्र भाष्ये ।

भावबोधिनी : आक्षेपादिति । अवध्याकाङ्क्षाशान्तये प्रकृतेरित्यध्याहारादित्यर्थः । पचति भवतीत्यादौ प्रथमाया आपत्तिसम्भवेऽपि अनभिहिताधिकारे द्वितीयायाः प्राथम्यमित्यभिप्रेत्याह द्वितीयादिरिति । पश्य मृगो धावतीत्यादौ कर्मबोधक-धावतीत्यादिपदादिति भावः । आदिना ज्योतिष्ठोमेन यजेतेत्यत्र यजेतेत्यस्मात् तृतीयापत्तिर्गृह्यते । संख्याभावादिति । धावनादाविति शेषः । ननु धावनादिविशेषणे कर्तरि तत्सत्वात् तदापत्तिरिति चेत् तस्यापीदमेवोत्तरं संख्याभावादिति । तिङर्थसंख्यावच्छिन्ने आपाद्यमानसुबर्थसंख्यान्वयाभावादित्यर्थः । समाधानान्तरमाह तिङोक्तत्वादिति । फलस्य व्यपदेशिवद्भावेन कर्मत्वात् धातुमात्रस्य तदुपस्थापकत्वेन स्वरीत्या क्रियागताम् अन्यरीत्या कर्तृकारकादिगतां संख्यामादाय द्वितीयाप्राप्तेरिति भावः।

नन्वेककर्तृकपाकसमूह इत्यर्थे पचतीत्यादेरणादिव्यावृत्त्यर्थं स इत्यत आह तस्येति । ननु तस्येत्यादेः न षष्ठ्यन्तादित्यर्थः किन्तु तत्सम्बन्धीत्येव । तथा च एककर्तृकपाकसमूहसम्बन्धि इत्यर्थविवक्षायां पचतीत्यादेरणादिः प्राप्नोतीत्यत आह तिङश्चेति । तिङन्तात् तद्धितश्चेति तरबादिरेवेति नियमद्वारेति भावः । तेभ्यः = तिङन्तेभ्यः । तदभाव इति । अस्य सुबन्तविशेषणत्वापत्तावित्यत्रान्वयः । सुबन्तस्योपस्थितत्वसिद्ध्ये हेतुद्वयमाह स्वार्थेति तस्येति च । प्रथमोच्चारितेति । तस्यापत्यमित्याद्यर्थबोधकशास्त्रेषु प्रथमोच्चारितं यत् तस्येत्यादि तद्बोध्यः य उपग्वादिसम्बन्धः तद्बोधकं यत् उवङ् ङस् इत्यादि तस्मादित्यर्थः । घटकतयोपस्थित-प्रातिपदिकविशेषणत्वाभावायाह प्राधान्यादिति । आद्युदात्तेति । अन्तरङ्गेत्यादिः । स न्यायो लुक इव तदुपजीव्यकार्यस्यापि प्राबल्यबोधक इति भावः ।

बालबोधिनी : ङ्याप्प्रातिपदिकात् । समाहारद्वन्द्व इति । ङीप् च आप् च प्रातिपदिकञ्चैतेषां समाहार इति समाहारद्वन्द्वादेकवचनमुपपद्यते । प्रातिपदिकाधिकारस्य वैयर्थ्यं शङ्कते नन्विति । प्रकृतेराक्षेपादिति । परत्वस्यावध्यंशे नित्यसाकाङ्क्षत्वादिति भावः। तिङन्ताद्विभक्तिवारणायापि प्रातिपदिकाधिकारस्यावश्यकता नास्तीत्याह तिङन्तादिति। पश्य मृगो धावतीत्यादौ आख्यातार्थं प्रति विशेष्यभूतस्य धावनरूपधात्वर्थस्य दर्शनक्रियायां कर्मत्वेनान्वयाद्धावतीति तिङन्तात् तत्प्राप्तिरित्यर्थः । न द्वितीयादिरिति । प्रथमादिरिति तु नोक्तं, प्रथमाविधौ प्रातिपदिकार्थपदोपादानेन तिङन्ते प्रातिपदिकार्थाभावेन तदप्राप्तेः । द्वितीयाद्यप्राप्तौ हेतुमाह संख्याभावादिति । आख्यातार्थसंख्याया धात्वर्थे एवान्वयस्य सिद्धान्तितत्वेन तदर्थसंख्यावच्छिन्ने धावनादौ संख्यान्तराभावादित्यर्थः । नन्वन्यसंख्या-भावेऽपि तत्संख्यामादाय विभक्तिः कुतो न भवतीत्याह तिङोक्तत्वादिति । तथा चोक्तार्थानामप्रयोग इति न्यायेन तत्संख्यामादाय न पुनः विभक्त्युत्पत्तिरिति भावः ।

ननु धातुभ्यः स्वाद्युत्पत्तिवारणाय प्रातिपदिकाधिकार आवश्यक इत्यत आह धातुभ्य इति । अपवादत्वादिति । विशेषविहितत्वेनेति शेषः । यद्यपि फलस्य व्यपदेशिवद्भावेन तदाश्रयत्वेन कर्मत्वात् , धातुमात्रे फलवाचकत्वस्य सर्वसम्मतत्वात् स्वमते संख्यासत्वाच्च द्वितीया प्राप्नोति तथापि तिङां तदपवादत्वान्न भवतीति भावः । ननु धातुतिङन्तेभ्यस्तद्धितवारणाय प्रातिपदिकाधिकार आवश्यक इत्यत आह तस्येति । आदिना तेनेत्यादिपरिग्रहः । तस्यापत्यम्, तेन रक्तं रागात् इत्येवं तस्य, तेनेत्यादिसमर्थविभक्तिनिर्देशात् षष्ठ्यन्तादिभ्य एव तत्तत्प्रत्ययप्राप्तिरिति धातुतिङन्तयोः तत्तत्समर्थविभक्त्यन्तत्वाभावेन न तेभ्यस्तद्धितप्रसङ्ग इति भावः । तदप्रवृत्तौ हेत्वन्तरमाह ज्ञापकादिति । अतिशायने तमबिष्ठनौ (5-3-55) इति सूत्रेणातिशयविशिष्टार्थवृत्तेः स्वार्थे तमब्ष्ठिनौ विधीयेते । तिङन्तादतिशये द्योत्ये तमबर्थं तिङश्च (5-3-56) इति सूत्रमारब्धम् । यदि तिङन्तेभ्योऽपि तद्धितप्रत्ययः प्रवर्तेत तर्हि अतिशायने इति सूत्रेणैव तदन्तादपि तत्सिद्धौ, तदर्थमारब्धं तिङश्चेति सूत्रं व्यर्थं स्यात् । तद्व्यर्थं सत् तिङन्तात्तद्धितश्चेत् तरबादिरेवेति नियमार्थं भविष्यतीति तेनैव तद्धितान्तरव्यावृत्त्या न तदर्थमपि प्रातिपदिकाधिकार इति भावः । समादधाति तन्नेति ।

तदभावे = प्रातिपदिकादित्यस्याभावे । सार्थकतद्धितानां सुबन्तादुत्पत्तिमाह स्वार्थद्रव्येति । न्यायेनेति । स्वार्थे परिपूर्णं पदमर्थान्तरेणोपसङ्क्रामतीति न्यायेनेत्यर्थः । स्वार्थद्रव्यलिङ्गसंख्याकारकाणां क्रमेणोपस्थित्या तेन क्रमेण शब्दप्रादुर्भावेण येन क्रमेण शब्दप्रादूर्भावस्तेन क्रमेण तत्तत्प्रयुक्तकार्यप्रवृत्तौ स्वार्थे परिपूर्णता भवति । तथा परिपूर्णस्य

पदस्यार्थान्तरेणापत्यादिना योग इति सार्थकतद्धितानां सुबन्तादुत्पत्तिरिति सिद्धम् । तत्रैव हेत्वन्तरमाह तस्यापत्यमिति । प्रथमोच्चारितबोध्यादिति । प्रथमोच्चारितं बोध्यं वाच्यं यस्येति तदर्थः । बोध्यबोधकादिति यावत् । तस्यापत्यमित्याद्यर्थबोधकशास्त्रेषु प्रथमोपात्तं यत् तस्येत्यादि, तद्बोध्यो य उपग्वादिसम्बन्धस्तद्बोधकं यत् उपगु+ङस् तस्मादित्यर्थः। अनेन च सुबन्तादेव सार्थकतद्धितानामुत्पत्तिः सिद्धा । प्रातिपदिकात् तद्धितविधानञ्च दुर्वचमिति भावः । तर्हि किं जातमित्यत आह अनुदात्तादेरिति । घटकतयोपस्थित-प्रातिपदिकविशेषणत्वाभावायाह प्राधान्यादिति । सुबन्तविशेषणत्वापत्तावति । अनुदात्तादेः सुबन्तादञ् स्यादित्यर्थः स्यात् । सर्वस्य सुपीति । सौवरीणां = स्वरविधायकसूत्रभवानाम्, (भवार्थेऽणि द्वारादीनाञ्च इत्यैजागमः) सप्तमीनां तदन्तसप्तमीत्वात् सुबन्तस्य सर्वशब्दस्यादिरुदात्त इत्यर्थकेन सर्वस्य सुपीति सूत्रेणाद्युदात्तत्वे अनुदात्तादित्वाभावेन सार्व इत्यत्र अञनापत्तिरिति भावः । प्रातिपदिकाधिकारसत्वे कथं दोषपरिहार इत्यतआह सामर्थ्यादिति । तदधिकारेति । प्रातिपदिकाधिकारेत्यर्थः । तद्विशेषणम् = प्रातिपदिक-विशेषणम् । उञ्छादीति । उञ्छादीनां च (6-1-160) अन्त उदात्तः स्यादिति सूत्रार्थः । स्वाङ्गशिटामदन्तानामिति सूत्रेण प्राप्ताद्युदात्तत्वबाधनार्थमुञ्छादिगणपाठ इति भावः ।

न चान्तरङ्गानपीति न्यायेन लुङ्निमित्तप्रत्ययात्पूर्वमाद्युदात्ताप्राप्त्या तस्य सुबन्तविशेषणत्वेऽपि न दोष इति वाच्यं, तेन न्यायेन धर्मिग्राहकमानादन्तरङ्ग-निमित्तविनाशकलुक एव प्राबल्यबोधनेनादोषात् । 'सर्वस्य सुपी'त्यत्र सौवरीणां सप्तमीनां तदन्तसप्तमीत्वात् प्रत्यये परतः पूर्वस्य कार्यित्वाभावेन न लुमतेत्यस्याप्राप्तौ प्रत्ययलक्षणेन सुबन्ततया तस्यान्तरङ्गनिमित्तविनाशकत्वाभावात् । अत एव सर्वस्तोमादिबहुव्रीहेराद्युदात्तत्व-सिद्धिः । न चानुदात्तादिप्रकृतिकषष्ठ्यन्तादित्यर्थेन न दोष इति वाच्यं, गर्गादिभ्य इत्यादौ सुबन्तं प्रति गर्गादिनां विशेषणत्वासम्भवादगत्या लक्षणास्वीकारेऽपि प्रकृते लक्षणायां मानाभावात् । वस्तुतस्तत्रापि न लक्षणा । गर्गादिरूपात् प्रातिपदिकात् तत्सम्बन्ध्यपत्यमित्यर्थे प्रत्यय इत्यर्थे प्रातिपदिकात् परत्वं तद्व्यवधानेन भविष्यति । तद्व्यतिरिक्तव्यवधाने तु न, मानाभावात् । एतच्च मतुप्सूत्रे कैयटे स्पष्टमित्यन्यत्र विस्तरः।

भावबोधिनी : मानादिति । तच्च = प्रत्ययोत्तरपदयोश्चेति सूत्रस्थमुत्तरपदग्रहणम् । सौवरीणाम् = स्वरविधायकसूत्रभवानाम् । भवार्थेऽणि द्वारादीनाञ्च इत्यैजागमः । तस्य= सर्वशब्दोत्तरषष्ठीलुकः । नानाभावादिति । सुबन्तस्यानुदात्तादित्वसंभवात् कल्पकाभाव इति भावः । तद् व्यवधानेन = कुत्सितसूत्रभाष्योक्तन्यायप्राप्तसुब्व्यवधानेन । सामान्यग्रहण इत्यादि ।

बालबोधिनी : ननु 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति परिभाषया लुकस्तदुपजीव्यसमासादीनाञ्च प्राबल्यबोधनेन सर्वस्य विकारः सार्व इत्यत्र लुङ्निमित्ततद्धितप्रत्ययात् (तद्धितान्तस्य प्रातिपदिकत्वद्वारा सुपो लुगिति लुङ्निमित्तत्वं तद्धितस्य) पूर्वमाद्युदात्ताप्राप्त्या सुबन्तविशेषणत्वेऽपि न दोष इति शङ्कते न चेति । प्रत्ययात्= अनुदात्तादेरञः । तस्य = अनुदात्तादेरित्यस्य । समाधत्ते तेनेति । अन्तरङ्गानपीति न्यायेनेत्यर्थः । धर्मिग्राहकमानादिति । धर्मिणः = बहिरङ्गेण लुकाऽन्तरङ्गविधिबाधनस्य ग्राहकं यन्मानं = प्रत्ययोत्तरपदयोश्चेति सूत्रस्थमपर्यन्तग्रहणानुवृत्तिरूपमानं तस्मादित्यर्थः। त्वत्कृतमित्यादौ लुकोऽन्तरङ्गत्वमावेकवचने इत्यस्य निमित्तविनाशकता । न लुमतेति निषेधेन, लुकि विभक्तिपरत्वाभावात् । एवञ्च तया परिभाषया अन्तरङ्गविनाशकस्यैव लुकः तत्प्रयोजकसमासादीनाञ्च प्राबल्यबोधनात् सार्व इत्यत्र लुकोऽन्तरङ्गनिमित्तविनाशकत्वं नास्तीत्याह सर्वस्य सुपीति । सौवरीणाम् । स्वरशब्दात् तत्र भव इत्यणि द्वारादीनाञ्चेति ऐजागमः ।

अप्राप्ताविति । लुप्तप्रत्यये परतो यः पूर्वः तत्प्रकृतिभूतः लब्धाङ्गसंज्ञकस्तदुद्देश्यकं कार्यमाङ्गमनाङ्गं वा नेत्यर्थेन प्रकृते स्वरस्य लुप्तप्रत्ययविशिष्टोद्देश्यकत्वेऽपि लुप्तप्रत्यये परतः पूर्वकार्यत्वाभावान्न तन्निषेधप्राप्तिरिति स्पष्टं गुरुप्रसादे । तस्य = लुकः । एवञ्च सार्व इत्यत्र न लुमतेति निषेधाप्राप्त्या प्रत्ययलक्षणेन सुबन्ततया लुकोऽन्तरङ्गनिमित्तविनाशकत्वाभावात् न तस्य प्राबल्यं बोध्यत इति भावः ।

अत एव = अन्तरङ्गनिमित्तविनाशकलुक एव प्राबल्यबोधनादेव । सर्वस्तोमेति । 'स्तोमः स्तोत्रेऽध्वरे बृन्दे' इति कोशः । अन्तरङ्गनिमित्तविनाशकलुक एव प्राबल्यबोधनेन सर्वस्तोम इत्यादिबहुव्रीहौ सर्वस्य सुपीति आद्युदात्तत्वसिद्धिः । अन्यथा सर्वस्तोमादिबहुव्रीहौ सर्वस्य सुपीत्याद्युदात्तं बाधित्वा समासे लुकि च कृते परत्वादाद्युदात्तं बाधित्वा 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (6-2-1) इति बहुव्रीहिप्रयुक्ते पूर्वपदप्रकृतिस्वरे सर्वशब्दस्योञ्छादिगणपाठेनान्तोदात्तत्वात् अन्तोदात्तपूर्वपदकत्वापत्तिः, न तु सर्वस्य सुपीत्यभीष्टाद्युदात्तपूर्वपदकत्वसिद्धिरिति भावः ।

ननु अन्तरङ्गनिमित्तविनाशकलुक एव प्राबल्यमिति सङ्कोचाकरणेऽपि सर्वस्तोम इत्यत्र न दोषः । तथा हि - प्रकृतन्यायेन समासे लुकि च सति परमपि पूर्वपदप्रकृतिस्वरं बाधित्वा प्रतिपदविधित्वेनान्तरङ्गत्वात् सर्वस्य सुपीत्याद्युदात्तत्वसिद्धिरित्युच्यते तर्हि 'अर्णुहि' इत्यत्र दोष इति बोध्यम् । ऋणुधातुः तानादिकः । लोटि मध्यमपुरुषैकवचने

ऋण् + उ + हि इत्यवस्थायां लघूपधगुणात्पूर्वमुतश्चेति हेर्लुकि तन्न सिद्ध्येत् । प्रागुक्तरीत्या सङ्कोचकरणे तु लुकोऽन्तरङ्गगुणनिमित्तविनाशकत्वाभावात् तन्न्यायाप्रवृत्तौ अन्तरङ्गे गुणे ततस्संयोगपूर्वत्वान्न हेर्लुगिति तत्सिद्धिरिति स्पष्टं गुरुप्रसादे ।

प्रागुक्तग्रन्थे अत एवेत्यस्य तदन्तसप्तमीत्वाङ्गीकारादेवेति व्याख्यानमपि वर्तते । सौवरसप्तमीनां तदन्तसप्तमीत्वाङ्गीकारादेव सर्वस्तोमादिबहुव्रीहावाद्युदात्तत्वसिद्धिरित्यर्थः। तदन्तसप्तमीत्वानङ्गीकारेऽनेन न्यायेन समासे लुकि सर्वशब्दस्य उच्छादिपाठेन स्वतोऽन्तोदात्ततया पूर्वपदप्रकृतिस्वरेण तस्यैवातिदेशः स्यात् । तदन्तसप्तमीत्वे तु प्रागुक्तरीत्या न लुमतेति निषेधाप्रवृत्तौ प्रत्ययलक्षणेन सुबन्ततया परमपि पूर्वपदप्रकृतिस्वरं बाधित्वान्तरङ्गत्वात् सर्वस्य सुपीति आद्युदात्तपूर्वपदकत्वसिद्धिरिति भावः। स्पष्टञ्चेदं सदाशिवभट्टीये तथाऽन्यत्र च ।

ननु समर्थानां प्रथमाद्वेत्यधिकारेण समर्थादेव तद्धितोत्पत्त्या गर्गादिभ्य इत्यत्रेव अनुदात्तादेरञित्यस्यानुदात्तादिप्रकृतिकसुबन्तादित्यर्थस्य लक्षणयाऽवश्कमङ्गीकर्तव्यतया तेनैवेष्टसिद्धौ प्रातिपदिकाधिकारो व्यर्थः । यतः तत्सत्वेऽपि अनुदात्तादि यत्प्रातिपदिकं सर्वेत्यादि तन्न समर्थम् । यच्च सुबन्तं समर्थं तन्न प्रातिपदिकमिति सार्व इत्यत्राञ् न प्राप्नोतीति तदर्थं गर्गादिभ्य इत्यत्रेव अनुदात्तादेरित्यस्य तत्प्रकृतिके लक्षणा स्वीकार्या । तेनैव निर्वाहे किं प्रातिपदिकाधिकारेणेति शङ्कते न चेति । प्रकृते = अनुदात्तादेरञित्यत्र । मानाभावादिति। गर्गादिभ्य इत्यत्र गर्गादीनां सुबन्तविशेषणत्वासम्भवात्तत्र यथा तत्प्रकृतिके लक्षणा तथा अनुदात्तादेरञित्यत्रासम्भवो नास्ति । अनुदात्तादेः षष्ठ्यन्तविशेषणत्वसम्भवादिति न तत्र तत्प्रकृतिके लक्षणेति भावः । इदं प्राचामनुरोधेनेति सिद्धान्तमाह वस्तुत इति । तत्रापि = गर्गादिभ्य इत्यादावपि । अन्यथानिर्वाहे जघन्यवृत्तिकल्पनाया अन्याय्यत्वात् । तद्व्यवधानेन=सुब्व्यवधानेन । तद्व्यतिरिक्तव्यवधाने = सुब्व्यतिरिक्तव्यवधाने । अट्कुप्वाङितिवदिति भावः । एतच्च = उक्तार्थकथनम् । अन्यत्र = उद्योतादौ । मतुप्सूत्रे कैयटे चित्रा गावो यस्य सन्तीत्यत्र मतुप् कस्मान्न भवतीति शङ्कायाः, सामर्थ्याभावादवयवान्न भवति, समुदायादप्रातिपदिकत्वान्न भवतीति समाधानरूपभाष्यव्याख्यावसरे ''गोमानित्यत्रापि सुबन्तात् तद्धितोत्पत्त्या गोशब्दप्रकृतिकसुबन्तादुत्पद्यमानो मतुप् प्रत्ययान्तत्वादप्रातिपदिकत्वान्न स्यादित्याशङ्क्य प्रथमासमर्थात् प्रत्ययः, प्रातिपदिकात्तु परः श्रूयते'' इति समाहितम् ।

लिङ्गविशिष्टस्येति। इयश्च प्रातिपदिकसामान्यग्रहणे, तद्विशेषग्रहणे च । अनया परिभाषया ङ्याब्ग्रहणवैयर्थ्यस्य भाष्ये शङ्कितत्वात् । विशेषविषये बहुतरोदाहरणदानाच्च।

स्त्रीप्रत्ययसमभिव्याहारे प्रातिपदिकत्व- तद्व्याप्यधर्मा विशिष्टेऽनेनातिदिश्यन्ते, अत एव बहुव्रीहेरूधस इति सूत्रे भाष्ये-नद्यृतश्चेत्यस्य नद्यन्तबहुव्रीहेरित्यर्थे कुण्डोध्नीत्यत्र कबापादितः। अन्यथा तु ङ्यन्तस्य बहुव्रीहित्वाभावात्तदसङ्गतिः। नद्यन्तानां यो बहुव्रीहिरित्यर्थेन च परिहृत इत्यन्यत् । समासान्तेषु तत्परिभाषाऽभावस्तु ङ्याप्सूत्रभाष्योक्ताऽवयवविषय एव। समुदायविषये तत्प्रवृत्तावपि दोषाभावेन तदंशे तदप्रवृत्तौ न मानमित्याशयः।

भावबोधिनी : अनया परिभाषया ङ्याब्ग्रहणवैयर्थ्यप्रतिपादनपरभाष्यात् सामान्यग्रहणे श्रमणादिगणे स्त्रीलिङ्गपाठात् ज्ञापकाद्विशेषग्रहणे च प्रवृत्तिः आद्यफलम् । प्रातिपदिकाद्धत्वर्थे सर्वप्रातिपदिकेभ्यः इत्यादौ प्रवृत्तिरिति भावः । बहुतरोदाहरणेति । अयस्कुम्भीत्यत्र अतः कृकमीति सः, सर्वनाम्नस्तृतीया च भवत्याहेतोः, कुसूलकुम्भशालं बिले कुसुलीबिलम्, पूर्वसदृश पित्रा सदृशीत्येवमादयः ।

ननु प्रातिपदिकग्राहकशब्देन स्त्रीप्रत्ययविशिष्टस्य ग्रहणेऽपि प्रातिपदिकत्वतद्व्याप्यधर्मलाभः कथमित्यत आह स्त्रीप्रत्ययेति । तद्व्याप्यधर्मा इति। आनुपूर्वीविशेषतद्भिन्नधर्मा अपीत्यर्थः । अत एव = व्याप्यधर्मातिदेशादेव । अन्यथा = बहुव्रीहित्वरूपव्याप्यधर्मानतिदेशे । अवयवविषयक एवेति । समासावयव–प्रकृतिकस्त्रीप्रत्ययान्तविषये इत्यर्थः । यथा राज्ञीत्यत्र न राजन्शब्दातिदेशः । अतो न टच् । बहुव्रीहित्वादिकन्तु समासप्रकृतिकस्त्रीप्रत्ययान्ते अतिदिदिक्षित एवेति भावः ।

बालबोधिनी : लिङ्गविशिष्टस्येति । लिङ्गबोधकप्रत्ययविशिष्टस्येत्यर्थः । प्रातिपदिकत्व-तद्व्याप्यधर्माणां लिङ्गबोधकप्रत्ययविशिष्टेऽतिदेशादिति भावः । कुमारः श्रमणादिभिरिति ज्ञापकस्य विशेषापेक्षत्वाद्विशेषग्रहणे एव प्रवृत्तिरिति वदतां मतनिरासायाह इयश्चेति । उक्तपरिभाषा चेत्यर्थः । प्रातिपदिकसामान्यग्रहणे = प्रातिपदिकत्वेन रूपेण तद्ग्रहणे । तद्विशेषग्रहणे = प्रातिपदिकत्वव्याप्यधर्मावच्छिन्नग्रहणे । आद्ये परिभाषाप्रवृत्तौ मानमाह अनयेति । अनया परिभाषया ङ्याब्ग्रहणवैयर्थ्यप्रतिपादनपरभाष्येणेत्यर्थः । विशेषग्रहणे प्रवृत्तौ मानमाह विशेषेति । बहुतरोदाहरणेति । अतः कृकमीत्यादिना सत्वादिसिद्ध्यर्थ-मयस्कुम्भीत्यादेः बहुतरोदाहरणस्य प्रातिपदिकविशेषरूपस्य दानादित्यर्थः।

नन्वनया परिभाषया अयस्कुम्भीत्युदाहृते प्रातिपदिकत्वरूपेण कुम्भत्वादिना ग्रहणे प्रवृत्तिलाभेऽपि तद्व्याप्यबहुव्रीहित्वादिना ग्रहणे प्रवृत्तिर्न स्यादत आह स्त्रीप्रत्ययेति । तद्रहिते दृष्टा इति शेषः । स्त्रीप्रत्ययरहिते तत्प्रकृतौ दृष्टा इत्यर्थः । तद्व्यतिरिक्तधर्मा इति ।

आनुपूर्वी विशेषभिन्ना अपीत्यर्थः। विशिष्टे = स्त्रीप्रत्ययमात्रविशिष्टे। अत एव = आनुपूर्वी-विशेषव्याप्यधर्माणामप्यतिदेशादेव। कप् = नद्यृतश्चेति कप्। अन्यथा = प्रातिपदिकत्व-व्याप्यधर्मानतिदेशे। कुण्डोध्नीत्यत्र प्रातिपदिकत्वव्याप्यबहुव्रीहित्वानतिदेशे कबापादनमसङ्गतं स्यादिति भावः। नद्यन्तानां बहुव्रीहिरिति। नद्युत्तरपदको बहुव्रीहिरित्यर्थः।

ननु समासान्तविधावियं परिभाषा नेति ङ्याप्सूत्रभाष्यविरोधोऽत आह समासान्तेष्विति। अवयवविषयक एवेति। मद्रराज्ञीत्यादिसमासावयवराजन्शब्दविषयक एवेत्यर्थः। तथा च समासघटकराजन्शब्दत्वादिकमेव समासान्तविधावनया परिभाषया नातिदिश्यते। समुदायवृत्तिबहुव्रीहित्वादिकं तु अतिदिश्यत एवेत्यर्थ इति विषमपदविवृतौ स्पष्टम्। समुदायेति। यत इत्यादि। समुदायविषये = कुण्डोध्नीत्यादौ। तत्प्रवृत्तावपि = लिङ्गविशिष्टपरिभाषायाः प्रवृत्तावपि दोषाभावेन = नद्यन्तानां यो बहुव्रीहिरित्याश्रयणात्। तदंशे = समुदायांशे, तदप्रवृत्तौ = लिङ्गविशिष्टपरिभाषाया अप्रवृत्तौ।

ङ्याबन्तादिति। ङ्याब्ग्रहणं स्त्रीप्रत्ययमात्रोपलक्षणं, तेन 'ब्रह्मबन्धूतरा' युवतितरेत्यादेः सिद्धिः। 'जातेश्चे' ति निषेधान्न पुंवत्वम्; वयोवाचिनां वैकल्पिकजातिकार्यस्य वक्ष्यमाणत्वात्।

भावबोधिनी : उपलक्षणमिति। तथा च स्त्रीप्रत्ययान्तात् तद्धितोत्पत्तिरित्यर्थः पर्यवसितः। तत्फलमाह तेनेति। इत्यादेरित्यादिना युवतिकासंग्रहः। सिद्धिरिति। ऊङन्ततिप्रत्ययान्तात् तद्धितसिद्धिरित्यर्थः। ननु युवतीतरेत्ययुक्तम्, तसिलादिषु पुँवद्भावापत्तेरत आह जातेश्चेति। ननु वयसो नित्यत्वेन युवन् शब्दस्य जातिवाचकत्वमत आह वयोवाचिनामिति। वैकल्पिकेति। आकृतिग्रहणेत्यादिलक्षणे अनित्यव्यावर्तकविशेषणाभावात् युवत्वादिकमपि जातिरेव। न चैवं युवजानिरित्यत्रापि निषेधापत्तिरिति वाच्यम्। अपर आहेत्यादिना 'प्रादुर्भावविनाशाभ्यां द्रव्यस्य युगपद्गुणैः' इत्यादिना यावद्द्रव्यभावित्वघटितलक्षणान्तरकरणेन युवत्वस्य तन्मते जातित्वाभावात्। एवञ्च भिन्नर्षिकर्तृकलक्षणद्वयप्रामाण्येन वयोवाचिनां जातिकार्यविकल्प इति भावः।

बालबोधिनी : ङ्याबन्तादिति। लिङ्गविशिष्टपरिभाषयैव सिद्धे ङ्याब्ग्रहणं ङ्याबन्तात् तद्धितोत्पत्तिर्यथा स्यात् ङ्याब्भ्यां प्राङ् माभूदित्येवमर्थम्। ननु ङ्याब्ग्रहणेन ङ्यन्तादाबन्तात् तद्धितोत्पत्तिरिति सिद्धावपि ऊङन्तादावनिर्वाह इति शङ्कायामाह स्त्रीप्रत्ययमात्रोपलक्षणमिति। तत्फलमाह तेनेति। सिद्धिः = ऊङन्तात् तद्धितसिद्धिः। अन्यथा लोहितिकेत्यादिवदादावेव स्यादिति भावः। आदिना युवतिकेत्यादिपरिग्रहः।

ननु युवतितरेत्यादौ तसिलादिषु कृत्वसुजन्तेषु परेषु स्त्रियाः पुँवत् स्यादित्यर्थकेन 'तसिलादिष्वाकृत्वसुचः' इति सूत्रेण पुँवद्भावः प्राप्नोतीति न कश्चिद्विशेषोऽत आह जातेश्चेति । जातेः परो यः स्त्रीप्रत्ययस्तदन्तं न पुँवदित्यर्थः । ननु वयोवाचिनां कथं जातित्वम्? वयसोऽनित्यत्वादत आह वयोवाचिनामिति ।

तद्धित इति। एतच्च समासान्ततिप्रत्ययाद्यतिरिक्तपरं ; व्याख्यानात् । एतेन यूनीतिः बहुगोमतीकेति स्यादित्यपास्तम् । एवञ्च स्त्रीप्रत्ययेषु, अत्यन्तस्वार्थिकानारभ्य तद्धितेषु च ङ्याब्ग्रहणासम्बन्धो व्याख्यानात् । अत एव लोहिनिकेत्येतत्सिद्धये लोहिताल्लिङ्गबाधनं वेति चरितार्थम् ।

<u>भावबोधिनी :</u> एतच्च =तद्धितपदञ्च । तिप्रत्ययादीत्यादिना अत्यन्तस्वार्थिकपरिग्रहः। एतेन = समासान्ततद्धितप्रत्ययातिरिक्ततद्धितान्तानामेव स्त्रीप्रत्ययान्तादुत्पत्तिस्वीकारेण । अपास्तमिति । प्रकृतेति । प्रत्यायकप्रत्यययोः ङीपः पूर्वमेवोत्पत्त्या युवतिः, बहुगोमत्केत्येव रूपमिति भावः । तद्धितपदस्य समासान्ततिप्रत्ययाद्यतिरिक्तपरत्वे सति यत्फलितं तदाह एवञ्चेति । आरभ्येति । अनेन समासान्तपरिग्रहः । व्याख्यानादिति । ङ्याब्ग्रहणस्य स्त्रीप्रत्ययमात्रोपलक्षणत्वस्य तत्प्रत्याख्यानानुरोधेनावश्यकतया स्त्रीप्रत्ययभिन्नतद्धितस्यैव तद्धितपदेन ग्रहणमिति यूनस्तिरित्यत्र तदसम्बन्धस्सिद्धः । अत्यन्तस्वार्थिकादिषु तेषामतिरिक्तार्थाभावेन स्वार्थद्रव्येत्यादिन्यायाविषयतया सुबन्तात् तद्धित इति सिद्धान्तस्याभावात् ङ्यापोः पृथक् प्रवृत्तेश्च तदसम्बन्धस्सिद्ध इति युक्तिमूलकव्याख्यानादित्यर्थः । न्यायसिद्धेऽर्थे वार्तिकसम्मतिमप्याह अत एवेति । लिङ्गबाधनं वेति । लोहितान्मणाविति कप्रत्ययेन लिङ्गबोधकप्रत्ययस्य ङीबादेः विकल्पेन बाधो वक्तव्य इत्यर्थः । बाधे लोहितिका, बाधाभावे वर्णादनुदात्तादिति ङीपि नकारे च लोहिनिकेति रूपमिति बोध्यम् । चरितार्थमिति । अत्यन्तस्वार्थिकेषु ङ्याब्ग्रहणसम्बन्धे तु बाधोक्तिरसङ्गता ङ्याबुत्पत्त्यनन्तरमेतदुत्पत्तेः न्याय्यत्वादिति भावः । तथा च आर्यिकेत्यत्र नव्यमते नेत्वविकल्पः टापः पूर्वमेव कप्रत्ययोत्पत्तेः । नन्वेवं ङ्याब्ग्रहणं व्यर्थम् । अत्यन्तस्वार्थिकानामन्तरङ्गत्वेन परत्वेन ङ्याब्भ्यां प्रागेवोत्पत्तेरिष्टत्वात् । सार्थकतद्धितानां कुत्सित इति सूत्रभाष्योक्तन्यायेनैव सुबन्तादुत्पत्तेरिष्टत्वादिति चेन्न । लिङ्गविशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थत्वात् । तेन समासान्तादिविधौ तदप्रवृत्तिरिति मद्रराज्ञीत्यादौ न टजिति भावः ।

<u>बालबोधिनी :</u> एतच्च = तद्धितग्रहणञ्च । तिप्रत्ययेति । यूनस्तिरित्यर्थः ।

आदिनाऽत्यन्तस्वार्थिकानां परिग्रहः । व्याख्यानादिति । ङ्याप्प्रातिपदिकात् (4-1-1) इति सूत्रे भाष्ये 'तद्धितार्थविधानार्थं तु ङ्याब्ग्रहणं कर्तव्यं ङ्याबन्तात् तद्धितोत्पत्तिर्यथा स्यात् । कालितरा, हरिणितरा, खट्वातरा मालातरा' इति प्रयोजनमुक्त्वा ततः 'तत्र समासान्तेषु दोषो भवति, बहुगोमत्का, बहुयवमत्का' इति दोष उक्तः । बहवो गोमन्तोऽस्या इति बहुव्रीहौ कृते ङीपि कबुत्पत्तौ बहुगोमतीकेत्यनिष्टापत्तिरिति भावः । तदुत्तरं स्वार्थे टाबादयो भवन्ति । समासान्ता अपि स्वार्थिकाः । उभयोः स्वार्थिकयोः परत्वात् समासान्ता भविष्यन्तीति तद्दोषः परिहृतः । स्वार्थे परिपूर्णं पदमर्थान्तरेणोपसंक्रामते इति न्यायेनैव ङ्याबन्तात्तद्धितोत्पत्तिसिद्धौ तदनावश्यकमिति तात्पर्येणैव परत्वात् समासान्ता इत्युक्तं भाष्ये । 'ङ्याब्ग्रहणप्रत्याख्यानेन समासान्तेषु परिहार' इति कैयटः । एवञ्च प्रत्याख्यातृमते स्त्रीप्रत्ययात् प्रागेव परत्वात् समासान्तानामुत्पत्त्या तदेकवाक्यतया आरम्भपक्षेऽपि समासान्ताद्यतिरिक्ततद्धितानामेव स्त्रीप्रत्ययान्तादुत्पत्तिराश्रयणीयेति भावः । अयं भावः । ङ्याबन्तादेव तद्धितोत्पत्तिरिति नियमेन लोहिनिका इति आर्यका इति च सिद्ध्यति । तथा हि अत्यन्तस्वार्थिकत्वेनान्तरङ्गः परश्च लोहितान्मणौ इति कन् ङीपं बाधेत । ततो लोहितिकेत्येव स्यात् । इष्यते तूभयम् । ङीब्ग्रहणसामर्थ्यात्तु ङ्यन्तात् कनि वर्णादनुदात्तादित्यस्य वैकल्पिकत्वात् लोहितिका , लोहिनिका इति रूपद्वयं सिद्ध्यति । आर्यशब्दात् न सामिवचने इत्यत्र ज्ञापयिष्यमाणोऽत्यन्तस्वार्थिकोऽपि कन् आब्ग्रहणसामर्थ्यात् पूर्वं न प्रवर्तते । तेन आर्यशब्दात् पूर्वं टापि ततः कनि ह्रस्वे आकारस्थानिकाकारत्वात् उदीचामात इतीत्वविकल्पः सिद्ध्यति । अन्यथा आर्यशब्दात् कनि समुदायोत्तरटापैव लिङ्गसम्बन्धबोधनसम्भवात् एकाज्द्विर्वचनन्यायेन समुदायादेव टापि कनः पूर्वं टाबभावे आतःस्थानिकत्वाभावाद्विकल्पासिद्धिरिति भावः । वस्तुतस्तु सुबन्तादेव तद्धितोत्पत्तिरिति सिद्धान्तात् सुपः प्रागेव लिङ्गबोधकप्रत्ययप्रवृत्तिः । स्वार्थादिप्रयुक्तकार्याणां क्रमिकत्वस्वीकारादिति ङ्याब्ग्रहणमनावश्यकम् । स्वार्थः प्रवृत्तिनिमित्तम् । विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वात् पूर्वं जात्यादिज्ञानं, ततो धर्मित्वेन प्रधानत्वाल्लिङ्गादिभिरप्याकाङ्क्षितत्वात् तदाश्रयज्ञानं ततः स्वमात्रापेक्षत्वाल्लिङ्गस्य ज्ञानं, ततो विजातीयक्रियाकारकापेक्षया सजातीयपदार्थापेक्षसंख्यायाः प्रथममुपस्थित्या तज्ज्ञानं, ततः कारकरूपविभक्त्यर्थाकाङ्क्षा तन्निवृत्तौ हि बहिर्भूतकुत्सादियोग इति कुत्सिते इति सूत्रे भाष्ये स्पष्टम् । एवञ्च ज्ञानक्रमानुरोधेनैव तत्तत्प्रयुक्तकार्यप्रवृत्तिरिति न्यायसिद्धार्थानुवाद एव ङ्याब्ग्रहणमिति भट्टोजीदीक्षितस्याशयः । इत्थं मनोरमोक्तं ङ्यब्ग्रहणफलं लोहिनिका, आर्यकेति, तत्रास्वारस्यसूचनायाह नागेशभट्टः एतच्चेति ।

अयमत्र ग्रन्थकृदाशयः । तद्धितपदं समासान्ततिप्रत्ययात्यन्तस्वार्थिकातिरिक्तपरम् । तथा चात्यन्तस्वार्थिकाः स्त्रीप्रत्ययात् प्रागेव प्रवर्तन्ते । ङ्याब्ग्रहणं स्त्रीप्रत्ययमात्रोपलक्षणम् । स्वार्थे परिपूर्णं पदमिति न्यायसिद्धार्थानुवादकमेव ङ्याब्ग्रहणम् । यद्यपि अत्यन्तस्वार्थिकानां स्त्रीप्रत्ययात् प्रगुत्पत्तौ आर्यका, आर्यिकेति रूपद्वयं न सिद्ध्यति तथापि आर्यिकेत्यस्यैवेष्टत्वात् तन्न दोषः । लोहिनिकेति तु लोहिताल्लिङ्गबाधनं वेति वचनेनैव सिद्ध्यतीत्यभिप्रायः । हरिणिकेति तु हरिणशब्दात् प्रकृत्यन्तरात् कनि टापि प्रत्ययस्थादितीत्वेन सिद्ध्यति । एनेति प्रकृत्यन्तरस्याभावात् एनिकेति त्वसाधुरेव । एतशब्दात् एतिकेत्येवेति बोध्यम् । अत एव भाष्ये सामान्यतो नियमाभिप्रायेण समासान्तेषु दोषः । बहुगोमतीकेति स्यादिति परेण दोषोद्भावने कृते 'न दोषः तेऽपि स्वार्थिकाः' ततः 'परत्वात् समासान्ताः' इत्युक्तम् । ततः 'कथं हरिणिकेति प्रकृत्यन्तरं सः । कथं लोहिनिकेति? वक्ष्यत्येत् लोहिताल्लिङ्गबाधनं वा' इति प्रतिपादितम् । एवञ्च एनिका, आर्यका इत्यनयोरभाव एव स्पष्टं लभ्यते ।

एतेन = तद्धितपदस्य समासान्ततिप्रत्ययाद्यतिरिक्तपरत्वेन सङ्कोचकरणादेव । अपास्तमिति । समासान्तादीनां ङ्याब्भ्यां प्रागेव प्रवृत्तेरिष्टत्वादेव यूनीतिरित्याद्यापत्तिरिति शङ्काया अवकाशो नास्तीति भावः । एवञ्चेति । तद्धितपदस्योक्तरीत्या सङ्कोचादेवेत्यर्थः । आरभ्येति । पठितेष्विति शेषः । व्याख्यानादिति । कुत्सित इति सूत्रभाष्यात्, प्रकृतसूत्रस्थभाष्याच्चेत्यर्थः । अत एव = अत्यन्तस्वार्थिकेषु ङ्याब्ग्रहणासम्बन्धादेव । चरितार्थमिति । अन्यथा अत्यन्तस्वार्थिकानामपि स्त्रीप्रत्ययान्तादेवोत्पत्त्या लोहितशब्दात् वर्णादनुदात्त इति ङीपि नकारादेशे ततः लोहितान्मणाविति कनि लोहिनिकेति रूपस्य, ङीपो वैकल्पिकत्वेन तदभावे लोहितिकेत्यस्य च सिद्धौ लोहिताल्लिङ्गबाधनं वेति व्यर्थं स्यादिति भावः ।

'अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्ति'रिति 'सर्वस्य द्वे' इति सूत्रे भाष्ये स्पष्टं, कैयटे च। तत्र हि 'पदस्ये'त्यस्य प्रयोजनं द्विपदिकेत्यादौ द्वित्वसङ्ख्यायुक्तपदार्थस्य वीप्सितत्वात् , वीप्सायामेकत्वलक्षणसङ्ख्याया अनन्तर्भावात्समासाद्विभक्त्यभावेन पदत्वाभावात्प्राक्तद्धितोत्पत्तेर्द्विर्वचनाभाव इत्युक्तम् । पुंयोगादिति सूत्रे भाष्येऽप्येतत् स्फुटम्। तत्र हि-गतिकारकोपपदानामित्यस्याः- साङ्कूटिनमिति प्रयोजनमुक्तम् । तत्र हि 'अभिविधौ भाव इनुणि कूटिन्शब्दादणप्रत्ययविभक्त्योः प्राप्तयोः स्वार्थिकत्वेनान्तरङ्गत्वादणि कूटिन्नित्यस्यैव वृद्धिः स्या'दित्युक्तम् । तस्यापि सुबन्तादुत्पत्तौ तु पूर्वं सुपि

इनुणन्तत्वरूपाधिकसापेक्षत्वेन बहिरङ्गतयाऽणः पूर्वं समासे विशिष्टादणि रूपसिद्धौ भाष्यासङ्गतिः। प्राक्सुबुत्पत्तेः समासे तु - उक्तरीत्यैवान्तरङ्गत्वात्पूर्वं समासे ततो विशिष्टादणिति साङ्कूटिनसिद्धिरित्यन्यत्र विस्तरः।

भावबोधिनी : ननु घकालतनेष्विति ज्ञापकेन तद्धितानां सुबन्तादेवोत्पत्त्या ततः पूर्वमेव ङ्याबुत्पत्तेर्वाच्यतया लोहिताल्लिङ्गबाधनं वेति पुनरयुक्तमित्यत आह अत्यन्तस्वार्थिकानामिति । प्रयोजनमिति । अस्य द्विर्वचनाभाव इत्यनेनान्वयः । द्विपदिकेति । द्वौ पादौ ददातीत्यर्थे तद्धितार्थेति समासे पादशतस्य संख्यादेः वीप्सायां पुनर्लोपश्चेति स्वार्थिको वुन् । पदस्येत्यस्येति । अधिकृतस्येत्यादिः । एकत्वलक्षणेति। द्वित्वसंख्यायुक्तपदार्थस्य व्याप्तिबोधकसमये एकत्वाननुभवादिति भावः । विभक्त्यभावेन एकवचनरूपेत्यादिः । द्विर्वचनाभाव इति । तद्धितप्रकृतेः द्विपादशब्दस्येति शेषः । इदञ्चोक्तार्थानामिति न्यायमननुसन्धाय प्रवृत्तम् । वुन्प्रकृत्यैव वीप्साया उक्तत्वेन पुनस्तद्द्योतकद्वित्वाप्राप्तेः द्योतकविषये तन्न्यायाप्रवृत्तेर्वेत्याशयः ।

नन्वेकत्वस्य वीप्सायामनन्तर्भावेऽपि औत्सर्गिकैकवचनमङ्गीकृत्य सुबन्तात्तद्धितोत्पत्तावपीदं भाष्यकैयटं सूपपादम् । परमपि द्वित्वं नित्यत्वापवादत्वाभ्यां बाधित्वा वुनि अकारे च भत्वेन पदत्वाभावात् न तद्धितप्रकृतेर्द्वित्वम् । वीप्सायां द्वित्वैकत्वयोरनन्तर्भावात् न तद्धितान्तपदस्येत्यरुचेराह पुंयोगादिति । तत्र हीति । कूटधातोरिति शेषः । संख्यापेक्षत्वेन विभक्तेर्बहिरङ्गत्वमिति भावः । तस्यापि = अणिनुण इत्यत्यन्तस्वार्थिकाणोऽपि । इनुणन्तत्वरूपेति । समासविधौ गतित्वज्ञानं समर्थत्वज्ञानञ्चेति द्वयम् । अण्विधौ तु प्रातिपदिकत्वं, समर्थत्वम्, इनुणन्तत्वञ्चेति त्रयमिति भावः । न च सुबन्तद्वयसापेक्षसमासापेक्षया एकसुबन्तसापेक्षाणेवान्तरङ्ग इति वाच्यम् । एतद्भाष्यप्रामाण्येन पदद्वयसापेक्षादपि अधिकसापेक्षरूपविशेषापेक्षस्य बहिरङ्गत्वादिति विषमीकारः । मिश्रस्तु अण्प्रत्ययो भवतीत्यर्थे जननीये सौत्राण्पदादण्प्रत्ययस्य स्वरूपज्ञानस्याप्यपेक्षासत्वेन सर्वथा समासापेक्षयाऽणो बहिरङ्गत्वमित्यत आह उक्तरीत्याधिकानपेक्षत्वेन समासोऽन्तरङ्ग इत्युक्तरीत्या । इदञ्चान्तरङ्गत्वं समासस्य प्राचामनुरोधेन । वस्तुतस्तु सञ्चस्कारेत्यादौ सुट इवान्तरङ्गत्वं बोध्यम् । तदाह अन्यत्रेति ।

बालबोधिनी : ननु घकालतनेष्विति ज्ञापकेन सर्वेषां तद्धितानां सुबन्तादेवोत्पत्तिरिति वदतां मते ततः पूर्वमेव ङ्याबुत्पत्तेर्वक्तव्यतया कथमत्यन्तस्वार्थिकेषु प्रागुक्ता व्यवस्थेति

शङ्कायामाह अत्यन्तेति । सुबुत्पत्तेः पूर्वमिति । अत्यन्तस्वार्थिकानामन्तरङ्गत्वात् सुबुत्पत्तेः पूर्वं भवितुं युक्तत्वादित्यर्थः । तत्र = भाष्ये । उक्तार्थासंस्पर्शादाह कैयटे इति । प्रयोजनमिति। द्विर्वचनाभाव इत्यनेनान्वयः । द्विपदिका। द्वौ द्वौ पादौ ददतीत्यर्थे तद्धितार्थे ति समासे पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च (5-4-1) इति सूत्रेण स्वार्थिके वुन्प्रत्यये लोपे पदादेशे टापीत्वे रूपम् । पदस्येति । अधिकृतस्येति शेषः । द्वित्वसंख्यायुक्तपदार्थस्य = द्वित्वसंख्यायुक्तस्य पादपदार्थस्य, न तु तद्दातुः । एकत्वलक्षणेति । द्वित्वसंख्यायुक्तपदार्थस्य व्याप्तिबोधसमये दातृगतैकत्वसंख्याया अननुभवादित्यर्थः । अनन्तर्भावादिति । एतदुत्तरं सुबुत्पत्तेः प्राक् टाबन्तस्येति शेषः । तस्य पदत्वाभावाद् द्विर्वचनाभावः प्रयोजनमित्यन्वयः। ननु कृते तद्धितेऽपवादत्वात्, वीप्साया तेनोक्तत्वाद्वा द्विर्वचनाभावेऽपि तदुत्पत्तेः प्राक् समासस्य कुतो न द्विर्वचनमित्यत आह समासेति । विभक्त्यभावेनेति । विभक्तेः संख्यापेक्षत्वेन बहिरङ्गत्वात्, तद्धितस्य च स्वार्थिकत्वेनान्तरङ्गत्वात्तेन बाधात् न तदुत्पत्तेः पूर्वं विभक्त्युत्पत्तिरिति भावः । पदत्वाभावादिति । सुबूत्पत्तेः प्राक् टाबन्तस्य, तद्धितोत्पत्तेः प्राक् समासस्य च द्विर्वचनाभावे पदत्वाभावादिति हेतुरित्यर्थः ।

अयमत्र ग्रन्थसन्दर्भः । सर्वस्य द्वे (8-1-1) इति सूत्रे भाष्ये सर्ववचनं किमर्थमिति प्रतिपादनसन्दर्भे 'न वा पदाधिकारात् । न वा वक्तव्यम् । पदाधिकारात् । पदस्येति प्रकृत्य द्विर्वचनं वक्ष्यामि । तच्चावश्यं पदग्रहणं कर्तव्यं समासनिवृत्त्यर्थं तद्धितनिवृत्त्यर्थं, वाक्यनिवृत्त्यर्थञ्च । तद्धितनिवृत्त्यर्थं - द्विपदिका, त्रिपदिका' इत्युक्तं भाष्ये । तत्र प्रदीपे 'द्विपदिकेति । द्वित्वसंख्यायुक्तः पदार्थो वीप्स्यते इति वीप्सायां स्त्रीत्वैकत्वलक्षणयोः लिङ्गसंख्ययोरनन्तर्भावात् प्राक् तद्धितोत्पत्तेः समासे कृते पदत्वाभावाद् द्विर्वचनाभाव' इति कैयटः । द्वौ द्वौ पादौ ददातीत्यर्थे तद्धितार्थेति समासे पादशतस्य संख्यादेरिति वीप्सायां वुन्प्रत्यये, लोपे, पदादेशे टापि द्विपदिकेत्यादौ द्वित्वसंख्यायुक्तपादपदार्थस्य व्याप्तिबोधसमये ददातीति दातृगतैकत्वस्याननुभवात् सुबुत्पत्तेः प्राक् टाबन्तस्य पदत्वाभावात् द्विर्वचनाभावः। एवं विभक्तेः संख्यापेक्षत्वेन बहिरङ्गत्वात् तद्धितस्य च स्वार्थिकत्वेनान्तरङ्गत्वात् तेन बाधात् तद्धितोत्पत्तेः पूर्वं न समासाद्विभक्त्युत्पत्तिरिति पदत्वाभावात् तद्धितोत्पत्तेः प्रागपि समासस्य द्विर्वचनाभावस्सिद्धः। तथा च पदत्वाभावादिति टाबन्तस्य, तद्धितोत्पत्तेः प्राक् समसस्य च द्विर्वचनाभावे हेतुः । अनेन कैयटग्रन्थेनात्यन्तस्वार्थिकानां सुबुत्पत्तेः प्रागेवोत्पत्तिरिति स्पष्टं प्रतीयते । स्वार्थिकप्रत्ययानां सुबुत्पत्त्युत्तरमुत्पत्तौ तु द्विपादेत्यस्यापि प्रत्ययलक्षणेन पदत्वात् भाष्यकैयटासङ्गतिः स्पष्टैव ।

ननु समासाद्विभक्त्यभावेन पदत्वाभावात् प्राक् तद्धितोत्पत्तेर्द्विर्वचनाभाव इति कैयटवचनमत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्तौ गमकमिति वक्तुं न शक्यते । तद्धितोत्पत्तेः पूर्वं सुबुत्पत्तावपि तद्वचनस्य सूपपन्नत्वात् । पूर्वं सुबुत्पत्तावपि उपसञ्जनिष्यमाणन्यायेन तद्धितोत्पत्त्यनन्तरं जायमानभत्वेन सुप्तिङन्तमिति पदत्वस्य बाधादित्यरुचेर्निरुक्तार्थे भाष्यं प्रमाणयति पुँयोगादिति । एतत् = अत्यन्तस्वार्थिकानां सुबुत्पत्तेः प्राग्भवनम् । तत्र = भाष्ये । गतिकारकेति । गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक् सुबुत्पत्तेरिति परिभाषा । तत्र हि = साङ्कूटिनमित्यत्र कूटधातोः । इनुणीति । अभिविधौ भाव इनुणिति सूत्रेणेत्यर्थः । अण् = अणिनुण इति सूत्रेण । स्वार्थिकत्वेनेति । अन्तरङ्गत्वादिति । स्वार्थमात्रापेक्षस्याणोऽन्तरङ्गत्वम्, संख्याकारकापेक्षत्वेन विभक्तेर्बहिरङ्गत्वमिति भावः । वृद्धिः स्यादिति । गतिकारकोपपदानामित्यस्याभावे सुबुत्पत्तेः पूर्वं समासाप्राप्त्या, विभक्त्यपेक्षयाऽन्तरङ्गत्वात् कूटिन्शब्दादणि तस्यैव वृद्धिः स्यादिति सङ्कौटिनमित्यनिष्टं स्यादितिभावः । तस्यापि = अत्यन्तस्वार्थिकाणोऽपि । अपिना समाससमुच्चयः । पूर्वं सुपीति । अण्प्रत्ययसमासयोः प्राप्तयोरिति शेषः । अधिकसापेक्षत्वेनेति । समासविधौ गतित्वज्ञानं, समर्थत्वज्ञानश्चेति द्वयम् । अण्विधौ प्रातिपदिकत्वं, समर्थत्वम् इनुणन्तत्वश्चेति त्रयमिति अन्तरङ्गत्वात् पूर्वं समासे ततः सङ्कूटिन् इति विशिष्टादण् प्रत्यय इति भावः । भाष्यासङ्गेतिरिति । निरुक्तरीत्या पूर्वं समासे विशिष्टादणि समुदायस्यादिवृद्धौ साङ्कूटिनमिति रूपसिद्धौ गतिकारकोपपदानामिति परिभाषायाः तत्फलत्वकथनपरं भाष्यमसङ्गतं स्यादिति भावः । अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमेवोत्पत्तिरिति सिद्धान्ते तु कृदन्तेन समासस्यैतत्फलत्वकथनं सङ्गच्छत इत्याह प्रागिति । उक्तरीत्येति । अण इनुणन्तत्वरूपाधिकपदार्थसापेक्षतया बहिरङ्गतया तन्निरूपितान्तरङ्गत्वादित्यर्थः ।

स्वौजस। सूत्रे समाहारद्वन्द्वः। टङ्पाश्चेत इति। न च फलभावः, लोपस्यैव फलत्वात् । तत्र तत्रेतरव्यावृत्या चरितार्थानां लोपफलकत्वस्वीकारे बाधकाभावात् । काम्यजादौ तु लोपे सति वर्णोच्चारणवैयर्थ्यान्न तन्मात्रफलिकेत्सञ्ज्ञेति बोध्यम् ।

<u>**भावबोधिनी :**</u> स्वौजसमौट् । सूत्रस्यैकवचनान्तत्वोपपत्तये आह समाहारद्वन्द्व इति। जसादौ रुत्वादिकं सौत्रत्वान्नेति भावः । वस्तुतस्तु तिप्तस्झीत्यत्र वक्ष्यमाणरीत्या लाघवेन निर्विभक्तिकानुकरणान्येतानीति रुत्वाभावो न्याय्य एवेति बोध्यम् । ननु लोपमात्रकालिकेत्संज्ञा न युक्ता, उच्चारणसामर्थ्यात् । अन्यथा काम्यचः ककारस्यापि सा स्यादित्यत आह इतरव्यावृत्त्या चरितार्थानामिति ।

बालबोधिनी : स्वौजसमौट् । समाहारद्वन्द्व इति । अत एवैकवचनान्तत्वोपपत्तिः इतरेतरयोगद्वन्द्वे तु बहुवचनं स्यात् । सुरौर्जसित्यादिरीत्या विभक्तिश्रवणापत्त्या पृथक्पदत्वं न । जसादौ रुत्वं सौत्रत्वान्नेति भावः । यदपि स्वौजसमौडिति इतरेतरयोगः, सौत्रत्वाल्लुगिति केचित् । तन्न तथा सति गौरवापत्तेः । सुङस्योरुकारेकारौ जशटङपाश्चेतः । ननु लोपमात्रफलकत्वेनेत्संज्ञाकथनमयुक्तम् । उच्चारणवैयर्थ्यात् । अन्यथा काम्यजादौ कादीनामित्वापत्तिरित्यत आह तत्र तत्रेति । टाङसिङसामित्यादौ विशेषणार्थतया चरितार्थानामिति भावः । यथा सोरुकारः अर्वणस्त्रसावनञ् इत्यत्र विशेषणार्थः । ङसेरिकारः टाङसिङसाम् ङसिङ्योः स्मात्स्मिनौ इत्येतदर्थः । जश्शसोर्जकारशकारौ जसः शी, तस्माच्छसोरित्यनयोर्विषयविभागार्थौ । औटष्टकारः सुडिति प्रत्याहारार्थः । टाटकारस्तु टाङसिङसाम्, द्वितीयाटौस्स्वेन इति विशेषणार्थः । ङेप्रभृतीनां ङकारो घेर्ङितीति ङेरामिति विशेषणार्थः । सुपः पकारस्तु प्रत्याहारार्थः । काम्यजादौ दोषमाशङ्क्याह काम्यजादाविति। वर्णोच्चारणवैयर्थ्यादिति । इतरव्यावृत्तिरूपफलाभावादित्यर्थः ।

न विभक्ताविति निषेधोपयोगिनीं विभक्तिसञ्ज्ञामाह- विभक्तिश्च। चकार एकसञ्ज्ञाधिकारेऽपि पुरुषवचनसञ्ज्ञाभ्यां समावेशार्थः । अन्यथा पर्यायः स्यात् । 'सुप' इति सूत्रं, 'तिङस्त्रीणि' इति सूत्रात्तिङ इति चानुवर्तते। 'प्रथमयो'रित्यादौ व्याख्यानात्प्राचां वैयाकरणानां प्रथमाद्वितीयापदवाच्ययोर्ग्रहणं बोध्यम्। अन्यथा 'औजसोःपूर्व' इत्येव वदेत्।

विभक्तिप्रदेशेषु 'सुप्तिङि'ति न वक्तुं शक्यम्, 'यत्र' 'तत्रे'त्यादौ त्यदाद्यत्वानापत्तेः। तेषां सुप्सञ्ज्ञा त्वशक्या, 'एतर्हि' इत्यादौ सुपि चेति दीर्घापत्तेः। सप्तम्यन्ता इति। स्त्रीलिङ्ग इति शेषः। प्राचां-वैयाकरणान्तराणाम् । इहापि- अस्मिन्व्याकरणेऽपि। सुपः। सुबिति प्रत्याहारात्षष्ठ्यन्तः।

भावबोधिनी : ननु त्रीणि त्रीणीत्यननुवर्त्य तिङ्मात्रानुवृत्तौ विभक्तिपदेन एकैकप्रत्ययग्रहणात् प्रथमयोरित्यत्र वचनयोरेव ग्रहणं स्यादित्यत आह प्रथमयोरिति । वैयाकरणानामिति । रीत्येति शेषः । वाच्ययोरिति । द्वयोस्त्रिकयोरिति शेषः । अन्यथा= द्वयोरेवेष्टत्वे । औजसोरिति । लाघवेनेत्यादिः । सौ अचोऽभावात् तत्त्याग इति भावः । यद्यपि शिवोऽर्च्य इत्यादौ तत्सम्भवः तथापि तत्र नेष्टः । नादचीति वक्तव्ये जस्व्यावृत्तिफलकेजग्रहणाच्च सोस्त्यागः । तस्माच्छस इत्यपि षण्णां ग्रहणे लिङ्गमिति बोध्यम् । विभक्तिश्चेति सूत्रं न कर्तव्यमिति पूर्वपक्ष्यभिप्रायमाविष्कुर्वन् तं खण्डयति विभक्तिप्रदशेष्विति । अष्टन आ इत्यत्र अष्टनस्सुपीति, न विभक्तावित्यत्र न

सुप्तिङोस्तुस्मा इति न्यास इति तद्भावः । अनापत्तेरिति । त्यदादीनामित्यत्रापि अष्टन इत्यतस्सुपीत्यनुवृत्त्यापत्तौ प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञके त्रलादौ परतः अत्वं न स्यादिति भावः ।

ननु प्राग्दिशस्सुबित्येवास्त्वित्यत आह तेषामिति । प्राग्दिशीयानामित्यर्थः । दीर्घापत्तेरिति । न च भयीतिन्यासेन भकारादौ यकारादौ सुपीत्यर्थकेन तत्र दीर्घ इति वाच्यम् । एवमपि यत्र तत्रेत्यादौ सुपो धात्विति त्रलादेर्लुगापत्तेः । न च विधानसामर्थ्याल्लुगभाव इति वाच्यम् । एवमपि इदानीमित्यत्र दानीमः अनुदात्तौ सुप्पिताविर्त्यनुदात्तत्वापत्तेः । न च त्रलो लित्करणात् ज्ञापकात् प्राग्दिशीयेषु अनुदात्तावित्यस्याप्रवृत्तिकल्पनान्नोक्तदोष इति वाच्यम् । एवमपि सर्वदेत्यादौ सिद्धान्ते प्रत्ययाद्युदात्तत्वेनान्तोदात्तत्वं सुप्संज्ञायां तु सौवर्यस्सप्तम्यस्तदन्तसप्तम्य इति सिद्धान्तात् सर्वस्य सुपीत्याद्युदात्तत्वापत्त्या शेषनिघातत्वेनान्त्यस्यानुदात्तापत्तेर्दुर्वारत्वात्। त्रलो विधानसामर्थ्यस्य लित्करणस्य ज्ञापकत्वस्य चाश्रयणे मनोव्यापारगौरवस्य स्पष्टत्वाच्चेत्यलम् । प्रत्याहारादिति । न सप्तमीबहुवचनमात्रग्रहणम् । एकस्यानेक-संज्ञायोगादिति भावः ।

बालबोधिनी : विभक्तिश्च । अत्र सूत्रस्यास्योल्लेखे सङ्गतिमाह न विभक्ताविति । विभक्तिश्चेति चकारफलमाह चकार इति। एकसंज्ञेति । आकडारादेका संज्ञेत्यर्थः । समावेशार्थ इति । तेन युष्मद्युपपद इत्यादीनां प्रवृत्तिः । अन्यथा = चग्रहणाभावे । ननु त्रीणि त्रीणीत्यननुवर्त्य सुप्तिङ्मात्रानुवृत्तौ विभक्तिपदेनैकैकप्रत्ययग्रहणात् अष्टन आ विभक्तावित्यादावदोषेऽपि प्रथमयोः पूर्वसवर्ण इत्यादौ द्वयोरेव ग्रहणं स्यात्, न तु षण्णामित्यत आह प्रथमयोरिति । वाच्ययोरित्यत्र त्रिकयोरिति शेषः । व्याख्यानादित्यस्यार्थमाह अन्यथेति। ननु विभक्तिसंज्ञा मास्तु । तद्घटितप्रदेशेषु सुप्तिङित्येव भवत्विति शङ्कायामाह विभक्तिप्रदेशेष्विति । यत्र तत्रेति । सप्तम्यास्त्रलित्यर्थः । विभक्तिपदघटितसूत्रेषु सर्वत्र सुप्तिङ्पदसन्निवेशे अष्टन आ इति सूत्रात् 'त्यदादीनामः' इति सूत्रे सुप्पदानुवृत्त्या यत्र तत्रेत्यादौ सप्तम्यन्तात् त्रलि सुपो लुका लुप्तत्वेन प्रत्ययलक्षणाभावादत्वं न स्यात् । विभक्तिसंज्ञायां तु प्राग्दिशो विभक्तिरिति तस्य विभक्तित्वान्न दोषः ।

ननु प्राग्दिशस्सुबिति न्यासेन न दोष इत्यत आह एतर्हीति । अस्मिन् काले इत्यर्थे 'इदम्' शब्दात् इदमोर्हिल् इति र्हिल्प्रत्यये तस्मिन् परे एतेतौ रथोरिति एतादेशे एतर्हीति रूपम् । तस्य सुप्त्वे सुपि चेति दीर्घापत्तिरिति भावः । स्त्रीलिङ्गा इति शेष इति । सु औ जस्

इत्यादीनां त्रिकाणां प्रथमा, द्वितीया, तृतीयेत्यादयः स्त्रीलिङ्गशब्दाः प्राचां संज्ञाः । न तु प्रथमद्वितीयादयो ह्रस्वान्ताः पुँल्लिङ्गा इति भावः । इहेत्यस्यास्मिन् प्रकरणे इति भ्रमवारणायाह अस्मिन् व्याकरणे इति ।

सुपः । अस्य सप्तमीबहुवचनत्वभ्रमवारणायाह प्रत्याहारादिति ।

द्व्येकयोः। नियमार्थे इमे। इह सूत्रे द्व्येकशब्दौ सङ्ख्यापरौ, न सङ्ख्येयपरौ, बहुवचनापत्तेस्तदाह- द्वित्वैकत्वयोरिति। लौकिकप्रयोगे तु 'आदशतः सङ्ख्याः सङ्ख्येये' इति कोशभाष्याद्युक्तेः सङ्ख्येयपरत्वे एव प्रायः साधुत्वम् । क्वचित्सङ्ख्यापरत्वेऽपि सङ्ख्येयगतसङ्ख्यारोपेण साधुत्वम् । अत एव कयोर्द्वित्वे? इत्याद्यर्थे कयोर्द्वयोः केषां बहुष्विति भाष्ये प्रयुक्तमिति बोध्यम् । एकशब्दो द्विशब्दसाहचर्यात्सङ्ख्यावाच्येव। एकग्रहणन्त्यक्त्वा एकवचनमुत्सर्गः कर्तव्यस्तेनाव्ययेभ्यः 'पचतिकल्प'मित्यादौ च व्यर्थैकवचनप्रयोगसिद्धिरिति 'तद्धितश्चे'ति सूत्रे भाष्ये स्पष्टम् ।

भावबोधिनी : बहुवचनेति । द्व्येकेष्विति स्यादिति भावः । संख्येयगतेति । द्व्यादिशब्दवाच्यसंख्यायामित्यादिः । तथा च संख्यैव संख्येया आसीदिति भावः । एकशब्दस्यानेकार्थत्वादाह एकशब्द इति । उत्सर्गः संख्यानपेक्ष इत्यर्थः ।

बालबोधिनी : द्व्येकयोः । नियमार्थे इति । प्रातिपदिकात् विधीयमानाः स्वादय एकत्वादौ स्वार्थे सिद्ध्यन्त्येवेति सूत्रद्वयं नियमार्थम् । द्वित्वैकत्वयोर्द्विवचनैकवचने एव । बहुषु बहुवचनमेवेति । संख्यापराविति । आदशतः संख्याशब्दस्य संख्येयपरत्वेऽपि प्रकृते लक्षणया द्व्येकशब्दौ संख्यापराविति भावः । संख्येयपरत्वे दोषमाह बहुवचनापत्तेरिति द्व्येकेष्विति स्यादिति भावः । लोके संख्येयपरत्वे एव तेषां साधुत्वेऽपि क्वचित् संख्यापरत्वेऽपि संख्येयगतसंख्यारोपेण साधुत्वमित्याह क्वचिदिति । अत एव = संख्येयगतसंख्यारोपेण तत्र साधुत्वाङ्गीकारादेव । कयोरिति । कयोर्द्वित्वे इत्यर्थे कयोर्द्वयोरिति, केषां बहुत्वे इत्यर्थे केषां बहुष्विति 'बहुषु बहुवचन'मिति सूत्रे भाष्ये प्रयुक्तम् अन्यथा द्विबह्वोः संख्यापरत्वात् द्वयोरिति बहुष्विति द्विवचनबहुवचने असङ्गते स्यातामिति भावः । 'न चेह वयमेकत्वादिभिः कर्मादीन् विशेषयिष्यामः । किं तर्हि ? कर्मादिभिरेकत्वादीन् विशेषयिष्यामः । कथम् ? एकस्मिन्नेकवचनम् । कस्यैकस्मिन् ? कर्मणः । द्वयोर्द्विवचनम्। कयोर्द्वयोः ? कर्मणोः । बहुषु बहुवचनम् । केषां बहुषु ? कर्मणामिति' इति भाष्यम् ।

एकशब्दस्य बह्वर्थकत्वेन सन्देहादाह एकशब्द इति । नन्वेकत्वे वाच्ये एकवचनमेवेति नियमे अव्ययेभ्यः संख्याभावात् तन्न स्यादित्यत आह एकग्रहणमिति ।

उत्सर्ग इति । एकग्रहणमपनीय एकवचनमिति सामान्यसूत्रं कार्यमित्यर्थः । एकवचनमिति पृथक्सूत्रस्य फलमाह पचतिकल्पमिति । द्विबह्वोर्द्विबहुवचने इत्यपरं सूत्रमिति बोध्यम् ।

बहुषु। बहुशब्दोऽत्र त्रित्वादिपरार्द्धान्तसङ्ख्यानां व्यापको यो धर्मविशेषो बहुत्वं, तत्परः। बहुवचनन्त्वाश्रयगतबहुत्वं धर्मे आरोप्य कृतं, तेन वैपुल्यवाचिनो न ग्रहणम् । दारा इत्यादौ त्ववयवाश्रयगतबहुत्वस्यावयविन्यारोपो बोध्यः,स च कोशवृद्धव्यवहारानुसारेणैवेति नातिप्रसङ्गः। भर्तृदारयोः, अप्तेजसोरित्यादौ वृत्तौ तु द्विवचनमेव, आरोपे मानाभावात् ,अत एव द्व्येकयोरिति सङ्गच्छते। एतेनैकस्मिन्नपि गुरवः समागता इत्यादि समर्थितम् । अन्वर्थसञ्ज्ञयैव सिद्धे इदं सूत्रद्वयं स्पष्टार्थम् ।राम इति। रुत्वे एकदेशविकृतन्यायेन सुबन्ततया पदत्वाद्विसर्गः।

भावबोधिनी : न ग्रहणमिति । तेन बहुः पर्वत इत्यत्र न बहुवचनम् । नन्वेकस्यां व्यक्तौ दारा इति बहुवचनान्तप्रयोगोऽसङ्गत इत्यत आह दारा इत्यादाविति । आरोपस्य कामचारत्वं वारयति स चेति । कोशाद्यथा – दाराः पुँसि च भूम्न्येव, आपः स्त्री भूम्नीत्यादयः । वृद्धव्यवहाराद् यथा – गुरवः समागता इत्यादौ । व्यस्तविषय एव कोशादेर्मानत्वमित्याह भर्तृदारयोरित्यादि । आद्यः स्मार्तप्रयोगः । अन्त्यः शाबरभाष्यीयः। वृत्तौ = समासादिवृत्तौ । अत एव = वृत्तावारोपाभावादेव । एतेन = वृद्धव्यवहारस्य मानत्वेन । न्यायेनेति । अस्य पदत्वादित्यत्रान्वयः । सुबन्ततयेति तृतीया हेतौ । सुबन्तताहेतुकं यत्पदत्वं तदेकदेशविकृतन्यायेन कृतरुत्व इत्यर्थः । यथाश्रुतन्तु न युक्तम् । तेन न्यायेन विकृतावयवनिबन्धनकार्यस्यानतिदेशात् । इदञ्च कार्यकाले बोध्यम्। स्थानिवद्भावस्तु न, अल्विधित्वादिति भावः ।

बालबोधिनी : बहुषु बहुवचनम् । द्व्येकयोरिति साहचर्यात् बहुशब्दः संख्यापर इति भ्रमनिरासायाह बहुशब्द इति । अत्र = सूत्रे । धर्मविशेषः = अखण्डोपाधिरूपः । तत्पर इति । नियतपरिच्छेदकत्वाभावेन नास्य संख्यात्वेन व्यवहारः । अत एव यदयमसंख्यां संख्येत्याह, संख्यावदिति गम्यत इति संख्यासंज्ञासूत्रस्थं भाष्यं सङ्गच्छते । ननु बहुशब्दस्य धर्मपरत्वे बहुष्विति बहुवचनानुपपत्तिरत आह बहुवचनं त्विति । तेनेति । बहुवचनोपादानेन बहुः पर्वत इत्यादौ वैपुल्यवाचिनो न ग्रहणम् । तस्य एकाश्रयवृत्तित्वादिति बोध्यम् । नन्वाश्रयैकत्वात् दारा इति बहुवचनमनुपपन्नमिति शङ्कायामाह दारा इति । स च = आरोपः। वृत्तौ तथा आरोपो नेत्याह भर्तृदारयोरिति । अयं स्मार्तप्रयोगः । अप्तेजसोरिति । अयं शाबरभाष्यीयः । मानाभावादिति । आरोपप्रयोजकवृद्धव्यवहाराभावादित्यर्थः । तत्र मानमाह

अत एवेति । वृत्तौ तथारोपाभावादेवेत्यर्थः । अन्वर्थेति । द्विवचनबहुवचनयोरन्वर्थसंज्ञा-शब्दत्वेन तद्बलेन द्वित्वादिविवक्षायामेव द्विवचनादिप्रवृत्त्या सूत्रद्वयं स्पष्टार्थमिति भावः ।

राम इति । एकदेशविकृतन्यायेनेति । वस्तुतस्तु विकृतावयवनिबन्धनकार्यस्यानेन न्यायेनानतिदेशात् तस्यानुमानिकस्थानिवद्भावेनेत्यर्थो वक्तव्यः । एकदेशविकृतन्यायेन = आनुमानिकस्थानिवद्भावेन । एतच्च कार्यकालपक्षे बोध्यम् । यथोद्देशे तु पदसंज्ञादृष्ट्या रुत्वस्यासिद्धतया सुबन्तत्वबुद्ध्या पदत्वं सुलभम् ।

सरूपाणामे। वृद्धो यूनेति सूत्रादेवकारोऽपकृष्यत इत्याह सरूपाण्येवेति। तेन जननीपरिच्छेत्तृवाचिनोर्मातृशब्दयोर्भ्यामि नैकशेषः। न चैकविभक्ताविति व्यर्थं 'यानि सरूपाण्येवे' त्युक्त्यैवोक्तदोषवारणादिति वाच्यम् ; हरिणस्त्रीवाचकहरिणीशब्दस्य हरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दस्य चैकशेषानापत्तेः। पुंवद्भावेन तद्धितादौ वैरूप्यात्। दृष्टानीति। 'लौकिके प्रयोगे' इति शेषः। एकशेषश्चायमनैमित्तिकत्वेनान्तरङ्गत्वाद्वि-भक्त्युत्पत्तेः पूर्वमेवेति एतद्विषये द्वन्द्वप्राप्तिरेव नेति बोध्यम् ।

<u>भावबोधिनी :</u> सरूपाणामेकशेष । भ्यामिति । भ्यामादावित्यर्थः । एवकारेण विभक्तित्वावच्छेदेन सारूप्यलाभादौजसादौ तयोस्तदभावादिति भावः । व्यर्थमिति । अत्र वैयर्थ्यशङ्का विभक्तिपदस्यैवावशिष्टस्य एवकारापकर्षपक्षे एकग्रहणवैयर्थ्यस्येष्टत्वादिति बोध्यम् । तद्धितादाविति । आदिना क्यङ्परिग्रहः । ननु सत्यप्येवकारापकर्षपक्षे मातृमात्रोरेकशेषो दुर्वारः । अलौकिकप्रयोगे औजसादावपि सारूप्यादेकशेषस्यापर-निमित्तकत्वेनान्तरङ्गत्वात् तत्र कर्तव्ये दीर्घादीनामसिद्धत्वादित्यत आह लौकिक इति । स च परिनिष्ठित एव । तत्र च वैरूप्यं दृश्यत एवेति भावः । प्राप्तिरेव नेति । एतावतैव द्वन्द्वापवाद एकशेष इति व्यवहार इति भावः । अत्रापि सारूप्यं विभक्ति-प्राग्वर्तिप्रातिपदिकांश एव विवक्षितम् । तेन संज्ञासर्वनाम्नोः सर्वशब्दयोः जसि वैरूप्येऽप्येकशेषः । अत एव प्रथमे प्रथमा इत्यादावेकशेषसिद्धिरिति बोध्यम् ।

<u>बालबोधिनी :</u> सरूपाणामेकशेषः । वृद्धो यूनेति । वृद्धो यूना तल्लक्षणश्चेदेव विशेषः (1-2-65) इति सूत्रादित्यर्थः । वर्णवाचकहरिणीशब्दस्य हारितमिति, हरिणस्त्रीवाचक-हरिणीशब्दस्य हारिणमिति तद्धितादौ वैरूप्यादिति तात्पर्यम् । तेन = एवकारापकर्षेण। परिच्छेतृवाचको मातृशब्दो धातृशब्दवत् । जननीपरिच्छेतृवाचिनोः मातृशब्दयोरौजसादिषु वैरूप्यान्नातिप्रसङ्ग इति तदपकर्षस्यासाधारणं फलमाह भ्यामीति । तदादावपीत्यर्थः । एवकारस्यान्वयितावच्छेदकावच्छेदेनान्वये तात्पर्यग्राहकत्वेन विभक्तित्वावच्छेदेन सारूप्य

एवैकशेष इत्यर्थो लभ्यते । प्रगुक्तयोः मातृशब्दयोः मातरौ - मातारौ इयेवमौजसादिषु वैरूप्यात् विभक्तित्वावच्छेदेन सारूप्याभावात् भ्यामादौ सारूप्येऽपि नैकशेष इति भावः ।

नन्वेवकारापकर्षेणैव प्रयोगमात्रावच्छेदेन सारूप्यमित्यर्थलाभेन तेनैवेष्टसिद्ध्या एकविभक्ताविति व्यर्थमित्याशयेन शङ्कते न चेति । समाधत्ते हरिणेति । एकशेषानापत्तौ हेतुमाह पुँवद्भावेति । भस्याढे तद्धिते इति पुँवद्भावे हारिणं - हारितम् इति वैरूप्येण, प्रयोगमात्रावच्छेदेन सारूप्याभावादिति भावः। आदिना क्यङः परिग्रहः । हरिणीशब्दद्वयात् क्यङ्प्रत्यये पुँवद्भावे हरिणायते हरितायत इति वैरूप्यान्नैकशेषप्रवृत्तिः । नन्वेवकारापकर्षेऽपि अलौकिके प्रयोगे औजसादौ सारूप्यात् मातृमात्रोरेकशेषो दुर्वार इत्यत आह लौकिके प्रयोगे इति । परिनिष्ठिते रूपे इत्यर्थः । तत्र च वैरूप्यं दृश्यत एवेति भावः । द्वन्द्वप्राप्तिरेव नेति । अनैमित्तिकत्वेनान्तरङ्गत्वाद्विभक्त्युत्पत्तेः प्रागेव एकशेषः प्रवर्तत इति, कृते च तस्मिन् अनेकसुबन्तविरहाद् द्वन्द्वप्राप्तिरेव नेति एतावतैव द्वन्द्वापवाद एकशेष इति व्यवहार इति भावः ।

ननु तन्त्रेणैव सिद्धेरिदं व्यर्थम् यथा 'अक्षा भज्यन्तां भुज्यन्तां दीव्यन्ता'मित्यत्राक्षा इति कारकस्य सकृदुपादानेऽपि सर्वत्रान्वयः। तन्त्रकारणन्तु शब्दानां तुल्यरूपता। एवम् 'अक्षो भज्यतां दीव्यता'मित्यपि।तन्त्रं द्वेधा- शब्दतन्त्रमर्थतन्त्रश्च। शब्दस्य पर्यायपरिवृत्त्यसहत्वे आद्यं, यथा- अक्षा इत्यादौ। तत्सहत्वे त्वन्त्यं, यथा- 'घटा' इत्यादौ। तत्र 'अक्षा भज्यन्तां भुज्यन्ता'मित्यादावन्वयिपदार्थभेदाद्बोद्धुरावृत्त्यैव बोधः, उच्चारणन्तु तन्त्रेण। अन्वयिपदार्थस्यैकत्वे तु एकोपस्थित्यैवान्वयः ; यथा- 'अक्षान्पश्य', 'घटान्पश्ये' त्यादाविति चेत्सत्यम्। 'सरूपाणामेकशेष एवे' ति नियमर्थत्वात् । तत्फलन्तु प्रत्यर्थं शब्दनिवेशस्यापि दर्शनेन कदाचित्तादृशप्रयोगे प्राप्तद्वन्द्वस्य निवृत्तिः।

<u>**भावबोधिनी :**</u> तन्त्रेणैवेति । सकृदुच्चरितस्यैकस्यैव शब्दस्य शक्त्यानेकार्थप्रतिपादकत्वं तन्त्रम् । कारकस्येति । अनेन विभक्त्यन्ततन्त्रमस्येति सूचितम् । न चात्रैकशेषेण निर्वाहः । सहविवक्षाबाधात् । शाब्दबोधोऽप्यक्षपदबोध्यानां साहित्यावच्छिन्नानां तत्क्रियान्वयिनां समूहालम्बनरूप एव । एकशेषानिर्वाह्यमेकवचनान्त-रूपमुदाहरणान्तरमाह एवमक्ष इति । न चात्रापि बह्वर्थत्वेन बहुवचनापत्तिरिति वाच्यम् । विभक्त्यन्तस्य तन्त्राङ्गीकारेणाप्रातिपदिकत्वात् । शब्दस्य पर्यायेति । पर्यायस्याभिन्नशक्यतावच्छेदकत्वे सति विभिन्नशक्यतावच्छेदकावच्छिन्नशब्दस्य परिवृत्तिः स्वप्रयोगाभावेऽपि स्वबोध्ययावदर्थेषु प्रयोगः । स्वपदं तन्त्रयोग्यपरम् ।

पर्यायशून्यत्वमिति यावत् । शब्दस्येति । षष्ठ्यर्थो निष्ठत्वम् । तस्यासहत्वेऽन्वयः । तत्सहत्व इति । शब्दस्य पर्यायपरिवृत्तिसहत्वे इत्यर्थः । एवञ्चैतादृशधर्मद्वैविध्येन तन्त्रयोग्यशब्दो द्विविध इति भावः । शब्दतन्त्रनिष्कर्षस्तु स्वावच्छिन्ननिरूपित-शक्यतावच्छेदकावच्छिन्नविषयतासमनियतविषयताकोपस्थितिजनकतावच्छेदक स्वभिन्नानुपूर्वीको यश्शब्दः तद्भिन्नशब्दत्वमिति । अत्र स्वपदम् अर्थतन्त्रयोग्य-शब्दनिष्ठानुपूर्वीपरम् । सकृदुच्चरितश्शब्दः सकृदेवार्थं गमयतीति न्यायमनुरुध्याह अन्वयीति । अन्वयानुयोगिधात्वर्थभेदादित्यर्थः । तन्त्रेणेति । आवृत्तिं विनेत्यर्थः । बोद्धुरनेकार्थबोधनायानेकशब्दानुच्चारणमेव तन्त्रस्वीकारफलमिति भावः । एकोपस्थित्येति। समूहालम्बनरूपेत्यादिः । तत्फलन्तु = नियमफलन्तु । प्रत्यर्थमिति । अर्थमर्थं प्रतीत्यर्थः। अपिना अर्थौ अर्थौ प्रतीत्यादिभाष्योक्तविग्रहोऽपि सूचितः ।

बालबोधिनी : सकृदुच्चरितस्यैकस्यैव शब्दस्य शक्त्याऽनेकार्थप्रतिपादनं तन्त्रमित्युच्यते। तेनैव निर्वाहे एकशेषसूत्रं व्यर्थमिति शङ्कते नन्विति । इदम् = एकशेषसूत्रम्। तन्त्रस्योदाहरणमाह अक्षा इति । कारकस्येति । अनेन विभक्त्यन्ततन्त्रमत्रेति सूचितम् । सर्वत्रेति । प्रत्येकमिति शेषः । अक्षशब्दः शकटाक्षस्य बिभीतकाक्षस्य देवनाक्षस्य च वाचकः । एकशेषेण तु नात्र निर्वाहः । अक्षपदवाच्यानामेकत्रानन्वयेन सहविवक्षाया अभावात् । तथा च द्वन्द्वापवादत्वकथनपरभाष्यप्रामाण्येन, इदित इति गुरुनिर्देशेन चास्य सूत्रस्य सहविवक्षाविषयत्वस्याश्रयणीयतया अक्षा भज्यन्तां भुज्यन्तां दीव्यन्ताम् इत्यत्र तदभावात्, असहविवक्षायां निर्वाहार्थमावश्यकेन तन्त्रेणैव निर्वाहे एकशेषारम्भो व्यर्थ इति भावः । तुल्यरूपतेति । स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मेणेत्यर्थः ।

एकशेषानिर्वाह्यमेकवचनान्तरूपं स्थलान्तरमाह एवमक्ष इति । अत्रैकवचनान्तत्वेन स्वप्नेऽप्येकशेषः शङ्कितुमशक्य इति तदर्थं तन्त्रमावश्यकमिति भावः । प्रसङ्गात् तन्त्रस्वरूपमाह तन्त्रमिति । शब्दतन्त्रस्वरूपमाह पर्यायेति । पर्यायस्य = विभिन्नार्थबोधकस्य शब्दस्य या परिवृत्तिः = पाक्षिकप्रयोगः तस्यासहः पर्यायपरिवृत्त्यसहः पचाद्यजन्तः । तस्य भावस्तत्त्वं तस्मिन् सति शब्दतन्त्रम् । यथा अक्षा इत्यादौ । अत्राक्षशब्दो देवनाक्षरथाक्षबिभीतकाक्षानां प्रतिपादकस्तावतामन्येनाप्रतिपादनादिति भावः । तत्सहत्वे त्वर्थतन्त्रम् । यथा घटा इत्यादौ।

ननु तन्त्रस्थले बोद्धुः शब्दावृत्त्या बोधः, एकशेषस्थले न तथेति तयोर्वैलक्षण्यात् कथं तन्त्रेणैकशेषस्य गतार्थतेति शङ्कायामाह तत्राक्षा इति । तत्र = तयोर्मध्ये आद्योदाहरणे।

अन्वयिपदार्थेति । अन्वयानुयोगिधातूपस्थाप्यार्थस्य भेदादित्यर्थः । आवृत्त्या = शब्दावृत्त्या। तन्त्रेण = सकृदुच्चारणेन, आवृत्तिं विनेत्यर्थः । अन्वयिपदार्थस्यैकत्वे = अन्वयानुयोगि-धात्वर्थस्याभिन्नत्वे । एकोपस्थित्येति = समूहालम्बनरूपेत्यादिः । एकरूपपुरस्कारेण नानार्थोपस्थितेषु समभिव्याहृतपदार्थान्वयसम्भवादित्यर्थः । एवञ्च अन्वयिपदार्थभेदस्थले अक्षा भज्यन्तामित्यादौ सहविवक्षाया अभावेन एकशेषेनानिर्वाहात् तदविषये तन्त्रस्थले आवृत्त्या बोधेऽपि, एकशेषविषये अक्षान् पश्येत्यादौ तन्त्रस्वीकारेऽपि आवृत्तिं विनैव बोध इति न तन्त्रैकशेषयोर्बोधे वैलक्षण्यमिति भावः ।

तन्निराकरोति सरूपाणामिति । तत्फलम् = सरूपाणामेकशेष एवेति नियमफलम्। प्रत्यर्थमिति । अर्थमर्थं प्रतीत्यर्थः । अपीति। अपिना अर्थौ अर्थौ प्रतीत्यादि समुच्चीयते । दर्शनेनेति। घटोऽयं घटोऽयमित्यादौ । अर्थमर्थं प्रति प्रत्यर्थम् । एवमर्थावर्थौ प्रति यदर्थानर्थान् प्रति यत्तदपि प्रत्यर्थमेवेति भाष्ये उक्तम् । एवञ्च बह्वर्थबोधनायैकशब्दप्रयोगवदेकैकस्यार्थस्य बोधनायैकैक-स्यापि शब्दस्य प्रयोगदर्शनेन तथाप्रयोगे प्राप्तस्य द्वन्द्वस्य निवृत्तिरेव नियमफलमिति भावः ।

27 **स चायं नियमो विभक्तौ यानि सरूपाण्येव तद्विषयः, सहविवक्षाविषयश्च । अत एव 'विभक्त्यन्तानामेकशेष' इति पक्षे 'द्वन्द्वप्रतिषेधो वक्तव्य' इत्याशङ्क्य 'अनवकाश एकशेषो द्वन्द्वं बाधिष्यते' इति भाष्ये उक्तम् । किञ्चासहविवक्षायामपि तत्प्रवृत्तौ सहविवक्षायां द्वन्द्वस्येवान्यत्र कर्मधारयस्यापि बाधापत्तौ 'सारवसारवोर्मिंज' इत्यादिप्रयोगविरोधापत्तिः । असहविवक्षाविषयेण विभक्त्यन्ततन्त्रेण 'ब्राह्मणाभ्यां कृतं देहि 'पयो जरयती' त्यादि 'नीलोत्पलस्पर्धिनी नेत्रे तनुर्वा हरेरितिवत् 'विद्वन्मानसहंसे' तिवच्चेष्टमेवेति बोद्ध्यम् । न चासहविवक्षायां तन्त्रसत्वे 'इदित' इति गुरुनिर्देशो व्यर्थः, अन्यपदार्थावगतये तत्सत्वात् । इद्यस्य धातोरिति करणे तु गौरवम् ।**

27 **<u>भावबोधिनी :</u>** तद्विषय इति । सूत्रस्वारस्यादिति भावः । अन्त्ये प्रमाणमाह अत एवेति । सहविवक्षाविषयत्वादेवेत्यर्थः । तिष्यपुनर्वस्वोरित्यतो द्वन्द्व इत्यपकर्षादेतल्लाभ इति भावः । विपक्षे बाधकत्वमप्याह किञ्चेति । अन्यत्र = असहविवक्षास्थले । बाधेति। एकशेषेणेत्यादिः । आरवेण सहिताः सारवाः, सरय्वां भवाः सारवाः, सारवाश्च तास्सारवाश्च तादृशेषु ऊर्मिषु जात इत्यर्थः । विभक्त्यन्ततन्त्रं तु असहविवक्षायाम-पीष्टमेवेत्यत आह असहविवक्षेति । ब्राह्मणाभ्यामिति । तृतीयान्तं चतुर्थ्यन्तञ्च । पय इति । प्रथमान्तमुदकवाचि द्वितीयान्तं क्षीरवाचि । इत्यादीति । इष्टमेवेत्यन्वयः । नीलोत्पलेति । नवमोल्लासे काव्यप्रकाशे

भक्तिप्रह्वविलोचनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैः नीते हितप्राप्तये ।
लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतात् भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥ इति ॥

लिङ्गवचनश्लेषोदाहरणम् – नपुंसकद्विवचनान्तस्त्रीलिङ्गैकवचनान्तयोः तन्त्रेण प्रयोगस्तथा ''विद्वन्मानसहंसवैरिकमलासंकोचदीप्तद्युते'' इति दशमोल्लासे । अत्र विदुषां मानसाभिन्नमानससरोवराधिकरणकहंसेत्याद्यर्थः ।

बालबोधिनी : सहविवक्षाविषयश्चेति । इदञ्च तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे इति सूत्राद्द्वन्द्वे इत्यनुवर्त्य द्वन्द्वे प्रसक्ते इति व्याख्यानाल्लभ्यमित्याहुः । अस्य सूत्रस्य सहविवक्षाविषयत्वं प्रमाणयति अत एवेति । सहविवक्षाविषयत्वादेवेत्यर्थः । भाष्ये उक्तमिति । असहविवक्षायामेकशेषे तु तत्रास्य सावकाशतया निरवकाशत्वाभावेन 'अनवकाश एकशेषो द्वन्द्वं बाधिष्यते' इति भाष्योक्तिरसङ्गता स्यादिति भावः । असहविवक्षायामपि तत्प्रवृत्तौ बाधकमाह किञ्चेति । तत्प्रवृत्तौ = उक्तनियमप्रवृत्तौ । अन्यत्र = असहविवक्षायाम् । बाधापत्ताविति । स्वविषये यद्यत् प्राप्नोति तत्सर्वं बाध्यमेवेति बाध्यसामान्यचिन्तयेत्यर्थः। सारवसारवोर्मिज इति । आरवैस्सहिताः सारवाः, सरय्वां भवास्सारवाः । सारवाश्च तास्सारवाश्चोर्मयः सारवसारवोर्मयः । तासु जातः सारवसारवोर्मिजः । प्रयोगविरोधापत्तिरिति । असहविवक्षायामपि तत्प्रवृत्तौ कर्मधारयं बाधित्वा तदापत्तिरिति भावः ।

नन्वसहविवक्षायामपि तन्त्रापत्तिरित्याशङ्क्येष्टापत्त्या परिहरति असहविवक्षेति । ब्राह्मणाभ्यां कृतं ब्राह्मणाभ्याञ्च देहीत्यर्थे तृतीयान्तचतुर्थ्यन्तयोः तन्त्रेण ब्राह्मणाभ्यां कृतं देहीतिप्रयोगः । पयो पयः जरयतीत्याद्यर्थे प्रथमाद्वितीयान्तयोः तन्त्रेण पयो जरयतीति इष्ट एवेति भावः । प्रथमान्तमुदकवाचि, द्वितीयान्तं क्षीरवाचि । एवञ्चासहविवक्षायामपि विभक्त्यन्ततन्त्रमिष्टमेवेति सिद्धम् । तत्र दृष्टान्तमाह नीलोत्पलेति ।

भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी ।
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥ इति

काव्यप्रकाशे नवमोल्लासे लिङ्गवचनश्लेषोदाहरणम् । अत्र नपुंसकद्विवचनान्त-स्त्रीलिङ्गैक-वचनान्तयोः तन्त्रेण प्रयोगः । एकं द्विवचनान्तं नपुंसकं नेत्रे इत्यस्य विशेषणम् । एकं ङ्यन्तं तनोर्विशेषणम् । विद्वन्मानस इति ।

'विद्वन्मानसहंस वैरिकमलासङ्कोचदीप्तद्युते' इति काव्यप्रकाशे दशमोल्लासे । अत्र विदुषां मानसाभिन्नं यन्मानससरः तत्रत्यहंसेत्याद्यर्थः । अत्र शास्त्रीयप्रयोगविरोधमाशङ्क्य परिहरति न चेति । व्यर्थ इति । तन्त्रेण इत इत्येव ब्रूयादिति भावः । अन्यपदार्थेति । इत् इत् यस्येत्यन्यपदार्थबोधायेत्यर्थः । गौरवमिति । प्रतिपत्तिगौरवमिति भावः ।

अन्यपदार्थावगतये इति । चिन्त्यमिदं ,चक्षिङ्धातौ नुम्वारणाय इच्चासाविच्चेति कर्मधारयं स्वीकृत्य इदन्तधातोर्नुम् भवतीति इदितो नुम्धातोरिति सूत्रार्थस्यावश्यकत्वादिति चन्द्रिकाकाराः । इदमिदितो नुमित्यत्र बहुव्रीहिरित्याशयेनेर इत्संज्ञा वाच्येति वचनमारब्धवतो वार्त्तिककारस्य मतेन । तन्मते चक्षिङि नुम्वारणन्तु अकारोच्चारणेनापि सुकरम् । तत्पुरुषसमासमाश्रित्य तत्प्राख्यानं कुर्वतो भाष्यकृतो नये तु सर्वत्र तन्त्रेणैव निर्देशः कार्य इति नियमो नेत्यर्थं स्पष्टं बोधयितुमेव गुरुनिर्देश इति बोध्यम् । एतेन प्रागुक्तं परास्तमिति गुरुप्रसादकाराः ।

एतच्च सूत्रं भाष्ये प्रत्याख्यातम् 'अर्थावर्थौ प्रति यदर्थानर्थान्प्रति च यत्तदपि प्रत्यर्थमेवे'त्याश्रयणेन। अनेकघटादिपदानां साहित्ये वृत्तिरेव नानभिधानात् , एकस्यैव त्वनेकार्थस्य तत्र वृत्तिरभिधानस्वाभाव्यादिति तदाशयः। 'द्विर्वचनेऽची'त्यादावेकशेषशब्दस्तु भाष्ये तन्त्रपरः। स चोच्चारयितुः, बोद्धुस्त्वावृत्तिरेवेति बोद्धयम् । 'एकविभक्ता'वित्यत्रैकपदन्तु स्पष्टार्थम् , 'एकस्यामपि विभक्तौ यानि विरूपाणि ने'त्यर्थं स्पष्टं बोधयितुम् । ध्वनितश्चेदं 'विभक्तिः सारूप्ये उपलक्षण'मिति भाष्ये एकपदानुच्चारणेन। समाहारद्वन्द्वविषये तु नैकशेषः, 'एकवच्चास्यान्यतरस्या'मित्यनेनैकशेषविषयपदानां समाहारे वृत्त्यभावबोधनात् । 'न ब्राह्मणं हन्या'दित्यादौ तु जातिपक्षेणैव निर्वाहः। अत एव तत्र व्यक्तिपक्षे यं कञ्चिद्ब्राह्मणमहत्वा कृती स्यादिति दूषणं भाष्ये उक्तम् ।

<u>**भावबोधिनी :**</u> यदिति । शब्दस्वरूपमिति शेषः । एकत्वमत्र विवक्षितमिति भावः । नन्वेवं सूत्रप्रत्याख्याने यदा न एकेन शब्देन नानार्थप्रतिपादनविवक्षा किन्तु बहुना तदाऽनेकशब्दानां सह प्रयोगः स्यादित्यत आह अनेकेति । अनेकार्थस्येति बहुव्रीहिः । तन्त्रपरः = विभक्त्यन्ततन्त्रपरः । सूत्रारम्भे आह स्पष्टार्थमिति । एवकारापकर्षादिति भावः । अपकर्षाभावे आह एकस्यामपीति । इदम् = एकग्रहणानावश्यकत्वम् ।

ननु समाहारविवक्षायामप्येकशेष आवश्यकः । अत एवानेकब्राह्मणं भोजय, न ब्राह्मणं हन्यादित्याद्युपपत्तिरिति केचित् । तन्मतं दूषयति समाहारद्वन्द्वे इति । अन्यतरस्यामित्यनेनेति । यद्येकशेषविषयपदानां समाहारेऽपि वृत्तिः स्यात् तदा चार्थे

द्वन्द्व इत्यनेनैव विकल्पफलसिद्धौ इदं व्यर्थमिति भावः । न च आश्विकश्च आश्विकीच आश्विकश्च तानीमानि आश्विकानीत्यत्र बहुप्रकृतिकत्वात् फलसेनेति वार्तिकेनैकवद्भावनिषेधादप्राप्तैकवद्भावविधानार्थमिदमिति वाच्यम् । फलसेनेति वार्तिकस्य विभिन्नशक्यतावच्छेदकविषयत्वस्वीकारेण प्रकृते तदप्रवृत्तेः। अधिकमत्र विषम्यादौ बोध्यम् । जातिपक्षेणैवेति । जातेः हननादावन्वयाभावेन बहुव्यक्त्याक्षेपेऽपि अत्र पक्षे जातेः प्राधान्यात् तदनुरोधेनैकवचनमिति भावः । अत एव = जातिपक्षस्यावश्यकत्वादेव । कृती = बहुहननेऽपि पुण्यवान् ।

28 **बालबोधिनी :** सूत्रकृन्मतमुपपाद्य भाष्यसम्मतमेकशेषप्रत्याख्यानप्रकारमाह एतच्चेति। यत् = शब्दस्वरूपम् । ननु अर्थमर्थं प्रति तदपि प्रत्यर्थमिति प्रत्यर्थं शब्दप्रयोगस्थले घटोऽयं घटोऽयमित्यादौ प्राप्तद्वन्द्वनिवृत्त्यर्थमेतत्सूत्रमावश्यकमित्यत आह अनेकेति । तत्र = साहित्ये तदाशयः = सूत्रप्रत्याख्यातुर्भाष्यकारस्याशयः ।

नन्वेकशेषस्य सहविवक्षाविषयत्वे, तत्प्रत्याख्याने वा द्विर्वचनेऽचीत्यत्रैकशेषाश्रयणं भाष्यकृतामसङ्गतमित्यत आह द्विर्वचनेऽचीति । तन्त्रपरः = विभक्त्यन्ततन्त्रपरः । एकशेषे द्विवचनापत्तेः । सहविवक्षाभावेन तदप्राप्तेश्चेति भावः ।

भाष्यमतेन सूत्रप्रत्याख्यानमुपवर्ण्य, सूत्रारम्भे एकग्रहणस्यानावश्यकतामाह एकविभक्ताविति । स्पष्टार्थमिति । एवकारापकर्षादिति भावः । तदपकर्षलभ्यमेवार्थं स्पष्टं बोधयितुमेकग्रहणमिति भावः। तदेव स्पषष्टयति एकस्यामपीति । ध्वनितश्च इदम् = एकग्रहणानावश्यकत्वम् । समाहारद्वन्द्वविषये एकशेषो नेत्यत्र मानमाह अन्यतरस्यामिति। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् (1-2-69) । वृत्त्यभावबोधनादिति । एकशेष-विषयपदानां यदि समाहारे वृत्तिः स्यात्तदा समाहारविवक्षायामेकवद्भावस्य, इतरेतरयोग-विवक्षायां द्विवचनबहुवचनयोश्च सिद्धावन्यतरस्यामिति व्यर्थं स्यादिति भावः। एकशेषविषयपदानां समाहारे वृत्त्यभावबोधनात् घटघटमिति समाहारद्वन्द्वोऽपि नेति बोध्यम्।

नन्वेकशेषे सति न ब्राह्मणं हन्यादित्यत्र एकवचनानुपपत्तिरत आह जातिपक्षेणेति। एवञ्चात्रैकशेषाभावान्न द्विवचनबहुवचनयोः प्रसङ्ग इति भावः । अत एव = जातिपक्ष-स्यावश्यकत्वादेव । तत्र = न ब्राह्मणं हन्यादित्यादौ । दूषणं भाष्ये उक्तमिति । अन्यथा व्यक्तिपक्षेऽपि ब्राह्मणपदस्यैकशेषेणानेकब्राह्मणबोधकतया तद्दूषणमसङ्गतं स्यादिति भावः ।

शेषशब्दार्थश्चेतरनिवृत्तिपूर्वकमवस्थानं, तदाह- एक एवेति। 'एके'ति लुप्तविभक्त्यन्तं पृथक्पदम् । अत एव तत्र 'सरूपाणा'मित्यस्यान्वयः। तत्रावस्थानस्य सिद्धतया निवृत्तिरेव विधेया। तत्र शिष्यमाणं लुप्यमानार्थाभिधायीति न्यायेन श्रूयमाणपदवृत्त्या बोधः। धातुषु तु नास्य प्रवृत्तिः। एकनिष्ठानेकव्यापाराणामिवानेक-निष्ठानामप्येकधातुत एव निवृत्तभेदानां प्रतीत्याऽनेकधातुप्रयोगाप्रसक्तेः । सरूपाणां किम्? घटपटौ । शेष इत्येतन्मात्रोक्तौ द्विबह्वोरपि शेषः प्रसज्येत। एक इत्येतावदुक्तौ त्वेक आदेश इत्यर्थः स्यात् । तथा चाश्वश्चाश्वश्चेत्यादौ कदाचित् द्व्युदात्तवत्त्व- द्व्यनुदात्त-वत्त्वरूपसाम्यमादायोभयस्वरितैकादेशः प्रसज्येत। न च अक्षस्यादेवनस्येति फिट्सूत्रेण शकटाक्षे आद्युदात्तस्य, देवनाक्षे फिष इत्यन्तोदात्तस्य चैकशेषे कदाचिदन्तोदात्तस्यापि शेषः स्यादिति वाच्यम् । 'स्वरभिन्नानां यस्योत्तरस्वरविधि' रिति वचनेनैव निर्वाहात् । एकादिदशान्तसङ्ख्यावाचिनामेकशेषद्वन्द्वावनभिधानान्न भवतः। विंशत्यादौ त्विष्ट एवैकशेष इत्यलम् ।

भावबोधिनी : अवस्थानमिति स्वस्येत्यादिः । ननु एकेत्यस्य सरूपाणामित्येतदपेक्षत्वेनासामर्थ्यादुद्देश्यविधेययोः समासाभावाच्चेत्यत आह पृथगिति। अत एव = पृथक्पदत्वादेव । पदवृत्त्येति । लुप्यमानपदार्थेऽपि श्रूयमाणस्य शक्तिग्राहक-मेकशेषसूत्रमिति भावः । ननु भवतः भवन्तीत्यादौ विभिन्नकर्तृकानेकक्रियाप्रतीतेः अनेकधातुव्यक्तिप्रयोगनिवृत्तिरेकशेषेणेति भ्रमं वारयति धातुष्विति । निवृत्तभेदानामिति। भेदेनाप्रतीयमानानामित्यर्थः । स्वतो द्वित्वादिसंख्यारहितानामिति यावत् । वस्तुतस्तु कर्तृभेदाद्भेदेऽपि तिङन्ताद्भेदस्य तत्समानाधिकरणद्वित्वादेश्चानवगतिरेव शब्दशक्तिस्वाभाव्यादिति भावः । अधिकं भट्टग्रन्थे बोध्यम् । द्विबह्वोरिति संख्यापरत्वात् साधुत्वम् ।

न चाश्वशब्दस्य क्वन्नन्तत्वेनाद्योऽजुदात्तः, द्वितीयोऽनुदात्तः । तथा च सम्पूर्णो-दात्तकत्वे सति सम्पूर्णानुदात्तकत्वेन साम्यमादायोदात्तानुदात्तयुक्ताश्वशब्दादेशेनेष्ट-सिद्धेरित्यत आह कदाचिदिति । उभयस्वरितकेति । अपीति शेषः। द्वयोः स्वरितयोः द्वावुदात्तौ द्वावनुदात्तौ वर्तेते इति भावः । द्वावुदात्तवन्तावश्वशब्दौ यस्य समुदायस्येति बहुव्रीहिः । तस्य भावस्तत्त्वम् । कर्मधारयस्तु न । ततो मतुबनापत्तेरिति बोध्यम् । स्वरभिन्नानामिति तृतीयातत्पुरुषः । उत्तरः उत्तरसूत्रविहितः । उत्तरश्च सूत्रमक्षस्यादेवनस्येतीति भावः । अनभिधानादिति । भाष्यकैयटयोरित्यादिः । अत्र

दशान्तेत्यस्याष्टादशान्तेत्यर्थः । विंशत्यादावित्यस्य एकोनविंशत्यादावित्यर्थः । तौ च संख्यापरिच्छिन्नसमुदायपराणां विंशत्यादीनां न तु संख्येयमात्रपराणाम् । ब्राह्मणानां विंशतीत्यादौ विंशतिसंख्यावच्छिन्नौ द्वौ समुदायावित्यर्थप्रतीतेः विंशती घटा इत्युक्ते चत्वारिंशतामप्रतीतेः ।

बालंबोधिनी : शेषशब्दार्थमाह इतरनिवृत्तीति । लुप्तविभक्त्यन्तमिति । शेषशब्दस्य कर्मसाधनत्वे लुप्तप्रथमान्तम् । भावसाधनत्वे लुप्तषष्ठ्यन्तम् । अत एव = एकेत्यस्य पृथक्पदत्वादेव । तत्र = एकशब्दार्थे । अन्यथा एकदेशान्वयापत्तिः । तत्र = एकशेषस्थले। बोध इति । तत्रैकशेषशास्त्रमेव मानमिति भावः। ब्राह्मणावित्यत्रेव, भवतः, भवन्तीत्यादौ विभिन्नकर्तृकानेकक्रियाप्रतीतेरनेकधातुव्यक्तिप्रयोगनिवृत्तिरेकशेषैणैवेति भ्रमवारणायाह धातुष्विति । न अस्य = एकशेषशास्त्रस्य । निवृत्तभेदानाम् = भेदेनाप्रतीयमानानाम् । तथा च तिङन्तेभ्योऽभेदेनैव शब्दशक्तिस्वभावेन व्यापार प्रतीत्या नानेकशब्दप्रयोगप्रसङ्ग इति नैकशेषप्रवृत्त्यावश्यकतेति भावः । द्विबह्वोरिति । अनयोः संख्यापरत्वेन न द्विवचनानुपपत्तिः। शेष इति । एकस्य निवृत्तिः प्रसज्येत, न त्वेकस्य शेष इति भावः।

शेषग्रहणफलमाह एक इति । अन्तरतम इति भावः । अश्व इति । अश्वशब्दः 'अशूप्रुषि लटि' इति क्वन्नन्त आद्युदात्तः । नन्वश्वशब्दस्याद्युदात्तत्वेनान्तानुदात्तत्वेन चान्तरतम्यात् उदात्तानुदात्तयुक्त एवादेशो भवतीति तेनैवेष्टसिद्धिरत आह कदाचिदिति । द्व्युदात्तवत्त्वेति । द्वावुदात्तवन्तावश्वशब्दौ यस्य समुदायस्य स द्व्युदात्तवान् । तस्य भावस्तत्त्वम् । अत्र बहुव्रीहिरेव, न तु कर्मधारयः । अन्यथा न कर्मधारयान्मत्वर्थीय इति निषेधान्मतुब् न स्यात् । अत्रोदात्तशब्दो धर्मिपरः । धर्मस्यैव ग्रहणे विनिगमकाभावात् । तेनोदात्तगुणयुक्ताकार इत्युदात्तशब्दस्यार्थः । उभयस्वरितकेति । अपीति शेषः । अन्यतरसाम्यमादायान्यतरादेशवदुभयसाम्यमादाय = द्व्युदात्ताकारवत्त्व द्व्यनुदात्ताकार-वत्त्वरूपसाम्यमादाय उभयस्वरितोऽश्वशब्द आदेशः स्यादित्यर्थः । समाहारः स्वरित इति स्वरितस्योदात्तानुदात्तसमाहाररूपत्वेन तादृशादेशस्य द्व्युदात्तवत्त्वं द्व्यनुदात्तवत्त्वञ्चास्तीति भावः। एकशेष इत्युभयोक्तावप्यतिप्रसङ्गमाशङ्कते न चेति । कदाचिदिति । आद्युदात्तस्य शेषस्तु इष्ट एवेति भावः। समाधत्ते स्वरेति । स्वरेण भिन्नानामिति तृतीयातत्पुरुषः । स्वरेण भिन्नानां मध्ये यस्य शब्दस्य उत्तरसूत्रेण स्वरो विहितस्स शिष्यत इति भावः । फिषोऽन्त उदात्त इत्यपेक्षया अक्षस्यादेवनस्येति सूत्रस्य परत्वेनाद्युदात्त एव शिष्यत इति बोध्यम् ।

एकश्चैकश्च द्वौ च द्वौ चेत्यादौ एकद्व्यादिशब्दस्थले एकशेषातिप्रसङ्गं निराचष्टे एकादीति । एकश्चैकश्च द्वौ च द्वौ चेत्यादौ । अनभिधानादिति । सरूपसूत्रे भाष्ये एकश्चैकश्च द्वौ च द्वौ चेत्यादावेकशेषः कस्मान्न भवतीत्याशङ्क्य 'संख्याया अर्थासम्प्रत्ययादन्यपदार्थत्वाच्चानेकशेषः' इति समाहितम् । वाचकशब्दान्तरसत्ताविशिष्टार्थासम्प्रत्ययः एकादिदशान्तसंख्यानामेकशेषाभावे हेतुरिति भावः । यत्रैकशशब्दोऽनेकमर्थमभिधातुं शक्नोति तत्रैवैकशेषो नान्यत्र, प्रयुक्तानामेवान्वाख्यानात् । एकश्चैकश्चेत्यस्य द्वौ च द्वौ चेत्यस्य च यादृशोऽर्थोऽभिप्रेतः सोऽसन्दिग्धेन द्वाविति पदान्तरेण, चत्वार इति पदान्तरेण च भवतीति न तत्रैकशेषः । प्रागुक्तहेतुना एकादिदशान्तानां द्वन्द्वानभिधानमपि ध्वन्यते । तच्च सरूपविषये । एकादश, द्वादशेत्यादौ विरूपविषये द्वन्द्वो भवत्येवेति बोध्यम् । एकोनविंशतीत्यर्थे नवदशेति प्रयोगोऽपीष्यते । अधिकं गुरुप्रसादतो ज्ञेयम्।

वाचकशब्दान्तरसत्ताविशिष्टत्वे सति अर्थासम्प्रत्ययत्वस्यैकशेषशास्त्राप्रवृत्तौ हेतुत्वेन विंशत्यादावेकशेषे तद्वाचकशब्दान्तरस्य चत्वारिंशदिति पदस्य सत्त्वेऽपि अर्थासम्प्रत्ययरूपविशेष्यदलस्याभावात् विशिष्टहेतोरभावेन न तत्रैकशेषाप्रवृत्तिरित्याह विंशत्यादाविति । संख्यापरिच्छिन्नसमुदायपराणां, न तु संख्येयमात्रपराणाम् । 'ब्राह्मणानां विंशती' इत्यादौ विंशतिसंख्यावच्छिन्नौ द्वौ समुदायावित्यर्थप्रतीतेः । विंशती घटा इत्युक्ते चत्वारिंशतामप्रतीतेः ।

चुटू। 'आदिर्ञिटुडव' इत्यत 'आदि'रिति 'षः प्रत्ययस्ये' त्यतः 'प्रत्ययस्ये' ति चानुवर्त्तते, तदाह- प्रत्ययाद्याविति। तेन वाचाटे नेत्वम् । प्रत्ययेति किम् ? चामरादावित्वं मा भूदिति। चुञ्चुप्चणपोर्यादित्वात्परनिमित्तयलोपस्य बहिरङ्गासिद्धत्वात्प्रत्ययादित्वाभावान्नेत्त्वम् ।

भावबोधिनी : चुटू । तेन = आदिग्रहणानुवर्तनेन । मा भूदिति । चित इत्यन्तोदात्तः स्यात् । चामरस्तु लघावन्त इत्यनेनाद्युदात्त इष्यत इति भावः । ननु चुटु षः प्रत्ययस्येति वाच्ये योगविभागादस्यानित्यत्वेन चुञ्चुबादौ नेत्वमिति प्रकारान्तरस्य भाष्यानुक्तत्वं ध्वनयन्नाह यादित्वादिति । इत्वे तु चित्पित्स्वरयोः पर्यायः स्यादिति भावः ।

बालबोधिनी : चुटू । तेन = आदिर्ञिटुडव इति सूत्रादादिग्रहणानुवर्तनेन । नेत्वमिति। 'आलजाटचौ बहुभाषिणि' इति सूत्रविहिते आटचि टकारस्य नेत्वप्रसङ्गः । अन्यथा टित्वात् स्त्रियां ङीप् स्यात् । प्रत्ययग्रहणफलमाह चामरादाविति । यदि चकारस्येत्संज्ञा स्यात्तर्हि

चित इत्यन्तोदात्तापत्तिः । 'लघावन्ते द्वयोश्च बह्वचो गुरुः' इति फिट्सूत्रेणाद्युदात्त इष्यत इति भावः । चामरादावित्यादिपदेन 'चकासृ' इत्यादेर्धातोः सङ्ग्रहः । 'तेन वित्तश्चुञ्चुप्-चणपौ' इति सूत्रविहितयोः चुञ्चुप्चणपोः प्रत्यययोरादेश्चकारस्येत्ववारणमाह चुञ्चुप्-चणपोरिति । यादित्वादिति । अत एव चुञ्चुप्चणपोश्चकारस्य प्रत्ययादित्वं नास्तीत्यर्थः। ननु यकारस्य लोपेन तस्य प्रत्ययादित्वं भवत्येवेत्यत आह परनिमित्तेति । असिद्धत्वादिति। इत्वे कर्तव्ये इति शेषः । नेत्वमिति । इत्वे तु चित्स्वरपित्स्वरयोः पर्यायिता स्यादिति भावः। एतेन चुटुषः प्रत्ययस्येत्येकयोगेनैव सिद्धे योगविभागादस्यानित्यत्वेन चुञ्चुबादौ नेत्वमिति रत्नाकरकारोक्तः प्रकारस्तु भाष्यानुक्तत्वन्नादर्तव्य इति सिद्धम् ।

न विभक्तौ। हलन्त्यमित्यस्य निषेधोऽयम् । अनित्यमिदं थमोर्मकारपरित्राणार्थादुदित्करणात् । तेन किमोऽत् क्वेति सिद्धम् । प्राग्दिशीयत्वादयं विभक्तिः।अत एव दानीमो मस्य नेत्वमिति नव्याः। भाष्ये तु प्राग्दिशीयेष्वस्याप्रवृत्तावुदित्त्वं ज्ञापकमित्युक्त्वा 'दानीञ्चे'ति सूत्रे 'लोपो व्यो' रिति लोपेन यकारं प्रश्लिष्येत्सञ्ज्ञा वारिता। अन्यत्रानित्यत्वस्य फलाभावाच्चैवमेवोक्तम् । लोपस्यासिद्धत्वाच्च नान्त्यत्वमिति बोद्ध्यम्। विभक्तौ किम् ? अचो यत् ।

भावबोधिनी : अयं कर्तृपर्यायः । नव्याः दीक्षितादयः । अनुपदं वक्ष्यमाणभाष्यरीत्या। उदित्करणेनास्य प्राग्दिशीयेष्वप्रवृत्तिरित्येव ज्ञापनीयेति सामान्यतोऽनित्यत्वज्ञापनं भाष्यविरुद्धमित्यरुचिः सूचिता अप्रवृत्ताविति । नन्वेवं दानीमो मकारस्येत्वापत्तिरत आह दानीञ्चेति । यकारम् । मकारचकारयोर्मध्ये इति शेषः । अन्यत्र = दानीमोऽन्यत्र। अनित्यत्वस्येति । पाक्षिकप्रवृत्तेरित्यर्थः । एवमेव = अप्रवृत्तिरित्येव । न च सामान्यतोऽनित्यत्वज्ञापनस्य औतस्तकारेऽप्रवृत्तिः फलमिति वाच्यम् । तकारानुच्चारणेनाप्युपपत्तेः । ननौ पृष्ठप्रतिवचने, शेषे लृडयदौ इत्यादिनिर्देशेनेत्वस्वीकाराच्च । सद्यः परुदित्यत्र तु सकारमकारयोरित्वाभावः निपातनादेवेति भावः ।

बालबोधिनी : न विभक्तौ तुस्माः । निषेध्यशास्त्राकाङ्क्षायामाह हलन्त्यमिति । ननु न विभक्ताविति निषेधेनैव इदमस्थमुरिति थमोर्मकारस्येत्ववारणसम्भवे तदर्थं कृतं थमुरित्युदित्करणं व्यर्थमत आह अनित्यमिति । तद्व्यर्थं सदस्य निषेधस्यानित्यत्वं ज्ञापयतीति भावः । अत एव 'किमोऽत्' इति अत्प्रत्ययस्य प्राग्दिशीयत्वेन विभक्तित्वेऽपि तत्सम्बन्धितकारस्य नानेन निषेध इति क्वेति सिद्धमिति भावः ।

अनित्यत्वज्ञापनफलमाह तेनेति । क्वेति । 'किमोऽत्' इत्यत्प्रत्यये 'क्वाति' इति किमः क्वादेशे क्वेति रूपम् । अत्प्रत्ययस्य विभक्तित्वमाह प्राग्दिशीयत्वादिति । ननूदित्करणेन प्राग्दिशीयविभक्तिषु नायं प्रवर्तत इत्येव ज्ञाप्यतामित्यत आह अत एवेति । थमोरुदित्करणस्य सामान्यतोऽनियत्वज्ञापनेनेत्यर्थः । नेत्वमिति । अन्यथा दानींप्रत्ययस्य प्राग्दिशीय-विभक्तित्वात् निषेधाप्रवृत्तौ दानीमो मस्येत्वापत्तिरिति भावः । नव्याः = दीक्षितादयः । तत्रारुचिमाह भाष्ये त्विति । नन्वेवं दानीमो मस्येत्वापत्तिरत आह दानीश्चेति । इत्वे कर्तव्ये परनिमित्तस्य लोपो व्योरिति लोपस्य बहिरङ्गत्वेनासिद्धत्वात् मकारस्यान्त्यत्वाभावेन नेत्वप्राप्तिरित्यर्थः । अन्यत्र = प्राग्दिशीयादन्यत्र । एवमेव = प्राग्दिशीयेष्वप्रवृत्तिरेव । लोपस्यासिद्धत्वात् = बहिरङ्गासिद्धत्वात् ।

अतो गुणे। 'उस्यपदान्ता'दित्यतोऽपदान्तादिति एङि पररूपमित्यतः पररूपमिति चानुवर्तते। पुरस्तादिति। अत एव 'नादिची'तीज्ग्रहणं चरितार्थम् । तद्धि रामानित्यादौ निषेधाभावाय, पररूपेण पूर्वसवर्णदीर्घबाधे हि तद्वैयर्थ्यं स्पष्टमेव। नोत्तरानिति। अनन्तरापेक्षया उत्तरान् व्यवहितानित्यर्थः।

भावबोधिनी : अत एव = बाध्यविशेषचिन्ताश्रयणादेव । अन्यथा इको यणचीत्यतः अज्ग्रहणानुवृत्यैव सिद्धाविज्ग्रहणं व्यर्थमेवेति भावः ।

नन्वनन्तरस्याप्युत्तरत्वादित्यत आह अनन्तरापेक्षयेति ।

बालबोधिनी : अतो गुणे । पुरस्तादिति । पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरानिति परिभाषा । अनन्तरान् = अव्यवहितान् । उत्तरान् = व्यवहितान् । बाध्यविशेषचिन्ताश्रयणे गमकमाह अत एवेति । पुरस्तादपवादन्यायाश्रयणादेवेत्यर्थः । तद्धि = इज्ग्रहणम् । निषेधाभावाय = नादिचीति पूर्वसवर्णदीर्घनिषेधाभावाय । बाध्यसामान्यचिन्तया यदि पररूपं सवर्णदीर्घमिव व्यवहितं पूर्वसवर्णदीघमपि बाधेत तर्हि नादिचीति सूत्रे इज्ग्रहणाभावेऽपि इको यणचीति सूत्रादज्ग्रहणानुवृत्त्यैव सिद्धेस्तद्व्यर्थमेव स्यादित्याह पररूपेणेति । तद्वैयर्थ्यं = इज्ग्रहणवैयर्थ्यम् । उत्तरत्वमव्यवहितापेक्षं, न व्यवहितापेक्षमित्याह अनन्तरेति ।

एकवचनं सं। 'सुः सम्बुद्धि'रित्युचितम् । 'सम्बोधने चे' त्यतः 'सम्बोधने' इत्यनुवृत्तेः सप्तमीबहुवचने न दोषः। 'सम्बुद्धावङ्गस्य गुण' इति व्यवहारान्न तदन्तस्य संज्ञा। तस्मात्पारायणादावदृष्टार्थमेवैवं न्यास इति बोद्ध्यम् । सम्बुद्ध्याक्षिप्तस्येति। सम्बुद्धेः

प्रत्ययत्वेन 'यस्मात्स विहितस्तदादी'त्यंशोपस्थितिः। स चात्र योग्यतया पञ्चम्यन्त इति भावः। 'प्रत्यये गृह्यमाणे यस्मात्स विहित' इत्याद्युपतिष्ठत इति 'प्रत्ययग्रहणे यस्मात्स विहित' इत्यादिपरिभाषार्थ इतिअङ्गस्येति सूत्रे भाष्ये स्पष्टम्। अनुमानरूपाऽऽक्षेपस्तु नात्र, फलाभावात्। यथा पीनत्वानुपपत्त्याऽनुमीयमानरात्रिभोजनस्य पीनत्वोपपत्तिः फलं, न तथा एतत्सूत्रे तदनुमानेन सम्बुद्ध्युपपत्तिर्भवति। किञ्च प्रत्ययस्योत्पत्तावङ्गापेक्षत्वेऽपि ज्ञाने तदपेक्षत्वाभावेन शास्त्रे तदाक्षेपे मानाभावः। अत एवाङ्गस्येति सूत्रे तत्स्थाने प्रत्यये इत्यधिकारः कार्य इति पक्षे प्राकरोदित्यादौ उपसर्गात्पूर्वमडादिः स्यादित्याशङ्क्य प्रत्ययग्रहणे यस्मात्स विहितस्तदादे'रिति परिभाषोपस्थित्या समाहितं भाष्ये, न त्वङ्गाक्षेपेणेति दिक्।

भावबोधिनी : न दोषः = न सम्बुद्धिकार्यम्। व्यवहारादिति। न च संज्ञाविधाविति निषेधे जागरूके व्यवहारालम्बनं किमर्थमिति वाच्यम्। सामन्त्रितमित्येव महासंज्ञाकरणेन तदन्तग्रहणस्य दुर्वारत्वादिति भावः। तस्मादिति। सु सम्बुद्धिरिति न्यासे दोषलेशाभावादित्यर्थः। आक्षेपं दूषयिष्यन् तस्य विवक्षितार्थमाह सम्बुद्धेरिति। तथा चाक्षिप्तस्येत्यस्योपस्थापितस्येत्यर्थ इति भावः। स च = तदादीत्यंशः। पञ्चम्यन्त इति। एङ् ह्रस्वादित्यनेन सामानाधिकरण्यायेति शेषः।

ननु प्रत्ययज्ञानस्य प्रकृतिज्ञानव्याप्यत्वादनुमितिर्भविष्यतीत्यत आह अनुमानरूपेति। भावे ल्युट्। फलाभावादिति। अनुपपद्यमानार्थदर्शनेन तदुपपादके बुद्धिरर्थापत्तिः। तस्याश्चानुपपद्यमानार्थोपपत्तिः फलं, तदभावादित्यर्थः। तदेवाह यथेति 'ननु प्रकृतिमन्तरा' प्रत्ययानुपपत्त्या तेन तदुपपत्तिर्भवत्येवेत्यत आह किञ्चेति। ज्ञान इति। प्रत्ययत्वज्ञाने प्रत्ययाधिकारपाठः विधेयसमर्पकविभक्तिनिर्देशश्च साधकः, न तु प्रकृतिज्ञानम्, तस्य जनकतावच्छेदकधर्मशून्यत्वादिति भावः। ननु रात्रिभुक्तिरपि पीनत्वजनिकैवेति तत्रापि तज्ज्ञाने तदनपेक्षत्वमस्त्येवेत्यत आह शास्त्र इति। लोके अभुञ्जानत्वपीनत्वयोः विरुद्धत्वेनानुपपद्यमानत्वात् तज्ज्ञाने तज्ज्ञानापेक्षत्वेऽपि न शास्त्रे इति भावः। ननु तदादेः परमेकवचनं सम्बुद्धिसंज्ञं स्यादित्यर्थात् ज्ञानेऽप्यपेक्षाऽस्त्येवेत्यत आह अत एवेति। परिभाषोपस्थापनादेवेत्यर्थः। अधिकार इति। तेनैव ब्राह्मणभिस्सेत्यादौ ऐसादिव्यावृत्तिरिति भावः। न त्वङ्गेति। नन्वङ्गाधिकाराभावे अङ्गसंज्ञासूत्रस्याप्यभावेन कथं तदाक्षेपं वदेद्भाष्यकार इति चेन्न। अङ्गस्येति सूत्राभावेऽपि ह्रस्वादङ्गादित्याद्यर्थमङ्गसंज्ञासूत्रसत्वात् अङ्गाक्षेपेणेत्यत्राङ्गपदस्य प्रकृतिपरत्वाच्चेति भावः। दिगिति। अनुमितस्य शाब्दबोधेऽन्वयाभावो दिगर्थः।

बालबोधिनी : एकवचनं सम्बुद्धिः । उचितमिति । लाघवादिति भावः । नन्वेवं न्यासे सप्तमीबहुवचनस्य सुपोऽपि सम्बुद्धिसंज्ञापत्तिरत आह सम्बोधने चेति । न दोष इति। अत एव प्रातिपदिकार्थसूत्रविहितप्रथमैकवचनस्यापि न संज्ञापत्तिरिति बोध्यम् । तत्फलन्तु तत्प्रयुक्तकार्याभाव एव । ननु सुः सम्बुद्धिरिति न्यासे सोः प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया तदन्तस्य संज्ञापत्तिः । एकवचनग्रहणे तु तस्य प्रत्ययमात्रबोधकत्वाभावेन न तत्र प्रत्ययग्रहणपरिभाषोपतिष्ठते । न च सुरिति न्यासेऽपि संज्ञाविधाविति निषेधेन न तदन्तविधिरिति वाच्यम् । यथा सामन्त्रितमिति संज्ञासूत्रे आमन्त्रितशब्दयोगार्थोपपत्तये संज्ञाविधाविति निषेधाप्रवृत्त्या तदन्तविधिस्तथाऽत्रापि सम्बुद्धिरिति महासंज्ञाकरणेन तन्निषेधाप्रवृत्तेः । आमन्त्रणसाधनत्वस्येव सम्बोधनसाधनत्वस्यापि तदन्त एव सम्भवादिति शङ्कयामाह सम्बुद्धाविति । 'ह्रस्वस्य गुणः' इति सम्बुद्धौ परे ह्रस्वान्तस्याङ्गस्य गुण इति व्यवहारात् सम्बुद्धिनिमित्तकाङ्गसंज्ञावत इत्यर्थो लभ्यते । यदि सुप्रत्ययन्तस्य सम्बुद्धिसंज्ञा तर्हि निरुक्तव्यवहारोऽनुपपन्नः स्यादिति भावः। तस्मात् = सुः सम्बुद्धिरिति न्यासे दोषाभावात्। तर्हि तथा न्यासः कुतो न कृत इत्याह पारायणादाविति । पारायणादिजन्यपुण्य-विशेषलाभायेत्यर्थः । एवं न्यास इति ।

एङ्ह्रस्वात् सम्बुद्धेः । सम्बुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह हे कतरत्कुलेति मूलम् । न हि शाब्दमशाब्देनान्वेतीति सम्बुद्ध्याक्षिप्तस्याङ्गस्य शाब्दान्वयित्वासम्भवेन मूलग्रन्थमन्यथा योजयितुमाह सम्बुद्धेरिति । प्रत्ययत्वेनेति । तथा च प्रत्ययग्रहणपरिभाषया यस्मात् स विहितस्तदादीत्यंश उपतिष्ठते । सम्बुद्ध्याक्षिप्त-स्याङ्गस्येत्यस्य मूलग्रन्थस्य सम्बुद्ध्युपस्थापितस्य तदादेरित्यर्थः । स च = तदादीत्यंशः । एङ्ह्रस्वादिति पञ्चम्यन्ततया तेन सह सामानाधिकरण्याय तदादीत्यंशः पञ्चम्यन्त इत्याह योग्यतयेति । यस्मात्प्रत्ययविधिरित्यङ्गसंज्ञासूत्रे तदादिशब्देन बहुव्रीहित्वेऽपि प्रत्ययप्राग्वर्तिन एव ग्रहणं तद्वत् प्रत्ययग्रहणपरिभाषया अत्रोपस्थिततदादिशब्देनार्थाधिकारानुरोधात् प्रत्ययप्राग्वर्तिन एव ग्रहणमिति बोध्यम् । अत एव प्रत्ययग्रहणे शब्दस्वरूपं विशेष्यमादाय तदन्तविधिरित्युच्यते । प्रत्ययान्तं शब्दस्वरूपमित्यर्थो लभ्यते । अन्यथा तदादेः बहुव्रीहित्वेन प्रत्ययान्तस्य ग्रहणे सामानाधिकरण्यासम्भवेन तस्य विशेष्यत्वं न सम्भवतीति बोध्यम् । किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्, वा बहूनां जातिपरिप्रश्ने डतमच्, एकाच्च प्राचाम् इति तद्धिताधिकारविहितौ डतरडतमौ प्रत्ययौ । डतरप्रत्ययान्तात् कतरशब्दान्नपुँसकलिङ्गात् सम्बुद्धिः सुप्रत्ययः । अद्ड्डतरादिभ्यः पञ्चभ्य इति तस्य अद्ड् आदेशो डित्वसामर्थ्यात् टेरकारस्य लोपे कतरदिति । तदादिशब्दस्योक्तार्थस्वीकारेणैव, अद्डादेशसम्बन्ध्यकार-

विशिष्टस्य तदादित्वात् ह्रस्वान्तत्वाच्च हे कतरदित्यत्र सम्बुद्धिलोपापत्तिरिति शङ्काया अवकाशो नास्तीति ज्ञेयम् ।

प्रत्ययग्रहणपरिभाषायाः पदोपस्थापकत्वं प्रमाणयति भाष्ये इति । ननु प्रसिद्धाक्षेप एव भवत्विति शङ्कायामाह अनुमानेति । नन्वाक्षिप्तस्यापि व्युत्पत्तिवैचित्र्येण शाब्देऽन्वयो भवत्विति शङ्कायामाह फलाभावादिति । अनुपपद्यमानार्थोपपत्तिराक्षेपस्य फलं, प्रकृते तदभावादित्यर्थः । तदेवाह यथेति । एतत्सूत्रे = एङ्ह्रस्वादिति सूत्रे । तदनुमानेन = सम्बुद्ध्या अङ्गाक्षेपेण । प्रकृतिं विना प्रत्ययानुत्पत्त्या प्रयोगे एव सम्बुद्ध्युपपत्तिरूपफलं सम्भवति, न त्वेतत्सूत्रे इति नात्र तदाक्षेप इति भावः ।

एवमाक्षेपकोपपत्तिरूपाक्षेपफलाभावमुक्त्वा आक्षेपमूलभूतानुपपत्तेरप्यभावमाह किञ्चेति । प्रत्ययस्योत्पत्तावित्यस्य बाहुलकात् करणे क्तिना प्रत्ययविधायकशास्त्रे इत्यर्थो बोध्यः । ज्ञाने = प्रत्ययत्वज्ञाने । तदपेक्षत्वाभावेन = अङ्गापेक्षत्वाभावेन । तदाक्षेपे = अङ्गाक्षेपे । प्रत्ययत्वज्ञाने प्रत्ययाधिकारे पाठो विधेयसमर्पकविभक्तिनिर्देशश्च साधकः, न तु प्रकृतिज्ञानम् । तस्य तज्जनकतावच्छेदकधर्मशून्यत्वादिति भावः । शास्त्रे = एङ्ह्रस्वादित्यादौ । मानाभाव इति । लोके दिवाभोजनाभाववतो देवदत्तस्य रात्रिभोजनं विना पीनत्वानुपपत्त्या तेन रात्रिभोजनमाक्षिप्यते । प्रत्ययविधायकशास्त्रे प्रकृतिं विना प्रत्ययविधानानुपपत्त्या तेन प्रकृतेराक्षेपेऽपि, एङ्ह्रस्वादित्यादौ सम्बुद्धित्वज्ञानस्यापेक्षिततत्वेन तदर्थं प्रकृतिज्ञानापेक्षाभावेनानुपपत्त्यभावात् तदाक्षेपे मानाभाव इति भावः ।

प्रत्ययविधायकभिन्ने एङ्ह्रस्वादित्यादिशास्त्रे प्रत्ययग्रहणपरिभाषाया एवोपस्थितौ मानमाह अत एवेति । निरुक्तविषये उक्तपरिभाषाया एवोपस्थितेरेवेत्यर्थः । आशङ्क्येति। तदन्तविधिना विशिष्टस्य उपसर्गधातुसमुदायस्य प्रत्ययान्तत्वादिति भावः । समाहितमिति। प्रत्ययग्रहणपरिभाषया यस्मात् स विहितस्तदादिर्धातुरेव न तु तत्समुदाय इति न दोष इति भावः । दिगिति। आक्षिप्तस्य शाब्दबोधेऽन्वयित्वाभावाद्विशेष्यविशेषणभाव-निबन्धनतदन्तविधेरलाभो दिगर्थः ।

अङ्गस्य- उक्तार्थस्य। हल्ङ्याबिति सूत्राद्धलित्यनुवर्त्तते। हे कतरदिति। प्रकृत्यकारस्य टिलोपेनापहारादिति भावः। नन्वङ्गात्परस्याः सम्बुद्धेरवयवस्य हलो लोप इत्युचितम् , सम्बुद्ध्याक्षिप्तस्य सम्बुद्ध्यैवान्वयस्योचितत्वादत आह- कुलेतीति। अत्र परत्वात्पूर्वरूपे उभयत आश्रयणेऽन्तादिवद्भावाभावात्, तत्स्वीकारेऽपि ह्रस्वसम्बुद्ध्योः पौर्वापर्यव्यवहारासम्भवात् , ताद्रूप्यानतिदेशाच्च ह्रस्वान्ताङ्गात्परसम्बुद्धेरभावान्मलोपो

न स्यात् । एवञ्च लक्ष्यानुरोधादन्याक्षिप्तस्याप्यन्यत्रान्वय इति भावः। एतदर्थमेव हल्लुप्यते सम्बुद्धेश्चेदिति व्याख्यातम्, मस्य सम्बुद्धित्वाभात्। अर्द्धविकारेणैकदेशविकृतन्यायेनापि न सम्बुद्धित्वम्, एकवचनसञ्ज्ञासम्बुद्धिसञ्ज्ञयोरक्तपरिमाणनिष्ठतया तयोस्तेन न्यायेनालाभाच्च। मकारस्यादेशत्वाभावच्च नात्र स्थानिवद्भावः। अत एव 'राम'मित्यादौ 'सुपि चे' ति दीर्घो न। न च सम्बुद्धित्वस्य सकारमात्रनिष्ठत्वेन स्थानिभूताल्धर्मत्वेनामः सम्बुद्धित्वाभावे कथं मस्य सम्बुद्ध्यवयवत्वमिति वाच्यं, सुप्सञ्ज्ञाया उकारविशिष्टे सत्वेन तदुपस्थाप्ये जायमानैकवचनसञ्ज्ञाया विशिष्टे सत्वेन सम्बुद्धिसंज्ञायाम् इत्संज्ञोकारविशिष्ट-स्यैवोद्देश्यत्वेन तस्यानल्विधित्वात्। एतेन 'अद्डादेशेनैव नपुंसकत्वाभिव्यक्तौ 'कुलेतीति' व्यर्थम्' इत्यपास्तम्।

भावबोधिनी : उक्तार्थस्येति । तदाद्यंशरूपार्थवत इत्यर्थः । अपहारादिति । नन्वत्रोक्ताक्षेपवादे दोषाभावेऽपि तदाद्यंशोपस्थितिवादे सम्बुद्धिलोपो दुर्वारः । अद्डवयवाकारान्तस्यापि ह्रस्वान्ततदादित्वादिति चेन्न । परिभाषायां तदादिपदे बहुव्रीहिसत्वेऽपि तेन विहितप्रत्ययभाग एव गृह्यत इति प्रकृते सम्बुद्ध्या तादृशस्यैवोपस्थित्यङ्गीकारात् । वैयधिकरण्यान्वयप्रयोजनं वक्तुमवतारयति नन्वङ्गेति। अदन्तत्वादिति शेषः । उचितमिति सामानाधिकरण्यमिति शेषः । तेनैव हे कतरदिति सिद्ध्यतीति भावः । परत्वादिति । सम्बुद्धिलोपादित्यादिः । अपरनिमित्तकत्वेन लोपस्यान्तरङ्गत्वोद्भावने तु पूर्वरूपस्य प्रतिपदोक्तत्वं बोध्यम् ।

ननु वैयधिकरण्येऽपि हलि सम्बुद्ध्यवयवत्वज्ञानायामि सम्बुद्धित्वं ह्रस्वान्तेऽङ्गत्वमित्युभयत आश्रयत्वमस्त्येवेत्यत आह तत्स्वीकारेऽपीति । ह्रस्व-सम्बुद्ध्योरिति । वैयधिकरण्यपक्षे तु ह्रस्वहलोः पौर्वापर्यमपेक्षितं तच्चास्तीति भावः ।

ननु पौर्वापर्यभावोऽप्यन्तादिवच्चेत्यनेन साध्यतामत आह ताद्रूप्येति । पौर्वापर्यानतिदेशादित्यर्थः । ह्रस्वान्तत्वानतिदेशादिति तु नार्थः । तस्य स्वतस्सिद्धत्वेनातिदेशानपेक्षणादिति विषम्याम् । मिश्रस्तु स्थानिवद्भावेन ह्रस्वान्तात् परा सम्बुद्धिरिति व्यवहारो भविष्यतीत्यत आह ताद्रूप्येति । ताद्रूप्यस्य वर्णमात्रवृत्ति-धर्मघटितस्यानतिदेशेन तादृशव्यवहारः स्थानिवत्वेनापि दुर्घटः । ह्रस्वत्वस्य वर्णमात्रवृत्तितया विशेषणतयाऽलाश्रयणादित्यत आह अन्याक्षिप्तस्य = अन्योपस्थापितस्य । वस्तुतस्तु येन यदुपस्थाप्यते तस्य तेनैवान्वय इति नियमेन गुणश्रुत्या उपस्थापितस्य इक इत्यस्याङ्गेनान्वयदर्शनात् । अत एवोचितत्वादित्युक्तमवतारिकायाम् । एतदर्थमेव=

कुलेति रूपसिद्ध्यर्थमेव । उक्तमुपपादयति मस्येति । ननु पूर्वान्तवद्भावेन ह्रस्वान्ताङ्गत्वमेकदेशन्यायेन मस्य सम्बुद्धित्वं व्यपदेशिवद्भावेन तदवयवत्वमिति लोपो भविष्यति, किं व्यधिकरणान्वयेनेत्यत आह अर्थेति । हेत्वन्तरमाह एकवचनेति । आदेशत्वेति । श्रौतानुमानिकोभयविधादेशत्वाभावादित्यर्थः । अत एव = मकारे सम्बुद्धित्वसुप्त्वयोरनतिदेशादेव । वैयधिकरण्यपक्षेऽपि शङ्कते न चेति । तदुपस्थाप्ये= सुप्पदोपस्थाप्ये । एकवचनशब्दोपस्थापितस्येत्यादिः । तस्य = सम्बुद्धित्वस्य । अनल्विधित्वात् समुदायधर्मत्वात् । इदञ्च यथाश्रुतसूत्ररीत्या । सम्बुद्धिरिति न्यासे तु न कोऽपि क्लेश इति बोध्यम् । एतेन कुलेत्युक्तेः वैयधिकरण्यान्वयप्रयोजनत्वकथनेन। विषम्यान्तु स्थानिभूताल्धर्मत्वेनेत्यादिग्रन्थः प्रकारान्तरेण व्याख्यातः ।

बालबोधिनी : अङ्गस्य = उक्तार्थस्य = यस्माद्विहितस्तदादेः । तस्य चैङा ह्रस्वेन च विशेषितत्वात् तदन्तविधिः। हे कतरदित्यत्र प्रकृत्यकारस्य टिलोपेनापहारात् न ह्रस्वान्ता प्रकृतिरित्याह प्रकृत्यकारस्येति । ननु सम्बुद्ध्याक्षिप्तस्य अङ्गादित्यस्य सामानाधिकरण्यानुरोधेन सम्बुद्ध्यैवान्वय उचितः । न तु तस्य हल्विशेषणतया । तथा चाङ्गत् परस्य सम्बुद्ध्यवयवस्य हलो लोप इति वक्तुमुचितम् । एवं सति एङन्तात् ह्रस्वान्ताच्चाङ्गाद्धल् लुप्यत इति अङ्गादित्यस्य हल्विशेषणतया वृत्तिरनुचितेति शङ्कते नन्विति । कुलेति । कुलशब्दात् प्रथमैकवचने सोरमादेशे सम्बुद्धिलोपापेक्षया परत्वात् अमि पूर्व इति पूर्वरूपे, उभयत आश्रयणे नान्तादिवदिति अन्तादिवद्भावाभावात्, कथञ्चित् तत्स्वीकारेऽपि ह्रस्वसम्बुद्ध्योः पौर्वापर्यातिदेशबोधकशास्त्राभावेन तादृशव्यवहारासम्भवात्, ह्रस्वान्ताङ्गात्परसम्बुद्धित्वस्याशास्त्रीयत्वेन स्थानिवत्सूत्रेणातिदेष्टुमशक्यत्वाच्च ह्रस्वान्ताङ्गात्परसम्बुद्धेरभावात् अङ्गादित्यस्य सम्बुद्धिविशेषणत्वे मलोपो न स्यात् । हल्विशेषणत्वे तु ह्रस्वसम्बुद्ध्योः पौर्वापर्यानपेक्षणान्न दोष इत्याह अत्रेति । सोरमादेशे कुल+अम् इत्यत्रेत्यर्थः । परत्वादिति । सम्बुद्धिलोपापेक्षयेत्यादिः । पूर्वरूपे = अमि पूर्व इत्यनेन । प्राचां मतेनाह उभयत इति ।

ननु अङ्गादित्यस्य हल्विशेषणत्वमङ्गीकर्तुः तवापि हलि सम्बुद्ध्यवयवत्वाय अमि सम्बुद्धित्वं, ह्रस्वान्तेऽङ्गत्वमित्युभयत आश्रयणमावश्यकमेवेत्यत आह तत्स्वीकारेऽपीति। उभयत आश्रयणे अन्तादिवत्त्वस्वीकारेऽपि अङ्गादित्यस्य सम्बुद्ध्यैवान्वय इति सामानाधिकरण्यपक्षे तयोः पौर्वापर्यमपेक्षितम् । तच्च न सम्भवति । हल्विशेषणत्वे वैयधिकरण्यपक्षे तयोः पौर्वापर्यं नापेक्ष्यते । अङ्गहलोः पौर्वापर्यमपेक्षितं तच्चास्तीति भावः।

ननु ह्रस्वान्ताङ्गात्परसम्बुद्धित्वरूपधर्मस्य पौर्वापर्यघटितस्य स्थानिवत्सूत्रेणातिदेशो भवत्वित्यत आह ताद्रूप्येति । निरुक्तपौर्वापर्यानतिदेशादित्यर्थः । अन्याक्षिप्तस्य = अन्योपस्थापितस्य । एतदर्थमेव = अन्याक्षिप्तस्यान्यत्रान्वयसूचनार्थमेव । हल् लुप्यते सम्बुद्धेश्चेदिति व्याख्याने हेतुमाह मस्येति । सम्बुद्धित्वाभावादिति । सम्बुद्ध्याक्षिप्तस्याङ्गस्य सम्बुद्ध्यैवान्वये अङ्गात्परमस्य सम्बुद्धित्वाभावात् लोपो न स्यादिति भावः । अङ्गादित्यस्य हल्विशेषणत्वे तु नायं दोषः ।

ननु पूर्वान्तवद्भावेन ह्रस्वान्ताङ्गत्वम्, एकदेशविकृतन्यायेन मस्य सम्बुद्धित्वं, व्यपदेशिवद्भावेन तस्यैव सम्बुद्ध्यवयवत्वमिति सम्बुद्धिविशेषणतायामपि लोपो भवत्येवेति कुतो वैयधिकरण्येनान्वय इत्यत आह अर्द्धविकार इति । एकदेशविकृत-न्यायाप्रवृत्तौ हेतुमाह अर्धविकारेत्ति । हेत्वन्तरमाह एकवचनेति । अक्तपरिमाणेति । परिच्छिन्नपरिमाणेत्यर्थः । तयोः = एकवचनसंज्ञासम्बुद्धिसंज्ञयोः । ननु स्थानिवद्भावेन मस्य सम्बुद्धित्वातिदेशो भवत्विति शङ्कायामाह मकारस्येति । अत एव = मस्यादेशत्वा-भावादेव । अन्यथा तत्र सम्बुद्धित्ववत् सुप्त्वातिदेशे राममित्यत्र सुपि चेति दीर्घापत्तिरिति भावः ।

अङ्गादित्यस्य हल्विशेषणत्वपक्षे शङ्कते न चेति सकारमात्रनिष्ठत्वेनेति । प्रत्याहारपरामर्शवेलायां लोपश्च बलवत्तर इत्युक्तेरुकारनिवृत्त्या तस्य तन्निष्ठत्वमिति भावः। स्थानिभूताल्धर्मत्वेन = स्थान्यलसाधारणधर्मत्वेन । आदिरन्त्येनेत्यत्रान्त्यपदस्य सादृश्ये लक्षणानङ्गीकर्तृमूलकृन्मतरीत्या समाधत्ते सुपूसंज्ञाया इति । विशिष्टे सत्वेनेति । तन्मते ह्युक्तरीत्या मध्यगानुबन्धनिवृत्तावपि इकः, सुप इत्यादिनिर्देशान्यथानुपपत्त्या आद्यन्तपद-परामर्शयोग्ययोः प्रागनिवृत्तिरित्यस्यावश्यं वक्तव्यतया स्वपदेन विशिष्टस्यैव परामर्शात् तस्य विशिष्टे सत्वमिति भावः । स्पष्टश्चेदं सदाशिवभट्टीयादिषु । तदुपस्थाप्ये = सुपूपदोपस्थाप्ये। तस्य = सम्बुद्धिलोपस्य । इमे शङ्कासमाधाने एकवचनं सम्बुद्धिरिति यथाश्रुतसूत्ररीत्या । सुः सम्बुद्धिरिति सिद्धान्तभूते न्यासे तु समुदायस्य संज्ञित्वेन न दोष इति बोध्यम् ।

एतेन = कुलेत्यस्य शङ्कासमाधानपरतया योजनेन ।

एङ्ग्रहणं किमिति। हरे विष्णो इत्यादावङ्गाधिकारस्थात् परनिमित्तापेक्षाच्च गुणात्पूर्वं ह्रस्वान्तत्वादेव सिद्धिः। सेप्रभृतीनां सम्बोधने प्रयोगसत्त्वे एग्रहणेनैव सिद्धे प्रत्याहारग्रहणं व्यर्थमिति प्रश्नः। हरे इति। सामर्थ्यादेवात्र सन्निपातपरिभाषा न, गुणात्सम्बुद्धेरिति वक्तव्ये एङ्ह्रस्वग्रहणसामर्थ्याच्च । अत एव हे लक्ष्मि इत्यादौ लोपसिद्धिः।

परत्वादिति अभ्युच्चयः। नित्यत्वाच्चेति। चेनानवकाशत्वसङ्ग्रहः। नपुंसके त्रपो इत्यादावस्यापि लुका बाध इत्यन्यत्।

भावबोधिनी : ननु गुणस्य प्रकृतिप्रत्ययसम्बन्धिवर्णमात्रनिमित्तकत्वेनान्त-रङ्गत्वादुभयोरन्तरङ्गयोः परत्वाद्गुण एव स्यादत आह अङ्गाधीति । एवं लोपस्यैवान्तरङ्गत्वमिति भावः । संज्ञाकृतबहिरङ्गत्वानङ्गीकारादाह परनिमित्तेति । एग्रहणेति । स्मृतवादिषु तु णित्वात् वृद्धिप्राप्तिरिति भावः । प्रयोगसत्व इति । नान्तः पादमिति सूत्रस्थेन न चैङः पदान्तात् परो रुरस्तीति भाष्येण सौ ईदृशानामनभिधानादिति भावः । मूले नित्यत्वाच्चेति । ननु ह्रस्वान्तत्वप्रयुक्तलोपस्यान्तरङ्गत्वमुपपादितमेवेति चेन्न । अपरनिमित्तकत्वेनान्तरङ्गत्वमित्यस्य लक्ष्यसाधकत्वेनासम्प्रतिपन्नत्वादिति भावः। सामर्थ्यादिव = एङ्प्रत्याहारग्रहणसामर्थ्यादिव । अत्र = सम्बुद्धिलोपविषये ।

ननु हे रामेत्यादौ ह्रस्वग्रहणस्य चारितार्थ्यात् हे गौर्यादौ कथं सन्निपातपरिभाषाविरोधो वार्येतात आह गुणादिति । अत एव = ह्रस्वांशेऽपि परिभाषाप्राप्तिकथनादेव । एवञ्च एङ्ह्रस्वग्रहणं सन्निपातपरिभाषाया अनित्यत्वज्ञापकमिति तत्त्वम् । असमबलयोः परत्वं न नियामकमित्याशयेनाह अभ्युच्चय इति । अनवकाशत्वेति। अपवादत्वमित्यर्थः । ननु तदप्राप्तियोग्येऽचारितार्थ्यं येन नाप्राप्तिन्यायप्रवृत्तौ बीजम् । तच्च त्रपो इत्यादौ नेत्याशङ्क्य समाधत्ते नपुंसकं इति । अस्यापीति । सम्बुद्धिलोपस्यापीत्यर्थः । अन्यदिति । बाधकाबाधितप्राप्तेरभावेऽपि प्राप्तिमात्रमस्त्येव, उद्देश्यतावच्छेदकाक्रान्तत्वादिति भावः । न चैवं गुणे कृते लोपाप्रसङ्ग इति वाच्यम् । एङन्तत्वनिमित्तकलोपप्रवृत्तेस्सुलभत्वादिति भावः ।

बालबोधिनी : एङ्ग्रहणं किमिति प्रश्नकर्तुराशयमाह हरे इति । तत्र सम्बुद्धिलोपगुणयोः प्राप्तयोः गुणस्य बहिरङ्गत्वमाह अङ्गाधिकारेति । अङ्गसंज्ञासापेक्षत्वेन गुणस्य बहिरङ्गत्वमित्यर्थः । संज्ञाकृतबहिरङ्गत्वस्यानाश्रयणादाह परनिमित्तेति । गुणस्य बहिरङ्गत्वेनासिद्धत्वात् ततः पूर्वं ह्रस्वान्तत्वादेव लोपसिद्धिरिति तदाशयः । ननु इना सहितः सेः, तस्य सम्बोधने लोपार्थमेङ्ग्रहणमावश्यकमत आह सेप्रभृतीनामिति । प्रयोगसत्त्वे इति । 'न चैङः पदान्तात्परो रुरस्ती'ति नान्तः पादमिति सूत्रस्थभाष्येण, अनेन च विरोधात् सावीदृशानां प्रयोगाणामनभिधानमिति बोध्यम् । प्रत्याहारग्रहणम् = एङ्ग्रहणम् ।

हरे इति । ननु ह्रस्वस्य गुण इति सम्बुद्धिनिमित्तके गुणे कृते सन्निपातपरिभाषा-विरोधात् सम्बुद्धिलोपो न स्यादित्यत आह सामर्थ्यदिवेति । प्रत्याहारग्रहणसामर्थ्यदिवेत्यर्थः।

अत्र = सम्बुद्धिलोपविषये । ननु प्रत्याहारग्रहणसामर्थ्यात् एङन्तात् परसम्बुद्धिलोपविषये सन्निपातपरिभाषाया अप्रवृत्तावपि ह्रस्वान्तात्परसम्बुद्धिलोपविषये तदप्रवृत्तौ मानाभावः । तथा च हे गौरीत्यादौ परत्वात् हल्ङ्यादिलोपं बाधित्वा सम्बुद्धिनिमित्तके अम्बार्थनद्योरिति ह्रस्वे तदुत्तरं सन्निपातपरिभाषया सम्बुद्धिलोपो न स्यात् । ह्रस्वग्रहणं तावत् हे रामेत्यादौ चरितार्थमत आह गुणादिति । हे गौरीत्यादौ सन्निपातपरिभाषाविरोधात् यदि सम्बुद्धिलोपो न स्यात् तर्हि ह्रस्वग्रहणस्य हे रामेत्यादावकारांश एव प्रयोजनसत्वेन तस्य अकारस्य एङश्च संग्राहकतया गुणात् सम्बुद्धेरिति न्यासेनैवेष्टसिद्धौ एङ्ह्रस्वग्रहणसामर्थ्यात् सम्बुद्धिलोपमात्रविषये सन्निपातपरिभाषाया अप्रवृत्तिः कल्प्यत इति भावः । अत एव = ह्रस्वांशेऽपि सन्निपातपरिभाषाया अप्रवृत्तेरेव । परत्वादिति । हे हरे, हे विष्णो इत्यादौ सम्बुद्धिलोपापेक्षया परत्वात् सम्बुद्धिगुणे कृते ह्रस्वात् परत्वं नास्तीत्युक्तं मूले । वस्तुतः विप्रतिषेधे एव परत्वसम्भवेन प्रकृते तदभावेन परत्वासम्भवादाह अभ्युच्चयं इति । नित्यानित्ययोर्विप्रतिषेधायोगादिति भावः । अनवकाशत्वेति । येन नाप्राप्तन्यायेन तदप्राप्तियोग्येऽचारितार्थ्यरूपबाधबीजस्य सत्वादिति भावः । ननु नपुंसके त्रपो इत्यादौ हे त्रपु + स् इत्यवस्थायां स्वमोर्नपुंसकादिति लुका बाधेन एङ्ह्रस्वादित्यस्याप्रवृत्तौ गुणस्य चारितार्थ्यात् उत्सर्गाप्राप्तियोग्ये विषयेऽचारितार्थ्यरूपबाधबीजस्याभावेन न सम्बुद्धिगुणस्यानवकाशत्वाद् बाधकत्वमित्यत आह नपुंसके इति । अस्यापि = एङ्ह्रस्वादित्यस्यापि । बाधकाबाधितप्राप्तेरभावेऽपि लोपशास्त्रीयोद्देश्यतावच्छेद-काक्रान्तत्वेन एङ्ह्रस्वादित्यस्य प्राप्तियोग्यताया अक्षतत्वेन लोपशास्त्राप्राप्तियोग्ये विषयेऽचारितार्थ्यरूपमपवादत्वं गुणस्याक्षतमेवेति भावः ।

अमि पूर्वः । 'पूर्वसवर्ण' इत्यनुवृत्त्यैव सिद्धे पूर्वग्रहणन्तु 'राम'मित्यादौ द्विमात्रवारणाय। लशकु। समाहारद्वन्द्वः । अतद्धिते किम् ? 'कर्णललाटात्कनलङ्कारे' कर्णिका। कित्त्वफलन्त्वादिवृद्धिः स्यात् । आदिग्रहणाद्वृङः षाकनो न । तस्य कित्त्वे गुणो न स्यात् । तस्माच्छ। पुंसीति पञ्चम्यर्थे सप्तमी। पुंसो विहितस्येत्यर्थः। 'तत्र विद्यमाना-द्विहितस्ये' त्यर्थो वा । तस्मादिति किम् ? एतान् गाः पश्य। 'पुंसि' किम् ? मतीः।

भावबोधिनी : वारणायेति । न चैवं सति प्रथमयोरित्येव सिद्धेः अमि पूर्व इति व्यर्थमिति वाच्यम् । गौरीमित्यादौ त्रिमात्रव्यावृत्तिमात्रार्थत्वकल्पनापत्त्या द्विमात्रप्रवृत्तेर्दुर्वारत्वात् ।

तस्माच्छसो नः पुँसि । पुँसि व्यत्ययकल्पने गौरवादत आह तत्र विद्यमानादिति।

निष्कृष्टदूषणमाह एतान् गाः पश्येति । एतेन तस्मादित्यन्ताभावेऽपि न क्षतिः । अक इत्यनुवृत्त्या लिह इत्यादावदोषात् । न चाकः परस्य नत्वविधाने पूर्वसवर्णदीर्घं बाधित्वा आदेः परस्येत्यादेरकारस्य नकारे रामानित्यादौ दीर्घश्रवणानापत्तिरिति वाच्यम् । शसस्सो नः पुँसीति न्यासेनादोषात् । अकः परो यः शस् तस्य सस्य न इत्यर्थात् पूर्वसवर्णदीर्घे उत्सर्गे कृते अकः पर शसोऽसम्भवेन तक्रन्यायाप्रवृत्त्याऽनवकाशत्वेन तं बाधित्वा नत्वे पश्चात् तत्प्रवृत्तेः । न च तितऊनित्यत्रोत्सर्गे कृते नत्वचारितार्थ्यात् तत्र न्यायेन तद्बोधे पश्चात् तदप्रवृत्तिरिति वाच्यम् । अक इत्यस्य सकारविशेषणत्वेनादोषात् । अक् चानुवृत्तिसामर्थ्यात् शसनवयव एव । तथा च दीर्घोत्तरमेव नत्वप्रवृत्त्या अदोषात् । अन्यथाऽकारेण व्यवधानान्न नत्वप्राप्तिरित्यपास्तम् ।

बालबोधिनी : अमि पूर्वः । ननु प्रथमयोः पूर्वसवर्ण इति सूत्रात् पूर्वसवर्ण इत्यनुवृत्त्यैव सिद्धे पूर्वग्रहणं व्यर्थमित्यत आह द्विमात्रवारणायेति । त्रिमात्रेत्यस्याप्युपलक्षणम् । पूर्वग्रहणाभावे राममित्यादौ आन्तरतम्यात् पूर्वसवर्णो द्विमात्रः स्यात् । कुमारीमित्यादौ त्रिमात्रः स्यादिति भावः ।

लशक्वतद्धिते । लश्च शश्च कुश्चेति समाहारद्वन्द्वः । इतरेतरयोगद्वन्द्वे तु बहुवचनापत्तिः । कर्णिकेति । सूत्रे अतद्धितग्रहणाभावे 'कर्णललाटात् कनलङ्कारे' इति भवार्थे कनि कर्णिका ललाटिका इत्यत्र तद्धितकनः ककारस्येत्वापत्तिः । न च तस्येत्वेऽपि फलाभाव इति नेत्वमित्यत आह कित्वफलमिति । आदिवृद्धिरिति । किति चेति सूत्रेणेत्यर्थः। चूडालः, लोमश इत्यादि प्रत्युदाहरणमिति केचित् । तन्न । तत्रेत्वे फलाभावात् । 'आदिर्ञिटुडवः' इति सूत्रादादिग्रहणमनुवर्तते । तेन तद्धितभिन्नप्रत्ययाद्यानामेव लशक-वर्गानामित्वप्रवृत्त्या 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' इति सूत्रविहितषाकनः ककारस्येत्वा-पत्तिर्नेत्याह आदिग्रहणादिति । तस्येति । षाकनः कित्वे क्ङिति चेति गुणनिषेधे वराक इति न सिद्ध्येदिति भावः ।

तस्माच्छसो नः पुँसि । अत्र पुँसीति पञ्चम्यर्थे सप्तमी । शस इत्यवयवषष्ठी । तत्पदेन पूर्वसवर्णदीर्घः परामृश्यते । तेन पूर्वसवर्णदीर्घात्परस्य पुँवाचकाद्विहितशसवयवस्य सकारस्य नत्वमित्यर्थः । विहितस्येति । अन्यथा रामानित्यादौ पूर्वसवर्णदीर्घे कृते शसः परत्वासम्भवादनुपपत्तिः स्यादिति भावः । अथवा पुँसीती सप्तम्येव, न तु व्यत्ययकल्पनेत्या-शयेनाह तत्रेति । तत्र = पुँसि विद्यमानाद्विहितस्येत्यर्थः । अत्र पक्षे पञ्चम्यर्थकल्पना नास्ति। पूर्वसवर्णदीर्घे कृते पुँसि विद्यमानात् परः शस् न सम्भवतीत्यतः परविशेषणं विहाय विहितस्येत्युक्तम् ।

तस्मादिति किमिति ? शङ्कितुरयमाशयः । अत्र सूत्रे तस्मादिति मास्तु । अकस्सवर्ण इति सूत्रादक इत्यनुवर्त्य अकः परस्य शसो नत्वविधानेन लिह इत्यादावदोषात् । न च अकः परस्य नत्वविधाने पूर्वसवर्णदीर्घं बाधित्वा आदेः परस्येति परिभाषया आदेरकारस्य नकारे रामानित्यादौ दीर्घश्रवणानापत्तिः । सुपि चेति दीर्घेण तत्सिद्धावपि हरीनिति न सिद्ध्येदिति वाच्यम् । शसः सो नः पुँसीति न्यासेनादोषात् । अकः परस्य शसः सस्य न इत्यर्थः । न च नत्वस्य तक्रकौण्डिन्यन्यायेन पूर्वसवर्णदीर्घबाधकतया नत्वप्रवृत्त्युत्तरं पूर्वसवर्णदीर्घो न स्यादिति वाच्यम् । पूर्वसवर्णदीर्घे कृतेऽकः परस्य शसोऽसम्भवेन तक्रकौण्डिन्यन्यायाप्रवृत्तावनवकाशत्वेन तं बाधित्वा नत्वे प्रवृत्ते पश्चात् तत्प्रवृत्तेः । न च तितऊनित्यत्रोत्सर्गे दीर्घे कृते नत्वचारितार्थ्येन तेन न्यायेन बाधो दुर्वार एवेति वाच्यम् । अक इत्यस्य सकारविशेषणत्वेनादोषात् । अक् च सामर्थ्यात् प्रत्ययानवयव एव गृह्यते । तथा च पूर्वसवर्णदीर्घोत्तरमेव नत्वप्रवृत्तिरिति न कश्चिद्दोष इति तस्मादिति किमर्थमिति तदभिप्रायः । निष्कृष्टदूषणमाह एतान् गाः पश्येति । एकस्मिन्नेव वाक्ये व्याख्याभेदेन दोषप्रदर्शनार्थमस्य वाक्यस्योपन्यासः । अकः परस्य शसवयवसकारस्य नकार इत्यर्थे गा इत्यत्र आत्वोत्तरं नत्वं स्यात् । अकः परो यः शस् इति अक इत्यस्य शस्विशेषणत्वे गा इत्यत्र नत्ववारणेऽपि प्रागुक्तरीत्या दीर्घं बाधित्वा पूर्वं नत्वे तदुत्तरं दीर्घाप्रवृत्त्या एतानित्यस्यासिद्धिः । अतस्तस्मादिति पदमावश्यकमिति सिद्धम् । स्पष्टञ्चैतत् विषम्यादिषु। शसः किम् ? रामाः ।

अट्कु । बाधितुमिति । तेन 'पर्याणद्ध'मित्यत्र 'उपसर्गादसमासेऽपी'ति णत्वसिद्धिरिति भावः। अयोगवाहानामिति। न विद्यते योगो वर्णसमाम्नाये येषां तेऽयोगाः। अनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्चेत्यर्थः। ते च ते वाहयन्ति प्रयोगं निर्वाहयन्ति ते वाहाः । ते चानुस्वारविसर्गजिह्वामूलीयोपध्मानीययमाः। अत एव उरःकेणेत्यादौ विसर्गव्यवधानेऽपि णत्वसिद्धिः। तदुक्तं भाष्ये- 'नार्थो नुम्ग्रहणेन अनुस्वारे कृतेऽड्व्यवाये इत्येव सिद्ध'मिति। 'आदर्शेने' त्यादौ तु नातिप्रसङ्गः, अडतिरिक्तव्यवायात् । 'तस्मा'दित्युपस्थितं निर्दिष्टग्रहणमेतत्समभिव्याहारे 'अडादिव्यतिरिक्ताव्यवहितपरम्' । तदुक्तं- 'णत्वेऽन्यव्यवाये प्रतिषेधो वक्तव्यो, न वा अन्येन व्यवेतत्वा'दिति ग्रन्थेन। एतदुत्तरम् - 'अटा व्यवाय-सत्त्वात्प्राप्नोत्येव। अटैव व्यवाये इत्यर्था'दित्यादिभाष्यमेकदेशिनोरुक्तिप्रत्युक्तिपरम् । 'चुटुतुलशर्व्यवाये ने' ति प्रतियोगिज्ञानसापेक्षनिषेधबोधकगुरुन्यासेन सिद्धे अट्कुप्वाङित्युक्त्या 'एतैरेव व्यवाये' इत्यर्थं वदता तस्यास्तदुक्तित्वध्वननात् । एतद्वार्तिकमतम् ।

भावबोधिनी : उरःकेति। उरसि कं यस्येति उरः कायतीति वा विग्रहः । अडतिरिक्तव्यवायेनेत्यर्थलाभप्रकारमाह तस्मादिति । एतदिति । अडादीत्यर्थः । अट्कुप्वाङित्यस्य नियमत्वभ्रमं वारयति एतदुत्तरमिति । न्यासस्य गुरुत्वे हेतुः प्रतियोगिज्ञानेति । इत्युक्त्येत्यस्य लब्धमिति शेषः । तस्याः =समाधानपरभाष्योक्तेः।

बालबोधिनी : अट्कुप्वाङ् । बाधितुमिति । पदव्यवायेऽपीति निषेधं बाधितुमाङ्ग्रहणमिति मूलम् । पर्याणद्धमिति । निमित्तनिमित्तिनोः पदेन व्यवधाने पदव्यवायेऽपीति णत्वं निषिध्यते। उपसर्गादसमासेऽपि णोपदेशस्येति सूत्रेण उपसर्गस्थात् निमित्तात् परस्य णोपदेशस्य धातोर्नस्य णः स्यात् समासेऽसमासेऽपि । प्रपूर्वक णद (अव्यक्ते शब्दे) धातोः प्रणदतीत्यादिक-मुदाहरणम् । अट्कुत्वाङिति सूत्रे आङ्ग्रहणं यदि न स्यात्तर्हि आङ्पूर्वकात् णदधातोः निष्ठाप्रत्यये आङा पदेन व्यवयात् पदव्यवायेऽपीति निषेधात् पराणद्धमित्यत्र णत्वं न सिद्ध्येत् । कृते तु तद्ग्रहणे पदशब्दस्य आङभिन्नपदपरत्वेन न निषेधप्रवृत्तिरिति णत्वं सिद्ध्यति, प्रणिनदतीत्यादौ तदभावश्च ।

अयोगवाहपदस्यान्वर्थतामाह न विद्यत इति । अयोगवाहानामट्सूपदेशे फलमाह अत एवेति । उरःकेणेति । उरसि कं यस्येति, उरः कायतीति वा विग्रहः । विसर्गव्यवधानेऽपीति । तस्याट्त्वादिति भावः । नुम्ग्रहणप्रत्याख्याने भाष्यं प्रमाणयति तदुक्तमिति । अड्व्यवाये इति । अयोगवाहानामट्सूपदेशादिति भावः । ननु रषाभ्यामित्यनेन व्यवहितेऽप्राप्ते विध्यर्थमिदम् । निर्दिष्टांशविकला तस्मादिति परिभाषा अत्रोपतिष्ठते । तथा च अडादिभिस्तदन्येन च व्यवाये णत्वापत्तिरित्याशङ्क्य समाधत्ते आदर्शेनेति । दर्पणे मुकुरादर्शाविति कोशः । अडतिरिक्तव्यवाये नेत्यर्थलाभप्रकारमाह तस्मादिति । तस्मादित्युत्तरस्येति परिभाषेत्यर्थः । एतत्समभिव्याहारे = अडादिसमभिव्याहारे । अडादिव्यतिरिक्ताव्यवहितपरम् = अडादिव्यतिरिक्तवर्णव्यवधानरहितपरम् । अयं भावः। तत्तत्प्रदेशेषु तत्तल्लिङ्गैरुपतिष्ठमाने तस्मिन्निति, तस्मादितिपरिभाषे यावानर्थस्सिद्धो बाधितो वा तमंशं परित्यज्यान्यांशविशिष्टे उपतिष्ठेते । यथा प्रत्ययविधौ परश्चेत्यधिकारेणोत्तर-त्वांशस्य सिद्धत्वात्, प्रत्ययस्थादित्यत्र पूर्वस्येत्युक्त्या उत्तरत्वांशस्य बाधितत्वाच्च तदंशविकलायाः तस्मादिति परिभाषाया उपस्थितिः । निर्दिष्टांशस्य तत्र तत्रोपस्थित्या निमित्तकार्यिणोः व्यवधानराहित्यं बोध्यते । अट्कुप्वाङिति सूत्रेण रषाभ्यामुत्तरस्य नकारस्याडादिव्यवाये णत्वविधानात् तद्व्यवधानराहित्यस्य बाधितत्वेन तस्मादिति परिभाषया अडादिव्यतिरिक्तवर्णव्यवधानराहित्यं बोध्यत इति वक्तव्यम् । एवञ्च प्रकृतसूत्रे

तस्मादितिपरिभाषया अव्यवहितत्वांशोपस्थितौ रषाभ्यामुत्तरस्याडाद्यतिरिक्त-वर्णव्यवधानरहितस्य नस्य णत्वं भवतीत्यर्थेन आदर्शेनेत्यादावडतिरिक्तव्यवायाण्णत्वं न भवतीति तात्पर्यम् । स्पष्टञ्चैतत् गुरुप्रसादशेषे । अत्रार्थे मानमाह तदुक्तमिति । वार्त्तिककृतेति शेषः । अन्येन व्यवेतत्वादिति । पूर्वोक्तयुक्त्यनङ्गीकारे एतत्कथनमसङ्गतं स्यात् । अग्रिमभाष्यविरोधमाशङ्क्याह एतदुत्तरमिति । अटा व्यवधानसत्वात् तदतिरिक्तव्यवायेऽपि प्राप्नोतीत्याशङ्क्य अटैव व्यवाये इत्यवधारणगर्भव्याख्यानेन णत्ववारणपरं भाष्यमेकदेशि-वचनमित्याह एकदेशिनोरिति । अडतिरिक्तव्यवाये णत्वं न भवतीति व्याख्यानेन सिद्धान्तिना णत्वे वारितेऽपि तदज्ञानपूर्वकमवधारणगर्भपरतया व्याख्यातं भाष्यमेकदेशिवचनमिति भावः । अस्यैकदेश्युक्तित्वं समर्थयन्नाह चुट्टुतुलेति । न्यासस्य गुरुत्वे हेतुः प्रतियोगिज्ञानेति । गुरुन्यासः चुट्टुतुलशर्व्यवाये नेति । निषेधवाक्यार्थबोधस्य प्रतियोगिज्ञानसापेक्षत्वेन न्यासस्य गुरुत्वमिति भावः । तस्याः = समाधानपरभाष्योक्तेः । तदुक्तित्वम् = एकदेश्युक्तित्वम् । एतद्वार्त्तिकमतमिति । मातृणामित्यादौ णत्वार्थं ऋवर्णान्नस्य णत्वं वाच्यमिति णत्वमारब्धवतो वार्त्तिककारस्य मतम् । तन्मते आदर्शेनेत्यादौ णत्ववारणं प्रागुक्तरीत्या कार्यम् ।

भाष्ये तु 'रषाभ्या'मिति सूत्रे 'ऋवर्णान्नस्ये' त्यस्य प्रत्याख्यानाय व्यवाये इति योगं विभज्य अट्कुप्वाङ्नुम्भिरित्येतत् एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरित्यर्थकं व्याख्यातम् । तदा तु आदर्शेनेत्यादौ प्राप्तिरेव नेति बोध्यम् । णत्वे इति । णकारे इत्यर्थः । पदान्तस्य । न भाभू इति सूत्रान्नेति वर्त्तते । अत्र सूत्रे 'अनन्तरस्ये'त्यादि-व्यवस्थापकन्यायानामप्रवृत्तिर्बोद्ध्या, अपदान्तस्येत्यनुवर्त्यैतस्य भाष्ये प्रत्याख्यानात् ।

भावबोधिनी : आक्षरेत्यस्य वर्णैरिति शेषः । अज्भागस्य तु न वर्णत्वमिति भावः। अत्राक्षरसमाम्नायिकशब्देन तत्र पठितानां तद्गृहीतानाञ्च ग्रहणम् । अत एव सरूपाणामिति निर्देशः सङ्गच्छत इति बोध्यम् । प्रत्याख्यानादिति । अनन्तरस्येतिन्यायप्रवृत्तौ त्वारम्भप्रत्याख्यानयोः फलभेदात् तन्न स्यादिति भावः ।

बालबोधिनी : सिद्धान्तमाह भाष्ये इति । रषाभ्यां नो णः समानपदे (8-4-1) इति सूत्रे भाष्ये मातृणाम्, पितृणामित्यादौ णत्वार्थं रषाभ्यामिति सूत्रे ऋकाराच्चेति वक्तव्यमित्युक्त्वा तदुत्तरं न वक्तव्यम् । योऽसौ ऋकारे रेफस्तदाश्रयं णत्वं भविष्यतीति समाधाय ततः न सिध्यति । किं कारणम् ? न हि वर्णैकदेशा वर्णग्रहणेन, गृह्यन्त इति आक्षेपः कृतः । ततः 'एकदेशे नुडादिषु चोक्तम्' । किमुक्तम् । अग्रहणं चेत् नुड्विधिलादेशविनामेषु ऋकारग्रहणमिति । तस्माद् गृह्यन्त इति समाहितम् । नुडादिषु

चोक्तमिति भाष्यव्याख्याने प्रदीपे 'अग्रहणपक्षे नुडादिषु ऋकारग्रहणं कर्तव्यं भवेदिति ग्रहणपक्ष आश्रीयते । इह समुदायेषु कार्येषु व्यापारे अवयवस्य स्वनिमित्ते कार्ये मा भूद्व्यापारः । यथा अग्न इन्द्र इत्यादावेकारोऽयादेशं प्रतिपद्यते । न तु तदवयव इकारः सवर्णदीर्घत्वम् । इह तु मातॄणामिति समुदायस्य न कस्मिंश्चिद्विधौ निषेधे वा व्यापार इत्यवयवः स्वाश्रयकार्यं प्रति कस्मान्निमित्तत्वं न प्रतिपद्यते ? भेदेन चोपलम्भात् नाऽव्यवपृक्तस्यावयवे तद्विधिर्यथा द्रव्येष्विति न्यायो नास्ती'ति कैयटः । भेदेन चेति । यथा माषा न भोक्तव्या इति निषेधो मिश्रेष्वपि प्रवर्तते तत्र तद्बुद्धिसद्भावात् । एवमृकारस्थो रेफो भेदेन प्रतिभासात् कार्यं प्रतिपद्यत एवेत्यर्थ इत्युद्योतकारः ।

ततो भाष्ये यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वात् मातॄणामित्यादौ णत्वं न प्राप्नोतीत्याशङ्क्य 'अड्व्यवाये' इत्येवं भविष्यतीति समाधाय तदुत्तरं 'न सिध्यति । किं कारणम् ? वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते ये व्यपवृक्ता अपि वर्णा भवन्ति । यच्चात्र रेफात्परं भक्तेर्न तत् क्वचिदपि व्यपवृक्तं दृश्यते' इत्याक्षेपः कृतः । न तत् क्वचिदपीति भाष्यव्याख्याने मात्राचतुर्थस्य पृथगभावादिति कैयटः । तद्व्याख्याने रेफोऽर्धमात्रः, मात्राचतुर्थस्य पृथगभावादिति कैयटः । तद्व्याख्याने रेफोऽर्धमात्रः, उभयतोऽज्भक्तिरर्धमात्रा । अत्र मानं प्रत्याहाराह्निके उक्तम् । एवञ्च परभागो मात्रातुर्य इति स्पष्टमेव । एवञ्च नाव्यवपृक्तस्येति न्यायादड्ग्रहणेन ग्रहणाभाव इति भाव इति नागेशः । ततो भाष्ये एवं तर्हि योगविभागः करिष्यते रषाभ्यां नो णः समानपदे । ततो व्यवाये । व्यवाये च रषाभ्यां नो णो भवतीति । ततः अट्कुप्वाङ्नुम्भिरिति इदमिदानीं किमर्थम् ? नियमार्थम् । एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति समाहितम् ।

विभज्येति । तदुत्तरं तत्र णत्वं विधायेति शेषः । प्राप्तिरेव नेति । भाष्ये व्यवाये इति योगं विभज्य व्यवाये च रषाभ्यां नो णः, समानपदे इत्युक्त्वा ततः 'अट्कुप्वाङ्नुम्भिरिति'। अट्कुप्वाङ्नुम्भिरित्येतत् एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति नियमाय भवतीत्युक्तम्। एतैरेवेति । येऽक्षरसमाम्नाये पठ्यन्तेऽकारादयः, ये च तैर्गृह्यन्ते आकारादयः सर्वे ते आक्षरसमाम्नायिकाः । अत्र च बह्वचोऽन्तोदात्तादिति भवार्थे ठञ् । प्रयोजनमित्यनेन वा। ननु नियमशास्त्राणां निषेधमुखेन प्रवृत्तिरिति पक्ष आश्रीयते तर्हि तत्पक्षे व्यवाये णत्वं भवत्यडादिभिन्नैराक्षरसमाम्नायिकैर्व्यवाये नेत्यर्थात् आदर्शेनेत्यादौ प्राप्तिरेव न । स्वसिद्धान्तभूते विधिमुखेन प्रवृत्तिरिति पक्षे त्वाक्षरसमाम्नायिकातिरिक्तैः व्यवाये णत्वं भवत्यडादिभिर्व्यवाये णत्वं भवतीत्येवार्थात्तस्य चात्र सत्वात् प्राप्तिरस्त्येवेति चेन्न ।

अट्कुप्वाङ्नुमिति पूर्वसूत्रे व्यवायेऽपीत्यपकृष्य रषाभ्यामव्यवहितपरस्याडादिभिर्व्यवाये णत्वं भवतीत्यर्थेन तदतिरिक्तव्यवाये णत्वं न भवतीत्यर्थलाभात् न दोषः । एवं व्यवायेऽपीत्युत्तरसूत्रेऽपि अट्कुप्वाङिति पूर्वसूत्रानुवृत्त्या पूर्ववत् रषाभ्यामव्यवहित-परस्याडादिभिर्व्यवाये णत्वं भवति, अनाक्षरसमाम्नायिकैर्व्यवाये णत्वं भवतीत्यर्थेनाडाद्यतिरिक्ताक्षरसमाम्नायिकव्यवधान एव णत्वाप्रवृत्तेर्लाभेन आदर्शेनेत्यादौ न णत्वप्रसङ्गः, मृगेणेत्यादौ णत्वसिद्धिश्च भवति । अत एव व्यवायेऽपीत्युत्तरसूत्रस्य रषाभ्यामव्यवहितपरस्यानाक्षरसमाम्नायिकैर्व्यवाये णत्वं भवतीत्यर्थेन मृगेणेत्यादौ आक्षरसमाम्नायिकेन व्यवायसत्वादुत्तरसूत्रेण णत्वं न स्यात्, अडतिरिक्ताज्भक्त्या व्यवायसत्वात् नापि पूर्वसूत्रेणेति शङ्काया अवकाशो नास्ति । योगविभागे सूत्रद्वयस्य निरुक्तार्थाङ्गीकारादिति भावः । स्पष्टञ्चैतत् विषमीगुरुप्रसादशेषादिषु ।

अयं भावः । मातॄणां पितॄणामित्यादौ रषाभ्यां नो णः समानपदे इति णत्वाप्रवृत्तौ तदर्थं वार्तिककृता 'रषाभ्यां णत्वे ऋकारग्रहणम्' इत्युक्तम् । ऋवर्णान्नस्य णत्वं वाच्यमिति तत्फलितार्थकथनम् । तदुत्तरं यदि अड्व्यवाये णत्वमित्युच्यते तर्हि तदतिरिक्तव्यवायेऽपि आदर्शेन, अक्षदर्शेनेत्यादौ णत्वापत्तिमाशङ्क्य 'अड्व्यवाये णत्वेऽन्यव्यवाये प्रतिषेधः, नवाऽन्येन व्यवेतत्वात्' इति वार्त्तिककृता समाहितम् । अट्कुप्वाङिति सूत्रारम्भात् रषाभ्यामिति पञ्चम्याऽत्र अडादिव्यवायविषये निर्दिष्टांशविकला तस्मादिति परिभाषोपतिष्ठते। तेन आदर्शेनेत्यादावडादिव्यवाये तदन्यव्यवाये च णत्वप्रसङ्ग इत्याशङ्क्य 'न वाऽन्येन व्यवेतत्वात्' इत्युक्त्वा वार्त्तिककारः णत्वं वारितवान् । तस्यायमाशयः । प्रकृतसूत्रे निर्दिष्टांशस्य बाधितत्वेन तस्मादिति परिभाषयाऽव्यवहितत्वांशोपस्थितौ रषाभ्यामुत्तरस्या-डाद्यतिरिक्तवर्णव्यवधानरहितस्य नस्य णत्वं भवतीत्यर्थेन आदर्शेनेत्यादावडादिव्यतिरिक्त-शकारेण व्यवायात् णत्वं न भवतीति । तदग्रे भाष्येऽडाद्यतिरिक्तव्यवाये णत्वमाशङ्क्य 'चुटुतुलशर्व्यवाये न' (भाष्ये शर्व्यवाये नेत्युक्तम् । तच्च चुटुतुलानामुपलक्षणम्) इत्येव णत्वनिषेधप्रकरणे पठनीये अट्कुप्वाङित्यादिरीत्या सूत्रकरणादडादिभिरेव व्यवाये णत्वमित्यभिप्रेत्य 'अटैव व्यवाये' इत्यर्थेन परिहृतं, तच्च एकदेशिभाष्यमिति मन्तव्यम् । वार्त्तिककृन्मते योगविभागाभावेन आदर्शेनेत्यादौ णत्वमेवमेव वारणीयम् । भाष्यमतं तु पूर्वं दर्शितम् ।

णत्वे इति । णकारे इत्यर्थ इति । णपदशक्यार्थे एव भावप्रत्ययविधानेनाऽयमर्थो

लभ्यत इति भावः । न्यायानामिति । न्यायाप्रवृत्तिरिति क्वचित् पाठः । न्यायानामिति पाठे विषयभेदकृतं बहुत्वं बोध्यम् । अत्र सूत्रे = पदान्तस्येति सूत्रे । अप्रवृत्तिरिति । तथा च णत्वमात्रस्य निषेध इति भावः । तत्र मानमाह अपदान्तस्येति । णत्वविधायकेषु अपदान्तस्य मूर्धन्य इति सूत्रमनुवर्त्य पदान्तस्येति सूत्रं णग्रहणञ्च भाष्ये प्रत्याख्यातम् । एवञ्च प्रत्याख्यानपक्षे णत्वमात्रं पदान्तनकारे न प्रवर्तत इत्यारम्भप्रत्याख्यानयोः फलाभेदायारम्भ-पक्षेऽपि अनन्तरस्येति न्यायाप्रवृत्तिर्बोध्या । अन्यथाऽव्यवहितस्यैव णत्वस्य निषेधापत्त्या फलभेदः स्यादिति भावः ।

यस्मात्प्र । यस्मादिति तदादीति तच्छब्दाकाङ्क्षापूरणाय । तदादीति । तत् प्रकृतिरूपम् आदिर्यस्येत्यर्थः । प्रत्यासत्तिन्यायलब्धार्थमाह तस्मिन्प्रत्यये इति । 'गुणः कृतात्मसंस्कार' इति न्यायेनात्रापि 'तस्मि'न्निति परिभाषाप्रवृत्तिः । प्रकृतिमात्रस्य तु व्यदेशिवद्भावेन तदादित्वं बोध्यम् ।

<u>**भावबोधिनी :**</u> यस्मात् प्रत्ययविधिः । गुणशास्त्रे गुणशास्त्रप्रवृत्तिर्न स्यादत आह गुण इति । ''गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते । प्रधानस्योपकारो हि तथा भूयसि वर्तते ॥'' इति न्यायेनेत्यर्थः । यथा पानीयमेलादिसंस्कृतं पुरुषस्येति । भू इत्यादेः शब्निरूपिताङ्गत्वसिद्धये आह प्रकृतिमात्रस्येति ।

<u>**बालबोधिनी :**</u> यस्मात् प्रत्ययविधिः । तदादीति । तत् = प्रकृतिरूपमादिः यस्य तत् तदादि । यस्मादिति यच्छब्देन प्रकृतिर्गृह्यते । तदादीत्यत्र तच्छब्देन प्रकृतिपरामर्शद्वारा आकाङ्क्षाशान्त्यर्थं यस्मादिति । अन्यथा परामृष्टव्यप्रकृत्यनिर्देशे सर्वनाम्ना तत्परामर्शा-सम्भवात् तदादीत्यसम्बद्धं स्यादिति भावः । यः प्रत्ययो यस्मात् क्रियत इति वृत्तौ यच्छब्दान्तराध्याहारस्तु प्रत्यासत्तिलभ्यः । यच्छब्दग्राह्यो यः प्रत्ययः तस्मिन् परे इत्यर्थः प्रत्यासत्तिन्यायलभ्य इत्याह प्रत्यासत्तीति।

ननु संज्ञापरिभाषयोरुभयोरपि अन्योपकारकत्वेन गुणत्वात् गुणानाञ्च परार्थत्वादिति न्यायेन परस्परमुपकार्योपकारकभावाभावेनात्र सूत्रे सप्तमीश्रुतेर्लिङ्गस्य सत्वेऽपि तस्मिन्निति परिभाषाया अप्रवृत्तौ तस्मिन् प्रत्यये परे इति वृत्तिरसङ्गतेत्य आह गुण इति । गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते । प्रधानस्योपकारे हि तथा भूयसि वर्तत इति न्यायशरीरम्। एलादिसंस्कृतं पानीयं यथा पुरुषस्योपकारकं तथा तस्मिन्निति परिभाषासहकारेण बोधजनकं सदिदं सूत्रं विधिशास्त्रोपकारकं भवतीति भावः । ननु तदादिग्रहणात् केवलप्रकृतेरङ्गत्वं न स्यादत आह प्रकृतिमात्रस्येति । तेन भवतीत्यादौ भूइत्यादेः शब्निरूपितमङ्गत्वं सिद्ध्यति।

स्त्री इयतीति। इदंशब्दाद्वतुपि वस्य 'किमिदंभ्यां वो घ' इति घादेशे तस्येयादेशे 'इदं किमो'रितीशि 'यस्ये'ति लोपे ङीपि 'इयती' इति रूपम् । न च तत्र परतः स्त्रीशब्दस्येयङाद्यापत्तिरूपो दोषो न, यस्येतिलोपस्याभीयत्वादसिद्धत्वेनात्र तदप्राप्तेरिति वाच्यं, व्याश्रयत्वेनाभीयासिद्धत्वाप्राप्तेः।

तत्र हि समानाश्रयत्वम् असिद्धत्वाश्रयशास्त्रसम्बन्धिनिमित्तसमुदायान्यूनानतिरिक्ताश्रयकत्वम् । अस्ति च 'यस्येति' लोपापेक्षया 'स्त्रिया'इति सूत्रेऽधिकस्य स्त्रीशब्दस्यापेक्षा। प्रत्यासत्त्या चाजादि प्रत्ययनिरूपिताङ्गे एवेयङ्प्रवृत्त्या स्त्रीशब्दस्य सुनिरूपिताङ्गत्वेऽपि न दोषः। विधिग्रहणादेव 'भनक्तीत्यादौ' 'अतो दीर्घो यञी'ति न । तदादिग्रहणं 'करोमी'त्यादौ विकरणस्य गुणार्थम् । प्रत्ययविशिष्टस्येति। तथा सत्यङ्गेन प्रत्ययपरत्वलाभानापत्तौ 'वव्रश्च' इत्यस्यासिद्धिः। किञ्च 'राजपुरुष' इत्यादौ 'न लुमते'ति निषेधात्पूर्वपदे पदत्वाभावेन नलोपानापत्तिरिति भावः । ततोप्यधिकस्य वेति। 'देवदत्त ओदनमपाक्षी'दित्यादौ देवदत्तादिशब्दोत्तरसुपं निमित्तीकृत्य लुङ्पर्यन्तमङ्गत्वात्तस्य लुङ्परत्वेन देवात्पूर्वमप्यडापत्तिः, अङ्गसञ्ज्ञायाः प्रत्ययनिमित्तत्वाभावेन लुङादिनिरूपिताङ्गस्येत्यर्थस्य दुर्लभत्वादिति भावः ।

भावबोधिनी : विधिग्रहणाभावे स्त्री इयतीत्यत्र इयङापत्तिर्मूलकृतोऽभिमतेति भावेन शङ्कते न चेति । अत्रादिपदग्राह्यं चिन्त्यम् । यत्तु आदिपदग्राह्यं स्त्रीशब्देकारस्थानिक यस्येति लोप इति । तन्न । तस्मिन् कर्तव्ये सुस्थानिकलोपस्य स्थानिवत्त्वात् । न च कृतेऽपि विधिग्रहणे सुनिरूपिताङ्गत्वमादाय इयङ् दुर्वार इत्यत आह प्रत्यासत्येति । ननु मास्तु विधिग्रहणम् । समानाश्रयत्वम् असिद्धत्वाश्रयशास्त्रीयान्यूनानतिरिक्तकार्यिनिमित्तान्यतरसमुदायकत्वमित्येवास्तु । तच्चास्ति प्रकृते इत्यत आह विधीति। न चात्र सिद्धान्तेऽपि मिदच इति श्नमो विधानमाश्रित्याङ्गत्वं दुर्वारमित वाच्यम् । तेनाचः परत्वस्याज्ञातस्य ज्ञापनेऽपि प्रत्ययस्यापूर्वबोधनाभावात् भूसुवोरित्यतः तिङ्गीत्यनुवर्त्य यञादौ तिङि दीर्घविधाने तु स्त्री ईं पश्यतीत्यत्रैव संज्ञापत्तिर्बोध्या । ननु तदादिग्रहणस्य मूलोक्तप्रयोजनमयुक्तम् । दीर्घविधानसामर्थ्येनाङ्गस्येत्यस्य तत्रासम्बन्धकल्पनेन दीर्घसिद्धेः । न च चिकीर्षामीत्यत्र शबेकादेशस्य पूर्वान्तत्वेनाङ्गत्वात् तत्र दीर्घश्चरितार्थ इति वाच्यम् । कृदतिङिति सूत्रभाष्यीयरीत्या शबेकादेशस्यान्तवत्त्वाद्यप्राप्तेरित्यतः स्वयं तत्फलमाह तदादीति । प्रत्ययपरत्वेति । उरदत्वस्येत्यादिः । असिद्धिरिति । स्थानिवत्त्वाप्रवृत्त्या न सम्प्रसारण इति निषेधो न स्यादिति भावः । ननु सम्प्रसारणे

इत्यत्र सम्प्रसारणपदं लक्षणया तत्स्थानिकपरम् अतो न दोष इत्यरुचेराह किञ्चेति । प्रत्ययान्तस्याङ्गसंज्ञायां लुप्तप्रत्ययावधिकाङ्गत्वस्य राजन्शब्दप्रकृतिकङसन्ते सत्वेन न लुमतेति स्यादिति भावः । लुङ्पर्यन्तमिति । लुङ्प्राग्भागस्येत्यर्थः । ननु प्रत्यासत्त्या लुङादिनिरूपिताङ्गस्येत्यर्थात् न दोष इत्यत आह अङ्गसंज्ञाया इति ।

बालबोधिनी : स्त्री इयतीति । विधिग्रहणाभावे यस्माद् यः प्रत्ययः परत्वेन श्रूयते तदादि शब्दरूपं तस्मिन् प्रत्यये, अङ्गसंज्ञमित्यर्थः स्यात् । स्त्री इयतीत्यत्र रेफादीकारस्य 'स्त्रियाः' इत्यङ्गकार्यमियङ् स्यात् । स्त्रीशब्दात् परत्वेन इयदिति प्रत्ययस्य श्रूयमाणत्वात् । विधिग्रहणे तु ल्यब्लोपपञ्चम्या यमुद्दिश्य प्रत्ययो विहितस्तस्मिन् प्रत्यये तदादेरङ्गसंज्ञा भवतीत्यर्थेन वतुपः स्त्रीशब्दमुद्दिश्य विहितत्वाभावेन नाङ्गसंज्ञेति तत्र नेयङाद्यापत्तिः। ननु विधिग्रहणाभावेऽपि असिद्धवदत्राभादिति सूत्रेणाभीयस्य यस्येति चेति ईकारलोपस्यासिद्धत्वेन तद्व्यवधानान्नेयङापत्तिरित्यत आह न चेति । तदप्राप्तेरिति । अजादिप्रत्ययपरत्वाभावादिति भावः । असिद्धत्वेनेति । यस्येति लोपस्य स्थानिवत्त्वन्तु न । पदसंस्कारपक्षे अनादिष्टादचः पूर्वत्वाभावात् अचः परस्मिन्निति न । वाक्यसंस्कारेऽपि लोपे तत्प्राप्तावपि इयङि न पदान्तेति निषेधादिति बोध्यम् । समाधत्ते व्याश्रयत्वेनेति । समानाश्रयत्वाभावेनेत्यर्थः। 'स्त्रिया' इत्यत्र यस्येति लोपापेक्षया स्त्रीशब्दस्याधिक-स्यापेक्षणादसिद्धत्वाश्रय यस्येति चेति लोपशास्त्रसम्बन्धिनिमित्तसमुदायान्यूनानति-रिक्ताश्रयकत्वस्य स्त्रिया इत्यत्राभावेनासिद्धवदित्यस्याप्राप्तिरित्याह तत्र हीति । असिद्धत्वाश्रयेति । अस्य तत्प्रयोगप्राप्तेत्यादिः । अत्र निमित्तशब्दः स्थानिनिमित्तोभय-साधारणः । एवञ्चाश्रयणमिह स्थानिवत्त्वेनैवेति निमित्तत्वेनैवेति वा नाग्रहः। किन्तु यथाकथञ्चित् । असिद्धवत्सूत्रभाष्ये उद्योते स्पष्टं यथा - 'समानाश्रयत्वञ्च तत्प्रयोग-प्राप्तासिद्धत्वाश्रयशास्त्रीयनिमित्तसमुदायापेक्षयाऽन्यूनानतिरिक्ताश्रयकत्वम् । आश्रयणं स्थानिवत्त्वेनैव, निमित्तत्वेनैवेति नाग्रहः, किन्तु यथाकथञ्चित् । विकारकृतमतिरिक्तत्वं तु न । जहीत्यादेरनुदाहरणत्वापत्तेः । तत्र पपुषः इत्यत्र न्यूनः । चाखायितेत्यादावधिकः । अतिरिक्तमपि पूर्वविध्युपात्ततावच्छेदकरूपेणाश्रितं चेत्तदपि समानाश्रयमेव, समानशब्द-स्वारस्यात् । अत एव चिणो लुकि चिणो लुगसिद्ध इति सङ्गच्छते' इति । पपुष इत्यत्रातो लोपस्यासिद्धत्वाश्रयसम्प्रसारणसम्बन्धिनिमित्तसमुदायापेक्षया न्यूननिमित्तकत्वेन समानाश्रयत्वाभावान्न तत्र सम्प्रसारणस्यासिद्धत्वम् । खन्धातोः यङन्ताल्लुटि चाखायितेत्यादौ असिद्धत्वाश्रयात्वशास्त्रीयनिमित्तसमुदायापेक्षया यस्य हल इति लोपस्यार्धधातुकरूपाधिकनिमित्तकत्वेन नासिद्धत्वमिति भावः । प्रकृते स्त्री इयतीत्यत्र

ईकारस्थानिकयस्येति चेति लोपीयनिमित्तसमुदायापेक्षया स्त्रिया इतीयङि अधिकस्य स्त्रीशब्दस्यापेक्षणेन समानाश्रयत्वाभावन्न तत्र यस्येति लोपस्यासिद्धत्वमिति ज्ञेयम् ।

ननु कृतेऽपि विधिग्रहणे स्त्रीशब्दस्य ततो विहितसुनिरूपिताङ्गत्वमादायेयङ् दुर्वार इत्यत आह प्रत्यासत्त्येति विधिग्रहणस्य फलान्तरमप्याह विधिग्रहणेति । भनक्तीति रौधादिकात् भञ्जधातोर्लटि रूपम् । विधिग्रहणाभावे भनक्तीत्यत्र श्नमि परे भ इत्यस्याप्यङ्गत्वापत्तौ अतो दीर्घ इति दीर्घापत्तिरिति भावः । यदि तु आने मुगिति सूत्रभाष्योक्तरीत्या अतो दीर्घो यञीत्यत्र भूसुवोरित्यतः तिङीत्यनुवृत्त्या यञादौ तिङीत्यर्थेन भनक्तीत्यत्र दीर्घवारणे तु स्त्री ईं पश्यतीत्यत्रैव स्त्रीशब्दस्येङापत्तिर्बोध्या । ईकार-वाचकादीशब्दादमि पूर्वरूपे ईमिति रूपम् । परादिवद्भावेन तस्य प्रत्ययत्वं बोध्यम् ।

ननु भवामि, भविष्यामीत्यादौ विकरणविशिष्टस्य अङ्गसंज्ञार्थं तदादिग्रहणमिति मूलोक्तं फलं न युक्तम् । तत्राङ्गत्वाभावेऽपि अतो दीर्घो यञीत्यारम्भसामर्थ्यात् दीर्घो भविष्यति । न च पुत्रीयामि, चिकीर्षामीत्यादौ शबेकादेशस्य पूर्वान्तत्वेनाङ्गत्वात् तत्र दीर्घस्य चारितार्थ्येनारम्भसामर्थ्यादिति कथनमयुक्तमिति वाच्यम् । 'एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद् व्यवधानमेव' इति कृदतिङिति सूत्रस्थभाष्योक्तरीत्या अन्तवद्भावस्य प्रापकत्वेन स्थानिवद्भावस्याभावातिदेशकत्वेन निषेधकतया निषेधांश्च बलीयांस इति न्यायेनान्तवद्भावबाधकतया पूर्वविप्रतिषेधेन अचः परस्मिन्नित्यस्यैव प्रवृत्त्या शबेकादेशस्य स्थानिवत्त्वेन तेन व्यवधानात् तत्रापि दीर्घस्याप्राप्तेः । तदेतद् ध्वनयन् तत्फलमाह विकरणस्येति । अन्यथा करोमीत्यादौ विकरणविशिष्टस्य मिबूनिरूपिताङ्ग-त्वाभावे तस्मिन् परे विकरणस्य गुणो न स्यादिति भावः ।

प्रत्ययग्रहणफलं मूलोक्तमाह प्रत्ययविशिष्टस्येति । तथा सतीति । अत्र सूत्रे प्रत्ययग्रहणाभावे इत्यर्थः । प्रत्ययपरत्वेति । उरदत्वस्येत्यादिः । असिद्धिरिति । प्रत्ययग्रहणं विहाय यस्मात्प्रत्ययविधिस्तदाद्यङ्गमित्येतावन्मात्रमेव सूत्रं स्यात्तर्हि अङ्गसंज्ञाया अनैमित्तिकत्वेन 'उरत्' इति सूत्रस्याङ्गाधिकारस्थत्वेऽपि तेन प्रत्ययपरत्वाक्षेपासम्भवात् उरदत्वस्य परनिमित्तकत्वाभावेन अचः परस्मिन्निति स्थानिवत्त्वं न स्यात् । तथा सति व्रश्चूधातोः लिटि णलि द्वित्वे लिट्यभ्यासस्येति अभ्यासरेफस्य सम्प्रसारणे ऋकारे तस्य उरदित्यत्वे, ऋकारस्थानिकस्य उरदत्वस्य परनिमित्तकत्वाभावेन अचः परस्मिन्निति स्थानिवत्त्वाप्रसक्त्या सम्प्रसारणत्वाभावात् तस्मिन् परे न सम्प्रसारणे सम्प्रसारणमिति निषेधाप्राप्तेः वकारस्य सम्प्रसारणापत्तौ वव्रश्चेत्यस्यासिद्धिः । कृते तु प्रत्ययग्रहणे अङ्गेन

प्रत्ययाक्षेपादुरदत्वस्य परनिमित्तकत्वेन स्थानिवत्त्वात् न सम्प्रसारण इति निषेधसिद्धिरिति भावः ।

ननु सम्प्रसारणाश्रयस्य प्रतिषेधो वक्तव्य इति वार्त्तिकेन न सम्प्रसारण इति सूत्रस्य प्रत्याख्यानेन न सम्प्रसारण इति सूत्रस्य सम्प्रसारणाश्रयस्य पूर्वरूपस्य प्रतिषेध इति पक्षे व्रश्च+व्रश्च्+अ इत्यवस्थायमुभयोरपि अभ्यासयणोस्सम्प्रसारणे उ ऋ अ इत्यवस्थायां पूर्वस्य पूर्वरूपे निषिद्धे परस्य पूर्वरूपे उ ऋ इत्यत्र उकारस्य यणि लक्ष्ये लक्षणस्येति न्यायेन पुनस्सम्प्रसारणस्याप्राप्त्या वव्रश्चेतीष्टसिद्ध्या नेदं फलमत आह किञ्चेति । अत्र सूत्रे प्रत्यय इति पदाभावे प्रत्ययान्तस्याङ्गसंज्ञायां लुप्तप्रत्ययावधिकाङ्गत्वस्य राजन्शब्दप्रकृतिकङसन्ते सत्वेन सुप्तिङन्तं पदमिति पदत्वस्याङ्गकार्यत्वेन तस्मिन् कर्तव्ये न लुमताङ्गस्येति निषेधेन प्रत्ययलक्षणाभावात् पदत्वाभावेन नलोपानापत्तिरिति भावः । ननु न लुमता तस्मिन्निति न्यासे लुमता लुप्ते प्रत्यये परतः पूर्वस्य यत्कार्यं तदेव निषिध्यते । प्रकृते राजपुरुष इत्यादौ पदसंज्ञाया लुप्तप्रत्ययनिमित्तकपूर्वकार्यत्वाभावेन निषेधाप्राप्तिरिति नास्ति दोष इत्युच्यते तर्हि श्रियावित्यादौ ससहायत्वेन व्यपदेशिवद्भावाप्रवृत्त्या श्रीत्यस्यानङ्गत्वात् इयङनापत्तिर्दोषः । प्रत्यय इत्युक्तौ तस्मिन् परे मुख्यतदादित्वस्याभावेनासहायत्वात् व्यपदेशिवद्भावस्सुलभ इति श्रीत्यस्याङ्गत्वादियङ् सिध्यति । यथाकथञ्चिदत्र व्यपदेशिवद्भावस्वीकारे स्त्र्यर्थमित्यादावन्तर्वर्तिसुपमादाय स्त्रीशब्दस्याङ्गत्वात् स्त्रिया इतीयङाद्यापत्तिर्दोष इति विभावनीयम् । स्पष्टश्चेदं विषम्यादिषु । लुङ्पर्यन्तम् = लुङ्प्राग्वर्तिनः । ननु प्रत्यासत्त्या लुङादिनिरूपिताङ्गस्य ग्रहणेन नास्ति दोष इत्यत आह अङ्गसंज्ञाया इति ।

टाङसि। **'अङ्गस्ये'ति षष्ठ्या 'अतो भिस' इत्यतोऽनुवृत्तेनात इत्यनेन पञ्चम्यन्तेन समानाधिकरण्यानुरोधात्पञ्चम्या विपरिणाम इत्याह अकारान्तादिति। 'अकारात्परेषामङ्ग-सञ्ज्ञानिमित्तटादीनामित्यर्थ' इति पक्षान्तरं भाष्ये । किञ्चादन्तादङ्गादित्यर्थेऽपि 'ब्राह्मणभिस्सा' इत्यादावतिप्रसङ्गः । 'ब्राह्मणे'त्यस्यापि 'युवोरनाकौ' इतिसूत्रभाष्योक्तरीत्याऽन्तर्वर्तिविभक्त्याऽङ्गत्वात् । अर्थवत्परिभाषया प्रत्ययग्रहणपरिभाषया वा प्रत्ययस्यैव भिसो ग्रहणे त्वेषामङ्गाधिकारे पाठो व्यर्थः। भिसः प्रत्ययस्यैव ग्रहणे हि प्रत्यासत्या तन्निरूपिताङ्गस्य ग्रहणमिति युज्यते वक्तुं, नान्यथा । इदमेव हि 'अतो भिस' इत्यत्राङ्गाधिकारस्य प्रयोजनं भाष्ये दत्तमित्यलम् ।सुपि च। 'अतो दीर्घो यञि'त्यनुवर्तते। 'यञी'त्यनेनाल्त्वात्तदादिविधिरित्याह - यञादाविति।**

भावबोधिनी : ब्राह्मणभिस्सेति । भिस्सा अन्नम् । युवोरनाकाविति । तत्र हि पञ्चभिः क्रोष्ट्रीभिः क्रीतं पञ्चक्रोष्टृ अङ्गस्य क्रोष्टुः तृज्वदङ्गसंज्ञा च भवति प्रत्ययलक्षणेनेत्युक्तम् । न लुमतेत्यङ्गसंज्ञाया निषेधस्तु न । लुप्तप्रत्ययनिमित्तकाङ्गत्वावच्छिन्नोद्देश्यक-कार्यान्तरस्यैव तेन निषेधादिति भावः । प्रत्ययग्रहणेति । प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति परिभाषयेत्यर्थः । व्यर्थ इति । विभक्तिविपरिणामेनादन्तादङ्गादिति व्याख्यानं निष्फलमेव । उक्तपरिभाषाभ्यामेव ब्राह्मणभिस्सेत्यादिव्यावृत्तेः । अङ्गसंज्ञानिमित्तेत्यर्थे तु न तयोरावश्यकसञ्चारकत्वम् । तयोस्सञ्चारे तु पाठो न कार्य इति स्पष्टं भाष्ये । ननु न ते सञ्चार्येते किन्तु प्रत्यासत्त्या भिसादिनिरूपिताङ्गमेव गृह्यते अतो नोक्तदोष इत्यत आह भिस इति । इदमेवेति । ब्राह्मणभिस्सेत्यादिव्यावर्तनमेवेत्यर्थः ।

बालबोधिनी : टाङसिङसाम् । अङ्गस्येति । अधिकृतस्येत्यादिः । अधिकृतस्याङ्गस्येति षष्ठ्यन्तस्य पञ्चम्यन्ततया विपरिणाम इत्याह सामानाधिकरण्येति । विपरिणामे गौरवात् सिद्धान्तपक्षमाह अकारादिति । अङ्गस्येति षष्ठ्या निमित्तनिमित्तिभावरूपसम्बन्धोऽर्थ इत्याह अङ्गसंज्ञानिमित्तेति । अदन्तादङ्गादिति मूलोक्तव्याख्याने न केवलं गौरवं किन्त्वति-प्रसङ्गोऽपीत्याह किञ्चेति । अत्रापिशब्दः अतिप्रसङ्ग इत्यनन्तरं योजनीयः ।

ब्राह्मणभिस्सेति । भस्यते भक्ष्यत इति भिस्सा । अन्नमित्यर्थः । ब्राह्मणानां भिस्सा। ननु ब्राह्मणेत्यस्य कथमङ्गत्वमत आह अन्तर्वर्तीति । ननु न लुमतेति निषेधात् तस्याङ्गत्वं दुर्लभमत आह युवोरनाकाविति । तत्र हि अङ्गसंज्ञायां न लुमतेति निषेधो न प्रवर्तते । लुप्तप्रत्ययनिमित्तकाङ्गत्वावच्छिन्नोद्देश्यककार्यान्तरस्यैव तेन निषेधात् । अङ्गसंज्ञाया अङ्गत्वावच्छिन्नोद्देश्यककार्यत्वाभावादित्युक्तम् । नन्वर्थवद्ग्रहणपरिभाषया, प्रत्ययग्रहणपरिभाषया वा भिसः प्रत्ययस्यैव ग्रहणलाभादतिप्रसङ्गो नास्तीत्यत आह अर्थवदिति । प्रत्ययग्रहणेति । प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति परिभाषेत्यर्थः । एषाम् = टाङसिङसामित्यादीनाम् । व्यर्थ इति । विभक्तिविपरिणामेनादन्तादङ्गादिति व्याख्यानं निष्फलम् । परिभाषाद्वयसञ्चारेणैवानङ्गादन्तव्यावृत्तिसिद्धेः । अङ्गसंज्ञानिमित्तेत्यर्थे तु न तयोस्सञ्चार आवश्यकः । सञ्चारे तु पाठो न कार्य इति अङ्गस्येति सूत्रे भाष्ये स्पष्टम्।

ननु प्रत्यासत्त्या भिसूनिरूपिताङ्गस्यैव ग्रहणं भवतु । तथा च नोक्तदोष इत्यत आह भिस इति । इदमेव = ब्राह्मणभिस्सेत्यादौ दोषवारणमेव ।

ङेर्यः । चतुर्थ्येकवचनस्यैव ग्रहणं, व्याख्यानादित्याह ङेइत्येतस्येति। सन्निपातेति। उपजीव्यविरोधन्यायमूलैषा। सन्निपातः संश्लेषस्तन्निमित्तको यो विधिः स तं सन्निपातं यो

विहन्ति स तद्विघातः तस्यानिमित्तमित्यर्थः । न च यञादित्वसापेक्षदीर्घस्य बहिरङ्गतयाऽसिद्धत्वान्नात्र सन्निपातविघात इति वाच्यम् , आरोपितासिद्धत्वेऽपि वस्तुतस्तद्विघातस्य जायमानत्वेन तत्प्रवृत्तेः । किञ्चान्तरङ्गे कर्तव्ये बहिरङ्गासिद्धत्वेऽपि कृतेऽसिद्धत्वे मानाभावः। किञ्चातिदेशिकसन्निपातविघाताभावमादायैतदप्रवृत्तौ 'गौरि' इत्यादौ सम्बुद्धिलोपेऽपि स्थानिवत्त्वेन ह्रस्वनिमित्तविघाताभावात्तत्रैतस्या अतिव्याप्तिपरभाष्यासङ्गतिः।

भावबोधिनी : व्याख्यानादिति । अतो गुण इति सप्तम्येकवचनस्य यादेशमूलका-दित्यर्थः । संश्लेषः = सम्बन्धः । विहन्तीति । ननु यादेशेनैव सन्निपातनाशात् कथं दीर्घस्य तद्विघातकत्वमिति चेन्न । तेन पूर्वापरीभावरूपसन्निपातविनाशेऽपि अदन्ताङ्गेति विशेषणविशेष्यभावरूपसन्निपातस्य सत्वेन दीर्घस्य तद्विघातकत्वात् सन्निपातलक्षणविधिप्रवृत्तेः प्रागुत्तरं वा यस्सन्निपातः तदन्यतरविघातकस्या-निमित्तमित्यर्थस्य, सन्निपातपरिभाषयैव तिसृचतस्रोः ङीबभावे सिद्धे तदनित्यत्वज्ञापनार्थं तयोर्ग्रहणमिति केचिदिति अजन्तस्त्रीलिङ्गान्तशेखरः तिसृ इत्याद्यनुरोधेनावश्यकत्वाच्च। यञादित्वसापेक्षेति । बह्वपेक्षं बहिरङ्गमिति प्राचीनमतेनेदम् । स्वमते परनिमित्तत्वेन तत्त्वमिति भावः । असिद्धत्वादिति । यादेशदृष्ट्येत्यादिः । तत्प्रवृत्तेः = परिभाषाप्रवृत्तेः। तत्कृते = अन्तरङ्गे कृते । मानाभाव इति । भाष्यादौ कर्तव्यपदाध्याहारस्यैव दर्शनादिति भावः । वस्तुत इति । प्राथमिकपरिहारे उपबृंहणमाह किञ्चेति । आतिदशिकेति । अतिदेशः = असिद्धं बहिरङ्गमन्तरङ्गे इत्यादयः, तेन कृतमित्यर्थः । एतस्याः = सन्निपातपरिभाषायाः ।

बालबोधिनी : ङेर्यः । चतुर्थ्येकवचनस्यैवेति । एवेन सप्तम्येकवचनव्यावृत्तिः । व्याख्यानादिति । द्वन्द्वे चेत्यादिनिर्देशमूलकाद्व्याख्यानादिति केचित् । ङेर्य इति सूत्रे चतुर्थ्येकवचनसप्तम्येकवचनयोरुभयोरपि ग्रहणे सर्वनाम्नः स्मै इति तदुत्तरसूत्रेऽनुवृत्त्यैव उभयोरपि ग्रहणल्लाभेन, सर्वनाम्नः स्मैस्मिनौ, ङसेः स्मादिति न्यासेनैव सिद्धे ङसिङ्योरिति सूत्रे ङिग्रहणरूपाद्व्याख्यानादिति अन्ये । ङेरिति प्रतिपदोक्तग्रहणश्चात्र बीजमित्यपि बोध्यम्। सन्निपातेति । उपजीव्यविरोधेति । उपजीवकमुपजीव्यस्य विघातकं न भवतीति तदर्थः । संश्लेषः = सम्बन्धः । प्रकृते रामायेत्यत्र अदन्तसम्बन्धमाश्रित्य प्रवृत्तो यादेशः अदन्तसम्बन्धविघातकस्य दीर्घस्य कथं निमित्तं स्यादिति शङ्कितुराशयः ! विधिरिति कर्मणि किः । तद्विघातस्येत्यत्र कर्मण्यण्। परिभाषार्थमाह सन्निपात इति ।

ननु ङेर्य इति यादेशेनैवादन्तविभक्तिसन्निपातनाशात् कथं दीर्घस्य तद्विघातकत्वमिति चेन्न । तेन यादेशेन पूर्वापरीभावरूपसन्निपातनाशेऽपि अदन्ताङ्गेति विशेषणसन्निपातस्य सत्वेन दीर्घस्य तद्विघातकत्वात् । सन्निपातलक्षणविधिप्रवृत्तेः प्रागुत्तरं वा यस्सन्निपातः तदन्यतरविघातकस्यानिमित्तमित्यर्थस्य तिस्र इत्याद्यनुरोधेनावश्यकत्वाच्चेति विषम्यादिषु स्पष्टम् ।

बहिरङ्गेति । परनिमित्तकत्वेन दीर्घस्य बहिरङ्गत्वमिति भावः । बह्वपेक्षं बहिरङ्गमिति प्राचीनाः । असिद्धत्वादिति । यादेशदृष्ट्येत्यर्थः । आरोपितेति । आहार्यारोपस्याकिञ्चित्करत्वादिति भावः । तत्प्रवृत्तेः = परिभाषाप्रवृत्तेः । ननु शास्त्रे आहार्यारोपः प्रवृत्तिनिवृत्तिनियामक एव भवतीत्यत आह किञ्चेति । तत्र कृते = अन्तरङ्गे कते । मानाभाव इति । अत एव पट्व्येत्यादौ पूर्वयणादेशप्रवृत्त्यवस्थायामसिद्धोऽपि यणादेशः पश्चात् प्रवर्तत इति ज्ञेयम् । अयं भावः । रामायेत्यादौ ङेर्यादेशे तन्निमित्तकदीर्घे कृतेऽपि यादेशदृष्ट्या परनिमित्तकत्वेन बहिरङ्गत्वाद्दीर्घस्यासिद्धत्वेन नात्रादन्तसन्निपातविघात इति न शङ्कनीयम्। अन्तरङ्गपरिभाषया तस्मिन् कर्तव्येबहिरङ्गस्यासिद्धत्वेऽपि कृते च तस्मिन्नसिद्धत्वे मानाभाव इति सन्निपातविघातोऽस्त्येवेति भावः ।

पूर्वोक्तमेव समर्थयन्नाह किञ्चेति । आतिदेशिकेति । अतिदेशः = असिद्धं बहिरङ्गमन्तरङ्गे इत्यादिः । तेन कृतमित्यर्थः । एतदप्रवृत्तौ = सन्निपातपरिभाषाया अप्रवृत्तौ। गौरीत्यादौ = हे गौरि इति सम्बुद्धौ । तत्र सम्बुद्धिलोपेऽपि स्थानिवत्त्वेन = आनुमानिकस्थानिवद्भावेन सन्निपातलाभात् अम्बार्थेति ह्रस्वनिमित्तविघाताभावेन तत्र = हे गौरीत्यादौ एतस्याः = सन्निपातपरिभाषाया अतिव्याप्तिपर कृन्मेजन्तसूत्रस्थभाष्यासङ्गतिः। नदीह्रस्वत्वं सम्बुद्धिलोपस्यानिमित्तं स्यादित्यादि कृन्मेजन्तसूत्रभाष्यमिति बोध्यम् ।

सन्निपातस्याशास्त्रीयत्वान्नात्र स्थानिवत्वमिति चेदत्रासिद्धत्वमपि कथमिति वद ? 'कार्यस्य निमित्तं ययोः सन्निपातस्तयोः सूत्रे उपादानमपेक्षित'मिति तु नाग्रहः। अत एव 'दाक्षि'रित्यत्राकारान्तप्रकृतीञ्सन्निपातनिमित्ताऽङ्गसञ्ज्ञा ऽनया परिभाषयाऽल्लोपस्य निमित्तं न स्यादित्याशङ्क्याऽनित्यत्वेन समाहितं भाष्ये कृन्मेजन्तसूत्रे। नह्यङ्गसञ्ज्ञायामदन्तस्याङ्गसञ्ज्ञेत्युक्तमस्ति। न च कष्टायेत्यस्य 'अकृत्सार्व' ति दीर्घेणोपपत्तेरनित्यताज्ञापकत्वं कथमिति वाच्यं, तस्यापि सन्निपातपरिभाषयाऽप्राप्तेः। विरोधाभावात् , फले विशेषाभावाच्च परत्वेऽप्यकृदिति नोपन्यस्तम् । तस्याकृदित्यादिपर्युदासेनाऽसुप्येव प्रवृत्तिरित्यन्ये।

भावबोधिनी : अत्र = हे गौरीत्यत्र । तत्र = सुपि चेति दीर्घे । असिद्धत्वं

बहिरङ्गासिद्धत्वम् । कार्यस्येति । ययोः सन्निपातः कार्यस्य विधेयस्य निमित्तमित्यन्वयः। तयोः =उद्देश्यनिमित्तयोः । सूत्रे = कार्यविधायकसूत्रे । उपादानम् = सन्निपात-प्रतियोगितावच्छेदकानुयोगितावच्छेदकरूपेण ग्रहणमित्यर्थः । तेनाङ्गसंज्ञायां तदादित्वेन प्रत्ययत्वेनोपादानेऽपि न क्षतिरिति बोध्यम् । अत एव = उक्तरीत्या आग्रहाभावादेव । ननु परिभाषाविरोधस्योभयत्र तुल्यत्वेऽपि परत्वादकृदित्यनेनैव दीर्घो युक्त इत्यत आह विरोधाभावादिति । असुप्येवेति । तेन उरुया धृष्णुयेत्यादौ न दीर्घ इति भावः ।

बालबोधिनी : ननु सन्निपातस्याशास्त्रीयत्वात् अत्र = हे गौरीत्यादौ सम्बुद्धिलोपे तासौ नित्यानिट्त्ववत् सन्निपातो न स्थानिवत्त्वेनानेतुं शक्य इति शङ्कते सन्निपातस्येति । समाधत्ते तत्रेति । सुपि चेति दीर्घे इत्यर्थः । असिद्धत्वमपीति । अशास्त्रीये सन्निपात-विघाताभावे बहिरङ्गासिद्धत्वमपि कथमिति भावः ।

ययोः सन्निपातः कार्यप्रवृत्तौ निमित्तं तयोस्सन्निपातलक्षणकार्यविधायकसूत्रे उपादाने एवैषा परिभाषा प्रवर्तत इति नाग्रहः । अत एव अदन्तसन्निपातं निमित्तीकृत्य यादेशविधायके ङेर्य इति सूत्रे अत इत्यस्यानुपादानान्नायमेतत्परिभाषाविषय इति प्रकृतपरिभाषया रामायेत्यत्र सुपि चेति दीर्घो न स्यादिति शङ्का न युक्तेति शङ्काया अवकाशो नास्तीत्याशयेनाह कार्यस्येति। सूत्रे = तद्विधायके । अत एव = तदनाग्रहादेव । समाहितमित्यनेनान्वयः । अन्यथा शङ्कासमाधानयोरसङ्गतिरित्याह न हीति । ननु सुपि चेति दीर्घापेक्षया अकृत्सार्वधातुकयो-रित्यस्य परत्वात् तेनैव दीर्घो युक्त इत्यत आह विरोधाभावादिति । मतान्तरमाह तस्येति । असुप्येवेति । तेन उरुया धृष्णुयेत्यादौ तृतीयैकवचनस्य सुपां सुलुगिति सूत्रेण यादेशे अकृदिति दीर्घो नेति भावः ।

झलि किमिति। 'उतोवृद्धि'रित्यतो 'हली' त्येवानुवर्त्य सन्निपातपरिभाषया रामाणामित्यत्र न दोष इति प्रश्नः । झल्ग्रहणमेत्त्वे सन्निपातपरिभाषाया अप्रवृत्तिज्ञापनार्थं, तेन 'सर्वेषा'मित्यादावेत्वसिद्धिरित्युत्तरम् । एतेन - 'बहुवचने किं ? रामस्य' इति व्याख्यातम्। 'रामाभ्या'मित्यपि प्रत्युदाहरणं बोद्ध्यम् । 'बहुवचने झलीक्' इति तु न सूत्रितं, ज्ञानयोरित्यादौ नुमापत्तेः। इटि तु - गङ्गे इत्यादौ गुणे तस्य पञ्चमीसमासेन स्थानिवत्वात् 'एङ्ह्रस्वा'दित्यस्याप्राप्तौ व्यवधानाद् 'हल्ङ्या'बित्यस्य चाप्राप्तौ सम्बुद्धिलोपानापत्तेश्च। जश्त्वमिति। 'बाधित्वे'ति शेषः । अवसाने चर्त्वस्य पदान्तजश्त्वापवादत्वात् । द्वित्वे रूपेति। 'पूर्वत्रासिद्धमद्वित्वे' इति न्यायाच्चर्त्वोत्तरं द्वित्वं बोद्ध्यम् । तादेश इति। अन्यथा 'खरि चे'ति चर्त्वेन सिद्धाविदं व्यर्थं स्यादिति भावः।

भावबोधिनी : ननु झल्ग्रहणाभावे नुटः पूर्वमेवैत्वापत्तिरत आह हलीत्येवानुवर्त्य इति । नन्वेवमपि नुडुत्तरं स्यादत आह सन्निपातेति । ज्ञापनार्थमिति । ज्ञापनोत्तरमेत्वप्रवृत्तौ तद्वारणाय झल्ग्रहणमिति स्वांशे चारितार्थ्यं बोध्यम् । फलमाह तेनेति । एतेन = एत्वे सन्निपातपरिभाषाया अप्रवृत्तिस्वीकारेण । व्याख्यातमिति । सन्निपातपरिभाषाविरोधादेत्वं नेति वक्तुमशक्यम् । किन्तु एत्वे तदप्रवृत्त्या एत्वं स्यादेवेत्येतद्व्यावृत्तये बहुवचनग्रहणमावश्यकमेवेति व्याख्यातमित्यर्थः । राम इति तु न प्रयोजनम् । प्रत्यय इत्यादिनिर्देशेन क्वचित् त्रैपादिकस्य सिद्धत्वकल्पनेन एतद्दृष्ट्या रुत्वविसर्गयोरसिद्धत्वाभावात् । अत एव स्थानिवत्सूत्रदृष्ट्या रुत्वस्य सिद्धत्वाद्रेफान्ते परत्वाद् विसर्गसिद्धिरित्यरुचिरिति भावः । यत्र सन्निपातपरिभाषाप्रसक्तिरेव नास्ति तादृशं प्रत्युदाहरणमाह रामाभ्यामिति । परत्वात् सुपि चेति बाधित्वा एत्वं स्यादिति भावः । नुमापत्तेरिति । ओसि चेत्यत्रापि इगित्यनुवृत्त्या तस्मिन् कृते गुणापेक्षया परत्वादिकोऽचीति नुमापत्तेरित्यर्थः । न च गुणो नित्यः । पञ्चमीसमासेन स्थानिवत्त्वेन नुमोऽपि नित्यत्वात् । न च गुणोऽन्तरङ्गः । असिद्धपरिभाषायाः इगागमेऽनित्यत्वेनाप्रवृत्तेः। अन्यथा इकोऽसिद्धत्वेन गुणाप्राप्तेः । वार्णादाङ्गस्य बलीयस्त्वाच्च वार्णपरिभाषा आगमविषयेऽपि स्वीकार्यैव । अत एव सतुक्निर्देशेन तदनित्यत्वज्ञापनं संगच्छते । उभयोरादेश एव तत्प्रवृत्तिस्वीकारे तु रमे इत्यादौ सम्बुद्धौ चेतीगागमे गुणं बाधित्वाङ्गत्वात् ह्रस्वस्य गुण इति गुणापत्तिर्बोध्या उभयोरादेशत्वात् ।

ननु बहुवचने झलीडित्यस्तु झलादेर्बहुवचनस्य सुप इडित्यर्थः । एवञ्च ज्ञानयोरित्यादौ न नुमः प्रसक्तिः । तत्रापि ओस एव इडिति अङ्गस्येगन्तत्वाभावादित्यत आह इटि त्विति । गुण इति । सम्बुद्धौ चेति निष्पन्नेटा सह आद्गुणे कृते इत्यर्थः । न च बहुवचने इत्यादिसप्तमीनिर्देशोऽचरितार्थ इति तेषां षष्ठ्यन्तत्वकल्पनमनुचितमिति वाच्यम् । तदादिविधिसम्पादनेन चारितार्थ्यात् । किञ्च सप्तम्यन्तत्वे अत इडित्यर्थापत्तौ सुतरामिष्टासिद्धेश्चेति भावः । इट्पक्षे एभ्य इत्यत्र नित्यत्वादिटि हलि लोपानापत्तिरित्यपि बोध्यम् । अपवादत्वादिति । नन्वेवं रत्नमुडित्यादौ षकारस्यान्तरतम्याच्चर्त्वेन षत्वं स्यात् न टकारः । अल्पप्राणतया प्रयत्नभेदात् । तथा च चर्त्वाभावपक्षे जश्त्वेन डकारे रत्नमुड् सिद्धावपि रत्नमुट् इत्यस्यासिद्धिरिति चेन्न । जक्षित्यादयः षडित्यादिनिर्देशेन षविषये जश्त्वात्पूर्वं चर्त्वप्रवृत्तिकल्पनेनादोषात् । अनेन निर्देशेन न्यायतः प्राप्तस्यापवादत्वस्याभावकल्पनापेक्षया ईदृशकल्पनस्यैवौचित्यादिति भावः । न्यायेनेति।

फलाभावेऽपि न्यायप्रवृत्तौ बाधकाभाव इति भावः । द्वित्वे परसवर्णत्वं सिद्धं वक्तव्यमिति वार्तिकं तु एतन्न्यायस्य युक्त्यनुवादः । एतेन एतद्वार्तिकाद्वर्णद्वित्वविषये पूर्वत्रासिद्धमद्वित्वे इति न्यायाप्रवृत्तिरित्यपास्तम् । वाक्क्, वाग्ग् इति भाष्योदाहरणे उक्तन्यायस्वीकारादिति भावः । मूले प्रयत्नभेदादिति । ननु प्रयत्नभेदेऽपि तकार एव स्यात् न तु सकारः सादृश्यस्य भेदघटितत्वादित्याह अत एवेति । आन्तरतम्यपरीक्षायामभेद-घटितसादृश्यस्यापि ग्रहणादेवेत्यर्थः । सस्सीति न ज्ञापकम् । वत्स्यतीत्यादौ चयो द्वितीया इति पक्षे थकारस्य तादेशविधानाय चरितार्थत्वात् । चर्त्वे तु तस्यासिद्धत्वात् न चयो द्वितीया इत्यस्य प्रवृत्तिरिति चेन्न । आर्धधातुकसंज्ञापेक्षत्वेन बहिरङ्गस्य सस्सीत्यस्यासिद्धत्वेन चयो द्वितीया इत्यस्य सिद्धान्तेऽप्यप्राप्तेः । अस्य ग्रन्थस्य प्राचीनमताभिप्रायकत्वेन तन्मते संज्ञाकृतबहिरङ्गत्वस्याश्रयणात् त्रैपादिकेऽन्तरङ्ग-परिभाषाप्रवृत्तेश्च क्वचिदसिद्धत्वं नेत्यर्थकेन न मुने इत्यत्र नेति योगविभागेन द्वितीयवर्णे कर्तव्ये चर्त्वस्य सिद्धत्वसंभवेन फलभेदाभावाच्चेत्याशयात्।

बालबोधिनी : बहुवचने झल्येत् । ननु झलि किमिति प्रश्नोऽनुपपन्नः । तदभावे जसादावतिव्याप्तेः स्फुटत्वादत आह उत इति । उतो वृद्धिर्लुकि हलीति सूत्रात् हलीत्यनुवर्तते। रामाणामित्यत्र नुडागमोत्तरं हलादिबहुवचनपरत्वेऽपि अदन्तसन्निपातं निमित्तीकृत्य जायमानो नुडागमः तत्सन्निपातविघातकस्य एत्वस्य निमित्तं न भवतीति सन्निपातपरिभाषया दोषवारणात् झल्ग्रहणं किमर्थमिति प्रश्नकर्तुराशयः । समादधाति झल्ग्रहणमिति । ज्ञापनार्थमिति । ज्ञापनोत्तरमेत्वप्रवृत्तौ तद्वारणाय झल्ग्रहणं स्वांशे चरितार्थमिति भावः । फलमाह तेनेति । एतेन = एत्वे सन्निपातपरिभाषाया अप्रवृत्तिस्वीकारेण । व्याख्यातमिति। एत्वे सन्निपातपरिभाषाया अप्रवृत्त्या बहुवचनग्रहणाभावे रामस्येत्यत्र एत्वापत्तिरिति तद्व्यावृत्त्यर्थं बहुवचनग्रहणमावश्यकमिति व्याख्यातमित्यर्थः । सन्निपातपरिभाषाया अविषयं शुद्धं प्रत्युदाहरणमाह रामाभ्यामिति ।

ननु मात्रालाघवात् बहुवचने झलीक् इत्येव सूत्र्यताम् । कित्वादन्तावयवे आद् गुणे रामेभ्य इत्यादिसिद्धेरिति चेन्न । तथा सति ओसि चेत्युत्तरसूत्रेऽपि तदनुवृत्तौ ज्ञान+ओस् इत्यवस्थायामिगागमे अन्तरङ्गमपि गुणं बाधित्वा वार्णादाङ्गं बलीय इति परिभाषया इकोऽचि विभक्ताविति नुमापत्तिरित्याह बहुवचने इति । नुमापत्तेरिति । न च वार्णपरिभाषाया आदेश एव प्रवृत्त्या कृते इकि गुणापेक्षया कथं नुमागमस्य तया परिभाषया प्राबल्यं बोध्यत इति वाच्यम् । आगमादेशसाधारण्येन वार्णपरिभाषायाः प्रवृत्तिरिति ग्रन्थकृदाशयः । अत

एवोभयसंग्रहाय परिभाषेन्दुशेखरे 'सा चेयं धर्मिग्राहकमानादाङ्गवार्णयोस्समानकार्यित्व एव' इत्युक्तम् । न तु समानस्थानिकत्व इति । अत एव सतुग्ग्रहणेन तदनित्यताज्ञापनं संगच्छते। अथाप्युभयोरादेशत्व एवास्याः प्रवृत्तिरित्युच्यते तर्हि हे रमे इत्यादौ 'सम्बुद्धौ च' इतीगागमे अन्तरङ्गगुणं बाधित्वाऽनया परिभाषया ह्रस्वस्य गुण इति गुणे तदसिद्धिरिति इगिति न्यासोऽयुक्त इति भावः ।

ननु 'बहुवचने झलीट्' इति न्यासो भवतु । ज्ञानयोरित्यादावोसि इडेव भवतीति अङ्गस्येगन्तत्वाभावात् न नुमः प्रसक्तिरित्यत आह इटि त्विति । हे गङ्गे इत्यादौ 'सम्बुद्धौ च' इतीटि आद्गुणे हे गङ्गे + स् इत्यवस्थायां पूर्वविधिरित्यत्र पञ्चमीसमासेन पूर्वस्मात् परस्य विधिरिति स्थानिवत्त्वात् एङन्तत्वाभावेन एङ्ह्रस्वादिति न प्रवर्तते । इटा व्यवधानात् हल्ङ्यादिलोपस्याप्राप्तौ सम्बुद्धिलोपो न स्यादिति भावः । न च गङ्गे इत्यादौ पञ्चमीसमासस्यानित्यत्वात् स्थानिवत्त्वाप्रवृत्तौ एङन्तत्वादेव सम्बुद्धिलोपः सिध्यतीति इट्पक्षे न दोष इति वाच्यम् । एभिः, एभ्य इत्यादौ नित्यत्वात् भिसादेरिटि हलादित्वाभांवेन हलि लोप इति सूत्रेण इदम इदो लोपो न स्यादिति बोध्यम् ।

ननु मूले रामादित्यत्र जश्त्वमित्युक्त्वा ततः 'वावसाने इति सूत्रमारब्धम् । तेन जश्त्वे ततो वावसाने इति चर्त्वमित्यर्थ आगच्छति । मनोरमायान्तु तच्छिव इति ग्रन्थे जश्त्वं प्रति अवसाने चर्त्वस्यापवादत्वादित्युक्तम् । अनयोः परस्परविरोध इत्याशङ्कय मनोरमाग्रन्थविरोधं परिहर्तुमाह बाधित्वेति शेष इति । येन नाप्राप्तिन्यायेन अवसाने चर्त्वस्य जश्त्वापवादत्वमिति भावः । तदप्राप्तियोग्येऽचारितार्थ्यं बाधकताबीजम् । यत्र तु मूले जश्त्वचर्त्वे इति पाठस्तत्र अचर्त्वे = चर्त्वाभावे जश्त्वमिति योजनीयम् । नन्वेवं रत्नानि मुष्णातीत्यर्थे रत्नमुडिति डकारान्तस्य सिद्धावपि रत्नमुट् इति टकारान्तस्यासिद्धिः । तथा हि - प्रथमैकवचने रत्नमुषित्यत्र जश्त्वं बाधित्वा षकारस्यान्तरतम्यात् वावसाने इति चर्त्वेन षकारे षकारान्तस्य, चर्त्वाभावे जश्त्वेन डकारान्तस्य लाभेऽपि रत्नमुट् इत्यस्यासिद्धिरिति चेन्न । ष्णान्ता षट्, जक्षित्यादयः षट् इत्यादिनिर्देशैः षविषये जश्त्वात्पूर्वं चर्त्वप्रवृत्ति-कल्पनेनादोषात् । एतत्सर्वं शश्छोऽटीति सूत्रे अवसाने चर्त्वस्य जश्त्वापवादप्रतिपादक-मनोरमाकृन्मतरीत्या । वस्तुतस्तु षडिति निर्देशेन जश्त्वावसानचर्त्वयोः बाध्यबाधकभावा-भावकल्पनमेव लघ्विति सदाशिवभट्टादयः ।

द्वित्व इति । तकारदकारयोः अनचि चेति द्वित्वे तदभावे च रूपचतुष्टयमित्यर्थः । पूर्वत्रासिद्धमिति । द्वित्वभिन्ने कर्तव्ये पूर्वं प्रति परमसिद्धं भवति, न तु द्वित्वे कर्तव्ये इति

तदर्थः । वाक्क्, वाक् इति भाष्योदाहरणेन वर्णद्वित्वेऽप्ययं न्यायः प्रवर्तत इति बोध्यम् । तेन न्यायेन द्वित्वं प्रति चर्त्वस्यासिद्धत्वाभावेन कृते चर्त्वे तदुत्तरं द्वित्वमिति बोध्यम् ।

ननु षष्ठ्येकवचने रामस्येत्यत्र सस्य अनचि चेति द्वित्वे पूर्वसकारस्य खरि चेति चर्त्वेन दन्तस्थानसाम्येन तकारे सति रामत्स्येति स्यादिति चेन्न । दन्तस्थानतः श्वासाघोषविवारात्मकबाह्यप्रयत्नतश्च सकारतकारयोः साम्येऽपि सकारस्य महाप्राणत्वेन तकारस्याल्पप्राणत्वेन बाह्यप्रयत्नभेदादान्तरतम्याभावेन सकारस्य तकारो न भवति । न च प्रयत्नभेदेऽपि स्थानमात्रसाम्येन तकार एव स्यान्न तु सकारः, सादृश्यस्य भेदघटितत्वेन सकारस्य सदृशतमत्वाभावादिति वाच्यम् । आन्तरतम्यपरीक्षायामभेदघटितसादृश्यमपि गृह्यते । अत एव वत्स्यतीत्यादौ वस्+स्य+ति इत्यवस्थायां सकारस्य सकारे परे तादेशाय सः स्यार्धधातुके इति सूत्रमारब्धम् । अन्यथा = भेदघटितसादृश्यस्यैव ग्रहणे खरि चेति सूत्रेणैव सिद्धौ तद्विधानमनर्थकं स्यादिति भावः । तदेवाह अन्यथेति ।

ह्रस्वन । 'ह्रस्वनद्याप' इति पञ्चमी, 'आमिसर्वनाम्न' इत्यत 'आमी'ति वर्तते । तच्च षष्ठ्या विपरिणम्यते, नामीति लिङ्गादित्याह - ह्रस्वान्तादित्यादि । आमत्र षष्ठीबहुवचनमेव, न तु ङेरामादीति स्पष्टं भाष्ये । यत्तु नुडिति विभज्य सामान्येन नुड् विधेयः। 'नद्याप' इति 'दीर्घान्ताच्चेन्नद्याप एवे'ति नियमार्थमिति दीर्घेषु न दोषः । हलन्ताच्चेत्षट्चतुर्भ्य एवेति नियम इति हलन्तेषु न दोषः। एवञ्च ह्रस्वग्रहणं न कार्यमिति। तन्न, 'नद्याप' इत्यस्य 'स्त्रीलिङ्गनाच्चेन्नद्याप एवे'ति नियमपरतयाऽपि व्याख्यातुं शक्यत्वेन, नदीत्वाप्त्वयोर्ह्रस्वेऽपि दृष्टत्वेन त्वदुक्तनियमे दृढतरमानाभावेन च 'मतीना'मित्यादौ नुडनापत्तेः।

भावबोधिनी : षष्ठ्येति । आमीति सप्तमी तु त्रेस्त्रय इति चरितार्था साधकमप्याह नामीतीति । ङेरामादीति । तत्र याट्स्याडाड्भिः परत्वान्नुटो बाधे सकृद्गतिन्यायेन पुनर्नुटोऽप्रवृत्तेः । कास्प्रत्ययात् किमेत्तिङिति विहितयोः सानुबन्धकत्वादिति भावः । दीर्घेषु वातप्रम्यादिषु । हलन्तेषु लिहादिषु । शक्यत्वेनेति । अस्य मतीनामित्यनेनान्वयः। तदुक्तनियमोऽप्ययुक्त इत्याह ह्रस्वेऽपि दृष्टत्वेनेति । नियमशरीरघटकधर्मस्य दीर्घत्वस्योपात्तनदीत्वाप्त्वव्यापकत्वं नेति भावः ।

बालबोधिनी : ह्रस्वनद्यापो नुट् । पञ्चमीति । ह्रस्वश्च नदी च आप् चेति समाहारद्वन्द्वात् दिग्योगलक्षणा पञ्चमी । परस्येत्यध्याहार्यम् । विपरिणम्यत इति । आमि सर्वनाम्न इति सूत्रादामीति सप्तम्यन्तं पदमनुवर्तते । ह्रस्वनद्याप इति पञ्चमी । उभयनिर्देशे पञ्चमीनिर्देशस्य बलवत्त्वेन तस्मादिति परिभाषया आमीति सप्तम्यन्तं षष्ठ्यन्ततया विपरिणम्यते । आमीति

सप्तमी त्रेस्त्रय इत्यत्र चरितार्था । ह्रस्वनद्याप इत्यस्य पञ्चमीत्वे बीजमाह नामीति । अन्यथा ह्रस्वान्तस्य नुटि नामीत्यसङ्गतं स्यादिति भावः ।

न तु ङेरामादीति । अयं भावः । प्रकृतसूत्रे आम्पदेन सुब्विभक्तेर्ग्रहणमुत प्रत्ययान्तरस्येति प्रश्नः ? अत्र षष्ठीबहुवचनस्यैव ग्रहणं नान्यस्य । तथाहि - नात्र 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' इति सूत्रेण किम् एतदन्तात् तिङन्तादव्ययाच्च यो घस्तदन्ताद्विहितस्य तद्धितस्यामो न ग्रहणम् । तस्य उकारानुबन्धकत्वात् । कासूप्रत्ययादिति विहितस्यापि न फलाभावात् । तथा हि - अदन्ते नित्यत्वात् नुटं बाधित्वा अतो लोपः । इगन्ते परत्वान्नित्यत्वाच्च तं बाधित्वा गुणः । णिजन्ते नित्यत्वादयमान्तेत्यादिनायादेश इति ह्रस्वांशे न फलम् । नद्यन्तेऽपि परत्वाद्गुणे वर्णसंज्ञापक्षेऽनल्विधाविति स्थानिवत्त्वनिषेधेन तदप्राप्त्या न नुटः प्राप्तिः । तदन्तसंज्ञापक्षेऽपि सकृद्गतिन्यायेनाप्राप्तिः। आबन्तादाचारक्विपोऽनभिधानमेवेति तत आमः प्राप्तिरेव नेति न तदंशेऽपि फलम् । ङेराम्नद्यामिति आमोऽपि न ग्रहणम् । तत्र याट्स्याडाड्भिः परत्वात् नुटो बाधे सकृदगतिन्यायेन पुनर्नुटोऽप्रवृत्तेः । तथा च आमः षष्ठीबहुवचनस्यैव ग्रहणम् । स्पष्टं भाष्ये इति। आमि सर्वनाम्न इत्यत्रेत्यर्थः ।

ह्रस्वग्रहणं न कार्यमिति कस्यचिदुक्तिमनूद्य खण्डयति यत्त्विति । अयं भावः । नद्याप इत्येको योगः । नुडित्यपरः । नद्यन्तादाबन्ताच्च परस्यामो नुडित्येकस्यार्थः । अङ्गात्परस्यामो नुडित्यपरस्य । तत्र नुडिति सामान्यसूत्रेण सिद्धे नद्याप इति नियमार्थम् । दीर्घात्परस्यामो नुट् चेन्नद्यापः परीभूतस्यैवेति । तेन दीर्घान्तेषु वातप्रम्यादिषु वातप्रम्यामित्यादौ न नुट् । नुडिति सामान्यसूत्रेण सिद्धे षट्चतुर्भ्यश्चेत्यस्य वैयर्थ्येन तस्य हलन्ताच्चेत् षट्चतुर्भ्य एवेति नियमार्थत्वात् हलन्तेषु लिहादिषु न दोषः । अत एव वसुस्रंसुध्वंस्वनडुहाम्, झलामित्यादि निर्देशा उपपद्यन्त इति ह्रस्वग्रहणं न कार्यमिति । तन्निरस्याति तन्नेति । स्त्रीलिङ्गानाञ्चेत् तर्हि नद्याप एवेति नद्याप इत्यस्य विपरीतनियमपरतयापि व्याख्यातुं शक्यत्वेन विनिगमकाभावात् प्रगुक्तं न युक्तमित्याशयेनाह नद्याप इति ।

ननु कुमारीशब्दात् क्यजन्तात् क्विपि तस्मादामि कुमारीणां ब्राह्मणानामित्यत्र कुमारीशब्दे तथा बहुश्रेयसीत्यादौ स्त्रीत्वस्याभावेन नद्यन्तत्वस्य च सत्वेन, एवं वनिताशब्दादाचारक्विबन्तात् कर्तरि क्विपि आमि वनितानां ब्राह्मणानामित्यादौ वनिताशब्दे, खट्वाया अः खट्वेत्यादौ स्त्रीत्वस्याभावेन आबन्तत्वस्य च सत्वेन नद्याबन्ताङ्ग-व्यवहितोत्तरत्वविशिष्टामृत्वव्यापकत्वस्य स्त्रीलिङ्गाव्यवहितोत्तरत्वविशिष्टाम्त्वे अभावेन,

अर्थात् नद्याबन्ताङ्गव्यवहितोत्तरत्वविशिष्टाम्त्वाधिकरणं प्रागुक्तस्थलघटककुमारीणां वनितानामित्यादि । तद्वृत्त्यभावप्रतियोगित्वस्यैव स्त्रीलिङ्गाव्यवहितोत्तरत्वविशिष्टाम्त्वे सत्वेन तदप्रतियोगित्वस्याभावात् व्यापकत्वाभावेन स्त्रीलिङ्गानाञ्चेत् नद्याबन्ताङ्गानामेवेति नियमो नोपपद्यत इति पूर्वपक्ष्युक्तनियम एव युक्त इति शङ्कयामाह नदीत्वाप्त्वयोरिति । मत्यतिमालादौ ह्रस्वेऽपि नदीत्वाप्त्वयोस्सत्वेन नदीत्वाप्त्वव्यापकत्वस्य दीर्घान्तेऽभावेन पूर्वपक्ष्युक्तनियमेऽपि दृढतरमानाभावात् ह्रस्वपदमकृत्वा नुट् नद्याप इति न्यासे मतीनामित्यादौ नुडनापत्त्या तन्न युक्तमिति भावः ।

नामि । 'ढ्रलोप' इत्यतो 'दीर्घ' इत्यनुवर्तते। अङ्गस्येति किम् ? चर्मणाम् । ननु 'आमी' त्येवास्तु , नित्यत्वात्पूर्वं दीर्घेऽपि ह्रस्वान्तान्नुडित्येतत्सामर्थ्याद्भूत-पूर्वह्रस्वान्तत्वमादाय नुट्सिद्धेः । न च 'नृ चे' ति दीर्घविकल्पात् नृणामित्यत्र नुट् चरितार्थः। 'नृनद्याप' इत्येव सिद्धेः। तदुक्तं भाष्ये - 'नैकमुदाहरणं योगारम्भं प्रयोजयती' ति । 'तिसृणामि' ति षडित्यत्र त्रेरित्यनुवृत्त्या सिद्धमिति भाष्ये एव स्पष्टम् । एतेन 'ऋनद्याप' इति न्यासे भाष्यतात्पर्यमित्यपास्तम् । 'चतसृणां' 'प्रियचतसृणा' मित्यत्र 'षट्चतर्भ्य' इति सिद्धम्। गौणे तदप्रवृत्तौ तु न मानम् । बहुवचनन्तु लाघवार्थम् । द्विवचने हि चतुर्भ्यामिति गुरुनिर्देशः स्यात्, 'नैकमुदाहरण' मिति प्रकृतसूत्रस्थभाष्यविरोधश्च । समाहारद्वन्द्वेन निर्देशे कार्ये बहुवचननिर्देशस्तदर्थ इति तु न युक्तम् , 'अस्थिदधि' 'तिसृभ्यो जस' इत्यादौ व्यभिचारात्।

<u>भावबोधिनी :</u> ननु नैकमित्यसङ्गतम् । तिसृणामित्यस्य सत्वादित्यत आह तिसृणामिति त्विति । एतेन = तिसृणामित्यस्यान्यथा समर्थनेन । भाष्यतात्पर्यमिति । नैकमुदाहरणमित्युक्तभाष्यस्येत्यर्थः । बहुवचननिर्देशेन षडाद्यर्थस्य प्राधान्य एव नुडिति प्राचोक्तमित्यत आह बहुवचनं त्विति । व्यभिचारादिति । बहुवचननिर्देशेऽपि तेषां गौणेऽपि प्रवृत्तेरिति भावः ।

<u>बालबोधिनी :</u> नामि । ढ्रलोप इति । ढ्रलोपे पूर्वस्य दीर्घोऽण इति सूत्रात् दीर्घ इत्यनु-वर्तते । दीर्घपदश्रवणेन अचश्चेति परिभाषया अच इति षष्ठ्यन्तं पदमुपतिष्ठते । अङ्गस्येत्यधिक्रियते । अच इति अङ्गस्येत्यस्य विशेषणम् । तदन्तविधिः । नामि परे अजन्तस्याङ्गस्य दीर्घः स्यादिति सूत्रार्थः । चर्मणामिति । नामीति सूत्रस्याङ्गाधिकारे पाठाभावे नामि परे अचो दीर्घः स्यादिति सूत्रार्थः स्यात् । तथा सति चर्मन् शब्दादामि चर्मन्+आम् इत्यत्र नकारस्यामा सम्बन्धे नाम्परत्वेन दीर्घापत्तौ चर्माणामित्यनिष्टापत्तिरिति भावः । ब्राह्मणभिस्सेति पूर्वोक्तोदाहरणपरभाष्यरीत्येदं प्रयोजनम् । ब्राह्मणभिस्सेत्यादावतो भिस

ऐसित्यस्य प्रवृत्त्यभावाय तस्याङ्गाधिकारे पाठ इत्येवमाशयकभाष्यप्रामाण्येनात्र प्रकरणे अर्थवद्ग्रहणपरिभाषायाः प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति परिभाषाया वाऽप्रवृत्तिराश्रीयते । अन्यथा ब्राह्मणभिस्सेत्यादौ निरुक्तपरिभाषाभ्यामेव वारणसम्भवेऽङ्गाधिकारपाठो व्यर्थः स्यात् । अत एव चर्मणामित्यत्रार्थवद्ग्रहणपरिभाषया वारणं न भवति । तस्येहाप्रवृत्तेः । अन्ये तु अर्थवद्ग्रहणपरिभाषया तद्वारणे तु नम्धातोः क्विपि अनुनासिकस्य क्विझलोरिति दीर्घे नमतीति नाम् । देवदत्त नामित्यत्र फलं बोध्यमिति वदन्ति । परे तु नमतीति नाम् । चर्मणो नाम् चर्मनामिति दन्त्यघटिते दीर्घापत्तिः । चर्मनामित्येव पाठः । तस्यैव पाठस्य युक्तत्वेन आमीति न्यासे चर्मणामित्यत्र दीर्घापत्तिरूपदोषो भाष्यकृतोपन्यस्तः । अन्यथा आमीति न्यासे चर्मणामित्यत्र दीर्घापत्तिश्चेत् अङ्गाधिकारपाठस्य किं फलम् ? अथाङ्गाधिकारपाठस्य चर्मणामित्यत्र दीर्घाभावः फलमित्युच्यते तर्हि आमीति न्यासे किं फलमिति उभयतः पाशा रज्जुः स्यादित्याहुः ।

नन्विति । अयमाशयः । ननु लाघवात् नामीत्यत्रामीत्येव न्यासोऽस्तु । अजन्ताङ्गस्य दीर्घः स्यादामि परे इति तदर्थः । राम+आम् इत्यत्र नुट्दीर्घयोः प्राप्तयोः परत्वान्नुटि यदागमपरिभाषया नुड्विशिष्टस्यामृत्वेन ग्रहणात् दीर्घे रूपसिद्धेः । न च नुड्दीर्घयोः परमपि नुटं बाधित्वा कृताकृतप्रसङ्गित्वेन नित्यत्वात् प्रथमं दीर्घे ह्रस्वान्तत्वाभावात् नुडभावे रामाणामिति रूपासिद्धिरिति वाच्यम् । ह्रस्वान्तान्नुडिति वचनसामर्थ्यात्, सरूपाणामित्यादिनिर्देशाच्च भूतपूर्वह्रस्वान्तत्वमादाय नुट्सिद्धेरबाधात् ।

न च नृ चेति दीर्घविकल्पाद्दीर्घाभावपक्षे नृणामित्यत्र नुडर्थं ह्रस्वग्रहणस्य चारितार्थ्यात् कथं तत्सामर्थ्यात् भूतपूर्वगत्याश्रयणमिति वाच्यम् । नृनद्याप इति न्यासेनापि तत्र नुट्सिद्ध्या ह्रस्वग्रहणस्य वैयर्थ्येन तत्सामर्थ्येन भूतपूर्वगत्याश्रयणमित्याशयः । अत एवोक्तं भाष्ये नैकमुदाहरणं योगारम्भं प्रयोजयतीति ।

न च तिसृणामित्यत्र तिसृ+आम् इति स्थिते न तिसृचतसृ इति निषेधात् दीर्घाभावेन ह्रस्वान्तत्वात् तत्र नुट्सम्पादनेन ह्रस्वग्रहणं चरितार्थमिति वाच्यम् । षट्चतुर्भ्यश्चेत्यत्र त्रेस्त्रय इत्यतः त्रेरित्यनुवृत्त्या त्रिशब्दादपि नुटि उक्तरूपसिद्धेः । न च बहुवचननिर्देशेन षट्चतुर्भ्यश्चेत्यस्य गौणेऽप्रवृत्तौ प्रियतिसृणामित्यत्र नुडर्थं ह्रस्वग्रहणं चरितार्थमिति वाच्यम्। बहुवचननिर्देशमात्रबलेन गौणेऽप्रवृत्तिकल्पने मानाभावात् । बहुवचनन्तु लाघवार्थम् । षट्चतुर्भ्यामिति द्विवचननिर्देशे गौरवापत्तिः। बहुवचननिर्देशेन गौणेऽप्रवृत्तिकल्पने तिसृभ्यो जसः इत्यत्राप्येवं कल्पने प्रियतिस्र इत्यत्र स्वरानापत्तिः ।

किञ्च गौणे तदप्रवृत्तिकल्पने न केवलं प्रमाणाभावः किन्तु नैकमुदाहरणमिति प्रकृतसूत्रस्थभाष्यविरोधश्च । तथाहि - षट्चतुर्भ्यश्चेति नुटो गौणेऽप्रवृत्तौ ह्रस्वग्रहणस्य प्रियतिसृणां, प्रियचतसृणामित्यादौ नुडादिसिद्धेरपि फलत्वेनानेकोदाहरणसम्भवे नैकमुदाहरणमिति भाष्ये एकपदोपादानमसङ्गतं स्यादिति गौणेऽपि षट्चतुर्भ्यश्चेत्यस्य अवश्यमङ्गीकर्तव्यत्वेन प्रियचतसृणामित्यादौ न दोषः ।

न च षट्चतुर इति समाहारद्वन्द्वेन निर्देशे कार्ये बहुवचननिर्देशो गौणेऽप्रवृत्ति-ज्ञापनार्थ इति वाच्यम् । अस्थिदधि, तिसृभ्यो जसः इत्यनयोर्बहुवचननिर्देशे सत्यपि प्रियदध्नेत्यादौ गौणे प्रवृत्तेः प्रामाणिकतया बहुवचनेन निर्दिष्टा गौणे न प्रवर्तन्ते इति नियमस्य व्यभिचारात् ।

न च सर्वादिसूत्रे भाष्ये 'अङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवति' इत्युक्तम्। अङ्गाधिकारे पञ्चम्यन्तेन सप्तम्यन्तेन वा यदुच्यते तत् गृह्यमाणविभक्तेः = गृह्यमाणाद्विहितविभक्तेर्भवतीति तदर्थः । एवञ्च गौणे प्रियचतसृणामित्यादौ विभक्तेः गृह्यमाणाद्विहितत्वाभावेन नुट् न प्राप्नोति । गृह्यमाणविभक्तेरित्यस्य गृह्यमाणाद्विहितविभक्तिरित्यर्थकल्पनं भाष्यारूढम् । तथा हि - षड्भ्यो लुगित्यत्र षड्भ्य इत्यस्य विहितविशेषणत्वमित्याशयेन परमपञ्चेत्यादौ जसः षड्भ्यो विहितत्वाभावेन लुगभावमाशङ्क्य षट्प्रधान एष समास इत्युक्तं भाष्यकृता । परमपञ्चेति समासस्य संख्याप्रकारक संख्येयमुख्यविशेष्यकबोधजनकत्वेन षट्त्वसत्वात् विहितविशेषणत्वेऽपि परमपञ्चेत्यादौ लुगप्राप्तिरूपदोषो नेति तदर्थः । गृह्यमाणेति निरुक्तभाष्यस्य यथाश्रुतार्थकत्वे शङ्कासमाधानयोः प्रसक्तिरेव न स्यात् । तथा च गौणे नुटोऽप्रवृत्तिरिति वाच्यम् । नैकमुदाहरणं योगारम्भं प्रयोजयतीति नामीति सूत्रस्थभाष्यप्रामाण्यात् नुड्विधायके विहितपदानध्याहारेण षडादिभ्यः परस्याङ्गसंज्ञानिमित्तस्यामो नुडित्यर्थेन गौणेऽपि तत्प्रवृत्तौ बाधकाभावात् । अन्यथा प्रियचतसृणामित्यद्यर्थमपि ह्रस्वग्रहणस्यावश्यकत्वात् नैकमुदाहरणमिति भाष्यमसङ्गतं स्यात् । नुड्विधायके विहितपदानध्याहारादेव परमचतुर्णामित्यादौ नुट् सिध्यति।

न च पदां, दतामित्यादौ भूतपूर्वह्रस्वान्तत्वमादाय नुडापत्तिरिति वाच्यम् । ह्रस्वत्वं नाम मात्राकालिकाच्त्वम् । तत्र लक्ष्यानुरोधेन मात्राकालिकत्वांशे एव भूतपूर्वगत्याश्रयणं, न तु अच्त्वांशे । अतोऽत्र मात्राकालिकत्वस्य सिद्धावपि अच्त्वाभावेन अजन्तत्वा-भावान्नुडभावः सिध्यति ।

न च अस्यापत्यमिः, तस्य बहुवचने अयः । हरयश्च अयश्चेति विग्रहे निष्पन्नहरीशब्दात् आम्प्रत्यये हरी+आम् इत्यत्र स्वतोऽजन्तत्वात् भूतपूर्वगत्या मात्राकालिकत्वाच्च नुडापत्तिरिति वाच्यम् । आम्प्रत्ययोत्पत्तिकाले मात्राकालिकत्वाभावेन नुडापत्तिर्नास्ति । एवञ्च आमीत्येव सूत्रं क्रियताम् । नुड्विशिष्टनिर्देशो विफल इति पूर्वपक्षिग्रन्थसारः ।

भूतपूर्वह्रस्वान्तत्वमिति । ह्रस्वान्तान्नुड्विधानसामर्थ्यात् ह्रस्वग्रहणं व्यर्थं सत् भूतपूर्वह्रस्वान्तत्वं ज्ञापयतीति भावः । पूर्वविधावित्यत्र पञ्चमीसमासेन पूर्वस्मात् परस्य विधौ कर्तव्ये इत्यर्थाश्रयणेन रामा+आम् इत्यत्र स्थानिभूतादचः पूर्वस्मात्परस्यामो नुटि कर्तव्ये स्थानिवत्त्वात् ह्रस्वान्तात् परत्वात् नुडिति ग्रन्थकृदाशय इति चन्द्रिकाकारादयः । वस्तुतस्तु अशब्दादामि आनामित्यादौ स्थानिभूतादचः पूर्वत्वेन दृष्टस्याप्रसिद्धेः न पञ्चमीसमासेन निर्वाहः । किञ्च अचः परस्मिन्निति सूत्रे प्रदीपे हे गौरित्यत्र पञ्चमीसमासेन स्थानिवद्भावे सति सम्बुद्धिलोपः प्राप्नोतीति तद्वारणाय पूर्वस्मान्निमित्तात् परस्येत्यर्थस्य कैयटेन स्पष्टमुक्तत्वेन रामाणामित्यत्र स्थानिवत्त्वप्रसक्तिर्नास्ति । किञ्च पूर्वस्मादव्यवहितपरत्वेन दृष्टस्य विधावेव स्थानिवत्त्वमिति अचः परस्मिन्निति सूत्रे, न धातुलोप इति सूत्रे चोद्योते, अल्लोपोऽन इति सूत्रशेखरे च नागेशभट्टेन सिद्धान्तितत्वेन न तन्मतेऽपि पञ्चमीसमासेन प्रकृते स्थानिवत्त्वप्रसक्तिरित्यन्ये ।

नृणामित्यत्र ह्रस्वान्तात् नुड्विधानेन चरतार्थस्य ह्रस्वग्रहणस्य कथं सामर्थ्यकल्पनमित्याशङ्कते न चेति । नद्यापुसाहचर्यात् नृशब्दोऽजन्तो गृह्यत इति नृशब्दादाचारक्विबन्तात् कर्तरि क्विपि तुकि नृत्शब्दादामि नृत्+आम् इत्यत्र ह्रस्वनद्याप इति न्यासे नुट् न भवति, नृनद्याप इति न्यासे नुट् भवतीति फलभेदशङ्का नास्तीति बोध्यम्। समाधत्ते नृनद्याप इति । ह्रस्वनद्याप इत्यस्य स्थाने इत्यर्थः । ननु आमीतिन्यासपक्षे ह्रस्वनद्याप इति ह्रस्वघटितसूत्रसत्वे नृ+आम् इत्यवस्थायां परत्वात् नृ चेति दीर्घे ह्रस्वान्तात् परत्वाभावेन नुटोऽप्राप्त्या यणादेशे न्रामिति, दीर्घाभावपक्षे नुटि नृणामिति रूपद्वयम् । नृनद्याप इति न्यासे तु दीर्घपक्षे स्थानिवद्भावेन नृशब्दत्वात् नुटि नॄणामिति, दीर्घाभावपक्षे नृणामिति रूपमिति फलभेदस्य सत्वात् नृनद्याप इति न्यासस्य कर्तुमशक्यत्वात् ह्रस्वग्रहणवैयर्थ्याभाव इति चेन्न । नृन्नद्याप इति तपरघटिततया न्यासेन नृसम्बन्धिह्रस्वऋकारात् परस्य नुडित्यर्थेन ह्रस्वान्तस्यैव नृशब्दस्य ग्रहणेन दीर्घपक्षे नुटोऽप्राप्त्या यणि न्रामित्यस्यैव सम्भवेन न फलभेद इति केचित् । वस्तुतस्तु तक्रकौण्डिन्यन्यायेन नृचेति दीर्घस्य नुड्बाधकतया नृनद्याप इति

न्यासेऽपि दीर्घप्रवृत्त्यनन्तरं नुटोऽप्राप्त्या यणि त्रामिति, दीर्घाभावपक्षे नृणामिति रूपद्वयमिति ह्रस्वनद्याप इति न्यासेऽपि पूर्वोक्तरीत्या तदेव रूपद्वयमिति नास्ति फलभेद इत्यन्ये । एवञ्च नृनद्याप इति न्यासे नद्याप्साहचर्यात् नृशब्दोऽजन्तो गृह्यत इति नृशब्दादाचारक्विबन्तात् कर्तरि क्विपि तुकि निष्पन्ननृत्शब्दादामि नृत्+आम् इत्यत्र ह्रस्वनद्याप इति न्यासे नुट् न भवति, नृनद्याप इति न्यासे नुट् भवतीति फलभेदशङ्का नास्तीति बोध्यम् । तस्यानजन्तत्वात्।

केवलं नृणामित्येतदर्थं ह्रस्वग्रहणं न कार्यमित्यत्र भाष्यं मानमाह नैकमुदाहरणमिति। सामान्यधर्मावच्छिन्नोद्देश्यताकं शास्त्रमेकमुदाहरणं न प्रयोजयतीति तदर्थः । अनेकलक्ष्यसंग्राहकं योगारम्भमिति फलितार्थः । तेन तदुदाहरणमात्रफलकं विशेषशास्त्रम् अग्नेर्ढक् इत्यादि तु प्रयोजयत्येवेति भावः ।

ननु नैकमित्यसङ्गतम् । न तिसृचतसृ इति निषेधेन दीर्घाभावे तिसृणामित्यत्र नुडर्थमपि ह्रस्वग्रहणस्य चारितार्थ्यादित्यत आह तिसृणामिति । षट्चतुर्भ्यश्चेति सूत्रे त्रेस्त्रय इति सूत्रात् त्रेरित्यनुवृत्त्येत्यर्थः । न च आमीति न्यासपक्षे ह्रस्वनद्याप इति ह्रस्वपदोपादाने त्रिशब्दादामि त्रयादेशे नित्यत्वादामीति दीर्घे ह्रस्वान्तत्वाभावेन नुटोऽप्राप्त्या त्रयामिति भवति । षट्चतुर्भ्य इत्यत्र त्रेरित्यस्यानुवृत्तिपक्षे त्रयादेशे दीर्घे स्थानिवद्भावेन त्रिशब्दत्वस्य सत्वान्नुटि त्रयाणामिति रूपे फलभेद इति वाच्यम् । षट्चतुर्साहचर्येण अनकारान्त-त्रिशब्दस्यैव ग्रहणेन त्रयादेशे नुटोऽप्राप्त्या फलभेदाभाव इति चन्द्रिकायां स्पष्टम्। भाष्ये स्पष्टमिति । नामीति सूत्रभाष्ये इत्यर्थः । एतेन = तिसृणामित्यस्यान्यथा समर्थनेन । भाष्यतात्पर्यमिति । नैकमुदाहरणमित्यादिभाष्यस्येत्यर्थः ।

चतसृणामिति । मुख्यमुदाहरणम् । प्रियचतसृणामिति गौणमित्यर्थः । सिद्धमिति। षट्चतुर्भ्यश्चेति सूत्रे षट्साहचर्येण हलन्तस्य चतुर्शब्दस्य यथा ग्रहणं तथाऽनुवृत्त-त्रिशब्दसाहचर्येणाजन्तस्यापि ग्रहणात् चतुर्णाम्, चतसृणामित्युभयत्रापि षट्चतुर्भ्य इति नुट् सिध्यतीति ह्रस्वग्रहणस्य सामर्थ्यं निराबाधमेव । अत एव षट्चतुर्भ्य इति सूत्रे षट्साहचर्येण हलन्तस्यैव चतुर्शब्दस्य ग्रहणमिति चतसृणामित्यत्र नुडर्थं ह्रस्वग्रहणं चरितार्थमिति शङ्का निरस्ता ।

ननु चतसृणामिति मुख्ये षट्चतुर्भ्य इत्यस्य प्रवृत्तावपि प्रियचतसृणामिति गौणे तत्प्रवृत्तौ मानाभावात् तदर्थं ह्रस्वनद्याप इति सूत्रे ह्रस्वग्रहणं चरितार्थमित्यत आह गौणे इति । ननु बहुवचननिर्देशेन षडाद्यर्थस्य प्राधान्य एव षट्चतुर्भ्य इति नुडिति तदेव गौणे तदप्रवृत्तौ मानमत आह बहुवचनं त्विति। तदेव समर्थयन्नाह द्विवचनेति । एवञ्च

बहुवचननिर्देशो गौणे तदप्रवृत्तौ न मानमिति सिद्धम् । न केवलं प्रमाणाभावः किन्तु भाष्यविरोधोऽपीत्याह नैकमिति । यदि गौणे षट्चतुर्भ्य इत्यस्य प्रवृत्तिर्न भवति तर्हि प्रियचतसृणामित्यत्रापि नुडर्थं ह्रस्वग्रहणस्य चरितार्थतया बहूदाहरणलाभेन नैकमुदाहरणमिति भाष्यस्यासङ्गतिः स्पष्टैव । तदर्थ इति । बहुवचननिर्देशो गौणेऽप्रवृत्त्यर्थ इत्यर्थः । व्यभिचारादिति । बहुवचननिर्देशेऽपि प्रियदध्नेत्यादौ गौणेऽपि अस्थिदधीत्यादीनां प्रवृत्त्या बहुवचनेन निर्दिष्टा गौणे न प्रवर्तन्ते इति नियमस्य व्यभिचारादित्यर्थः ।

न च 'अङ्गाधिकारे पञ्चम्या यदुच्यते गृह्यमाणविभक्तेस्तद्भवती'ति सर्वादिसूत्र-भाष्याद्गृह्यमाणाद्विहितविभक्तेरित्यर्थकादस्य नुटो गौणेऽप्रवृत्तिः। 'षड्भ्य' इत्यत्रापि विहितविशेषणमेवेत्याशयेन 'परमपञ्चे'त्यादौ लुगभावमाशङ्क्य - 'षट्प्रधान एष समास' इत्युक्तम् । समासस्य षट्प्रधानत्वेन सङ्ख्याप्रकारसङ्ख्येयविशेष्यकबोधजनकत्वेन षट्त्वसत्त्वान्न दोष इति तदर्थः । 'ष्णान्ते'त्यत्र लोके गणनायां प्रसिद्धानामेव ग्रहणमित्यत्र न मानम् । प्रकृतेऽपि तथैव, 'षड्भ्य' इत्यादौ - पञ्चम्या विरुद्धविभक्तित्वादङ्गस्येत्यनेन सम्बन्धायोग्यत्वाद्विहितेत्याद्यध्याहारेण प्रत्ययविशेषणतैवेति भाष्योक्तेः, - इति गौणे नुटोऽप्रवृत्तिरिति वाच्यम् । 'नामी'ति सूत्रस्थोक्तभाष्यप्रामाण्यान्नुड् विधायके विहितपदानध्याहारेण षडादिभ्यः परस्याङ्गसञ्ज्ञानिमित्तस्यामो नुडित्यर्थेन गौणेऽपि प्रवृत्तेः। 'अतो भिस' इत्यादावङ्गस्येत्यस्यैवमन्वयस्यैवाङ्गसञ्ज्ञासूत्रे भाष्ये उक्तत्वात् । अत एव 'परमचतुर्णा'मित्यादौ नुट् । यद्यप्येवं षड्भ्यः अद्ड्डतरादिभ्य इत्यनयोरपि वक्तुं शक्यं, तथापि लक्ष्यानुसारात्तत्र विहितविशेषणम् । 'विरुद्धविभक्तित्वादि'ति भाष्योक्तयुक्तिस्त्वेकदेशिन इति बोद्ध्यम् । 'अद्ड्डतरादिभ्यः' 'षड्भ्यो लुगि'त्यनयोरेव सर्वादिसूत्रे भाष्ये उपन्यासाच्च। 'षड्भ्य' इत्यादेः 'षडर्थगतसङ्ख्याभिधायिजश्शसो'रित्यादिक्रमेणार्थ इति कैयटोक्तन्तु 'अद्ड्डतरादिभ्य' इति सूत्रे भाष्यविरोधादिभिर्दूषयिष्यते । न च 'पदां' 'दता'मित्यादावतिप्रसङ्गः। ह्रस्वत्वं नाम मात्राकालिकाच्त्वं, तत्र सामर्थ्याद्विशेषणीभूत-मात्राकालिकत्वांशे एव भूतपूर्वगत्याश्रयणं न तु विशेष्यभूताच्त्वांशेऽपीत्यदोषादिति चेन्न

<u>**भावबोधिनी :**</u> न दोष इति । विहितविशेषणत्वेऽपीत्यादिः । परमपञ्चन्नादौ षट्संज्ञैव न स्यात् विशिष्टस्य संख्यावाचकत्वे प्रसिद्ध्यभावादित्यत आह ष्णान्तेत्यत्रेति । प्रकृतेऽपि= षट्चतुर्भ्य इत्यत्रापि । उक्तभाष्येऽपि = नह्येकमित्युक्तभाष्ये । अङ्गस्येत्यत्र निमित्तनिमित्तिकभावरूपसम्बन्धार्थिका षष्ठीत्यत्र भाष्यसम्मतिमाह अतो भिस इति । अत एव विहितपदानध्याहारादेव । एवम् अतो भिस ऐसित्यत्रोक्तरीत्या । एकदेशिन

इति । विरुद्धविभक्तित्वेऽपि अङ्गसंज्ञानिमित्तस्येत्यन्वयस्योपपादितत्वादिति भावः । सिद्धान्त्युक्तित्वेऽप्याह अनयोरेवेति । एतेन षट्चतुर्भ्य इत्यादिकं व्यावर्तयति । विहितविशेषणवादिनं कैयटं खण्डयति षड्भ्य इत्यादेरिति । भूतपूर्वगत्याश्रयणेऽतिप्रसङ्गं वारयति न चेति ।

बालबोधिनी : ननु सर्वादिसूत्रस्थभाष्यप्रामाण्येन षट्चतुर्भ्यश्चेति नुटो गौणेऽप्रवृत्तिरिति शङ्कते न चेति । पञ्चम्या = तदन्तेन । यद्यपि भाष्येऽङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीति सामान्यत उक्तम्, तथाप्यङ्गाधिकारे सप्तम्या यदुच्यते प्रकृतविभक्तेस्तद्भवतीत्युत्तरभाष्येणायमर्थः फलतीति बोध्यम् । गृह्यमाणविभक्तेरित्यस्यार्थान्तरभ्रमनिरासायाह गृह्यमाणादिति । निरुक्तार्थेऽग्रिमभाष्यं साधकमित्याह षड्भ्य इति । लुगभावमिति । पञ्चेत्यत्र यथा षट्संज्ञकाद्विभक्तिर्विहता तथा परमपञ्चेत्यत्र समुदायस्य नान्तस्य संख्यावाचित्वेन लोकप्रसिद्ध्यभावेन षट्त्वभावात् ततो विहितस्य लुगनापत्तिरिति शङ्कितुराशयः । शङ्कां निराचष्टे षट्प्रधान इति । इत्युक्तमिति । सर्वादिसूत्रे भाष्ये अथवाऽङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवति । यद्येवं परमपञ्च परमसप्त षड्भ्यो लुगिति लुङ्न प्राप्नोति । नैष दोषः । षट्प्रधान एष समास इत्युक्तम् । तत्र प्रदीपे गृह्यमाणानां त्यदादीनाम् इतरादीनां च स्वार्थद्वारेण सम्बन्धिनी या विभक्तिः तदर्थगतसंख्याकर्मादिवाचीनी तस्या इत्यर्थ इति कैयटेन व्याख्यातम् । तदर्थस्वीकारे परमपञ्चेत्यत्र न भवतीत्यादिरीत्या शङ्कासमाधानयोः प्रसक्तिरेव न भवतीति विहितविशेषणत्वेनार्थो वक्तव्य इति ग्रन्थकृदाशयः । संख्येयेति । संख्येयमुख्यविशेष्यकेत्यर्थः । षट्त्वसत्वादिति । परमपञ्चेत्यादावित्यर्थः । न दोष इति । विहितविशेषणत्वेऽपीत्यादिः ।

ननु परमपञ्चन् इत्यादीनां लोके संख्यात्वेन प्रसिद्धिर्नास्तीति कथं तेषां षट्संज्ञेत्यत आह लोके इति । प्रकृतेऽपि = षट्चतुर्भ्य इत्यत्रापि । तथैव = विहितविशेषणमेव । एतदुत्तरमुचितत्वादिति शेषः । औचित्यमेवाह षड्भ्य इति । प्रत्ययविशेषणतैवेति । अङ्गसंज्ञानिमित्तस्य षडादिभ्यो विहितस्यामो नुडित्यर्थः । भाष्योक्तेरिति । षड्भ्य इत्यादौ विरुद्धविभक्तित्वरूपयुक्त्या विहितविशेषणत्वं तथा षट्चतुर्भ्य इत्यत्रापि तुल्ययुक्त्या विहितपदाध्याहारेण प्रत्ययविशेषणत्वमुचितमिति भावः ।

गौणे नुटोऽप्रवृत्तिरिति शङ्कां समादधाति । नामीति । उक्तभाष्येति **नैकमुदाहरणमिति** भाष्येत्यर्थः । अन्यथा नृणामित्यत्रेव प्रियचतसृणामित्याद्यर्थमपि **ह्रस्वग्रहणस्यावश्यकत्वात्** नैकमुदाहरणमिति भाष्यमसङ्गतं स्यादिति भावः । अङ्गस्येति **षष्ठ्या निमित्तनिमित्ति-**

भावरूपार्थकत्वस्वीकारे मानमाह अतो भिस इति । एवमन्वयस्य = विहितपदानध्याहारेण अङ्गसंज्ञानिमित्तस्य भिस इत्यन्वयस्य । अत एव = नुड्विधायके विहितपदानध्याहारादेव ।

यद्यप्येवमिति । विहितपदानध्याहारेणेत्यर्थः । वक्तुं शक्यमिति । विहितपदानध्याहारेणाङ्गसंज्ञानिमित्तस्येति वक्तुं शक्यमित्यर्थः । लक्ष्यानुसारमिति । प्रियपञ्चानः, अतिकतरं ब्राह्मणकुलमित्यादिलक्ष्यानुरोधादित्यर्थः । अन्यथा गौणत्वेन तत्र तन्न सिद्ध्येदिति भावः। ननु अङ्गस्येति सूत्रे भाष्ये 'अत इति पञ्चमी, अङ्गस्येति स्थानषष्ठी। तत्राशक्यं विविभक्तिकत्वादत इति पञ्चम्याऽङ्गं विशेषयितुम्' इति विरुद्धविभक्तित्वादिति भाष्योक्तहेतोः का गतिरत आह एकदेशिन इति । अतो भिस इत्यादौ अङ्गस्येत्यस्याङ्गसंज्ञानिमित्तस्येत्यन्वयस्याङ्गसंज्ञासूत्रे भाष्ये उपपादितत्वादिति भावः ।

अनयोरेवेति । सर्वादिसूत्रस्थ तद्भाष्यबलेनोक्तसूत्रद्वये विहितविशेषणत्वेऽपि तदन्यत्र षट्चतुर्भ्य इत्यादौ तथात्वे मानाभाव इति भावः ।

षड्भ्य इत्यादेः कैयटोक्तव्याख्यानिरासायाह षड्भ्य इत्यादेरिति । भूतपूर्वगत्याश्रयणेऽतिप्रसङ्गमाशङ्क्याह न चेति । भूतपूर्वत्वाश्रयणे इति शेषः । मात्राकालिकत्वांशे इति । तावन्मात्रे भूतपूर्वगत्याश्रयणेन ह्रस्वान्तान्नुटः कृतार्थत्वादिति भावः ।

'नोपधाया' इत्युत्तरार्थत्वात् । तेन 'चर्मणा'मित्यादौ दीर्घाभावः सिद्ध इति दिक् ।

भावबोधिनी : दिगिति । तदर्थस्तु उक्तातिप्रसङ्गः पदादीनामादेशत्व एव । प्रकृत्यन्तरत्वपक्षे तु अतिप्रसङ्गशङ्कैव न । किञ्चादेशत्वपक्षेऽपि न दोषः, शस्प्रभृतिष्वित्यस्य विषयसप्तमीत्वेन हलन्तादेवामुत्पत्तेः आमुत्पात्तिकालिक-ह्रस्वान्तत्वस्यैव भूतपूर्वगत्याश्रयणमिति ।

बालबोधिनी : नामीति सूत्रं यथातथमावश्यकमिति समादधाति नोपधाया इति । उत्तरार्थत्वादिति । उत्तरसूत्रे नामीत्यस्यानुवृत्त्यर्थमिति भावः । अन्यथा आमीति न्यासे नोपधाया इति सूत्रेऽपि तस्यैवानुवृत्तौ चर्मणामित्यादौ आम्परत्वेन दीर्घापत्तिरिति तथा न्यासः कर्तुं न शक्यत इति भावः ।

परिभाषाविरोधादिति। सर्वत्रानित्यत्वाश्रयणे मानाभाव इति भावः। कृताऽकृतप्रसङ्गित्वात् 'नामी'ति नित्यम् । न च विशेषाभावेन फलाभावान्न कृते तत्प्राप्तिरिति वाच्यम् । विशेषाभावेऽपि 'पर्जन्य'न्यायेन शास्त्रप्रवृत्तेः इको झलिति सूत्रे भाष्ये उक्तत्वात्। 'आयादय' इति सूत्रे भाष्ये स्यादिभिः परत्वादायादिबाधमाशङ्क्य

'अनवकाशत्वादायादयः, न च 'गोपायती'त्यादिरवकाशः, अत्रापि शपः स्यादेःप्राप्तेः, न च नास्ति विशेषः, अन्यदिदानीमिदमुच्यते 'नास्ति विशेष' इति । यदुक्तम् आयादीनां स्यादिभिरव्याप्तोऽवकाश इति, स नास्त्यवकाशः इति भाष्योक्तेश्चेत्यपि बोध्यम् । आरम्भेति । यत्तु - 'कतीना'मित्यत्र 'षट्चतुर्भ्य' इति नुटि सन्निपातपरिभाषाया अप्राप्तेः सावकाशत्वमस्त्येवेति, तन्न । 'न ह्येक'मित्युक्तन्यायेन 'कतेर्नामी'त्येव सिद्धे सामान्यसूत्रारम्भेत्यर्थात् । एवञ्च 'न तिसृचतसृ' इत्यकरणेन लाघवमिति भावः । 'नुटी'ति तु नोक्तम् ।

भावबोधिनी : नन्वनित्यत्वात् सुपि चेति दीर्घे परिभाषा न प्रवर्ततामत आह सर्वत्रेति । अत एव दोषनिरूपणावसरे यादेशस्सुपि चेति दीर्घस्येत्येवाभिहितं भाष्ये इति भावः । यदि तु कष्टायेति निर्देशेन सामान्यतो दीर्घविषयेऽप्रवृत्तिं कल्पयित्वा सुपि चेत्येव वक्तुमुचित इत्युच्यते तदाप्याह कृताकृतेति । तदेवोपपादयितुं शङ्कते न चेति । विशेषाभावेऽपि पर्जन्यन्यायेन शास्त्रप्रवृत्तौ भाष्यसम्मतिमाह आयादय इतीति । नास्ति विशेष इति । शपि कृते अतो गुण इति पररूपेण विशेषो नेत्यर्थः । अव्याप्तोऽवकाश इति । अस्तीति शेषः । अप्राप्तेरिति । तत्र नामीति दीर्घस्येति शेषः । कतेर्नामीति न्यासेन गौरवमित्यत आह एवञ्चेति । एवं न्यासे चेत्यर्थः । नोक्तमिति । मात्रालाघवसत्वेऽपि बहूनामर्थानां कल्प्यत्वेन गौरवम् । तथा हि – नुटि अजन्ताङ्गस्य दीर्घ इत्यर्थे अनश्व इत्यादौ दीर्घापत्तिः । नञोऽव्ययत्वेन सुपं प्रत्यङ्गत्वात् अङ्गसंज्ञाप्रयोजके नुटीति तु वक्तुमशक्यम् । नुड्मात्रस्याङ्गसंज्ञाऽनिमित्तत्वात् नुटीत्यस्य नुडादौ लक्षणायान्तु लक्षणैव दोषः । यदि तु तस्य नुगचीति न्यासेन लुप्तनकारस्य नञो नुगागमः क्रियते तदा दीर्घाभावेऽपि नलोपापत्तिः । नुड्विधानसामर्थ्यात् तदभावकल्पने तु कल्पनागौरवं स्फुटमेवेति ।

बालबोधिनी : परिभाषाविरोधादिति । ननु रामाणामित्यत्र राम+नाम् इत्यवस्थायां परत्वात् सुपि चेति दीर्घ इति वक्तव्यः न तु नामीति शङ्कायां सन्निपातपरिभाषाविरोधात् नात्र सुपि चेति दीर्घ इति समाहितम् । वस्तुतस्तु कष्टाय क्रमणे इति निर्देशेन सन्निपातपरिभाषाया अनित्यत्वात् तया परिभाषया सुपि चेति दीर्घस्य प्रवृत्तिकथनमयुक्तमित्यत आह सर्वत्रेति । कष्टायेति निर्देशेन, यादेशस्सुपि चेति दीर्घत्वस्येति भाष्येण चतुर्थ्येकवचने तत्परिभाषाया अप्रवृत्तावप्यन्यत्र तदप्रवृत्तौ प्रमाणं नास्तीति भावः। ननु कष्टाय क्रमणे इति निर्देशस्य सामान्यापेक्षज्ञापकतामाश्रित्य सर्वत्र सुपि चेति दीर्घे

सन्निपातपरिभाषा न प्रवर्तत इत्युच्यते तर्हि सुपि चेति दीर्घाप्रवृत्तौ साधकान्तरमाह कृताकृतेति। सुपि चेति दीर्घे कृतेऽकृते च प्रवृत्त्या नामीति नित्यमित्यर्थः। सुपि चेति दीर्घोत्तरं पुनर्नामीति दीर्घे विशेषाभावेऽपि पर्जन्यवत् तत्प्रवर्तत इत्याह पर्जन्यन्यायेनेति। कृते =सुपि चेति दीर्घे कृते। तत्प्राप्तिः = नामीत्यस्य प्राप्तिः। भाष्ये उक्तत्वादिति। तत्र हि इगन्तात् झलादिः सन् कित् स्यादित्यर्थकस्य इको झल् इति सूत्रस्याभावे बुभूषतीत्यत्र गुणापत्तिः। न च अज्झनगमां सनीत्यजन्तस्य दीर्घविधानान्न गुणः। दीर्घेण गुणस्य बाधादिति वाच्यम्। गुणे कृतेऽपि दीर्घस्य चारितार्थ्यादित्युक्तम्। दीर्घस्य दीर्घविधाने फलाभावात्तत्र दीर्घाप्रवृत्तौ भाष्यासङ्गतिः स्पष्टैव। तेन पर्जन्यवल्लक्षणप्रवृत्तिस्सूचितेति बोध्यम्। तत्रैव मानान्तरमाह आयादय इति। परत्वादिति। परत्वात् स्यादिभिरायादिबाधे सति सकृद्गतिन्यायेन पुनरायादयो न भवन्तीति भावः। नास्ति विशेष इति। शपि सति असति वेत्यर्थः। शपि अतो गुणे इति पररूपेण विशेषाभाव इति बोध्यम्। स नास्तीति। पर्जन्यवल्लक्षणप्रवृत्तेरिति भावः। आयादय इति सूत्रस्थं भाष्यम् - 'स्यादि बलीयस्त्वं तु विप्रतिषेधेन तुल्यनिमित्तत्वात्'। स्यादिभिस्त्वायादीनां बाधनं प्राप्नोति विप्रतिषेधेन तुल्यनिमित्तत्वात्। तुल्यं हि निमित्तमायादीनां स्यादीनां च। स्यादीनामवकाशः करिष्यति, हरिष्यति। आयादीनामवकाशः गोपायति धूपायति। इहोभयं प्राप्नोति गोपायिष्यति धूपायिष्यति। परत्वात् स्यादयः। 'न वाऽऽयादिविधानस्यानवकाशत्वात्'। न वैष दोषः। अनवकाशा आयादयः। ते वचनाद् भविष्यन्ति। ननु चेदानीमेवावकाशः प्रक्लृप्तः। गोपायति धूपायतीति। अत्रापि शप् स्यादिर्भवति। यद्यत्रापि शप् स्यादिर्भवति। न त्वत्रास्ति विशेषः। सति वा शप्यसति वा। अन्यदिदानीमेतद् यदुच्यते नास्ति विशेष इति। यत्तु तदुक्तम् - आयादीनां स्यादिभिरव्याप्तोऽवकाश इति। स नास्त्यवकाश" इत्यादि। तत्र प्रदीपे अन्यदिदानीमिति। विशेषाभावेऽपि लक्षणवशात् प्रवर्त्य शपेति भाव इति कैयटः। उद्योते स नास्त्यवकाश इति। पर्जन्यवल्लक्षणप्रवृत्तिरिति भाव इति नागेशः।

आरम्भेति। आरम्भसामर्थ्यात् नामीत्यनेन सन्निपातपरिभाषा बाध्यत इति मूलम्। प्राचोक्तिं खण्डयति। यत्त्विति। अप्राप्तेरिति। कति+आम् इत्यत्र षट्चतुर्भ्यः इति नुटि, एकदेशविकृतन्यायेन नामीति कृतदीर्घेऽपि षट्त्वस्य सत्वात् सन्निपातविघाताभावेन तत्परिभाषाया अप्राप्त्या नामीति दीर्घस्य सावकाशत्वादारम्भसामर्थ्यादिति कथनमयुक्तमिति शङ्कितुराशयः। तन्निरस्यति तन्नेति। सामान्यसूत्रारम्भेति। नामीति सूत्रारम्भेत्यर्थः। तथा न्यासे लाघवमपीत्याह एवञ्चेति। कतेर्नामीत्युक्तौ चेत्यर्थः। अकरणेनेति। कतेर्नामीति न्यासे प्राप्तेरेवाभावेन न तिसृचतसृ इति निषेधो न कार्य इति लाघवमित्यर्थः। नोक्तमिति।

नामीत्यस्य स्थाने नुटीति नोक्तम् । मात्रालाघवसत्वेऽपि तस्मान्नुडचीति नुटिअनश्व इत्यादौ दीर्घापत्तिवारणायार्थान्तरकल्पनाप्रयुक्तगौरवं स्यादिति भावः ।

अपदान्तस्य । 'ष' इत्येव सिद्धे मूर्धन्यग्रहणम् 'इणः षीध्व'मित्यस्य ढविधानार्थं, 'रषाभ्या'मित्यत्रानुवृत्त्यर्थश्च, एवञ्च तत्र णग्रहणं, 'पदान्तस्ये'ति च न कर्तव्यमिति भाष्ये स्पष्टम् । इण्कोः । वर्गग्रहणश्चर्त्वस्यासिद्धत्वात् 'स्रक्षि्व'त्याद्यर्थम् । आदेश। प्रत्ययशब्दस्तदवयवपरो व्याख्यानात् , सातेः षत्वनिषेधाल्लिङ्गाच्च। तदाह - प्रत्ययावयवेत्यादि । विवृताघोषस्येति । विवृतरूपाभ्यन्तरप्रयत्नवतोऽघोषरूपबाह्य-प्रयत्नवतश्चेत्यर्थः। ठकारवारणयाद्यम्,ऋकारवारणाय द्वितीयम् । रामस्येति । 'टाङसी'तिसूत्रे सकारोच्चारणन्तु 'इण्को'रित्यनुवृत्तावेव तात्पर्यग्राहकमिति भावः।

50 **<u>भावबोधिनी :</u>** पदान्तस्य चेति । अपदान्तग्रहणस्याप्यनुवृत्तेरिति भावः । ननु इण्क इत्येवास्त्वित्यत आह वर्गग्रहणश्चेति । इत्याद्यर्थमिति । आदिना गवाङ्क्ष्वित्यादेः संग्रहः । प्रत्ययशब्द इति । लक्षणयेत्यादिः । व्याख्यानात् आत्मनेपदेष्वित्यादि-निर्देशमूलकात् । तत्र लिङ्गमप्याह सातेरिति । बाह्यप्रयत्नेति । तुल्यास्येत्यत्र प्रशब्दबलादाभ्यन्तरमात्रग्रहणेऽप्यन्यत्र तन्मात्रग्रहणे मानाभाव इति भावः । ननु स्यादेकादेशे सकारोच्चारणसामर्थ्यात् न षत्वमित्यत आह टाङसीति। ग्राहकमिति । वक्तुमुचित इति शेषः ।

<u>बालबोधिनी :</u> अपदान्तस्य । अपदान्तस्य ष इत्येव सिद्धे मूर्धन्यग्रहणं किमर्थमिति शङ्कायामाह इण इति । तत्र मूर्धन्यपदानुवृत्त्या ढविधानार्थम् । ननु तत्रापि ढग्रहणं भवत्वित्यत आह रषाभ्यामिति । एवञ्चेति । सर्वसंग्राहकमूर्धन्यपदस्य, अपदान्तस्येत्यस्य च पदद्वयस्याधिकारत्वे इत्यर्थः । तत्र = रषाभ्यामिति सूत्रे । अपदान्ताधिकारफलमाह पदान्तस्येति । णत्वविधायके अपदान्तस्येत्यस्य चाधिकारत्वादेव पदान्तस्येति निषेधसूत्रमपि न कार्यमिति लाघवमिति भावः ।

इण्कोः । इण् च कुश्चेति समाहारद्वन्द्वः । सौत्रं पुंस्त्वम् । इण् च क् चेति इतरेतरद्वन्द्वे द्विवचनमिति भ्रमनिरासायाह वर्गग्रहणमिति । तदभावे ककारोपादाने स्रक्षु इत्यादौ चोः कुरिति कुत्वे जस्य चर्त्वे, षत्वे कर्तव्ये तस्यासिद्धत्वात् षत्वानापत्तिरिति तदर्थं कुरिति वर्गग्रहणं कृतमिति भावः ।

आदेशप्रत्यययोः । व्याख्यानादिति । प्रत्ययस्येत्यनुवृत्तिं कृत्वा लोपे

प्रत्ययलक्षणमित्येव सिद्धे प्रत्ययलोपे प्रत्ययलक्षणमिति करणात् प्रत्ययावयवे प्रत्ययत्वं स्वीक्रियत इति व्याख्यानादित्यर्थः । उक्तञ्च शेखरे प्रत्ययलोप इति सूत्रे इदमेव प्रत्ययग्रहणं ज्ञापकमवयवेऽपि प्रत्ययत्वव्यवहारस्येति । तत्र लिङ्गमप्याह सातेरिति । 'विभाषा साति कार्त्स्न्ये' । च्विविषये सातिर्वा स्यात् साकल्ये । सात्पदाद्योरिति पदादेः सातेः सस्य षत्वं निषिध्यते । अग्निसाद्भवति । यदि प्रत्ययावयवस्य प्रत्ययत्वेन व्यवहारो न स्यात्तर्हि सातेः सकारस्य प्रत्ययत्वाभावेन षत्वस्य प्राप्तेरेवाभावेन तन्निषेधो व्यर्थः स्यादिति भावः । विवृताघोषस्येति । सवर्णसंज्ञायां केवलाभ्यन्तरप्रयत्नस्योपयोगेऽपि आन्तरतम्य-परीक्षायामाभ्यन्तरबाह्यप्रयत्नयोरुभयोरप्युपयोग इति भावः । इण्कोः किम् ? रामस्य । टाङसीति सूत्रे इनात्स्या इति सकारोच्चारणसामर्थ्यादेव षत्वस्य वारयितुं शक्यत्वात् कथमिण्कोरित्यस्य रामस्येति प्रयोजनं भवतीत्यत आह तात्पर्यग्राहकमिति । अन्यथा रामस्येत्यत्रेव तुल्ययुक्त्या अमुष्येत्यत्र षत्वानापत्तिः ।

सर्वादीनि। तद्गुणसंविज्ञानो बहुव्रीहिः। आदिशब्दोऽवयववाची। तेन सर्वशब्दघटित उद्भूतावयवभेदः समूहः समासार्थ इति बहुवचनम् । 'उद्भूतावयवभेद' इत्यस्य - आरोपितावयवगतसङ्ख्य इत्यर्थः। तत्र वैयर्थ्यादप्रवृत्तावपि अवयवेषु प्रवर्त्तमाना अविशेषात्सर्वशब्देऽपि भवति। 'सर्वनामानी'त्यत्र 'पूर्वपदा'दिति णत्वमत एव निपातनान्न, नाप्राप्ते णत्वे कृतस्य निपातनस्य तद्बाधकत्वात् णत्वसहितमसाधु इति स्पष्टं भाष्ये । 'प्रयोजनं सर्वनामाव्ययसञ्ज्ञाया'मिति वार्त्तिकात् शब्दरूपविशेष्यमादाय ज्ञापकात्तदन्तविधिरित्याह- द्वन्द्वे चेतीति। प्रथमार्थे सप्तमी । द्वन्द्वः सर्वनामसञ्ज्ञो नेति तदर्थः । न हि तदन्तविधिं विना समुदाये सञ्ज्ञाप्रवृत्तिरस्ति , या निषिद्ध्येतेति भावः ।

<u>भावबोधिनी :</u> सर्वादीनि सर्वनामानि । सर्वादीनीति । तद्गुणेति । अदस्सर्वेषामिति निर्देशोऽत्र मानम् । तस्य = अन्यपदार्थस्य, गुणानाम् = विशेषणानाम्, संविज्ञानं विशेष्यान्वय्यन्वयित्वं यस्मिन्निति विग्रहः । यच्छब्दो बहुव्रीहिपरः । सप्तम्यर्थो वाच्यत्वम्। तस्य संविज्ञानपदार्थैकदेशे विशेष्येऽन्वयः । अथवा तद्गुणानामित्यत्र तच्छब्दार्थे वाऽन्वयः। आद्ये यद्विशेषणान्वय्यन्वयित्वं तद्गुणानामिति बोधः । द्वितीये यद्वाच्यविशेषणानां विशेष्यान्वय्यन्वयित्वमिति बोधः । समासवाक्यात् तद्गुणान्वय्यन्वयविशेष्यबोधक इति एवं विशेष्यान्वय्यन्वयविशेषणबोधकपदघटितत्वं तद्गुणसंविज्ञानमिति फलितमिति बोध्यम् । संयोगसमवाय्यन्यतरसम्बन्धेन सम्बन्धो यत्रान्यपदार्थः तत्र प्रायेणायम् । प्रायेणेत्युक्तौ लम्बकर्णं भोजयेत्यादौ न व्यभिचारः । अतद्गुणसंविज्ञानबहुव्रीहौ

आदिशब्दस्य पूर्ववृत्तिरर्थः इदानीं कोऽर्थ इत्यत आह आदीति । तेनेति । उक्तबहुव्रीहिबलादादिशब्दस्यावयववाचित्वेनेत्यर्थः । अयञ्च सर्वशब्दघटित इत्यत्रोपयुज्यते । नन्वन्वयपदार्थस्य समूहस्यैकत्वेन कथं सर्वादीनीति बहुवचनमित्यत आह उद्भूतेति । भिद्यते अनेनेति भेदः । भेदकधर्मः संख्यैव । उद्भूत इत्यस्यारोपित इत्यर्थः । प्रवर्तमानेति । आनर्थक्यात्तदङ्गेष्विति न्यायादिति भावः । अविशेषात् = विश्वादिवदनवयवत्वाविशेषात् । अत्रेदं बोध्यम् । समुदाये फलाभावादवयवे प्रवर्तमाना संज्ञा सर्वादिष्वेव प्रवर्तते न तु तदवयवसकारादिषु । सर्वादीनामेव समुदायावयवत्वेन ऋषितात्पर्यविषयत्वात् । तात्पर्योन्नायकश्च अदस्सर्वेषामित्यादिनिर्देशः । णत्वमिति । नन्विदं णत्वापादनमयुक्तम् । तत्र हि तदापादनं युज्यते यत्र णत्वघटिते शब्दे संज्ञात्वावगमः । यथा अन्वयव्यतिरेकाभ्यां रघुनाथनारायणशब्दाविति चेन्न । रघुनाथसंज्ञादीनामस्याश्च इदानींतन ऋषिकर्तृकत्वेन स्वशास्त्रानुसारिणत्वघटितशब्दस्यैव संज्ञात्वे करणीये तद्विरुद्धसंज्ञाकरणस्यायुक्तत्वमिति तात्पर्यात् । समाधत्ते नाप्राप्त इति । अवश्यप्राप्त इत्यर्थः । निपातनस्य = अन्यादृशप्रयोगेऽन्यादृशप्रयोगस्य । ननु सूत्रे निपातनस्य बोधकत्वेऽपि लोके मूलकारादिप्रयोगेषु कुतो णत्वं न दृश्यत इत्यत आह णत्वसहितमिति । सर्वत्राप्यस्य निपातनस्य णत्वबाधकत्वाङ्गीकारादिति भावः । शब्दस्वरूपं विशेष्यमिति । सर्वाद्यवयवकसमुदायघटकान्तानि शब्दस्वरूपाणि सर्वनामानीति सूत्रार्थो बोध्यः । ननु द्वन्द्वे चेति सूत्रं समुदायनिषेधकं न त्ववयवनिषेधकं फलाभावात् । त्यदादीनां द्वन्द्व एव नास्ति, एकशेषेण बाधात् ततः प्राचीनास्त्वदन्ताः । न च दक्षिणोत्तरपूर्वाः, वर्णाश्रमेतरा इत्यादौ अवयवस्य सर्वनामसंज्ञानिषेधे अकजभावः फलमिति भावः । अकजभावेऽपि समानरूपप्रयोजकप्रत्ययस्य दुर्वारत्वात् । न च दक्षिणा च पूर्वा च उत्तरा चेत्यत्र सर्वनाम्नो वृत्तिमात्रे इति पुँवद्भावाभावः फलमिति वाच्यम् । मात्रग्रहणं यदा कदाचित् सर्वनाम्नः पुँवद्भावार्थमित्युक्तत्वेन तस्य दुर्वारत्वात् । अत एव दक्षिणोत्तरपूर्वायै इत्यत्र पुँवद्भावः । न च सर्वनाम्नः स्मै इत्यादीनामङ्गाधिकारत्वेन सर्वनामान्तादङ्गात् परेषां स्मायादीनीत्यर्थः । उक्तस्थले तु समुदायनिषेधे एते भवन्ति, अवयवनिषेधे तु नेति तदभावः फलमिति वाच्यम् । अदन्तादङ्गात् परस्य सर्वनाम्नो विहितस्य इत्यर्थाङ्गीकारादेव पक्षद्वयेऽपि तदभावसिद्धिः । न चोक्तोदाहरणेष्वनाङ्गतसिलादयः अवयवनिषेधे न भवन्ति । समुदायनिषेधे तु अवयवसर्वनामत्वाविघातेन त्रल्तसिलादयः प्राप्नुवन्तीति वाच्यम् । सर्वनामप्रकृतिकसुबन्तात् त्रल्तसिलादयो भवन्तीत्यर्थेनैव तदभावसिद्धेः । तस्मादवयवसंज्ञानिषेधे फलाभावात् समुदायसंज्ञानिषेधपरतया व्याचष्टे प्रथमार्थे सप्तमीति ।

एवञ्च ज्ञापकत्वमुपपन्नमिति भावः । नन्विदं न ज्ञापकम् इश्च इतरौ च ईतराः, तेषामीतराणाम् । एकादेशस्य परादिवद्भावेन इतरशब्दत्वात् द्वन्द्वाच्च, गणपाठप्राप्त-संज्ञावारणेन चरितार्थत्वादिति चेन्न । अन्तरङ्गसंज्ञां प्रति एकदेशशास्त्रस्यासिद्ध्या तदप्रवृत्तिबुद्धौ ईतरशब्दे इतरबुद्ध्यभावेन संज्ञाप्राप्त्यभावादिति भावः ।

बालबोधिनी : सर्वादीनि । तद्गुणसंविज्ञान इति । हलि सर्वेषामिति निर्देशादिति भावः । तस्य = अन्यपदार्थस्य गुणाः = विशेषणानि कार्ये संविज्ञायन्ते यत्र स तद्गुणसंविज्ञानो बहुव्रीहिः । संविज्ञानमिति संविपूर्वकज्ञाधातोः कर्मणि ल्युट् । वर्तिपदार्थानाम् = समस्यमानपदार्थानामन्यपदार्थान्वय्यन्वयित्वेन संविज्ञानं यत्र स तद्गुणसंविज्ञान-बहुव्रीहिरित्यर्थः । यत्र संयोगसमवायान्यतरसम्बन्धेन सम्बन्ध्यन्यपदार्थस्तत्र तद्गुण इति भावः । यथा लम्बकर्णं कुसूलपादं प्रोन्नतघोणं बृहन्नितम्बं स्थूलौष्ठमानयेत्यत्र लम्बौ कर्णौ यस्येत्यादिबहुव्रीहौ वृत्तिघटकसमस्यमानलम्बपदकर्णादिपदार्थानामन्यपदार्थान्वयि - आनयनक्रियान्वयित्वेन तद्गुणसंविज्ञानत्वम् । अत्र कर्णपदार्थस्यान्यपदार्थे समवाय-सम्बन्धेनान्वयोऽस्ति । नागयज्ञोपवीतमानायेत्यत्र यज्ञोपवीतस्य संयोगसम्बन्धेनान्यपदार्थे पुरुषेऽन्वयः । नागयज्ञोपवीती भोज्यतामित्यादौ यज्ञोपवीतस्य कार्यित्वाभावेऽपि तत्सन्निहितत्वमस्त्येवेति तद्गुणत्वमेवेति हरिग्रन्थे स्पष्टम् । एतेषु विशेषधर्मविशिष्ट-बोधकशब्देनोपादानसामर्थ्याद्विशेषस्य क्रियायामन्यपदार्थान्वयवेलायां सन्निधिमात्रे तद्गुणत्वव्यवहार इति भावः । 'व्यालयज्ञोपवीताश्च केचित्तत्र महासुराः' इत्यादयः हरिवंशीयादिप्रयोगास्तत्र मानम् ।

संयोगसमवायान्यतरसम्बन्धेन सम्बन्धी यत्रान्यपदार्थो न भवति तत्रातद्गुणत्वम् । यथा चित्रगुमानयेत्यादि । समासघटकपदार्थानामन्यपदार्थान्वयिना साकमन्वये तद्गुणसंविज्ञानः । तदभावेऽतद्गुणसंविज्ञान इति भेदः । तद्गुणसंविज्ञाने तद्विशिष्टस्येत-रान्वयः । अन्यत्र तदुपलक्षितस्येत्यपि भेदो बोध्यः । तथा हि -

येन सम्बन्धेन सम्बन्धी अन्यपदार्थः स सम्बन्धः शाब्दबोधकाले यदि भवेत्तदा तद्विशेषणं विशेषणमित्युच्यते । यदा तु सम्बन्धिनोस्सम्बन्धः शाब्दबोधकाले न भवेत्तदा तद्विशेषणमुपलक्षणमित्युच्यते । यथा लम्बकर्णमानयेत्यादिकमाद्यस्योदाहरणम् । दृष्टसागरमानयेत्यादौ सागरदर्शनस्यातीतत्वेन शाब्दबोधकालेऽन्यपदार्थस्य पुँसः वर्तमानकालिकदर्शनाश्रयत्वस्याभावेन कर्तृत्वसम्बन्धेन दर्शनविशिष्टत्वाभावस्य भूते क्तप्रत्ययेन बोधनादतद्गुणत्वम् । सर्वादिसूत्रे कैयटेन "तस्य = अन्यपदार्थस्य गुणाः =

उपलक्षणानि तेषामपि कार्ये संविज्ञानं तद्गुणसंविज्ञानम् । तत्र चित्रगुरानीयतामिति स्वस्वामिभावसम्बन्धः षष्ठ्यर्थ इति स्वविशेषोपलक्षितस्य स्वामिन एवानयनं न गवाम् । दण्डी विषाणी चानीयतामित्यत्र तु संयोगसमवायलक्षणेन सम्बन्धेन सम्बन्धिनि कार्ये विज्ञायमाने उपलक्षणस्याप्यन्तर्भावो भवति । इहाप्यादिशब्दस्यावयववाचित्वादुद्भूतावयव-भेदसमुदायः समासार्थः । तस्य च समुदायस्य युगपल्लक्ष्ये प्रयोगाभावात् तदन्तर्भूतानामेव पृथक्प्रयोगत्वात् कार्यार्थया संज्ञया प्रवर्तितव्यमिति सर्वशब्दस्यापि सा सिध्यती''ति व्याख्यातम् । तत्रैवोद्योते नागेशभट्टेन 'उपलक्षणानीति । प्रकारतयाऽन्वयीनीत्यर्थः । कार्ये संविज्ञानमिति । तच्च द्वेधा । क्वचिद्विशिष्टस्य क्रियायां संनिधानमात्रेण । यथा क्रियायोगाभावेऽपि शुक्लवाससं भोजयेति । क्वचित्तु विशेषणस्यापि क्रियायोगेन । यथा शुक्लवाससं पश्येति । कार्यं यत्र तद्भावभावि तत्र तद्गुणत्वमित्यर्थः फलति । एवं तद्गुणसंविज्ञाने तद्विशिष्टस्येतरान्वयः, अन्यत्र तदुपलक्षितस्येत्यपि भेदः । अयं शब्दशक्तिस्वभावगम्योऽन्तर्भावः । कार्यित्वं कार्यसंनिहितत्वं वा । एवञ्च यत्र संयोगसमवायान्यतरसम्बन्धेन सम्बन्ध्यन्यपदार्थस्तत्र तद्गुणः । अन्यत्रातद्गुण इत्युत्सर्ग इति गोलार्थ'' इति स्पष्टीकृतम् ।

सर्वादीनित्यस्य तद्गुणसंविज्ञानत्वं विवृणोति । आदीति । तस्यावयववाचित्वेन समवायसम्बन्धेन सम्बन्धी अन्यपदार्थ इति तद्गुणसंविज्ञानत्वम् ।

तेन = आदिशब्दस्यावयववाचित्वाङ्गीकारेण साकं सर्वादीनीत्यस्य तद्गुण-संविज्ञानबहुव्रीहित्वाङ्गीकारेण । अन्यपदार्थस्य समुदायस्यैकत्वेन सर्वादीनीति कथं बहुवचनोपपत्तिरत आह उद्भूतेति । उद्भूतः = आरोपितः, भेदः = भिद्यतेऽनेनेति भेदः = भेदकधर्मः = अवयवगतसंख्या यत्रेति बहुव्रीहिः । तत्र = समुदाये । युगपल्लक्ष्ये प्रयोगाभावात् आनर्थक्यात् तदङ्गेष्विति न्यायेनाह प्रवर्तमानेति । अविशेषादिति । विश्वादिवत् सर्वस्यापि तदवयवत्वादित्यर्थः ।

सर्वनामनीत्यत्र णत्वाभावमुपपादयति सर्वनामानीत्यत्रेति । अत एव = अस्मादेव । निपातनान्नेति । लोकेऽपीति शेषः । तदन्तविधिरिति । द्वन्द्वे चेति ज्ञापकस्य तदन्तविधि-प्रयोजकस्य सत्वात् शब्दस्वरूपं विशेष्यमध्याहृत्य तदन्तविधिरिति भावः । अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयाविति वचनेनावयवनिषेधकत्वाभावे सिद्धे द्वन्द्वे चेत्यनेन समुदायनिषेध आश्रयणीय इति तदर्थमाह प्रथमार्थे सप्तमीति।

ननु तदन्तस्यापि सर्वनामत्वे - 'सर्वनाम्नः स्मै' इत्यादिषु सर्वनाम्नो विहितस्य ङेः स्मै इत्यर्थाश्रयणेनातिसर्वादौ दोषाभावादुपसर्जनप्रतिषेधो न कार्य इति भाष्यसूचितं विरुद्ध्येतेति चेन्न 'प्रयोजनं सर्वनामाव्ययसञ्ज्ञाया'मिति तदन्तविधिसूत्रस्थ-वार्तिकभाष्यविरोधेनास्य भाष्यस्यैकदेश्युक्तित्वात् । इत एव वाऽरुचेर्भाष्ये पक्षान्तरोपादानम्। न च ऋष्युक्तपक्षेषु नारुचिरिति भ्रमितव्यं, वृद्धिसञ्ज्ञासूत्रे 'अपरितुष्यन्खल्वपि भवाननाकृतिर्लिङ्गेन वेत्याहे'ति वार्तिककारं प्रति भाष्योक्तेः। अकच्चेति। कुत्सिते इतिसूत्रोक्तभाष्यरीत्या सङ्ख्याकारकाभ्यां पूर्णार्थस्येतरान्वयेन सुबन्तादेव तद्धितोत्पत्तेः, प्रत्यासत्या सर्वनामप्रकृतिकसुबन्तात्तदर्थगतकुत्साविवक्षायां सर्वनामावयवटेः प्रागकजित्यर्थात्तदन्तसञ्ज्ञाऽभावे तदसिद्धिरिति भावः । एवमेव त्रलाद्यसिद्धिर्बोद्ध्या। एतेनावयवनिष्ठसर्वनामत्वेन तत्सिद्धिरित्यपास्तम् ।

<u>भावबोधिनी :</u> अस्य भाष्यस्येति । उपसर्जनप्रतिषेधो न कार्य इत्यस्य भाष्यस्यैवेत्यर्थः । विहितविशेषणन्तु अन्यार्थमावश्यकमेवेत्यर्थः । इदञ्चोपलक्षणम् । एतत्सजातीयस्याप्येकदेश्युक्तित्वं बोध्यम् । तथा हि – संज्ञोपसर्जनेति वार्तिकप्रत्याख्यानमुपक्रम्यार्थद्वारकं विभक्तिविशेषणमाश्रित्यापि प्रसङ्ग उद्धृतः । तदन्तविधौ सति तु अतिसर्वादौ विशिष्टस्य सर्वनामत्वेन ङे इत्यादीनां तदर्थगतसंख्याभिधायित्वेन पुनस्तद्दोषतादवस्थ्यमिति । इदञ्च कौस्तुभे स्पष्टम् । इत एव = तदन्तविधेरिष्टत्वादेव । पक्षान्तरमिति । अन्वर्थसंज्ञापक्ष इत्यर्थः । वृद्धिसूत्रे संज्ञासंज्ञिभावनिश्चयावसरे उक्तम् अनाकृतिस्संज्ञा बहुत्वशून्या संज्ञेत्यर्थः । लिङ्गेन वा संज्ञात्वनिश्चय इति । पूर्णार्थस्येति । अन्वितार्थस्येत्यर्थः । सुबन्तात्तदर्थेति । सर्वनामप्रकृतिकसुबन्तार्थगतकुत्साविवक्षायामिति ग्रन्थस्साधुः । यथाश्रुते तु पञ्चमी अनन्वितेति बोध्यम् । तदसिद्धिरिति । अकजसिद्धिरित्यर्थः । एवमेव त्रलादिसिद्धिरिति। त्रलाद्यविधायकसूत्रस्याप्येवमेवार्थ इति भावः । आदिना स्मायादिसंग्रहः । न चाकजादिविधौ प्रातिपदिकाधिकारात् तस्य च सर्वनाम्ना विशेषणे सर्वनामान्तप्रातिपदिकप्रकृतिकेत्यर्थात् परमसर्वादिशब्देषु अकजादिसिद्ध्या तदन्तसंज्ञाफलत्वं तेषां नास्तीति वाच्यम् । समासप्रत्ययविधाविति तदन्तग्रहणनिषेधात् वर्णाश्रमशब्दे दोषाच्च । ननु सर्वनाम्नः स्मै इत्यादीनामङ्गाधिकारस्थत्वेन सर्वनामान्तादङ्गात् परस्य विहितस्य वेत्यर्थात् परमसर्वादिशब्देषु तत्सिद्ध्या तदन्तसंज्ञाफलत्वं तेषां नास्तीति वाच्यम् । वर्णाश्रमेतरसमासपूर्वादिशब्देषु

स्मायादिवारणायावर्णान्तादङ्गात्परस्य सर्वनाम्नो विहितस्येत्यर्थस्यावश्यकत्वेन तदन्तसंज्ञाभावे उक्तस्थले तेषामसिद्धेः । न चैवं स्मायादीनामपि तत्फलत्वे मूले त्रलादिपर्यन्तानुधावनं निर्बीजमिति वाच्यम् । सूत्रपाठे तेषामेव प्राथमिकत्वेनादौ तदुपस्थितेः । अत एव कौस्तुभे त्रलादय एव फलत्वेनोक्ता इत्याहुः ।

परे तु सर्वनाम्नः स्मै, ङसि 'ङ्योरिति सूत्रद्वयेऽपि न विहितविशेषणं किन्तु अङ्गाधिकारस्थत्वेन अवर्णान्तसर्वनामान्तादङ्गात् परस्य ङेरिति क्रमेणार्थः वर्णाश्रमेतर–अतिसर्वमासपूर्वादिशब्देषु नातिव्याप्तिः आद्ययोरुपसर्जनत्वात् मासपूर्वस्त्ववतिष्ठते । तत्र च समासग्रहणेऽनुवर्तमाने पुनस्समासग्रहणेन विग्रहवाक्ये समासे वा सर्वत्र सर्वनामसंज्ञानिषेधः स्वीक्रियते । ततश्च न दोषः । एवञ्च परमसर्वस्मै, परमसर्वस्मात् परमसर्वस्मिन् इति सिद्ध्या तदन्तसंज्ञायाः फलं परमसर्वे, परमसर्वेष्विति बहुवचनान्तमेव । अत एव तत्त्वबोधिन्यामङ्गाधिकारे तदन्तविधिनैव परमसर्वस्मै इत्यादिसिद्धेः किं फलमित्यत आहेत्यवतारिका परमसर्वत्रेति ग्रन्थस्य दत्तेति वदन्ति । वस्तुतस्तु मासपूर्वेति समासे पूर्वशब्दस्य सर्वनामत्वं सर्वग्रन्थकृत्सम्मतमिति तत्र समासादिवारणाय तत्रापि विहितविशेषणस्यावश्यकतया तदन्तसंज्ञाफलत्वं तेषामपीति बोध्यम् । तत्त्वबोधिनी त्वयुक्तैव । एतेनेति । सर्वनामप्रकृतिकेत्यर्थेनेत्यर्थः ।

बालबोधिनी : भाष्यसूचितमिति अङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीति सर्वादसूत्रस्थभाष्येणेत्यर्थः । अस्य भाष्यस्य = अथवाङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीति भाष्यस्य । येन विधिस्तदन्तस्येति सूत्रे भाष्ये कानि पुनरस्य योगस्य प्रयोजनानीति निरूपणप्रकरणे 'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति वार्तिककृतोक्तम्। यथा विश्वे परमविश्वे, उच्चैः परमोच्चैः, नीचैः परमनीचैरिति । तत्रोद्योते 'एतद्वार्त्तिकमूलादूव्याख्यानादव्यावर्तकमपि शब्दरूपं विशेष्यमादाय तदन्तविधिरिति भाव' इति नागेशभट्टः । तदन्तस्यापि सर्वनामत्वे 'अथवाऽङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवती'ति भाष्येण सूचितमुपसर्जनप्रतिषेधो न कार्य इति विरुद्ध्येतेति ग्रन्थसमन्वयः । अङ्गाधिकारे इत्यादिना विहितविशेषणत्वलाभात् अतिसर्वादौ गृह्यमाणाद्विहितत्वाभावेन तत्र सर्वनामसंज्ञाप्रयुक्तकार्यस्य प्राप्त्यभावेनोपसर्जनस्य सर्वनामसंज्ञाप्रतिषेधो न कार्य इति पूर्वपक्षिग्रन्थार्थः । समाधत्ते प्रयोजनमिति । तदन्तिविधेः सर्वनामसंज्ञायां प्रयोजननिरूपणपरभाष्यविरोधेनाङ्गाधिकारे इति भाष्यस्यैकदेश्युक्तित्वं सिद्धम्। अन्यथा परमविश्वे इत्यादौ गृह्यमाणाद्विहितत्वाभावेन सर्वादिगणकार्याप्रवृत्तौ तदन्तविधिप्रयोजनप्रतिपादनमसङ्गतं स्यादिति भावः। विरुद्धविभक्तित्वेऽपि अतो भिस

इत्यादवन्वयस्य अङ्गस्येति सूत्रे भाष्ये प्रतिपादितत्वेनाङ्गस्येत्यनेनान्वयासम्भवमूलकस्याङ्गाधिकारे इति भाष्यस्यैकदेश्युक्तित्वं न्याय्यमिति बोध्यम् ।

उक्तभाष्यवचनस्यैकदेश्युक्तित्वं भगवता भाष्यकृतैव सूचितमित्याह इत एवेति । अङ्गाधिकारे इति वचनेन विहितविशेषणत्वमाश्रित्य अतिसर्वादौ दोषवारणेनोपसर्जनप्रतिषेध प्रत्याख्यानेऽपि तदन्तविधिसूत्रस्थभाष्यप्रामाण्येन परमसर्वत्रेत्यादिलक्ष्यानुरोधेन चात्र सूत्रे तदन्तविधेरावश्यकतयाऽतिसर्वायेत्यादौ दोषो दुर्वार एवेत्यरुचेः 'अथवा महतीयं संज्ञा क्रियते' इति पक्षान्तरमुपात्तमिति भावः । ननु पक्षद्वयस्यापि ऋष्युक्तत्वेनैकत्रारुचिकल्पनमयुक्तमित्यत आह न चेति । वृद्धिसंज्ञासूत्रे इति । तत्र भाष्ये 'यत्तावदुच्यते संज्ञाधिकारः कर्तव्यः संज्ञासम्प्रत्ययार्थ इति । न कर्तव्यः । आचार्याचारात् = व्यवहरात् संज्ञासिद्धिर्भविष्यती'त्युक्त्वा तदुत्तरम्' 'अथवाऽनाकृतिस्संज्ञा । आकृतिमन्तः संज्ञिनः । लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते' इति पक्षान्तरमुपस्थापितम्। ततः 'इदं तावदयुक्तं यदुच्यते आचार्याचारादिति । किमत्रायुक्तम् ? तमेव = सूत्रकारमेवोपालभ्य अगमकं ते सूत्रमिति तस्यैव पुनः प्रमाणीकरणमित्येतदयुक्तम् । अपरितुष्यन् खल्वपि भवाननेन परिहारेण अनाकृतिर्लिङ्गेन वेत्याह' इत्युक्तम् । अपरितुष्यन् खल्वपीत्यादि वार्त्तिककारं प्रति भाष्यकृतो वचनम् । यो हि सूत्रकारमुपालभते अगमकं ते सूत्रमिति स कथं सूत्रकारकृतसूत्रीयवृत्तिकारान् प्रामाण्येनाश्रयतीत्यर्थः । अनाकृतिर्लिङ्गेन वेति परिहारान्तरं ब्रुवता भाष्यकारेणाचार्याचारो न प्रमाणत्वेनाश्रित इति अपरितुष्यन्नित्यस्यार्थः । एवञ्च ऋष्युक्तपक्षेषु क्वचिदरुचिर्भवत्येवेति भावः ।

कुत्सित इति सूत्रोक्तभाष्येति ।

स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम् ।
समवेतस्य च वचने लिङ्गं वचनं विभक्तिश्च ॥

अभिधाय तान् विशेषानपेक्षमाणश्च कृत्स्नमात्मानम् ।
प्रियकुत्सनादिषु पुनः प्रवर्ततेऽसौ विभक्त्यन्तः ॥

इति हि तत्रत्यं भाष्यम् । पूर्णार्थस्य = पूर्णो योऽर्थस्तस्य । अन्वयेनेति सुबन्तादुत्पत्तौ हेतुः। सुबन्तादिति । सुबन्तं सम्पाद्येति ल्यब्लोपे पञ्चमी । तद्धितोत्पत्तेरिति । कर्तव्यत्वादिति शेषः । तदसिद्धिः = अकजसिद्धिः । त्रलाद्यसिद्धिरिति । तदन्तसंज्ञाभावे परमसर्वत्रेत्यादावित्यर्थः । एतेन = अकजादिविधायकसूत्रस्य सर्वनामप्रकृतिकसुबन्तार्थगतकुत्साविवक्षायां सर्वनामावयवटेरित्यादिरीत्यार्थाश्रयणेन ।

जसः शी । दीर्घोच्चारणमुत्तरार्थं 'वारिणी' इति । अदन्तादिति- परस्येत्यनेनान्वेति। अत इत्यस्याङ्गविशेषणतया अदन्तादङ्गादित्यर्थः । 'सर्वनाम्न' इति तु विहितविशेषणं, तस्य तु नाङ्गं विशेष्यम्, आवृत्तौ मानाभावात् । तेन 'वर्णाश्रमेतराः' 'मासपूर्वा' इत्यत्र न । अत एव 'विभाषा जसी'ति चरितार्थम् । 'अङ्गसञ्ज्ञानिमित्तस्यादन्तात् सर्वनाम्नो विहित-स्ये'त्यर्थस्तु न, 'ते' 'तेषा'मित्याद्यसिद्धेः । अत्वविधौ विषयसप्तमी तु न, तस्मिन्निति परिभाषा-बाधे मानाभावात्। प्रागित्सञ्ज्ञाया इति । प्रत्ययादित्वज्ञानाभावात्तज्ज्ञानाभाव इति भावः।

<u>**भावबोधिनी :**</u> तेनेति । विहितविशेषणदानेनेत्यर्थः । परत्वविशेषणे तूक्तस्थले अवयवस्य सर्वनामत्वेन दोषः स्यादिति भावः । अत एव = विहतविशेषणादेव । परत्वविशेषणे तु वर्णाश्रमेतरेति समुदायस्य संज्ञाभावपक्षेऽपि अवयवनित्य-सर्वनामत्वमादाय शीभावापत्त्या विभाषा जसीति व्यर्थमेव स्यादिति भावः। दीर्घोच्चारणमुत्तरार्थमिति । नपुँसकाच्चेति सूत्रे अनुवृत्त्यर्थमित्यर्थः । इदञ्चोपलक्षणम् । विषयसप्तमीविवक्षणे विषयत्वञ्च भावितदुच्चारणसत्ताकत्वम्, लुकानपहृतत्वं वेति वक्तव्यम्। ततश्च तदित्यादौ विभक्तौ विवक्षितायामत्वे ततो लुकं बाधित्वाऽमादेशे तमिति रूपापत्तेः। निरुक्तविषयत्वस्य सत्वात् । एतेन लक्ष्यसिद्धेः सत्वेन परिभाषाविरोध इत्युक्तिर-सङ्गतेत्यपास्तमिति केचित् । अन्ये त्वस्माकं लक्षणैकचक्षुष्कत्वेन लक्ष्यासिद्ध्यपेक्षया सूत्रबाधकल्पनस्यैवातिदुस्सहत्वेन विषयसप्तमीस्वीकारे परिभाषाविरोध इत्युक्तिः नासङ्गतेत्याहुः । एतत्सूत्रोदाहरणेष्वदन्तत्वस्यैव विद्यमानत्वेन ह्रस्वेऽपि आद्गुणेति गुणे रूपसिद्धेः ।

नन्वत्र ह्रस्वोच्चारणे सर्वेच्छत्रमित्यत्र ह्रस्वत्वप्रयुक्ततुगागमे कर्तव्ये षत्वतुकोरसिद्ध इति सूत्रेणैकादेशविधायकाद्गुण इत्यस्यासिद्धत्वेन सर्व ई छत्रमिति स्थिते छे चेति तुक् स्यात् । दीर्घोच्चारणे तूक्तसूत्रेणैव गुणस्यासिद्धत्वेऽपि ह्रस्वत्वाभावात् तुक् न भवतीति बोधनार्थमस्मिन् सूत्रे दीर्घोच्चारणमावश्यकमिति चेन्न। षत्वतुकोरित्यनेन पदान्तपदादिस्थानिकैकादेशविधायकशास्त्रस्यैवासिद्धत्वबोधनेन प्रकृते एकादेशस्या-तथात्वात् षत्वतुकोरिति सूत्राप्रवृत्त्या ह्रस्वाभावात् तुकोऽप्रवृत्तेः न च ह्रस्वोच्चारणे चिकीर्षामीत्याद्यर्थमङ्गीकृतेन स्थानिभूतादचः पूर्ववृत्तिधर्मावच्छिन्नोद्देश्यकार्ये कर्तव्ये स्थानिवद्भावेन प्रकृते स्थानिभूतोऽच् इकारः तत्पूर्वोऽकारः तद्वृत्तिर्यो धर्मः ह्रस्वत्वरूपो धर्मः तत्प्रयोज्ये तुकि कर्तव्ये स्थानिवद्भावेन तुक् स्यादिति वाच्यम् । तुकः पदचरमावयवत्वेन न पदान्तेति निषेधात् ।

ननु पदे परतो योऽन्त्यः तस्मिन् कर्तव्ये प्रत्यासत्त्या परपदस्थाजादेश एव न स्थानिवदित्युक्तेः। प्रकृते गुणस्यातथात्वात् स्थानिवत्त्वं स्यादेव। ततश्च ह्रस्वप्रयुक्ततुक् स्यात्। तद्वारणाय दीर्घोच्चारणमत्र सूत्रे आवश्यकमिति चेन्न। स्पष्टमुच्चारणं तत्र भवतीत्युक्तत्वात्। तज्ज्ञानाभाव इति। अनुबन्धत्वज्ञानाभाव इत्यर्थः।

बालबोधिनी : जसः शी। ननु जसः शिरेव ह्रस्वो विधीयताम्। सर्वे इत्यादौ आद्गुणेनेष्टसिद्धेः दीर्घोच्चारणं व्यर्थमित्यत आह दीर्घेति। उत्तरार्थमिति। नपुंसकाच्चेति उत्तरसूत्रेऽनुवृत्त्यर्थम्। अन्यथा तत्र शिपदस्यैवानुवृत्त्या वारिणी इति रूपासिद्धिरिति भावः। अदन्तादिति तदन्तविधिलाभप्रकारमाह अङ्गविशेषणतयेति। तस्य = सर्वनाम्न इत्यस्य। आवृत्तौ = अङ्गस्यावृत्तौ। तस्य फलमाह तेनेति सर्वनाम्नोऽङ्गविशेषणत्वाभावेन सर्वनामान्तादङ्गादित्यर्थालाभेन सर्वनाम्नो विहितविशेषणत्वेन चेत्यर्थः। द्वन्द्वे चेत्यादिभिः समुदायस्य सर्वनामसंज्ञानिषेधेन ततो विहितस्य सर्वनाम्नो विहितत्वं नेति भावः। विहितपदाध्याहारे सूत्रकारसम्मतिमाह अत एवेति। सर्वनाम्नो विहितविशेषणत्वादेवेत्यर्थः। विभाषा जसीति। द्वन्द्वे चेति या संज्ञा निषिद्ध्यते स च निषेधो जसाधारे कार्ये कर्तव्ये विकल्पेन भवति। अर्थात् विकल्पेन सर्वनामसंज्ञेत्यर्थः। चरितार्थमिति। अन्यथा = विहितविशेषणाभावे विभाषा जसीति सूत्रेण समुदायस्यैव सर्वनामसंज्ञाविकल्पविधानात् तदभावपक्षेऽपि सर्वादिसूत्रेणावयवस्य सर्वनामतया ततः परत्वेन शीभावस्य दुर्वारतया विकल्पविधानं व्यर्थं स्यादिति भावः।

नन्वङ्गस्येत्यस्य सामानाधिकरण्यानुरोधेन पञ्चम्यन्ततया कल्पनेन अत इत्यस्य तद्विशेषणतया अदन्तादङ्गात्परस्य सर्वनाम्नो विहितस्येति सूत्रार्थवर्णनापेक्षया लाघवात् अङ्गसंज्ञानिमित्तस्य अदन्तसर्वनाम्नो विहितस्य जसः शीति व्याख्यानेऽपि वर्णाश्रमेतरा मासापूर्वा इत्यत्र दोषाभावात् तदेव भवत्वित्यत आह अङ्गसंज्ञेति। ते तेषामिति। अदन्तसर्वनाम्नो विहितत्वाभावेन जसादीनां सर्वनामसंज्ञाप्रयुक्तकार्यं न स्यादिति लक्ष्यानुरोधात् विभक्तिव्यत्ययकल्पना अवश्यं कार्येति भावः।

ननु 'त्यदादीनामः' इति सूत्रे विभक्ताविति सप्तम्यन्तं पदमनुवर्तते। विषयत्वं सप्तम्यर्थो भवतु। तथा च विभक्तौ विषयेऽत्वं भवतीत्यर्थलाभेन विभक्त्युत्पत्तेः प्रागेव त्यदाद्यत्वप्रवृत्त्या ततो विभक्तौ तस्या अदन्तसर्वनाम्नो विहितत्वलाभेन न दोष इत्यत आह अत्वविधाविति। मानाभावादिति। शास्त्रबाधकल्पनापेक्षया उपश्लिष्टपदाध्याहारेणौपश्लेषिकसप्तम्याश्रयणमेव न्याय्यमिति भावः। अन्यथा परिभाषाया निर्विषयत्वप्रसङ्गः।

प्रागित्संज्ञाया इति । प्रत्ययादित्वेति । सर्वादेशत्वात् प्राक् प्रत्ययत्वज्ञानाभावेन तदादित्वज्ञानाभाव इत्यर्थः । तज्ज्ञानाभाव इति। प्रत्ययादित्वज्ञानाभावेन 'लशकु' इत्यस्याप्राप्त्याऽनुबन्धत्वज्ञानाभाव इत्यर्थः । तदभावे शित्वाभाव इति भावः । अयमाशयः। जसः शी अनेकाल्त्वात् सर्वादेशतया भवति । न तु शित्वात् । न च नानुबन्धकृतमनेकाल्त्वमिति परिभाषया अनुबन्धप्रयुक्तमनेकाल्त्वं नाश्रीयते । प्रकृते शीत्यत्र शकारस्यानुबन्धत्वेन तत्प्रयुक्तानेकाल्त्वस्यानाश्रयणात् शित्वादेव सर्वादेशत्वं वक्तव्यम् । अत एव 'अवर्णस्त्रसावनञः' इति सूत्रे ऋकारमितमादाय न तृ इत्यस्य सर्वादेशत्वम् । अन्यथा तस्यापि सर्वादेशत्वापत्तेरिति वाच्यम् । अवणस्तृ इत्यादाविवात्र नानुबन्धकृतमनेकाल्त्वमिति न प्रवर्तते । तथा हि - लशक्वतद्धिते इति सूत्रेण प्रत्ययाद्यानां लशकवर्गाणामिसंज्ञा विधीयते । प्रकृते शीत्यस्य स्वतः प्रत्ययत्वं नास्ति । प्रत्ययाधिकारस्थत्वाभावात् । किन्तु स्थानिवद्भावेनातिदेशात् प्रत्ययत्वं वक्तव्यम् । तच्च न सम्भवति । जसः स्थाने शीप्रवृत्त्यनन्तरमेव स्थानिवत्त्वप्रवृत्तेः । एवञ्च शीभावप्रवृत्तिकाले शकारस्य प्रत्ययादित्वाभावेनेत्संज्ञाया अप्रवृत्त्याऽनेकाल्त्वात् सर्वादेशत्वं न तु शित्वादिति भट्टोजीदीक्षितादयः ।

परे तु अनुबन्धत्वयोग्यतयाऽत्रापि तन्निषेधप्रवृत्त्या शित्त्वादेव सर्वादेशः। इत्सञ्ज्ञायोग्यशकारवत्त्वमेव तत्सूत्रे शित्त्वम् । अत एव काणोर्विषये 'नानुबन्धकृतमसारूप्य'मिति विकल्पाभावः। अन्यथा कादीनां कादेर्वाक्यार्थबोधोत्तरं प्रत्ययत्वज्ञाने इत्सञ्ज्ञादेः प्रवृत्त्या वाक्यार्थबोधरूपतत्प्रवृत्तिकालेऽनुबन्धज्ञानाभावेन विकल्पो दुर्वारः। पश्चादनुबन्धत्वज्ञानेऽपि जातनिवृत्त्ययोगात् । यदि तत्र पश्चात्तज्ज्ञाने तन्निवृत्तिस्तर्ह्यत्रापि पश्चात्तत्त्वज्ञाने सर्वादेशत्वस्यापि निवृत्त्यापत्तिः। ध्वनितञ्चेदं 'लुटः प्रथमस्य' 'अनेकाल्शि'दित्यादि सूत्रेषु भाष्ये इति प्राहुः ।

भावबोधिनी : अनुबन्धत्वयोग्यतयेत्यस्य शकारस्येत्यादिः । तन्निषेधप्रवृत्त्या = नानुबन्धकृतमनेकाल्त्वमिति निषेधप्रवृत्त्या । ननु परिभाषायामनुबन्धपदस्यानुबन्धयोग्यपरत्वेऽपि नेष्टसिद्धिरित्यत आह इत्संज्ञेति । तत्सूत्रे = अनेकाल् शिदिति सूत्रे। अत एव = नानुबन्धकृतमसारूप्यमित्यत्रापि अनुबन्धत्वयोग्यत्वस्वीकारादेव । कादेः = ककारादेः । बोधोत्तरमिति । वासरूपसूत्रेण सह महावाक्यार्थबोधोत्तरमित्यर्थः। जातनिवृत्तेरपि क्वचिदङ्गीकारादाह यदीति । पश्चात् लक्ष्य प्रवृत्त्यनन्तरम् । तज्ज्ञाने = अनुबन्धत्वज्ञाने । तन्निवृत्तिः वैकल्पिकबाधनिवृत्तिः । अत्रापि = जसः शीत्यत्रापि ।

भाष्य इति । यद्यपीदं भाष्यं नानुबन्धकृतमसारूप्यमित्यत्रानुबन्धपदस्य तद्द्योत्यपरत्वे मानम् , तथापि नानुबन्धकृतमनेकाल्त्वमिति परिभाषानुराधेनात्रापि तथैव स्वीकर्तव्यमिति भावः । अत एव योग्यपरत्वादेव ।

बालबोधिनी : भाष्याभिमतं सिद्धान्तमाह परे त्विति अनुबन्धत्वयोग्यतयेति । जसःशी आदेशे शकारस्येति शेषः । अत्रापि शी आदेशेऽपि । तन्निषेधेति । नानुबन्धकृतमनेकाल्त्वमिति निषेध इत्यर्थः । शित्वादेवेति । अनेकाल्त्वाभावादिति शेषः। तत्सूत्रे = अनेकाल्शिदिति सूत्रे । एवञ्च परिभाषायां सूत्रे च अनुबन्धयोग्यत्वमेव ग्राह्यमिति सिद्धम् । अनुबन्धपदस्य उक्तार्थकत्वस्वीकारे अन्यत् फलमाह अत एवेति । अनुबन्धयोग्यार्थकत्वमनुबन्धत्वमिति स्वीकारादेवेत्यर्थः । इतीति । प्रवृत्त्येति शेषः । अन्यथा = अनुबन्धपदस्योक्तार्थकत्वास्वीकारे । कादेः = ककारादेः । इत्संज्ञादेरित्य-नेनान्वयः । वाक्यार्थबोधोत्तरम् = वाऽसरूपसूत्रेण सह वाक्यार्थबोधोत्तरम् । तत्प्रवृत्तिकाले= वाऽसरूपन्यायप्रवृत्तिकाले । अनुबन्धज्ञानाभावेनेति । नानुबन्धकृतमसारूप्यमिति परिभाषाया अप्रवृत्त्येति शेषः । विकल्प इति । वाऽसरूपसूत्रेणेति शेषः। पश्चादिति । वासरूपन्यायेन कादीनां विकल्पेन प्रवृत्त्यनन्तरमित्यर्थः । जातनिवृत्त्ययोगादिति। भुक्तवन्तमिति न्यायविरोधादिति भावः । अयमाशयः । इकोगुणवृद्धीतिवत् वासरूपोऽस्त्रियामित्यस्य पदोपस्थापकपरिभाषात्वेनापवादप्रत्ययविधायकेषु वेतिपदमुपस्थाप्य पदैकवाक्यतया विध्युपकारिका भवति । प्रत्यय इत्यस्य तु संज्ञाशास्त्रत्वेन वाक्यैकवाक्यतया विध्युप-कारकत्वम् । तथा च वासरूपन्यायप्रवृत्तिकाले कादीनां प्रत्ययत्वज्ञानाभावेन इत्संज्ञा-लोपयोरप्रवृत्तौ असरूपत्वेन वासरूपसूत्रप्रवृत्त्या काणोर्विकल्पो दुर्वारः स्यात् । तत्प्रवृत्त्यनन्तरमनुबन्धत्वज्ञानेऽपि भुक्तवन्तमिति न्यायविरोधेन जातस्य निवृत्तिर्न भवति ।

विपक्षे बाधकमाह यदीति । तत्र = ककारादिविषये । पश्चात् = प्रवृत्त्यनन्तरम् । तज्ज्ञाने = अनुबन्धत्वज्ञाने । तन्निवृत्तिः = वासरूपन्यायस्य बाधेन कादिप्रत्ययनिवृत्तिः । अत्रापि = जसः शीत्यत्रापि । तत्त्वज्ञाने = अनुबन्धत्वज्ञाने । ध्वनिश्चेदमिति । लुटः प्रथमस्येति सूत्रे भाष्ये ''डाविकारस्य शित्करणं सर्वादेशार्थम् । शित्सर्वस्येति सर्वादेशो यथा स्यात् । अक्रियमाणे हि शकारेऽलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत'' इत्युक्तम् । अत्र कैयटः । 'डाविकार इति । डादेश इत्यर्थः । नानुबन्धकृतमनेकाल्त्वमित्यन्त्यस्य स्यादिति डाश् वक्तव्य' इत्याह । तदग्रे भाष्ये ''सिद्धमलोऽन्त्यविकारात् । सिद्धमेतत् । कथम् ? अलोऽन्त्यविकारात् । अस्त्वयमलोऽन्त्यस्य । का रूपसिद्धिः । कर्ता । डिति

टेर्लोपाल्लोपः । डिति टेर्लोपेन लोपो भविष्यति । अभत्वान्न प्राप्नोति । डित्करणसामर्थ्यात् भविष्यति'' इत्युक्तम् । भवितास् + ति इत्यादौ अलोन्त्यस्येत्यन्त्यस्य डादेशेऽपि भवितास्+त्+आ इत्यत्र आकारे डिति परे सतकारस्य आसृत् इति टिसंज्ञकस्य लोपो डित्वसामर्थ्यादङ्गसंज्ञाभसंज्ञयोरभावेऽपि भवति । चुटू इत्यादौ प्रत्ययशब्दस्य तदवयवपरत्वेन डा इत्यस्यान्त्यादेशत्वेऽपि प्रत्ययावयवादित्वेन डकारस्येत्वं सिध्यतीति भाष्यार्थः । अत्र पूर्वपक्षिणा डादेशस्य सर्वादेशत्वाय शित्वं कर्तव्यमित्युक्तम् । भाष्यकारेणान्त्यादेशत्वमभ्युपेत्य टिलोपेन समाहितम् । यदि नानुबन्धकृतमित्यत्रानुबन्धपदस्य तद्योग्यत्वार्थकत्वं न स्यात् डादेशस्यादेशतायाः प्राक् प्रत्ययत्वाभावेनेत्वाप्रवृत्तौ नानुबन्धकृतमनेकाल्त्वमिति परिभाषाया अप्रवृत्त्या अनेकाल्वेनैव सर्वादेशत्वे सिद्धे तदर्थं डाविकारः शित्कर्तव्य इति पूर्वपक्षिवचनम् , अनुबन्धयोग्यत्वमङ्गीकृत्य सिद्धमलोऽन्त्यविकारादिपूर्वपक्षिवचनप्रत्याख्यानश्चासङ्गतं स्यादिति भावः । अनेन पूर्वपक्षिसिद्धान्तिभाष्येणायमर्थो ध्वनितः ।

सिद्धान्तिभाष्ये तदर्थानङ्गीकारे डा इत्यस्यानेकाल्त्वात् अनेकालित्यस्यऽलोन्त्यसूत्रापवादतया सर्वादेशत्वे प्राप्ते अन्त्यादेशत्वकथनमसङ्गतं स्यादिति भावः । इदम् = परिभाषायामनुबन्धपदस्यानुबन्धयोग्यत्वार्थकत्वम् । अनेकाल् शिदिति । तत्र सूत्रे भाष्ये अष्टाभ्य औश्, इदम इशित्यादौ शकारोच्चारणसामर्थ्येन भूतपूर्वानेकाल्त्वमाश्रित्य सर्वादेशत्वं सिद्ध्यति । जसः शीत्यादौ आदेशात् प्रागित्संज्ञाया एवाभावेन अनेकाल्त्वादेव सर्वादेशत्वसिद्धौ अनेकाल् सूत्रे तदर्थं कृतं शिद्ग्रहणं व्यर्थं सत् नानुबन्धकृतमनेकाल्त्वमिति परिभाषां ज्ञापयतीत्युक्तम् । नानुबन्धकृतमिति परिभाषायामनेकालिति सूत्रे चानुबन्धपदस्य योग्यत्वार्थानङ्गीकारे ज्ञापनोत्तरमपि, आदेशात् प्राक् शकारस्येत्वाभावेन अनेकाल्त्वादेव सर्वादेशत्वे सिद्धे शिद्ग्रहणस्य स्वांशे चारितार्थ्याभावात् तदसङ्गतं स्यादिति तेनेदं ध्वनितमिति भावः ।

अतः सर्वनाम्न इति। अदन्तादङ्गात्परस्य सर्वनाम्नो विहितस्येत्यर्थः। तेन 'मासपूर्वाये'त्यत्र स्मै न । ङसिङ्योः। स्मात्स्मिनोर्हलन्त्यमिति न, 'न विभक्ता'विति निषेधात्। यद्यपि इत्त्वप्रवृत्तिकाले न विभक्तित्वज्ञानं, तथापि विभक्तावित्यस्य विभक्तित्वयोग्य इत्यर्थान्न दोषः। अत एव सूत्रे 'तु' ग्रहणं चरितार्थम् । आमि स । 'आज्जसेरसु'गित्यत आदिति वर्त्तते । पञ्चत्रिंशदिति । तेन सर्वार्थप्रतिपादकत्वेऽपि कृत्स्नसकलादिशब्दानां नेति भावः। सर्वविश्वौ बुद्धिस्थानेकसङ्ख्याकावयवारब्धसमुदाये शक्तौ। तस्य

समुदायस्यानुद्भूतावयवभेदत्वे एकवचनं, यथा- 'सर्वो लोक' इति । तादृक्समुदायद्वयादि-विवक्षायां द्विवचनादि - 'सर्वौ व्यूहौ' 'सर्वे व्यूहा' इति । यदाऽप्युद्भूतावयवभेद-समुदायविवक्षा तदाऽपि बहुवचनं 'सर्वे घटा' इति। पूर्वपरावर । व्यवस्थाऽसञ्ज्ञावर्तिन एवेमे सर्वादय इत्यर्थः। एवमुत्तरसूत्रद्वयेऽपि।

भावबोधिनी : तुग्रहणं चरितार्थमिति । अन्यथा विभक्तौ स्मौ इत्येव ब्रूयादिति भावः । उपजनिष्यमाणन्यायेन न विभक्तावित्यनेन हलन्त्यसूत्रस्य बाध इति तु न । निषेधविषये भाष्यादौ तदनङ्गीकारात् । तेनेति । परिगणनेनेत्यर्थः । सर्वार्थप्रतिपादकत्वेऽपीति । अयं भावः । संज्ञोपसर्जनव्यावृत्त्यर्थमन्वर्थसंज्ञाबलेन प्राधान्येन सर्वार्थवाचकानि सर्वादीनि सर्वनामसंज्ञानीति सूत्रार्थो वक्तव्यः । इत्थञ्च परिगणनाभावे कृत्स्नसकलयोरपि तत्त्वेन संज्ञा स्यादिति भावः ।

बालबोधिनी : सर्वनाम्नः स्मै । पूर्ववदत्रापि अत इत्यस्याङ्गविशेषणत्वं, सर्वनाम्न इत्यस्य विहितविशेषणत्वञ्चेति दर्शयति अदन्तादिति । तत्फलमाह तेनेति । अन्यथा मासपूर्वायेत्यत्र मासपूर्वशब्दस्य समुदायस्य 'तृतीयासमासे 'इति सर्वनामसंज्ञानिषेधेऽप्यवयवस्य सर्वनामत्वात् ततः विहितत्वाभावेऽपि परत्वेन स्मैभावो दुर्वारः स्यादिति भावः ।

ङसिङ्योः । इत्यर्थादिति । नानुबन्धकृतमिति परिभाषायामनुबन्धपदस्येव न विभक्ताविति सूत्रे विभक्तिपदस्य विभक्तित्वयोग्ये लक्षणा । न दोष इति । इत्वप्रवृत्तिकाले विभक्तित्वज्ञानाभावेऽपि तद्योग्यत्वज्ञानसत्वेन न विभक्ताविति निषेधप्रवृत्त्या स्मात्स्मिनोः हलन्त्यमिति तु नेति भावः । निरुक्तार्थे साधकमाह अत एवेति । योग्यपरत्वादेवेत्यर्थः । सूत्रे = न विभक्ताविति सूत्रे । चरितार्थमिति । स्मिन्, स्मादित्यादावन्त्यस्येत्ववारणार्थं न विभक्ताविति सूत्रे तुग्रहणं कृतम् । इत्ववारणञ्च विभक्तिपदस्य तद्योग्यत्वार्थकत्वे एव सम्भवति । अन्यथा विभक्तौ स्मौ इत्येव ब्रूयादिति भावः ।

आमि सर्वनाम्नः । तेनेति । सर्वादीनि पञ्चत्रिंशदिति परिगणनेनेत्यर्थः । तत्फलमाह सर्वार्थेति । ननु सर्वविश्वयोः बह्वर्थप्रतिपादकत्वेन बहुवचनमेव स्यान्न त्वेकवचनादीत्यत आह सर्वविश्वाविति । अनुद्भूतेति । समुदायगतैकत्वविवक्षायामनुद्भूतावयवभेदत्वम् । अवयवगतसंख्याविवक्षायामुद्भूतावयवभेदत्वम् ।

संज्ञायास्सामान्यसूत्रेणैव सिद्धेर्गणसूत्रस्यार्थमाह व्यवस्थेति । उत्तरसूत्रद्वयेऽपि = स्वमज्ञातिधनाख्यायाम्, अन्तरं बहिर्योगोपसंव्यानयोरिति सूत्रद्वयेऽपि ।

नित्यं द्विवचनान्त इति। द्विवचनान्त एवेत्यर्थः। अकजर्थ इति । ननु काकचोः को विशेषः? प्रत्ययस्वर-चित्स्वराभ्यामन्तोदात्तत्वस्यैव सत्त्वात् । न च सुबन्तात्तद्धितोत्पत्त्या चित्त्वप्रयुक्तमन्तोदात्तत्वम् - 'उभकाभ्या'मित्यादौ सुबन्तस्य, के तु प्रकृतेरिति विशेष इति वाच्यम् तद्धितविधौ 'प्रातिपदिका'दित्यधिकारेण प्रातिपदिकस्यैव प्रकृतित्वात् । स च जायमानो न्यायात्सुबन्तात्पर इत्यन्यदेतत् । युष्मदस्मद्विषये तु वचनात्सुबन्तत्यैव प्रकृतित्वं, तस्यैव टेः प्रागकजिति बोद्ध्यम् । न चाकचि तन्मध्यपतितन्यायेन तस्योभग्रहणेन ग्रहणे उभकाववयवौ यस्येत्यर्थे उभकशब्दादयच्युभकय इति रूपं, के तु नेति विशेषः ; 'कश्चेदानीं काकचोर्विशेष' इति भाष्यप्रामाण्येन तेषामनभिधानादिति शङ्कते- न चेति। द्विवचनपरत्वाभावेनेति। अकचि तन्मद्ध्यपतितन्यायेनोभशब्दस्य द्विवचनपरत्वं, के तु तेन व्यवधानान्न तस्य तत्त्वमित्यर्थः। 'उभादुदात्त' इति सूत्रे भाष्यकृताऽयचः प्रत्ययान्तरत्वेन व्याख्यानान्महाविभाषासम्बन्धस्यावश्यकत्वेन नित्यग्रहणमयोग्यं सत् योगविभागेनोभ-शब्दाद्वृत्तिविषयेऽत्यन्तस्वार्थिकायज्विधानार्थम् । अयश्च तद्विषये सुबुत्पत्तेः पूर्वमेव, स्वार्थिकत्वेनान्तरङ्गत्वात् । अत एवायज्विशिष्टस्योभस्य सर्वनामत्वात्सर्वनाम-प्रकृतिकसप्तम्याद्यन्तत्वेन त्रलाद्युत्पत्तिः। अत्र नित्यशब्दस्य वाच्यार्थविरोधान्महाविभाषाया असम्बन्धः। अयमप्याद्युदात्त एवोदात्तग्रहणानुवृत्तेः। अयश्च वार्तिकप्रामाण्याद्यत्रोभ-शब्दस्योभयशब्दस्य वा द्विवचनविषयत्वाभावसम्भावना तत्रैव। अत एवोभयोर्वास इत्यादौ 'शयवासे'त्यलुकि नायच् । तद्ध्वनयन् वार्तिकमाह उभयोऽन्यत्रेति। द्विवचनपरत्वाभावे इति। तत्परत्वविषयत्वाभावे इत्यर्थः। 'उभयो मणि'रित्यादौ तु न, लिट्यभ्यासस्यो-भयेषामिति निर्देशेन योगविभागस्य इष्टसिद्ध्यर्थत्वेन च तस्य क्वचिदप्रवृत्तेः, अतो रूपाद्यन्ते नायच् । रूपादेरस्मादनभिधानमेव वा । अयच्यकच् तु न वाच्यः । उपजीव्यत्वेन कस्यैव प्राप्तेः। अपवादस्त्वन्यत्र चरितार्थः।

<u>भावबोधिनी :</u> उभशब्दस्य काकचोर्विषये मूलोक्तफलातिरिक्तफलाभावमुपपादयति नन्वित्यादिना । सुबन्तस्येति । सुबन्तात् तद्धितोत्पत्तावपि तदवयवसर्वनाम्नटेः प्रागकच्प्रवृत्त्या भ्यामन्तस्याप्रातिपदिकत्वेन सुपो धात्वित्यस्याप्रवृत्त्या चितस्सप्रकृतेरिति भ्यामाकार उदात्त इति भावः । के तु प्रकृतेरिति सुबन्तात् तद्धितोत्पत्तेः उभशब्दात् प्रथमतः सुपि ततः कुत्साविवक्षायां कप्रत्यये तदन्तस्य प्रातिपदिकत्वेन भ्यामो लुकि पुनः भ्यामि तत्प्रकृत्यन्ताकार उदात्त इति भावः । सुबन्तात् पर इति । सुबन्तत्वज्ञानाव्यवहितोत्तरकालप्रवृत्तिक इत्यर्थः । सुबन्तस्यैव प्रकृतित्वमिति । अकच्प्रकृतित्वमित्यर्थः । तस्यैव सुबन्तस्यैव । इदमत्र बोध्यम् । युष्मदस्मद्विषयेऽपि

ओकारसकारभकारादौ प्रत्यये परतः प्रातिपदिकस्य टेः प्रागकचि तस्यैव प्रकृतत्वमन्यत्र सुबन्तस्य टेरिति तदन्तस्यैव प्रकृतित्वमिति । के तु नेति । कप्रत्ययान्तस्य उभग्रहणेन ग्रहणाभावात् अवयवार्थकायज् नेति भावः । तेषामिति । अकज्विशिष्टोभशब्द-प्रकृतिकावयवार्थकायजन्तानामित्यर्थः । ननु मूले उभयत उभयत्रेत्यादाविवायच्-प्रसङ्गादित्यसङ्गतं तत्रैवायचो दुर्लभत्वादित्यतस्तमुपपादयति उभादुदात्त इति । अथवा ननूभशब्दस्य गणे निवेशेन सर्वनामत्वादकचि प्रवृत्तावपि नित्यमिति योगविभागेनायच् दुर्वार इत्याशङ्क्य समाधत्ते उभादुदात्त इत्यादिना । एतदारभ्य उदात्तग्रहणानुवृत्तिरिति पर्यन्तं शङ्काग्रन्थःततोऽ यश्चेत्यारभ्य तत्रैवेति पर्यन्तं समाधानग्रन्थः । नन्वेवमवतारिते उभयो मणिरित्यारभ्य क्वचिदप्रवृत्तेरिति पर्यन्तेन ग्रन्थेनोभकावित्यादावयच् नेत्यर्थकेन सह विरोध इति चेन्न । अमुमेवार्थं तेन ग्रन्थेन विशदयतीत्यर्थेनादोषात् । अथवा उभयोऽन्यत्रेति वार्तिकमपूर्वमुक्तज्ञापकसिद्धं वेत्याकाङ्क्षायां ज्ञापकसिद्धमित्याह उभादुदात्त इति । प्रत्ययान्तरत्वेन व्याख्यानादिति । अस्यात्यन्तस्वार्थिकायज्विधानार्थमित्य-नेनान्वयः । नन्वयचः प्रत्ययान्तरत्वे द्वयी त्रयीत्यादौ तयप्प्रत्ययान्तत्वाभावेन टिड्ढेति ङीप् न स्यादिति चेन्न । टिड्ढेति सूत्रे द्वयसजिति अयचश्चकारेण प्रत्याहारेणायचोऽपि प्रत्याहारान्तर्गत्वेन उक्तस्थले ङीप्सिद्धेः । अत्र पक्षे दघ्नञ्मात्रच्तयपां ग्रहणं सूत्रे न कर्तव्यमिति लाघवमस्तीति बोध्यम् । अयचः प्रत्ययान्तरत्वे प्रमाणमन्यत्रोच्यते आवश्यकत्वेनेति । लक्ष्यानुरोधादिति शेषः । वृत्तिविषये इति । व्याख्यानादिति भावः। अयश्च स्वार्थिकायच्च । तद्विषये वृत्तिविषये । अन्तरङ्गत्वादिति । तत्त्वञ्चान्यपदार्थानपेक्षत्वेन । स्वार्थिकतद्धितस्तु अर्थापेक्षत्वेन विलम्बोपस्थितिकत्वेन बहिरङ्ग इति भावः । अत एवेति। सुबुत्पत्तेः पूर्वमयजुत्पत्तेरेवेत्यर्थः । ननु सुबुत्पत्त्यनन्तरमयजुत्पत्तावपि उभशब्दात् सुबन्तात् स्वार्थेऽयचि तदन्तस्य प्रातिपदिकत्वेन सुपो लुकि तदन्तप्रकृतिकसप्तम्यन्तात् त्रलि उभयत्रेति रूपं सिध्यतीति चेन्न । सुबुत्पत्त्यनन्तरमयजुत्पत्तौ नित्यमिति विभक्तसूत्रे उभादित्यसम्बन्धेन तस्य तत्प्रकृतिकसुबन्ते लक्षणायां मानाभावेन सुपि परत एव उभशब्दादयचि तस्य सप्तमीरूपस्य सुपः उभशब्दप्रकृतिकस्य सर्वनामप्रकृतिकत्वाभावेन त्रलाद्यनापत्तिरित्याशयात् । घकालतनेष्विति ज्ञापकन्तु सार्थकतद्धितविषयम् । न चोभशब्दपाठस्य त्रलाद्युत्पत्तिरपि प्रयोजनमस्त्विति वाच्यम् । तथा सति उभस्य सर्वनामत्वे कोऽर्थः अकजर्थं पाठः क्रियते उभकौ किमुच्यते । अकजर्थ इति । पुनरन्यान्यपि सर्वनामकार्याणि अन्याभावो द्विवचनटाब्विषयत्वादिति भाष्यग्रन्थसन्दर्भ-सूचितप्रयोजनान्तराभिप्रायविरोधात् । सर्वनामत्वादिति । उभयेत्यानुपूर्वीकस्य गणे

पाठात्तत्त्वम् । अवयवार्थकायजन्तस्यैव गणे पाठ इति नाग्रह इति भावः । अत्र = विभक्तसूत्रे । वाच्यार्थविरोधादिति । महाविभाषया कदाचिद्भावबोधने त्रैकालिकसत्ताबोधकनित्यशब्दार्थविरोधः स्यादिति भावः । अनुवृत्तेरिति । अन्यथा चितोऽन्तोदात्तः स्यादिति भावः ।

ननु क इदानीमस्यान्यत्र भवति उभयोऽन्यत्र उभयस्यान्यत्र भवतीति भाष्यम् । अस्य = उभशब्दस्य । द्विवचनभिन्ने परतः उभय इति रूपं भवति अयज् भवतीति फलितोऽर्थः । तथा च अयच्प्रत्ययस्य द्विवचनभिन्ने परत एव विधानेन सुबुत्पत्तेः पूर्वमयजुत्पत्तिरिति ग्रन्थासङ्गतिः भाष्यसूचिताकजतिरिक्तसर्वनामकार्याभावविरोधाच्च । तथा हि – उभयत्रेत्यादौ सप्तमीद्विवचनोत्तरमेव त्रलाद्युत्पत्त्या द्विवचने सति अयजभावेन सर्वनामप्रकृतिकसप्तम्यन्तत्वाभावेन त्रलाद्यनापत्त्या तदर्थमपि उभशब्दपाठस्याव-श्यकत्वादित्याशङ्क्य द्विवचनविषयत्वाभावसम्भावनेति । परिनिष्ठिते प्रयोगे इति शेषः। तथा चान्यत्रेत्यस्य द्विवचनभिन्नेति नार्थः । किन्तु परिनिष्ठिते प्रयोगे उभशब्दस्य द्विवचनपरत्वाभावसम्भावनायामिति । उभशब्दस्येति । ननूभशब्दस्य द्विवचनपरत्वाभावः वृत्तिविषये पूर्वमयच् यदि स्यात्तदाऽस्त्येवायचा व्यवधानादित्यत आह उभयशब्दस्येति। केचित्तु अवयवार्थकायजन्तोभयशब्दोऽपि द्विवचनविषये न प्रयुज्यत इति सूचनायो-भयशब्दस्य वेत्युक्तम् । तच्चाग्रिमग्रन्थे स्फुटीभविष्यतीत्याहुः । वस्तुतोऽयमार्थिकोऽर्थः न तु वाच्योर्थः । अन्यत्रेत्यस्य प्रकृतिद्विवचनभिन्न एव शक्तत्वेन ततो द्विवचनभिन्नपरत्वे इत्यर्थस्यैव लाभात् । अस्योभयशब्दस्य परिनिष्ठितप्रयोगे द्विवचनभिन्नपरत्वेन उभय इति रूपं बोध्यम् ।

ननु यत्र द्विवचनविषयत्वाभावसम्भावना तत्रैवायजिति नियमो व्यर्थः । उभावित्यादौ वृत्तेरभावादेव वृत्तिविषये विहितस्यायचोऽप्रवृत्तेः । अकजन्तात्तु नायच् । अनभिधानस्य प्रागेवोक्तत्वादित्याशङ्क्य तत्फलमाह उभयोर्वास इति । नन्वेवं सति वृत्तिविषय इति व्यर्थम् । उभावित्यादौ द्विवचनपरत्वादेवायचोऽप्रवृत्तिरिति चेत् सत्यम् । एतत्फलितार्थकथनमेव वृत्तिविषय इति । एवमन्यत्रेत्यस्य उभावित्यपि प्रत्युदाहरणं दातुं शक्यम् । तत्परत्वविषयत्वाभाव इति । परिनिष्ठितप्रयोगे तत्परत्वाभाव-सम्भावनायामित्यर्थः । यथाश्रुतमूलन्तु न युक्तम् । द्विवचनपरत्वाभाव इत्युक्तौ सम्प्रति द्विवचनपरत्वाभावाभावेन उभयत्रेत्यादौ अयजनापत्तेः त्रलर्थं तस्यावश्यकत्वात् । न चान्तरङ्गत्वाद्विभक्त्युत्पत्तेः पूर्वमयजुत्पत्तिरिति वाच्यम् । उभयोर्वास इत्यादावयजापत्तेः।

इत्यादौ तु नेति । अत्यन्तस्वार्थिकायजिति शेषः । निर्देशादिति । इदमुपलक्षणम् । अत्यन्तस्वार्थिकायचोऽन्तरङ्गत्वेन सुबुत्पत्तेः पूर्वमेवोत्पत्तिस्वीकारेणावयवार्थकायचः पूर्वं स्वार्थिकायचि ततस्सुपि उभशब्दप्रकृतिकसुबन्ताभावेन उभादुदात्त इत्यवयवार्थकायज्विधायकस्य निर्विषयकत्वापत्तेः । समाधानान्तरमाह योगविभागस्येति। विशेषविहितेनावयवार्थकायचा बाधाच्चेति बोध्यम् । अत इति क्वचिदप्रवृत्त्यङ्गीकारादिति भावः । एतदर्थमेव तदुक्तिः । अनभिधानमिति । प्रमाणं तु कप्रत्ययस्य द्विवचनत्वमाश्रित्योभशब्दपाठप्रत्याख्यानपरभाष्यम् । तथाहि – वार्तिकस्थद्विवचनशब्दस्य द्विवचनसंज्ञकपरत्वे रूपपि अयज् भवति । द्वित्वविशिष्टार्थपरत्वे तु रूपपोऽपि कप्रत्ययतुल्यत्वेन स नेति फलभेदादनभिधानमिति। आद्युदात्तार्थं पाठ इति तु न । उभस्यान्तोदात्तस्यैव सर्वत्र प्रयोगात् । नन्वकजर्थमपि उभशब्दपाठो व्यर्थः । उभशब्दात् कुत्साविवक्षायां कप्रत्ययबुद्धौ अयज्बुद्धिः तद्बुद्धौ विशिष्टस्य गणे पाठात् सर्वनामत्वेनाकचि द्विवचनपरत्वेनायचो निवृत्तौ अकचोऽपि निवृत्त्या कप्रत्ययबुद्धिः तद्बुद्धौ पुनरयचो बुद्धिरिति चक्रकापत्त्या चक्रकापत्ताविष्टतो व्यवस्थेति न्यायेन उभकावित्यस्येष्टत्वात् । तत्सिद्धावुभशब्दपाठो व्यर्थ इत्यत आह अयच्यकच् तु न वाच्य इति । स्वार्थिकायचि सति अकच् न वाच्य इत्यर्थः । कुतो न वाच्यस्तत्र हेतुमाह उपजीव्यत्वेनेति । परिनिष्ठितप्रयोगे द्विवचनपरत्वाभावो ह्युपजीव्यः । यदि चायचि कृते अकच् स्यात्तदा स्वार्थिकायजन्तस्य द्वित्वविशिष्टार्थबोधकत्वेन ततो द्विवचनापत्तौ द्विवचनपरत्वाभावरूपोपजीव्यः व्याहन्येतेति कप्रत्ययस्यैव प्राप्तेरित्यर्थः । यद्यप्यकचि कृते उभयकशब्दस्य द्विवचनपरत्वं तथापि तन्मध्यन्यायेनोभयकशब्दस्योभशब्दत्वेन तस्य द्विवचनपरत्वमस्त्येवेति भावः । ननु कापवादे अकचि जागरूके कथं क इत्याशङ्क्याह अपवादस्त्विति । अन्यत्रेति । उपजीव्योपजीवकभावादन्यत्रेत्यर्थः । तथा चोभयशब्दस्य द्विवचनपरत्वाभावसम्पादनद्वारा स्वोपजीव्यकप्रत्ययविधायकाकचोऽयच् न निमित्तमिति नात्राकच् प्रवर्तत इति भावः ।

बालबोधिनी : नित्यशब्दोऽवधारणार्थ इत्याह द्विवचनान्त एवेति । तेन सजातीयवचनान्तरस्यैव व्यवच्छेदः । न तु टापः । नित्यं द्विवचनान्त इति यथाश्रुतस्य स्वीकारे यत्र टाप् तत्रोभस्य द्विवचनान्तत्वासम्भवात् मूलोक्तमसङ्गतं स्यादिति भावः । द्विवचने सर्वनामसंज्ञाप्रयुक्तकार्याणामभावादुभशब्दपाठो व्यर्थ इत्याशङ्क्य मूले तत्फलमाह अकजर्थ इति।

मूलोक्तं फलं समर्थयितुमाह नन्विति । को विशेष इति । कप्रत्ययेणैवेष्टसिद्ध्या

अकचि को विशेष इति प्रश्नः । विशेषाभावमाह प्रत्ययस्वरेति । उभयशब्दात् कप्रत्यये आद्युदात्तश्चेति प्रत्ययस्याद्युदात्तत्वेन उभकशब्दोऽन्तोदात्त एव । अकच् प्रत्यये, सर्वनाम्नो विहितत्वेन उभशब्दस्यैव प्रकृतित्वात् सप्रकृतेः चित अन्तोदात्त इत्यर्थकेन चित इति सूत्रेण ककरोत्तरवर्तिन एवोदात्तत्वात् उभयत्रान्तोदात्तत्वस्य तुल्यतया काकचोर्नास्ति स्वरे विशेष इति भावः । एवञ्च कप्रत्ययेनैवेष्टसिद्ध्या उभकावित्यकजर्थं सर्वादिगणे उभशब्दपाठो व्यर्थ इति शङ्कितुराशयः । कश्चिदेकदेशी समाधत्ते न चेति । स्वार्थद्रव्यलिङ्गसंख्याकारकैः संस्कृतस्य बहिर्भूतापत्यादिना योग इत्यर्थक स्वार्थे परिपूर्णमिति कुत्सित इति सूत्रभाष्योक्तरीत्या सार्थकतद्धितानां सुबन्तादेवोत्पत्त्या अकज्विधौ सर्वनामप्रकृतिक-सुबन्तस्यैव प्रकृतित्वेन उभकाभ्यामित्यादौ सप्रकृतिकस्य चितोऽन्त उदात्त इति भ्याम आकार उदात्तः स्यात् । सुबन्तात् तद्धितोत्पत्तावपि तदवयवसर्वनाम्नटेः प्रागकचि भ्यामन्तस्याप्रातिपदिकत्वेन सुपो धात्विति लोपाप्रवृत्त्या भ्याम आकारस्योदात्तत्वं स्यादिति भावः । सुबन्तात् कुत्सायां कप्रत्यये तदन्तस्य प्रातिपदिकत्वेन तदवयवभ्यामो लुकि पुनर्भ्यामि ककरोत्तरवर्त्त्यकारस्योदात्तत्वमिति स्वरे विशेष इति न चेति शङ्कितुराशयः । तन्निरस्यति तद्धितविधाविति । प्रातिपदिकस्यैवेति । स्वार्थे परिपूर्णं पदमित्यादि कुत्सितसूत्रोक्तभाष्यरीत्या सार्थकतद्धितानां सुबन्तादुत्पत्तेः न्याय्यत्वेऽपि तद्धितस्य तु सुबन्तात् परत्वमिति भावः । तदेवाह स च जायमान इति । न्यायात् = स्वार्थे परिपूर्णमित्यादि कुत्सिते इति सूत्रभाष्योक्तन्यायात् । सुबन्तात्पर इति । उक्तन्यायात् पूर्वं सुपि सामर्थ्यात् तस्मादित्युत्तरस्येति परिभाषाया अव्यवहितत्वांशे बाधनेन सुपा व्यवधानेऽपि प्रवृत्तेः, अर्थात् सुबन्तात् परत्वेमेवैतद्विषये परश्चेत्यनेन बोध्यत इति भावः ।

नूनूक्तरीत्या तद्धितविधौ प्रातिपदिकादित्यधिकारेण तस्यैव प्रकृतित्वे अव्ययसर्वनाम्नामिति तस्यैव टेः प्रागकचि त्वयका मयकेत्यादि न सिध्यतीत्यत आह युष्मदस्मदिति । वचनादिति । अनोकारसकारभकारादाविति वक्तव्यमिति अव्ययसर्वनाम्नामिति सूत्रस्थभाष्यवार्त्तिकादित्यर्थः । अयं भावः । अव्ययसर्वनाम्नामिति सूत्रे प्रातिपदिकादिति, विभाषा सुपो बहुच् पुरस्तादिति सूत्रात् सुप इति चानुवर्तते । वाक्यभेदेन सम्बध्यते । सर्वनामरूपप्रातिपदिकावयवटेः प्रागकजिति प्रथमं वाक्यम् । सर्वनामप्रकृतिकसुबन्तस्य टेः प्रागकजिति द्वितीयं वाक्यम् । तत्र द्वितीयं वाक्यं युष्मदस्मच्छब्दमात्रविषयकम् । तथा हि अव्ययसर्वनाम्नामिति सूत्रे भाष्ये किमयं सुबन्तस्य प्राक् टेर्भवति, आहोस्वित् ङ्याप्प्रातिपदिकस्य ? कुतः सन्देहः ? उभयं प्रकृतम् । अन्यतरच्छक्यं विशेषयितुमित्युक्तम् । अत्र भाष्ये उभयं प्रकृतमित्युक्तत्वेनाकज्विधौ

प्रातिपदिकादित्यस्य सुप इत्यस्य चोभयोरपि सम्बन्धः । वाक्यभेदेनान्वय इति लभ्यते । एकमधिकारात्, सुबन्तं तु सामर्थ्यादिति बोध्यम् । तदुत्तरं भाष्ये यदि सुबन्तस्याकच् तर्हि युष्मकाभिः, अस्मकाभिः, युष्मकासु, युवकयोरिति न सिध्यति । प्रातिपदिकस्य चेत् त्वयका, मयका, त्वयकि, मयकि इति न सिद्ध्येदित्युक्त्वा, अस्तु सुबन्तस्य । कथं युष्मकाभिरित्यादीत्याशङ्क्य 'अनोकारसकारभकारादाविति वक्तव्य'मिति समाहितम् । भाष्ये यदि सुबन्तस्याकच् तर्हि युष्मकाभिरित्यादि न सिद्ध्येदित्याशङ्क्य अनोकारसकार-भकारादाविति वक्तव्यमिति समाहितत्वेन द्वितीयं वाक्यं युष्मदस्मच्छब्दविषयकमिति ज्ञायते। एवञ्च युष्मदस्मद्भिन्नसर्वनाम्नः, ओकारसकारभकारादौ सुपि युष्मदस्मदोश्च प्रातिपदिका-वयवटेः प्रागकज्विधायकमाद्यं वाक्यम् । अत्र शब्दतः सुप इत्यस्य निमित्तत्वेनानुपादानात् सुबुत्पत्त्यनन्तरं तन्निमित्तकादेशात् पूर्वमन्तरङ्गत्वादकचः प्रवृत्तिः । द्वितीयवाक्ये शब्दतः सुपो निमित्तत्वेन तन्निमित्तकादेशेषु कृतेषु सुबन्तस्य टेः प्रागकचि त्वयकेत्यादेस्सिद्धिरिति बोध्यम् ।

तस्यैवेति । अकज्विधायके सुपः, प्रातिपदिकादित्युभयोस्सम्बन्धेन क्वचित् सुबन्तावयवप्रातिपदिकस्यैव क्वचित् सुबन्तस्यैवेत्यर्थः । युष्मदस्मद्भिन्नसर्वनाम्नां प्रातिपदिकटेरेव प्रागित्यर्थः । ननु प्रत्ययस्वरचित्स्वराभ्यामन्तोदात्तत्वस्यैव सत्वात् स्वरे विशेषाभावेऽपि रूपे विशेष इति शङ्कते न चेति । तस्य = अकज्विशिष्टस्य । के तु नेति । अज्ञाताद्यर्थे कप्रत्यये तद्विशिष्टस्य शब्दान्तरत्वादिति भावः । उभकौ अवयवौ यस्येत्यर्थे संख्याया अवयवे तयबिति तयप्प्रत्यये अकज्विशिष्टस्य उभशब्दत्वेन ग्रहणात् उभादुदात्तो नित्यमिति तयपोऽयचि उभकयमिति रूपम् । कप्रत्यये तु कान्तस्य शब्दान्तरत्वात् उभशब्दत्वेन ग्रहणाभावे तयपोऽयज् न स्यादिति रूपे विशेष इति न शङ्कनीयम् ।

तेषाम् = अकज्विशिष्टोभशब्दप्रकृतिकावयवार्थकायजन्तानाम् । शङ्कते इति । उभशब्दपाठो गणे व्यर्थ इत्यर्थः । द्विवचनपरत्वाभावेति । उभयेति यः स्वार्थिकायजन्तः सोऽन्यत्र प्रयुज्यते, न तु द्विवचनपरत्वे इति उभयोऽन्यत्रेति वार्त्तिकस्यार्थः । वार्त्तिके अन्यत्रेत्यस्य द्विवचनादन्यस्मिन् परे इत्यर्थः । के त्विति । तेन = कप्रत्ययेन । तस्य = उभशब्दस्य । तत्त्वम् = द्विवचनपरत्वम् ।

ननु मूले कप्रत्ययेन नेष्टसिद्धिः । द्विवचनपरत्वाभावेन उभयतः, उभयत्र इत्यादाविवायच्प्रसङ्गादिति उभयतः, उभयत्रेति दृष्टान्तत्वेन प्रदर्शितम् । तदसङ्गतम् । तत्रावयवार्थाप्रतीत्या तयपोऽभावेन तत्स्थानिकायचोऽसिद्धिः, एवमुभशब्दात् कप्रत्यये

दार्ष्टान्तिके कथं वा तत्प्रसङ्ग इत्याशङ्क्य तमुपपादयति उभादुदात्तेति । अयचः प्रत्ययान्तरत्वेन व्याख्यानादिति महाविभाषासम्बन्धस्यावश्यकत्वे हेतुः । प्रत्ययान्तरत्वे महाविभाषाया असम्बन्धे तु आदेशत्वपक्षे उभयतः, उभयत्रेत्यादौ तयपोऽभावेनायच् न स्यात् । प्रत्ययान्तरत्वपक्षे तयपोऽभावेऽपि तत्सिध्यतीति फलभेदस्य सत्वेन पक्षभेदासङ्गतिः । विभाषासम्बन्धे तु प्रत्ययान्तरत्वपक्षे तत्प्रवृत्तौ अयजन्तं रूपम्, तदभावे च वाक्यमिति फलभेदाभावेन न पक्षभेदासङ्गतिरिति भावः । नित्यग्रहणमिति । अस्यायजुविधानार्थ-मित्यनेनान्वयः । अयोग्यं सत् = अन्वयायोग्यं सत् । वृत्तिविषये इति। योगविभागस्येष्ट-सिद्ध्यर्थत्वादिति भावः । ननु उभसर्वतसोरित्यादिकारकमनोरमाग्रन्थस्थेन वस्तुतस्त्वित्यादिना वृत्तौ कृतायामयजित्यर्थलाभेन वृत्त्यविषये तदप्राप्त्या उभयत उभयत्रेति दृष्टान्तासङ्गतिः तदवस्थैव । किञ्च सत्ययचि सर्वनामप्रकृतिकसप्तम्याद्यन्तत्वेन त्रलादिरुत्पद्यते । सत्याञ्च त्रलादिवृत्तौ अयजित्यन्योन्याश्रय इत्यत आह अयश्चेति । अयश्च= स्वार्थिकायच्च । तद्विषये = वृत्तिविषये । अन्तरङ्गत्वादिति । अत्यन्तस्वार्थिकत्वेनेतर-पदार्थानपेक्षत्वादिति भावः । कारकमनोरमाग्रन्थस्तु प्राचामनुसारीति न तद्विरोध इति भाव इति सदाशिवभट्टादयः । अत एव = त्रलादिवृत्तिप्रयोजकसुबुत्पत्तेः पूर्वमयजुत्पत्तेरेव ।

नित्यमिति द्वितीययोगे महाविभाषाया असम्बन्ध इत्याह अत्रेति । नित्यमिति विभक्तसूत्रे इत्यर्थः । अयमपि = नित्यमिति विभक्तसूत्रसिद्धायजपि । अनुवृत्तेरिति । अन्यथा चितः सप्रकृतेरिति अन्तोदात्तः स्यादित्यर्थः । ननु नित्यग्रहणस्य योगविभागेनोभ-शब्दाद्वृत्तिविषयेऽन्यन्तस्वार्थिकायज्विधानार्थत्वेन उभशब्दस्य सर्वनामत्वं स्वीकृत्याकचि कृतेऽपि तस्यापि वृत्तित्वेन वृत्तिविषयतायास्सत्वात् अयच् दुर्वार एवेत्यत आह अयश्चेति। अयजित्यर्थः । वार्त्तिकेति । उभयोऽन्यत्रेत्यर्थः । उभशब्दस्येति । तस्मादकचि तन्मध्य-पतितन्यायेन तस्योभशब्दत्वात् तस्य द्विवचनविषयत्वाभावसम्भावनाया अभावेन नायजिति भावः । ननूभशब्दादयचि कृते तेन व्यवधानात् द्विवचनविषयत्वाभावसम्भाव-नायास्सत्वेनोभशब्दादयच् दुर्वार एवेत्यत आह उभयशब्दस्य वेति । तेनोभशब्द-प्रकृतिकमेवेति नाग्रहः । एवञ्च द्विवचनविषयत्वाभावसम्भावनाया अभावेन उभावित्यादौ नायजिति भावः ।

द्विवचनविषयत्वाभावसम्भावनेति । परिनिष्ठिते प्रयोगे इति शेषः । तथा च उभयोऽन्यत्रेति वार्त्तिकेऽन्यत्रेत्यस्य द्विवचनपरत्वाभावे इति नार्थः । किन्तु परिनिष्ठिते प्रयोगे द्विवचनविषयत्वाभावसम्भावनायामित्यर्थः ।

तथा व्याख्यानस्य फलमाह अत एवेति । वृत्तिविषये इत्यनुक्त्वा द्विवचनविषयत्वा-भावसम्भावनायामित्यर्थस्वीकारादेवेत्यर्थः । नायजिति । अन्यथा उभयोर्वास इत्यलुक्समासे शयवासवासिष्वकालात् इति सप्तम्या अलुकि तस्य वृत्तित्वेनायच् दुर्वारः स्यात् । उक्तरीत्या सम्भावनार्थस्वीकारे यद्ययच् स्यात्तदा सप्तम्या अलुकि उभयशब्दस्य द्विवचनपरत्वं स्यादिति सम्भावनायास्सत्वेन तदभावसम्भावनाया अभावन्नायजिति भावः । इत्यादावित्यादिना उभये देवमनुष्या इति ग्राह्यः । अन्यथा तत्रायच्द्वयं श्रूयेतेति भावः । निरुक्तार्थस्वीकारे प्रमाणभूतं वार्त्तिकमाह उभयेति ।

ननु उभादुदुत्तो नित्यमिति सूत्रे नित्यमिति योगविभागेन वृत्तिविषये सुबुत्पत्तेः प्रागेवायचः प्रवृत्त्या सर्वत्र द्विवचनपरत्वाभावस्यैव सत्वेन व्यावृत्त्यभावादन्यत्रेत्यस्य द्विवचनपरत्वाभाव इति विवरणमयुक्तमित्यत आह तत्परत्वेति । परिनिष्ठिते प्रयोगे द्विवचनविषयत्वाभावसम्भावनायामित्यर्थः । सम्भावनानिवेशादेव उभयतः, उभयत्रेत्यादौ दृष्टान्ते यद्यत्र त्रलादिः स्यात्तदा लुगपि स्यादिति सम्भावनया द्विवचनपरत्वविषयत्वा-भावसम्भावनायास्सत्वेन अयच् सिध्यति । अनेन दृष्टान्ते अयचः प्राप्तिः कथमिति शङ्का समाहिता । सर्वादिषु उभशब्दपाठप्रत्याख्यातृभाष्यनयेऽपि दर्शितस्थले अयच् सिध्यतीति बोध्यम् ।

ननु उभौ अवयवौ यस्य स उभयो मणिः । उभादुदात्त इत्यवयवार्थकोऽयच् । उभादुदात्त इति योगेनावयववृत्तेः संख्यावाचिन उभशब्दादवयविन्यर्थे अयज्विधीयते । नित्यमिति योगविभागेन वृत्तिविषये अत्यन्तस्वार्थिकोऽयजिति बोध्यम् । अत्रापि यद्ययच् स्यात्तदा लुगपि स्यादिति सम्भावनया द्विवचनपरत्वविषयत्वाभावसम्भावनायास्सत्वेन उभयत्रेत्यादाविव अत्यन्तस्वार्थिकोऽयच् दुर्वार इत्यत आह उभयो मणिरिति । इत्यादौ तु नेति । अत्यन्तस्वार्थिकायजिति शेषः । अवयवार्थकायच्प्रवृत्त्यनन्तरं पुनः नित्यमिति योगविभागेनात्यन्तस्वार्थिकायज् न भवतीत्यर्थः । निर्देशेनेति । यकारद्वयाघटितेनेत्यर्थः । योगविभागेति । नित्यमिति योगविभाग इत्यर्थः । तस्य = नित्यमिति द्वितीययोगप्राप्तात्यन्त-स्वार्थिकायच इत्यर्थः । क्वचिदप्रवृत्तेरित्यस्य फलमाह रूपाद्यन्ते इति उभरूपमित्यादावित्यर्थः । नायजिति । अन्यथा तत्रापि यदि रूपप् स्यात्तदा द्विवचनस्य लुक् स्यादिति सम्भावनया द्विवचनपरत्वविषयत्वाभावसम्भावनायास्सत्वेनोभयत्रेत्यादाविव अयच् दुर्वारः स्यादिति भावः ।

वस्तुतस्तु उभशब्दात् रूपादेरनभिधानमित्याह रूपादेरिति । अस्मात् = उभशब्दात्।

अत्र प्रमाणं तु कप्रत्ययस्य द्विवचनत्वमाश्रित्योभशब्दपाठप्रत्याख्यानपरं भाष्यमेव । तथा हि - उक्तरीत्या प्रत्याख्यानपक्षे कप्रत्ययस्येव रूपपोऽपि द्विवचनशब्देन ग्रहणे तस्मिन् परे नायचः प्राप्तिः । आरम्भपक्षे प्रागुक्तरीत्या द्विवचनपरत्वविषयत्वाभावसम्भावनायास्सत्वेन अयच् प्राप्नोतीति आरम्भप्रत्याख्यानयोः फलभेदः प्राप्नोतीति तद्वारणायानभिधान-मावश्यकमिति भावः ।

ननूभशब्दस्य अकजर्थं सर्वादिगणे पाठो व्यर्थः । कप्रत्ययेनापीष्टसिद्धेः । तथाहि। नित्यमिति योगविभागेन वृत्तिविषयेऽत्यन्तस्वार्थिकाऽयचः सुबुत्पत्तेः पूर्वमेवोत्पत्तिस्वीकारेण उभशब्दादयचि विशिष्टस्य सर्वादिगणे पाठेन सर्वनार्मत्वादकचि तन्मध्यपतितन्यायेन समुदायस्योभयशब्दत्वात् द्विवचनपरत्वस्यैव सत्वेन, द्विवचनपरत्वविषयत्वाभाव-सम्भावनाया अभावेन पूर्वमयचोऽप्रवृत्तौ कप्रत्ययेनापि उभकावितीष्टसिद्धिरित्यत आह अयच्यकच् तु नेति । अत्यन्तस्वार्थिकायजुत्तरमकचः प्रवृत्तिर्न । यदि स्यात्तर्हि अयचोऽप्रवृत्तिः स्यादित्यर्थः । तदप्रवृत्तौ हेतुमाह उपजीव्यत्वेनेति । वृत्तिविषये सुबुत्पत्तेः पूर्वं प्रवर्तमानोऽयच्प्रत्ययः द्विवचनपरत्वविषयत्वाभावसम्भावनामुपजीव्य प्रवर्तत इति द्विवचनपरत्वाभावो हि तस्योपजीव्यः । कृतेऽयचि यदि अकच् प्रवर्तेत तर्हि तन्मध्यपतित-न्यायेनाकज्विशिष्टस्योभशब्दत्वात् तस्य द्विवचनपरत्वेन तदभावरूपमुपजीव्यं व्याहन्येतेति अयजुत्तरं कप्रत्ययस्यैव प्रवृत्त्या तेन व्यवधानात् द्विवचनपरत्वविषयत्वाभावसम्भावनाया अक्षतत्वेनोभशब्दस्य सर्वादिगणे पाठाभावे अयच् दुर्वार एव स्यादिति भावः । एवञ्चाकजर्थं सर्वादिगणे पाठ आवश्यक इति भावः ।

नन्वकचो कापवादत्वेन तद्विषये कथं कप्रत्ययस्य प्राप्तिरत आह अपवाद इति । अन्यत्रेति । उपजीव्योपजीवकभावादन्यत्रोभशब्दभिन्ने सर्विकेत्यादौ कबाधकतयाऽयचः चारितार्थ्येनात्र तदप्रवृत्तिरिति भावः । तथा चोभकावित्यकजर्थमुभशब्दस्य गणे पाठः कार्य इति सिद्धान्तः ।

अत्रेदं चिन्त्यम् - अकज्विधावेवोभग्रहणेन सिद्धे सञ्ज्ञाप्रणयनं किमर्थम् ? अभिव्यक्तपदार्थकत्वात्सञ्ज्ञाव्यावृत्तिः, सर्वनामसाहचर्याच्च। अत एवोपसर्जनव्यावृत्तिरिति। 'उभयोऽन्यत्रे'ति वार्तिके तयप्समानार्थकोऽप्ययज् गृह्यते, 'उभयो मणिः', 'उभये देवमनुष्या' इति भाष्ये तदुदाहरणात् स्वार्थिकस्य च ग्रहणं, तदुपक्रमेण वार्तिकप्रवृत्तेः। एवञ्चावयवद्वयारब्धमणिद्वयविवक्षया, उद्भूतावयवभेदविवक्षया वा द्विवचनमस्यासाध्वेव, एतन्मूलकमेवोभयस्यासर्वविभक्तित्वं 'तद्धितश्चे'ति सूत्रे कैयटेनोक्तं, तदाह - कैयट इति। हरदत्त इति। अत्रारुचिबीजं - प्रागुक्तभाष्यविरोधः।

भावबोधिनी : अत एवोपसर्जनव्यावृत्तिरिति । इदमुपलक्षणम् । वृत्त्युत्तरमुभादावुपसर्जने कुत्सादियोगासम्भवात् ततः पूर्वमेव तद्योगे तु अकजिष्ट एवेति बोध्यम् । एवञ्चेति । वार्तिके द्वयोरपि ग्रहणेनेत्यर्थः । एतन्मूलकमेव । द्वयोरपि ग्रहणमूलकमेव । अत्रेति । हरदत्तसते इत्यर्थः ।

बालबोधिनी : अकजर्थं गणे पाठ इत्यत्र दोषमाह अत्रेदं चिन्त्यमिति । अव्ययसर्वनाम्नामिति अकज्विधावेवोभग्रहणेन सिद्धे सर्वादिगणे पाठोऽनावश्यक इत्यर्थः। ननु तथाग्रहणे संज्ञाभूतादपि अकच् स्यात् । गणपाठे तु संज्ञोपसर्जनीभूतास्तु न सर्वादय इति निषेध इत्यत आह अभिव्यक्तेति । गौणमुख्यन्यायेनाकज्विधौ संज्ञाभूतस्योभशब्दस्य व्यावृत्तिरिति भावः । सर्वनामसाहचर्याच्चेति । अव्ययसर्वनाम्नामिति सर्वनामसाहचर्यात् संज्ञाभिन्नस्योपसर्जनभिन्नस्यैवोभशब्दस्य ग्रहणमित्यर्थः । अत एवेति । साहचर्याश्रयणा-देवेत्यर्थः ।

उभयोऽन्यत्रेति वार्त्तिके अवयवार्थकस्य स्वार्थिकस्य चायचो ग्रहणमित्याह उभयोऽन्यत्रेति । तदुदाहरणादिति । तद्वार्त्तिकस्य अवयवार्थकायजन्तोदाहरणदानाद्वार्त्तिके तस्यापि ग्रहणमित्यर्थः । समानार्थकोऽपीति अपिसमुच्चेयमाह स्वार्थेति । एवञ्च = वार्त्तिके द्वयोरपि ग्रहणेन । एतन्मूलकमेव = उक्तवार्त्तिकमूलकमेव । अत्र = हरदत्तमते । प्रागुक्तेति। उभयो मणिरित्याद्युदाहरणपरभाष्येत्यर्थः ।

भाष्ये तूभशब्दपाठः प्रत्याख्यातः, कप्रत्ययस्याज्ञाताद्यर्थविशिष्टस्वार्थे विधानेन द्वित्वसङ्ख्याप्रकारकसङ्ख्येयविशेष्यकबोधविषयार्थानुवादकत्वरूपद्विवचनत्वेन वार्तिके द्विवचनशब्देन तस्यापि ग्रहणमुभशब्दग्रहणवत् । अत एवोभयोरुभावुभोभावित्यादौ नायच् । तदुक्तं भाष्ये - 'केऽप्यन्तरेण वचनं द्विवचनपरो भविष्यति, कथं स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्तीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवति' इति। इति - हेतोः, प्रकृतेः - कादिप्रकृतेरुभशब्दस्य ग्राहकेण द्विवचनशब्देन स्वार्थिकस्यापि ग्रहणमिति तदर्थः। त्रतसिलौ तु विभक्त्यन्तस्य स्वार्थे विहिताविति तत्तत्कारकशक्तिप्रधानावेवेति न तयोरुक्तद्विवचनत्वमिति।

भावबोधिनी : अज्ञाताद्यर्थविशिष्टस्वार्थेति । सुबन्तात् कप्रत्ययविधानेऽपि अभिधानस्वाभाव्यात् सूत्रे विभक्तिविशेषस्यानुपादानाच्च विभक्त्यर्थाविशिष्टाज्ञातत्वादि-विशिष्टप्रातिपदिकार्थ एव कप्रत्यय इति भावः । केऽप्यन्तरेण वचनमिति । केऽपि कप्रत्ययेऽपि वचनमन्तरेण द्विवचनमन्तरेणेत्यर्थः । यद्वा वचनमन्तरेण शास्त्रमन्तरेणेत्यर्थः।

बालबोधिनी : भाष्यसम्मतं सिद्धान्तमाह भाष्ये इति । प्रत्याख्यानप्रकारमाह कप्रत्ययस्येति । अनुवादकत्वं = बोधकत्वम् । द्वित्वसंख्यानिष्ठप्रकारतानिरूपितसंख्येय-निष्ठमुख्यविशेष्यताकोपस्थितिजनकत्वं द्विवचनत्वमित्यर्थः । तस्यापि = कप्रत्ययस्यापि। अपिना शास्त्रीयसङ्केतिस्येत्यर्थः । अत एव = अकृत्रिमस्यापि ग्रहणादेव। नायजिति । द्विवचनपरत्वादित्यर्थः । भाष्यार्थमाह इतीति । इतिर्हेतावित्याह हेतोरिति । प्रकृतिग्रहणेनेति। प्रकृतिः गृह्यते अनेनेति करणल्युडन्तम् । प्रकृतेः उभशब्दस्य ग्राहकेण द्विवचनशब्देनेत्यर्थः। स्वार्थिकाः प्रत्ययाः यतः प्रकृतितोऽविशिष्टाः प्रकृत्यर्थभिन्नार्थविशेष्यकबोधाजनकाः अतो हेतोः प्रकृतेरुभशब्दस्य ग्राहकेण द्विवचनशब्देन तत्प्रकृतिकस्वार्थिकानां कादीनामपि ग्रहणमिति भाष्यार्थः । एवञ्च उभशब्दात् कप्रत्यये तस्य द्विवचनपदेन ग्रहणात् उभयोऽन्यत्रेति अयजापत्तिर्नास्तीति उभकावितीष्टसिद्ध्या तदर्थमकच्सम्पादनाय गणे पाठो न कर्तव्य इति भावः।

ननूक्तरीत्या द्विवचनपदेन स्वार्थिकानामपि ग्रहणे त्रतसिलोरपि स्वार्थिकयोः द्विवचनशब्देन ग्रहणापत्तौ उभयतः, उभयत्रेत्यसिद्धिः । द्विवचनपरत्वेनायचोऽप्रवृत्तेरत आह त्रतसिलाविति । पञ्चम्यास्तसिल्, सप्तम्यास्त्रलिति तयोरपादानाधिकरणरूपकारकशक्ति-विशेष्यकबोधजनकत्वेन, संख्याप्रकारकसंख्येयमुख्यविशेष्यकबोधजनकत्वाभावेन न तयोः द्विवचनपदेन ग्रहणमिति भावः । एवं सर्वादिगणे उभशब्दपाठः प्रत्याख्यातः भाष्यकृता।

तस्मात् - उभयशब्दात् । जसीति । अवयवद्वयारब्धसमुदायबहुत्व-विवक्षायामित्यर्थः। अन्तरङ्गत्वादिति । सर्वार्थबोधकत्वरूपार्थस्योभयत्रापि निमित्तत्वेन न तत्कृतं नित्यसञ्ज्ञाया बहिरङ्गत्वम् । अत एव सञ्ज्ञोपसर्जनप्रथमादिशब्दे न विकल्पः, अर्थकृतबहिरङ्गत्वस्यानाश्रयणाच्चेति भावः। इदमर्वाचामनुरोधेन। परे तु - अस्य पक्षेऽभावबोधकतया निषेधाश्च बलीयांस इत्यनेनाऽस्य प्राप्तिः। किञ्च न 'अन्तरङ्गं बलीयः' इत्यस्या अत्र विषयो, युगपत्प्राप्त्यभावात् । सञ्ज्ञानां बाध्यबाधकभावाभावेन प्रातिपदिकसञ्ज्ञासमकालमेव सर्वनामसञ्ज्ञाप्रवृत्तेः। अत एवोभये इत्यत्र सर्वनाम्नो विहितत्वेन शीभावसिद्धिः।

भावबोधिनी : अत एव संज्ञेति । प्रथमचरमसूत्रेऽपि सर्वार्थवाचकत्वविशेषणादेवेत्यर्थः । अस्येति । प्रथमचरमसूत्रस्येत्यर्थः । पक्षेऽ भावबोधकतयेति । प्राप्ताप्राप्तविभाषासु निषेधेन समीकरणानन्तरं पश्चात् सर्वत्र विकल्प इति सिद्धान्तादिति भावः । अस्येति । प्रथमचरमेत्यस्येत्यर्थः । न चाकडाराधिकारादन्यत्र संज्ञाया बाध्यबाधक-भावाभावेनेदमयुक्तमिति वाच्यम् । अविरुद्धयोस्तदभावेऽपि विरुद्धयोस्तदङ्गीकारात्

भावाभावयोः साक्षाद्विरोधात् । यथा तपरस्तत्कालस्य अणुदित्सवर्णस्येत्यनयोः । अत एव पूर्वपरेति वैकल्पिकी संज्ञा नित्यसंज्ञां बाधत इति । अन्तरङ्गबलेन निर्वाह इत्याह किञ्चेति । युगपत् प्राप्त्यभावादिति । समानकालिकप्राप्त्यभावादित्यर्थः । अशिश्रियत् असुस्रुवदित्युदाहरणेनोक्तपरिभाषायास्तद्विषयत्वादिति भावः । युगपत् प्राप्त्यभावमुप-पादयति संज्ञानामिति । आकडाराधिकारबहिर्भूतानामित्यादिः । समकालमेव सर्वनामसंज्ञेति । नित्यसर्वनामसंज्ञेत्यर्थः । वैकल्पिकसंज्ञाया जस्सापेक्षत्वेन तदनन्तरमेव तदिति समकालप्राप्त्यभाव इति भावः । अत एवेति । नित्यसर्वनामसंज्ञाया जसः पूर्वं प्रवृत्तत्वादेवेत्यर्थः । विहितत्वेनेति । जस इत्यादिः ।

बालबोधिनी : उभयशब्दात् जसि नित्यां सर्वनामसंज्ञां बाधित्वा परत्वात् प्रथमचरमेति सर्वनामसंज्ञाविकल्पप्राप्तिमाशङ्क्य परिहरति मूले तस्मादित्यादिना । उभयशब्दादिति । उभौ अवयवौ यस्येत्यर्थे संख्याया अवयवे तयबिति तयप्प्रत्यये उभादुदात्त इति प्रथमयोगेन तयपोऽयजादेशे निष्पन्नादुभयशब्दादित्यर्थः । अन्तरङ्गत्वादिति । प्रथमचरमेति विकल्पविधिः जसपेक्षत्वाद् बहिरङ्गः । सर्वादीनीति नित्यसंज्ञाविधिस्तु तदनपेक्षत्वादन्तरङ्गः । उभयत्र सर्वार्थवाचकत्वाविशेषात् न तत्कृतं नित्यसंज्ञाया बहिरङ्गत्वम् । प्रथमचरमेति विकल्पविधावपि सर्वार्थवाचकत्वविशेषणादेव संज्ञोपसर्जनप्रथमादिशब्दे न विकल्प इति भावः । वस्तुतः अर्थकृतं बहिरङ्गत्वं नाश्रीयत इत्याह अर्थकृतेति । अर्वाचामिति । प्रक्रियाकारादीनामित्यर्थः । सिद्धान्तमाह परे त्विति । अस्य = प्रथमचरमेति सूत्रस्य । पक्षेऽभावबोधकतयेति । प्राप्ताप्राप्तविभाषास्थले नेत्यनेन प्रथमतो निषेधे ततो वा शब्देन भावाभावौ बोध्येते इत्यर्थः । अस्य = प्रथमचरमेति सूत्रस्य । उभयशब्दविषये निषेधाश्च बलीयांस इति न्यायेन प्रथमचरमेति विकल्पस्यैव प्राप्तिरित्यर्थः । अन्तरङ्गपरिभाषयापि नैव निर्वाह इत्याह किञ्चेति । इत्यस्या अत्र न विषय इत्यन्वय । युगपत्प्राप्त्यभावात् = समकालिकप्राप्त्यभावात् । अनया परिभाषया समकालप्राप्तबहिरङ्गस्यैवासिद्धत्वं बोध्यत इति नित्यविकल्पसंज्ञयोः युगपत् प्राप्त्यभावात् नान्तरङ्गपरिभाषाया अत्र विषय इति भावः। संज्ञानाम् = आकडारीयबहिर्भूतानाम् । सर्वनामसंज्ञेति । नित्यसर्वनामसंज्ञेत्यर्थः । अत एवेति । प्रातिपदिकसंज्ञासमकालमेव सर्वनामसंज्ञाप्रवृत्तेरेवेत्यर्थः । तथा च जसः सर्वनाम्नो विहितत्वेन तस्य शीभावः सिध्यति ।

'पूर्वपरे'त्यादि तु पक्षे तदभावमात्रबोधकम् । 'असिद्धं बहिरङ्ग'मित्यपि न; अन्तरङ्गोत्तरं बहिरङ्गप्राप्तेः । अन्तरङ्गे कर्तव्ये बहिरङ्गासिद्धत्वेऽपि तत्प्रवृत्त्युत्तरं बहिरङ्गप्रवृत्तेरनया

वारयितुमशक्यत्वात् , बहुशस्तथा दृष्टत्वात् । तदुत्तरमप्येतत्प्रवृत्त्या पूर्वादिष्विव पक्षे तदभावविशिष्टे साधुत्वबोधनस्य शक्यत्वात् । 'जसी'ति विषयसप्तमीति पक्षेऽपि प्रातिपदिकादिसञ्ज्ञोत्तरमेवास्याः प्रवृत्तिः, तदुत्तरमेव तद्विषयात् । स्थानिवदतिदेशप्रापिताया निरवकाशत्वाच्च। प्रत्यक्षस्य स्थानिवद्भावस्यानुमानिक्याऽनया बाधायोगाच्च । सर्वनामसंज्ञायामुक्तयुक्त्या यथोद्देशपक्षस्यैवौचित्याच्च । अत एव 'तयादेशे उभयप्रतिषेधः, तयपो ग्रहणेन ग्रहणात् जसि विभाषा प्राप्नोती'ति स्थानिवत्सूत्रस्थं वार्तिकम् 'अयचप्रत्ययान्तर'मिति सूत्राशयप्रदर्शनेन भाष्ये प्रत्याख्यातं, न त्वन्तरङ्गन्यायबलेन। 'उभयी'त्यत्र ङीप्तु 'टिड्ढे'ति सूत्रे मात्रशब्दादारभ्यायचश्चकारात्प्रत्याहाराश्रयणेन सिद्धः। 'अत' इत्यनुवृत्त्या च 'कती'त्यादौ नातिप्रसङ्गः। तयब्ग्रहणन्तु सूत्रेऽवयुत्यानुवादः। द्वित्रिशब्दप्रकृतिकायजन्तस्य जसःशीविषयेऽनभिधानमेव, पुंस्येव वाऽनभिधानमिति तदाशय इति वदन्ति ।

भावबोधिनी : ननु प्रातिपदिकसंज्ञासमकालमेव सर्वनामसंज्ञावश्यकीत्युक्तम् । एवं सति पूर्वे इत्यादौ शीभावानापत्तिः । जसुत्पत्त्यनन्तरमेव पूर्वपरेत्यादिना सर्वनामसंज्ञाविधानादित्यत आह पूर्वपरेत्यादीति । पक्षे तदभाव इति । सर्वनामसंज्ञाभाव इत्यर्थः । अयं भावः पूर्वे इत्यादौ प्रातिपदिकसंज्ञासमकालं गणपाठान्नित्यसंज्ञा ततो जसिति जसः सर्वनाम्नो विहितत्वं ततः पूर्वपरेत्यादिनाभावांशमनूद्य पक्षे न भवतीत्यभावांशमात्रं विधीयत इति । पक्षे सर्वनामत्वबुद्धिनिवृत्तौ शीभावविकल्पसिद्धिरिति । न च पक्षे सर्वनामत्वनिवृत्तावपि जसः सर्वनामविहितत्वानपायेन पुनस्तद्दोष-तादवस्थ्यमिति वाच्यम् । विकल्पसंज्ञाविधानसामर्थ्येन जस्यपि पक्षे सर्वनाम-विहितत्वाभावबुद्धेरङ्गीकारात् । वस्तुतस्तु तत्प्रवृत्त्युत्तरमन्तरङ्गप्रवृत्त्युत्तरम् । अशक्यत्वादिति । तथा च विकल्पः स्यादेवेति भावः । नन्वन्तरङ्गविषये बहिरङ्गासिद्धत्वं स्वीक्रियते ततश्च बहिरङ्गस्यानन्तरं प्रवृत्तावपि न दोष इत्यत आह बहुश इति । पचावेदमित्यादौ बहिरङ्गस्यैव पूर्वं लक्ष्ये प्रवृत्तिनिमित्तसद्भावाधीनबहिरङ्गस्यान्त-रङ्गपरिभाषयासिद्धत्वबोधनस्याशक्यत्वेऽपि बहिरङ्गवैकल्पिकसर्वनामसंज्ञा असम्भवादेव न प्राप्नोति । न हि नित्यसंज्ञोत्तरं प्रवर्तमानमपि पूर्वपरेति शास्त्रमभावं बोधयितुं क्षमम् । भावभावयोर्विरोधात् । विधायकशास्त्रभेदेन संज्ञाया भेदेतु पूर्वपरेत्यादिना स्वविहितसंज्ञाभावबोधनेऽपि सर्वादीत्यनेन विहिताया अभावबोधनाशक्यत्वात् तामाश्रित्य पूर्वेत्यादौ नित्यशीभावापत्तिः । उभये इत्यत्रेष्टश्चासिद्ध इत्यत आह तदुत्तरमपीति । शास्त्रभेदेन संज्ञाभेदाभावेऽपि जातसंज्ञायाः पूर्वादिष्विव उभयेऽपि पक्षेऽभावबोधनं

सम्भवति । लुगादिना जातनिवृत्तेरप्यङ्गीकारात् । अन्यथा विकल्पवैयर्थ्यं स्यादिति भावः । ननु जसीति विषयसप्तमी । ततश्च जसुत्पत्तेः पूर्वमेव नित्याया इव वैकल्पिकायाः प्रवृत्तिरस्तीति समकालिकत्वात् अन्तरङ्गं बलीय इति न्यायेनेष्टसिद्धिरित्यत आह जसीति। अस्याः वैकल्पिकायाः । तदुत्तरम् = जसुत्तरम् । युक्त्यन्तरमाह स्थानिवदिति । प्राप्ताया इति । कार्यातिदेशपक्षस्यैव सर्वकार्यविधायकत्वेन वैकल्पिकाया निरवकाशत्वं बोध्यम्। स्थानिवद्भावलभ्यस्य प्राबल्ये युक्तिमाह प्रत्यक्षस्येति । सूत्रकृतोपदिष्टस्येत्यर्थः । आनुमानिक्येति । ज्ञापकबलेनोहितयेत्यर्थः । ननु सर्वनामसंज्ञायां कार्यकालोऽङ्गीक्रियते। ततश्च यदा कार्यं तदा संज्ञेति उभये इत्यादौ जसुत्पत्त्यनन्तरं सर्वनामत्वप्रयुक्तशीभावे कर्तव्ये नित्यवैकल्पिकयोस्समावेशात् समकालप्राप्तिरित्यन्तरङ्गं बलीय इत्यनेन सिद्धमित्यत आह सर्वनामेति । उक्तयुक्त्येति । जसस्सर्वनाम्नो विहितत्वार्थं प्रातिपदिकसंज्ञासमकालमेव सर्वनामसंज्ञा आवश्यकीत्युक्तयुक्त्येत्यर्थः । अत एव = अन्तरङ्गबहिरङ्गभावस्योपपादयितुमशक्यत्वादेव । नन्वेवं सति उभयीत्यादौ ङीप् न स्यात् तयप्प्रत्ययान्तत्वाभावादित्यत आह उभयीत्यत्रेति । नन्वेवं डतेरपि प्रत्याहारान्तर्गतत्वात् डत्यन्तादपि ङीबापत्तिरित्यत आह अत डतीति । न षडिति निषेधो वा बोध्यः। अनुवृत्त इति । अजाद्यत इत्यत इत्यर्थः । नन्वेवं सूत्रे तयब्ग्रहणं व्यर्थमत आह तयबिति। अवयुत्येति । ल्यबन्तमेतत् । अवयुत्या एकदेशेन अवयुत्यनुवाद इति पाठे तु अवयुतेरेकदेशस्येत्यर्थः स्पष्टार्थमिति भावः । ननु स्थानिवदित्यतिदेशप्रापितायाः निरवकाशत्वाच्चेति पूर्वोक्तप्रसङ्गतः द्वये त्रये इत्यादौ स्थानिवद्भावेन तयप्प्रत्ययान्ततया वैकल्पिकसंज्ञायाः सावकाशत्वादित्यत आह द्वित्रिशब्देति । अनभिधानमिति । तथा च नोक्तार्थे बाधकमिति भावः । तदाशय इति । अयच्प्रत्ययान्तरमिति वदतो भाष्यकाराशय इत्यर्थः । अत्रेदं बोध्यम् । इदञ्चानभिधानमयुक्तम्। धातोश्च द्वये प्रत्यया इति भाष्ये द्वये इति प्रयोगात् अयच् प्रत्ययान्तरमिति भाष्यन्तु नानुपपन्नम् । उभये इत्यादावन्तरङ्गबहिरङ्गभावस्योपपादयितुमशक्यत्वात् । परत्वात् प्राप्तविकल्पस्यानवकाशबोधनार्थमेव प्रवृत्तत्वादिति । किञ्च स्थानिवदित्यतिदेशप्रापिताया निरवकाशः प्रत्यक्षस्यातिदेशस्यानुमानिक्या बाधायोग इति द्वयमप्ययुक्तम् । अन्तरङ्गपरिभाषामुख्योदाहरणे पचावेदमित्यादौ वैपरीत्यदर्शनादित्यपि बोध्यम् ।

बालबोधिनी : ननु यदि प्रातिपदिकसंज्ञासमकालमेव नित्यसर्वनामसंज्ञायाः प्राप्तिस्तर्हि प्रथमचरमेति विकल्पविधानं व्यर्थमत आह पूर्वपरेत्यादीति । तदभावमात्रबोधकमिति । प्रातिपदिकसंज्ञासमकालमेव प्रवृत्तायाः नित्यसंज्ञायाः जसः प्रवृत्त्यनन्तरं प्रथमचरमेति सूत्रेण पाक्षिकः तदभावो बोध्यते । अत एव विकल्पसिद्धिरिति भावः ।

अन्तरङ्गत्वात् नित्या सर्वनामसंज्ञेति मूलोक्तं न युक्तम् । अन्तरङ्गपरिभाषाया अत्र प्रवृत्तियोग्यत्वाभावादित्याह असिद्धमिति । अन्तरङ्गे कर्तव्ये जातस्य समकालप्राप्तस्य वा बहिरङ्गस्यासिद्धत्वं बोध्यते । न तु तदुत्तरं जायमानस्य । प्रकृते प्रातिपदिकसंज्ञासमकालं नित्यसर्वनामसंज्ञायाः प्रवृत्तौ तया जसुत्तरं जायमानस्य वैकल्पिकसर्वनामसंज्ञाया असिद्धत्वं नैव बोधयितुं शक्यत इति भावः । अनया = अन्तरङ्गपरिभाषया । बहुशः = बहुत्र स्थलेषु। तथा = अन्तरङ्गे कर्तव्ये उपस्थितबहिरङ्गासिद्धत्वस्य दृष्टत्वात् ।

ननु प्रातिपदिकसंज्ञासमकालमेव नित्यं सर्वनामसंज्ञाप्रवृत्तौ पूर्वपरेत्यादि-विकल्पविधानं व्यर्थमत आह तदुत्तरमपीति । प्रातिपदिकसंज्ञासमकालमेव नित्यसर्वनाम-संज्ञाप्रवृत्त्युत्तरमपि । एतत्प्रवृत्त्या = पूर्वपरेत्यस्य प्रवृत्त्या । जसीति विषयसप्तमीति पक्षेऽपि न तयोः नित्यवैकल्पिकसर्वनामसंज्ञयोः युगपत् प्राप्तिरित्याह जसीति। अस्याः = विकल्पसंज्ञायाः । तदुत्तरमेव = प्रातिपदिकसंज्ञोत्तरमेव जसुत्पत्त्या तदुत्तरमेव । तद्विषयात्= शीभावविषयत्वात् । प्रातिपदिकसंज्ञासमकालमेव नित्यसर्वनामसंज्ञा । जसाधारस्य शीभावाख्यकार्यस्य प्रातिपदिकसंज्ञोत्तरमेव जसुत्पत्त्या प्रवृत्तिरिति तदुत्तरमेव विकल्पसंज्ञायाः प्रवृत्त्या न तयोः युगपत् प्राप्तिरिति भावः ।

ननु मनुष्योऽयं प्रातरुत्थायेति दृष्टान्तेन पूर्वं यस्य निमित्तसम्पत्तिस्तस्य पूर्वं प्रवृत्तिरित्यर्थः सिध्यति । तस्यापि परिभाषया क्रोडीकारे न बाधकम् । तत्रासिद्धत्वं च निमित्ताभावादप्राप्तिरूपमिति युगपत् प्राप्त्यभावेऽपि अन्तरङ्गपरिभाषा सञ्चरत्येवेति चेत् युक्त्यन्तरमाह स्थानिवदिति । तयप्स्थानिकस्यायचः स्थानिवद्भावार्थमुपप्लुतस्य स्थानिवत्सूत्रस्य निरवकाशत्वात् प्राबल्येन अयजादेशस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्रथमचरमेति विकल्पसिद्धिरिति भावः। तस्य प्राबल्ये युक्तिमाह प्रत्यक्षेति । अनया = अन्तरङ्गपरिभाषया ।

ननु कार्यकालपक्षे कार्यप्रवृत्तिकाल एव संज्ञाप्रवृत्तेर्वक्तव्यतया जसुत्पत्त्यनन्तरं शीभावाख्ये कार्ये कर्तव्ये नित्यवैकल्पिकयोः युगपत्प्राप्तिसम्भवात् तदसम्भवान्नात्रान्त-रङ्गन्यायस्य विषय इत्यसङ्गतमित्यत आह सर्वनामेति । उक्तयुक्त्येति । उभये इत्यत्र सर्वनाम्नो विहितत्वेन शीभावसिद्धिरित्युक्तयुक्त्येत्यर्थः । भाष्यसम्मतिमाह अत एवेति । अन्तरङ्गपरिभाषया अनिर्वाहादेवेत्यर्थः । तयादेश इति । तयबन्तत्वप्रयुक्ते आदेशे कर्तव्ये उभयशब्दावयवादेशस्य स्थानिवत्त्वप्रतिषेधो वक्तव्य इति तयादेशे उभयप्रतिषेध इति वार्त्तिकस्यार्थः । अत एव वार्त्तिकमते उभयीत्यत्र ङीपि कर्तव्ये न तन्निषेधः शीभावे कर्तव्ये

एव तन्निषेधादिति बोध्यम् । स्थानिवत्सूत्रे भाष्ये 'तस्य दोषस्तयादेशे उभयप्रतिषेध' इति वार्त्तिककृतोक्तम् । तस्यैतस्य लक्षणस्य दोषः तयादेशे उभये प्रतिषेधो वक्तव्यः । उभये देवमनुष्याः । तयपो ग्रहणेन ग्रहणाज्जसि विभाषा प्राप्नोतीति तत्रत्यं भाष्यम् । उभये देवमनुष्या इत्यत्र उभयशब्दस्य स्थानिवत्त्वेन तयबन्ततया प्रथमचरमेति जसि वैकल्पिकसर्वनामसंज्ञा प्राप्नोतीति तयादेशे उभयप्रतिषेधो वक्तव्य इति वार्त्तिककृतोक्तम् । तयबन्तत्वप्रयुक्ते आदेशे कर्तव्ये = प्रथमचरमेति वैकल्पिकसर्वनामसंज्ञाद्वारा जसः शीभावाख्ये कार्ये कर्तव्ये उभयशब्दावयवादेशस्य स्थानिवत्त्वप्रतिषेधो वक्तव्य इति वार्त्तिकार्थः । उभयेप्रतिषेध इति शीभावे कर्तव्ये एवायं स्थानिवत्त्वप्रतिषेध इति वार्त्तिककाराभिप्रायः । तदुत्तरं 'नैष दोषः । अयच् प्रत्ययान्तरम्' इत्युक्त्वा तद्वार्त्तिकं प्रत्याख्यातं भाष्यकृता । न त्वन्तरङ्गन्यायेन । यदि विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वात् नित्यैव संज्ञेति अन्तरङ्गपरिभाषया साध्यते तर्हि परिभाषासाध्यफलस्य, उभादुदात्त इति सूत्रे नित्यमिति योगं विभज्यायचः प्रत्ययान्तरत्वमाश्रित्यान्यथासिद्धिकथनं भाष्यकृतो विफलं स्यादिति भावः ।

नन्वयचः प्रत्ययान्तरत्वे उभयीत्यत्र तयबन्तत्वाभावेन टिड्ढाणञिति ङीप् न स्यादित्यत आह उभयीति । ननूक्तरीत्या मात्रशब्दादारभ्यायचः चकारात् प्रत्याहाराश्रयणे डति प्रत्ययस्यापि तद्घटकतया कतीत्यत्र ङीबापत्तिरत आह अत इति । ननु तयपः प्रत्याहारघटकतया तेनैव सिद्धे पृथग्ग्रहणं व्यर्थमित्यत आह तयब्ग्रहणं त्विति । अवयुत्याऽनुवाद इति । ल्यबन्तमेतत् । अवयुत्य = समुदायात् पृथक्कृत्य ।

ननु तयपोऽयजादेश इत्यादेशत्वपक्षः अयच् प्रत्ययान्तरमिति प्रत्ययान्तरत्वपक्षः। पक्षद्वयेऽपि फलाभेद आवश्यकः । 'अयच् प्रत्ययान्तरम्' इति भाष्ये प्रकृतिविशेषानुपादानेन द्वित्रिभ्यामुभशब्दाच्च प्रत्ययंसज्ञकोऽयज् भवतीति सामान्यतोऽर्थलाभे द्वयशब्दात् जसि तयपोऽयजादेशस्वीकारे प्रथमचरमेति वैकल्पिकसर्वनामसंज्ञायां द्वये, द्वया इति, अयच् प्रत्ययान्तरमिति पक्षे द्वया इत्येवेति फलभेदापत्तिरत आह द्वित्रिशब्देति । अनभिधानमिति । तथा चायचः प्रत्ययान्तरत्वे न बाधकमिति भावः । तदाशय इति । अयच् प्रत्ययान्तरमिति वदतो भाष्यकाराशय इत्यर्थः ।

तथापीहेति। प्रत्ययग्रहणे तदन्तग्रहणमिति प्रयोजनं सर्वनामाव्ययसञ्ज्ञायामिति च तदन्तविधिद्वयेन डतरान्तान्तेत्याद्यर्थे परमकतरस्य, व्यपदेशिवद्भावेन कतरस्य च सञ्ज्ञा सिद्धेति भावः। तत्र मानमाह - केवलयोरिति । प्रयोजनाभावात् - फलाभावादित्यर्थः।

अदन्तादङ्गात्परस्य सर्वनाम्नो विहितस्येत्येव जसः शी इत्यादेरर्थादिति भावः। ननु डतरग्रहणेनैव सिद्धेऽ न्यतरशब्दपाठो व्यर्थो ऽत आह - अन्यतरेति। किंयत्तद्भ्य एव तयोर्विधानादिति भावः। अपुरीति । पूः शब्दस्य विशेष्यत्वे नेत्यर्थः। तद्ध्वनयन् स्त्रियामुदाहरति - अन्तरायामिति।

एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा ।
साधारणे समानेऽल्पे सङ्ख्यायाञ्च प्रयुज्यते ।। इति केचित् ।

केवले = असहाये। तत्र सङ्ख्याऽन्यार्थासहायवाची ष्णान्ता षट् बहुषु बहुवचनम् एकादाकिनिच्चेत्यादिसूत्रेषु भाष्ये स्पष्टमुक्तः। एको गोत्रे इति सूत्रशेषे भाष्ये प्रथमार्थोऽपि उक्तः। साधारणसमानार्थयोः सङ्ख्यावाचिन एवार्थतःपर्यवसानम् । यथा - तेनैकदिक् चैत्रमैत्रयोरेका मातेत्यादौ। सर्वस्य द्वे इतिसूत्रे एकैकश इति भाष्यमुपादाय - केचिदाहुरल्पार्थोऽप्येकशब्दोस्तीति वदता कैयटेन केचिदित्युक्त्या तदर्थकाभावो ध्वनित एव, एवञ्च प्रधानार्थे न दृढं मानम् ।

भावबोधिनी : तत्रेति । उभयतदन्तविधावित्यर्थः । न च संज्ञाविधावित्यनेन प्रत्ययग्रहणप्राप्ततदन्तविधेरेव निषेधेन प्रयोजनं सर्वनामेति भाष्यमूलकशब्दस्वरूप-विशेष्यकतदन्तविधिसत्वेन केवलयोरिति ग्रन्थासङ्गतिरिति वाच्यम् । प्रत्ययग्रहणपरिभाषया तदन्तांशस्य येन विधिरिति सूत्रमूलकत्वेन संज्ञाविधा-वित्यस्योभयविधिनिषेधकत्वात् । नन्वत्र संज्ञाविधाविति निषेधस्यावकाशः प्रत्ययमात्रस्य यत्र संज्ञा तत्रैव तस्याः प्राप्तिरिति प्रकृते सर्वादीनामपि संज्ञासंभवेन तदभावादिति चेन्न। मात्रपदेन प्रत्ययान्तस्यैव व्यावर्तनीयत्वात् । अन्यथा कृत्तद्धितेति सूत्रे समासस्यापि संज्ञाविधानेन प्रत्ययमात्रस्य संज्ञाभावेन निषेधाप्रवृत्त्या तदन्तविधेस्सुलभत्वे-नार्थवद्ग्रहणसामर्थ्यात् तदन्तविधिरिति भाष्यासङ्गतेः । नन्वेवमप्यत्र तदन्तविधिद्वयं दुर्लभम् । प्रयोजनमव्ययसर्वनामेति भाष्यप्रामाण्यात् अध्याहृतस्य शब्दस्वरूपाणीति विशेष्यस्य सत्वेन पुनः शब्दस्वरूपाणीत्यस्याध्याहारायोगात् । प्रत्ययग्रहणपरिभाषा-प्रवृत्तिस्थले विशेष्यान्तरासत्वे हि विशेष्यस्याध्याहार इति चेन्न । क्वचिद्विशेष्यसत्वेऽपि शब्दस्वरूपं विशेष्यमादायं तदन्तविधिरिति नित्यं समास इति सूत्रे शेखरे उक्तरीत्या तदन्तविधिद्वयस्य सुलभत्वात् । अत एव वनो रचेत्यादौ तदन्तविधिरिति दिक् । फलाभावादित्यर्थ इति । अयं भावः । यथाश्रुतन्तु न युक्तम् । प्रयोजनत्वस्य इष्टानिष्टसाधारणत्वात् । अस्ति च प्रकृतेऽनिष्टप्रयोजनम्, केवलप्रत्ययस्य सर्वनामत्वे

सर्वनामत्वस्य प्रातिपदिकव्याप्यत्वाभावेन प्रातिपदिकग्रहणे भवतीशब्दादकजभावसिद्धेः। तथापि तस्य डतरडतमादौ तदन्तग्रहणवादिभाष्यकारादीष्टत्वाभावेन फलाभाव इति व्याख्यातमिति । नन्वस्त्येव फलं केवलस्य डतरस्य सर्वनामसंज्ञासत्वेऽपि कतरस्मै इत्यादौ सर्वनाम्नः परत्वमादाय स्मायादिसिद्धिरित्यत आह अदन्तादिति । एकोऽन्यार्थे प्रधाने चेति । अयञ्च ग्रन्थः न बहुव्रीहाविति सूत्रादव्यवहितपूर्वत्र लेखनीयः । मूले तत्रैव एकशब्दप्रसक्तेः । तेनैकदिगिति। अत्रत्य एकशब्दः समानार्थकः । अत एव तुल्यार्थैरिति तृतीयासिद्धिः । एका मातेति । साधारणीत्यर्थः । तदर्थकाभावः = अल्पार्थकाभावः । एकैकश इत्यादौ शस्प्रत्ययस्तु संख्यैकवचनादिति बोध्यम् । द्वित्वेन वीप्साया उक्तत्वात् कथं पुनर्वीप्सायां शसित्युच्यते तदा समाधानं विभावनीयम् । अल्पार्थत्वे तु बह्वल्पार्थादिति शस् सुलभ एवेति बोध्यम्।

बालबोधिनी : तथापीहेति । किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्, वा बहूनां जातिपरिप्रश्ने डतमच् इति डतरडतमौ प्रत्ययौ । प्रत्ययग्रहणपरिभाषया तदन्तयोर्ग्रहणम् । यद्यपि संज्ञाविधाविति निषेधेन सर्वनामसंज्ञाविधौ डतरडतमग्रहणे प्रत्ययग्रहणपरिभाषायाः प्रवृत्तिर्नास्ति तथापि केवलयोः संज्ञायाः प्रयोजनाभावात् प्रत्ययग्रहणपरिभाषया तदन्तयोर्ग्रहणमिति मूले उक्तम् । तत्रैका तदन्तविधिरित्युक्तम् । परन्तु तदन्तविधिद्वयं वक्तव्यमित्याह प्रत्ययेति । प्रत्ययग्रहणपरिभाषया एका तदन्तविधिः, प्रयोजनं सर्वनामाव्यय-संज्ञायामिति भाष्यमूलकशब्दस्वरूपविशेष्यकतदन्तविधिरपर इति तदन्तविधिद्वयम् । तत्र= तदन्तविधिद्वयस्वीकारे । केवलस्य सर्वनामसंज्ञायां फलाभावमाह अदन्तादिति । सर्वनाम्नो विहितस्येति । प्रत्ययमात्रस्य प्रातिपदिकत्वाभावेन ततो जसो विहितत्वाभावान्न शीभावसिद्धिरूपं फलमस्तीति भावः ।

अन्यतरेति । अव्युत्पन्नावित्यर्थः । तयोर्विधनादिति । डतरडतमयोर्विधानादित्यर्थः। तथा चान्यशब्दात् न तयोः प्राप्तिः । विशेष्यत्वे नेति । पूःशब्दस्य विशेष्यताप्रयोजकत्वे अन्तरशब्दस्य सर्वनामसंज्ञा नेति तदर्थः । तथा च पूःशब्दप्रयोज्यविशेष्यतानिरूपित-प्रकारताप्रयोजकेतरस्यैवान्तरशब्दस्य अन्तरं बहिर्योग इति गणसूत्रे ग्रहणमिति भावः ।

एकशब्दः संख्यायां नित्यैकवचनान्तः । अर्थान्तरे तु द्विवचन बहुवचने अपि स्तः। तेनैकदिगिति । अत्रत्यैकशब्दः समानार्थकः । अत एव तुल्यार्थैरिति तृतीया सिद्धा। एका माता । साधारणीत्यर्थः । तदर्थकाभावः = अल्पार्थकाभावः ।

स्वाभिधेयापेक्षावधीति समस्तः पाठः। नियमेनावधिसापेक्षेऽर्थे वर्तमानपूर्वादीनामित्यर्थः। दक्षिणा गाथका इति। उत्कर्षस्यावधिसापेक्षत्वादत्र व्यवस्थाऽस्तीत्याग्रहे तु-उत्तरे प्रत्युत्तरे च शक्त इति प्रत्युदाहरणं बोद्ध्यम् । उत्तराः कुरव इति । सुमेर्वधिकपरदेशरूपोपाधिविशिष्टकुरुषु उत्तरशब्दः शब्दं प्रवृत्तिनिमित्तीकृत्य वर्तते इति व्यवस्थाविषयत्वं बोद्ध्यम् । दिग्वाचकपूर्वादिशब्दानां मध्याह्नसूर्यसंयोगिदेशावधिकोदयाचलास्ताचलसंनिहितदेश - तत्कालिकसूर्यसम्मुखयावद्देश - तत्कालिकतत्पृष्ठस्थयावद्देश - रूपोपाधिविशिष्टदिशि तत्तच्छब्दं प्रवृत्तिनिमित्तीकृत्य प्रवृत्तिरिति उपाध्यन्तर्गततया व्यवस्थाऽस्त्येव, मद्ध्याह्ने सूर्यस्योदङ्मुखत्वात् । देशवृत्तीनां तत्तदवधिकोदयाचलसन्निहितत्वादि प्रवृत्तिनिमित्तमित्यन्यत्र विस्तरः।

अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये।
छिद्रात्मीयविनाबहिरवसरमद्ध्येऽन्तरात्मनि च ॥

इतिकोशोक्तार्थान्तरव्युदासार्थमाह - अन्तरं बहिर्योगेति। अयं त्रिसूत्र्या क्रियमाणः सञ्ज्ञाविकल्पो जसाधारे शीभाव एव, न त्वकजाद्युदात्तत्वादाविति बोद्ध्यम् ।

भावबोधिनी : समस्तः पाठ इति । पृथक्पाठे तु स्वाभिधेयापेक्षत्वस्य नियमेऽनन्वयः स्यादित्यसङ्गतिर्बोध्या । अवधौ स्वाभिधेयापेक्षत्वञ्च पूर्वाद्यर्थविषयकज्ञान-प्रयोज्याकाङ्क्षानिवर्तकत्वम् । तस्य नियमे पूर्वादीनां वृत्त्यसम्भवेन विवक्षितार्थमाह नियमेनेति । अवधिविषयकनियताकाङ्क्षाजनकज्ञानविषयार्थे वर्तमान इत्यर्थः । शब्दमिति। संज्ञास्थले तस्यैव प्रवृत्तिनिमित्तत्वमिति भावः । उपाध्यन्तर्गतेति । अवधेरित्यादिः । शीभाव एवेति । अयजादौ तु गणपाठान्नित्यसंज्ञेति भावः ।

बालबोधिनी : समस्तः पाठ इति । अपेक्ष्यत इत्यपेक्षः । कर्मणि घञ् । स्वस्य पूर्वादिशब्दस्याभिधेयो योऽर्थस्तेन अपेक्ष्यते स्वाकांक्षाशान्तये नियमेन जिज्ञास्यत इति स्वाभिधेयापेक्षः । स चासौ अवधिश्च स्वाभिधेयापेक्षावधिः । समानाधिकरणसमासः । तस्य नियमः = नियमेनोपशान्तिरित्यर्थः । स्वाभिधेयेन अपेक्ष्यमाणस्यावधेर्नियमो व्यवस्थेति वाक्यार्थः सम्पद्यते । यद्धर्मावच्छिन्नविषयकज्ञानोत्तरमवधिविशेषविषयिणी जिज्ञासा नियमेनोदेति तद्धर्मावच्छिन्नार्थबोधजनकपूर्वादीनामित्यर्थः ।

उत्तराः कुरवः इत्यत्र संज्ञावाचकस्य उत्तरशब्दस्य सर्वनामत्ववारणायासंज्ञायामित्युक्तम् । सुमेरुमवधीकृत्योत्तरशब्दो वर्तत इति व्यवस्थायास्सत्वेन प्राप्तसंज्ञावारणाया-

संज्ञायामिति भावः । तदेवाह सुमेर्वधिकेति । ''अयं भावः । वस्तुत आकाशस्यैकत्वेऽपि घटकाशम्, मठाकाशमित्युपाधिभेदेन भेदवत् एकस्या अपि दिश उपाधिभेदात् भेदो दृश्यते। उपधिश्च पृथ्वीमध्यम् । तत्प्रान्तवर्तिनश्चत्वारः पर्वताश्च । तत्र मध्याह्नसूर्यसंयोगवान् देशो मध्यम् । तच्च हिमवद्विन्ध्यमध्यदेशवर्ती आर्यावर्त एवात्र विवक्षितः । एवञ्च तदवधिकोदयाचलपर्यन्तयावद्देशोपाधिका दिक् पूर्वा । तदवधिकास्ताचलपर्यन्तयावद्देशो-पाधिका दिक् प्रतीची । तदवधिकमध्यह्नसूर्यसम्मुखयावद्देशोपाधिका दिगुत्तरा । तत्पृष्ठस्थयावद्देशोपाधिका दिक् दक्षिणेति विवेकः । निरुक्तदिशा तत्तदुपाध्यवच्छिन्नदिशि तत्तच्छब्दं प्रवृत्तिनिमित्तीकृत्य पूर्वादयश्शब्दाः प्रवर्तन्त इति दिग्वाचकपूर्वादिशब्दानां शब्दप्रवृत्तिनिमित्तकत्वम् । पृथ्वीमध्यभागावधिकोदयाचलपर्यन्तदेशादिरूपोपाधेः पूर्वादि-शब्दाभिधेयत्वेन तादृशोपाध्यन्तर्गतोदयाचलपर्यन्तदेशस्य नियमेनावध्याकाङ्क्षायास्सत्वात् व्यवस्थाविषयत्वमेषामव्याहतमेवे''ति स्पष्टीकृतं शास्त्रिपादैः गुरुप्रसादशेषे ।

देशवाचिनां व्यवस्थाविषयत्वं दर्शयति देशवृत्तीनामिति । अन्यत्र = शब्दरत्नादौ। अन्तरमिति । अवकाशे यथा अन्तरे देहि । अवधौ मासान्तरे देयम् । परिधाने अन्तरे शाटकाः । अन्तर्द्धौ घनान्तरितः सूर्यः । भेदे उदरमन्तरं कुरुते, यदन्तरं सिंहशृगालयोर्द्वयोः। तादर्थ्ये तवान्तरे ऋणं गृहीतम् । छिद्रे अन्तरं पश्यति । आत्मीये अन्तरे जनाः । बहिरर्थे अन्तरे चाण्डालगृहाः । अवसरे अन्तरज्ञः सेवकः । मध्ये अनयोरन्तरे शैलः । अन्तरात्मनि अन्योऽन्तर आत्मा आनन्दमयः । विनार्थे अन्तरेण पुरुषकारम् । चकारात् सदृशार्थोऽपि यथा स्थानेऽन्तरतमः ।

न बहुव्रीहौ। चिकीर्षिते इत्यध्याहारलभ्यम् । प्राचीनवृत्तिकृद्रीत्येदं व्याख्यानम् । नेदं सूत्रं बहुव्रीहेस्तत्त्वनिषेधकम् , उपसर्जनप्रतिषेधेन सिद्धेः। प्रक्रियावाक्य इति। अलौकिके इत्यर्थः। न चालौकिके समासप्रवृत्त्यैकार्थीभावस्यापि तत्रैव कल्पनादुपसर्जनत्वादेव समास इव तत्रापि निषेधः सिद्ध इति वाच्यम् । तत्रैकार्थीभावस्यारोपेऽपि स्वार्थविशिष्टार्थान्तर-बोधकत्वरूपोपसर्जनत्वाभावेनातिभवकानित्यत्रेव प्राप्तस्याकचोऽभावार्थं सञ्ज्ञानिषेध इत्यत्र तात्पर्यात् । लौकिके तु नास्य प्रवृत्तिस्तत्र समासस्य चिकीर्षितत्वाभावात् । अतिक्रान्त इत्यादिना पूर्वोक्तस्य लौकिकवाक्यस्य समासस्य च दृष्टान्तद्वयमुच्यते । अकृतव्यूहपरिभाषा तु नास्त्येवेति भावः। भाष्यकारास्त्विति । अकचस्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयमिति भाष्योक्तेः वृत्तिकृद्रीत्येदं व्याख्यानमयुक्तमिति भावः। ननु स्मृतिद्वयप्रामाण्याद्विकल्पोऽस्तु, कथं प्रत्याख्यानमत आह - यथोत्तरमिति। एतच्च धिन्विकृण्व्योर चेति सूत्रे भाष्ये ध्वनितम्।

एवञ्च वृत्तिकृदुक्तार्थकं नेदम् । तस्मादुपसर्जनप्रतिषेधानुवादकम् । यद्वा वार्तिककृता तस्य कृतत्वात्सूत्रकृतेदमारब्धम् । सञ्ज्ञाया अन्वर्थत्वमपि भाष्यकृदूहितमेव न सूत्रकृदूहितमिति विभाषा दिगिति सूत्रे कैयटे स्पष्टम् । सूत्रे सप्तमीनिर्देशः प्रथमार्थ एव । अत एव वृत्तिकृदुक्तः प्रक्रियावाक्ये निषेध इत्यर्थो भाष्यकृता बहुव्रीहिपदस्य तदर्थवाक्यस्थपदलक्षणया साधितः। अन्यथा मूलोक्तरीत्या सिद्धे तादृशलक्षणाप्रयासो व्यर्थःस्यादिति तत्त्वम् ।

भावबोधिनी : तत्त्वमिति । सर्वनामत्वमित्यर्थः । कुतो नेत्यत आह उपसर्जनेति । नन्वेकस्य समासस्यैव दृष्टान्तत्वे वक्तव्ये विग्रहवाक्योच्चारणं व्यर्थमत आह अतीति । लौकिकवाक्यस्य त्वकं पितेत्यस्य । समासस्य त्वत्कपितृक इत्यस्य । नन्वकजुपजीव्यस्यानुपसर्जनत्वस्य भाविना बहुव्रीहिणा नाशेनाकृतव्यूहपरिभाषया सिद्धे सूत्रं व्यर्थमत आह अकृतेति । इदञ्च स्वमते । अत एव ज्ञापकात् साऽनित्येति वदन्ति प्राञ्चः । प्रत्यङ्गम् अन्तरङ्गम् । समासप्रवृत्तेः प्रागेवेत्यर्थः । स्मृतिद्वयेति । सूत्रश्लोकावित्यर्थः । ध्वनितमिति । तत्र हि लोप इत्यनुवर्त्य विधातव्ये अकारविधानं व्यर्थम् । न चोप्रत्ययनिमित्तकलघूपधगुणस्य धिनोतीत्यादाविकारे आपत्तिः । अकारविधाने तु तल्लोपस्य स्थानिवद्भावेन गुणो न भवतीति वाच्यम् । लोपविधानेऽपि न धातुसूत्रेण निषेधसिद्धेः । एवं स्थिते अकारविधायकन्यासकरणेन सूत्रकृतः भाष्यकारक्रियमाण न धातुसूत्रप्रत्याख्यानेऽपि तात्पर्यमस्तीति ध्वनितमित्यर्थः । एवञ्चेति । अकच इष्टत्वे चेत्यर्थः । उपसर्जनप्रतिषेधानुवादकं बहुव्रीहिघटकोपसर्जनप्रतिषेधानुवादकं विधायकमेवेत्याह यद्वेति । तस्य = उपसर्जनप्रतिषेधस्य । इदमिति । बहुव्रीहेः सर्वनामत्वनिषेधकप्रकृतसूत्रमित्यर्थः । अन्वर्थसंज्ञां कुर्वता सूत्रकृता उपसर्जनप्रतिषेधस्य कृतत्वादनुवादकमेवेत्याह भाष्यकृदिति । एवञ्च विधायकमेवेत्यर्थः । सूत्रार्थमाह सूत्र इति । अत एव = प्रथमार्थत्वादेव । अन्यथा = प्रथमार्थत्वाभावे । मूलोक्तरीत्येति । चिकीर्षित इत्यध्याहारं विषयसप्तमीं वा आश्रित्य उक्तरीत्येत्यर्थः ।

बालबोधिनी : न बहुव्रीहौ । बहुव्रीहौ सर्वादीनि सर्वनामानि न स्युरिति सूत्रार्थे सति प्रियसर्वायेत्यादौ बहुव्रीहिसमासावयवसर्वादीनामुपसर्जनत्वादेव संज्ञोपसर्जनीभूतास्तु न सर्वादय इति वचनेन सर्वनामत्वनिषेधे सति तेन तदन्तविधिनापि विशिष्टस्य सर्वनामसंज्ञाया अप्राप्त्या सूत्रमिदं व्यर्थं स्यादिति चिकीर्षिते इति पदाध्याहारेण व्याख्यातीत्याह चिकीर्षित इति । बहुव्रीहाविति विषयसप्तम्याश्रयणादयमर्थो लभ्यत इति भावः । सिद्धान्तस्य वक्ष्यमाणत्वादाह प्राचीनेति । तत्पदाध्याहारेण व्याख्यातुराशयमाह नेदमिति । तत्त्वनिषेधकम्=

तदन्तविधिप्राप्तसर्वनामत्वनिषेधकम् । उपसर्जनप्रतिषेधेन सिद्धेरिति । निरुक्तरीत्या बहुव्रीहिसमासावयवसर्वादीनां सर्वादित्वनिषेधेन विशिष्टस्य तदन्तविधिनापि सर्वनामसंज्ञाया अप्राप्त्या सूत्रस्य नैरर्थक्यात् चिकीर्षित इत्यध्याहारः कार्य इति भावः ।

सूत्रवैयर्थ्यमाशङ्क्याह न चेति । तत्रैव = अलौकिके । तत्रापि = अलौकिकप्रक्रियावाक्येऽपि । निषेधः = सर्वनामत्वनिषेधः । समाधत्ते तत्रेति । अलौकिकप्रक्रियावाक्ये इत्यर्थः । एकार्थीभावस्य = एकोपस्थितिनियामकसमुदायशक्तेरित्यर्थः । आरोपेऽपीति । समासगतसमुदायशक्तेरलौकिके आरोपेऽपीत्यर्थः । स्वार्थविशिष्टेति । अलौकिकवाक्यात् बोधस्य कस्याप्यभावेन न प्रधानार्थविशिष्टविशेषणार्थबोधकत्वरूपोपसर्जनत्वं तत्रेति भावः। तत्र संज्ञानिषेधस्य फलप्रदर्शने व्यतिरेकमुखेन दृष्टान्तमाह अतिभवकानिति ।

ननु मूले 'इह = न बहुव्रीहाविति सूत्रे समासात् प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते । अन्यथा लौकिकविग्रहवाक्य इव तत्राप्यकच् प्रवर्तेत । स च समासेऽपि श्रूयेत। अतिक्रान्तो भवकन्तमतिभवकानितिवत्' इत्युक्तम् । तत्र समासेऽपि श्रूयेतेत्यस्य अतिभवकानिति समास एव दृष्टान्ततया दातुं युक्तः । न तु प्रकृतानुपयोगित्वेन अतिक्रान्तो भवकन्तमिति लौकिकवाक्यमित्यत आह अतिक्रान्त इत्यादिनेति । अतिक्रान्तो भवकन्तमतिभवकानित्यनेनेत्यर्थः । लौकिकवाक्यस्य त्वकं पिता यस्येत्यस्य । समासस्य= त्वत्कपितृक इत्यस्य । यथा अतिक्रान्तो भवकन्तमिति लौकिकविग्रहवाक्ये इवालौकिकप्रक्रियावाक्ये प्रवर्तमानोऽकच् समासेऽपि श्रूयेत तथात्रापि त्वकं पितेति लौकिकविग्रहवाक्ये इवालौकिकप्रक्रियावाक्ये प्रवर्तमानोऽकच् समासेऽपि श्रूयते । तद्वारणाय बहुव्रीहौ चिकीर्षिते अलौकिकप्रक्रियावाक्ये एव सर्वनामसंज्ञा निषिध्यत इति भावः ।

ननु अकजुपजीव्यस्य सर्वनामसंज्ञाप्रयोजकस्यानुपसर्जनत्वस्य भाविना बहुव्रीहिणा नाशेन तत्प्रयुक्तकार्यस्याप्राप्तिरिति अकृतव्यूहपरिभाषयैव सिद्धे सूत्रं व्यर्थमत आह अकृतव्यूहेति । सा नास्तीति स्वमते । प्रचीनमते तु सूत्रारम्भसामर्थ्यात् तस्या अनित्यत्वमिति भावः ।

भाष्यकाराभिमतं सूत्रप्रत्याख्यानप्रकारमाह भाष्यकारस्त्विति । अकच्स्वराविति। स्वरः स्वाङ्गशिटामित्यनेन विहितः । स्वाङ्गशिटामदन्तानामित्याद्युदात्तत्वमित्यर्थः । प्रत्यङ्गम् = प्रत्यवयवम् । पूर्वत्र परत्र वा । अङ्गं प्रति प्रत्यङ्गम् । यदि प्रत्यङ्गपदस्यान्तरङ्गार्थकत्वमुच्यते तर्हि समासप्रवृत्तेः पूर्वमकच्स्वरौ कार्याविति तदर्थ इति बोध्यम् । न बहुव्रीहाविति सूत्रे भाष्ये सूत्रप्रत्याख्यानसन्दर्भे 'गोनर्दीय आह - अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयम्।

त्वकत्पितृको, मकत्पितृक इत्येव भवितव्यम्' इत्युक्तम् । इदं व्याख्यानम् = चिकीर्षिते इत्यध्याहृत्य व्याख्यानम् । अयुक्तमिति । भाष्यकृता सूत्रस्यैव प्रत्याख्यानादित्यर्थः । स्मृतिद्वयम् । सूत्रभाष्यवार्त्तिकद्वयम् । एतच्चेति । भाष्यकृत्करिष्यमाणसूत्रप्रत्याख्यानस्य सूत्रकृदभिमतत्वमित्यर्थः । भाष्ये ध्वनितमिति । धिन्विकृण्व्योरच (31-1-80) इति सूत्रे भाष्ये 'क्वायमकारः श्रूयते ? न क्वचित् श्रूयते । लोपोऽस्य भविष्यति । अतो लोप आर्धधातुके इति । यदि न क्वचित् श्रूयते किमर्थमयमुच्यते । न 'लोप' इत्येवोच्येत । नैवं शक्यम् । लोपे सति गुणः प्रसज्येत । अत्वे पुनः सति अकारलोपस्य स्थानिवद्भावात् गुणो न भविष्यति । ननु च लोपेऽपि सति न धातुलोप आर्धधातुके इति प्रतिषेधो भविष्यति । आर्धधातुकनिमित्ते लोपे स प्रतिषेधः । न चैष आर्धधातुकनिमित्तो लोपः । अपि च प्रत्याख्यायते खल्वपि स योगः । तस्मिन् प्रत्याख्याते गुणः स्यादेव । तस्मादत्वं वक्तव्यम्' इत्युक्तम् । तत्रोद्योते अपि च प्रत्याख्यायत इति भाष्यमवतार्य 'अनेन सूत्रमतापेक्षया प्रत्याख्यानवादिमतं प्रबलमिति ध्वनितम् । एतन्मूलकमेव पठ्यते यथोत्तरं मुनीनां प्रामाण्यमिति' इति स्पष्टीकृतं नागेशेन । अयं भावः । धिन्विकृण्व्योरिति सूत्रेणाकारविधानं मास्तु । लोप इत्यनुवृत्त्या तस्यैव विधानं भवतु । न च लोपे सति धिनोतीत्यादौ उप्रत्ययनिमित्तकलघूपधगुण इकारस्य प्रसज्येत । अकारविधाने तु तल्लोपस्य स्थानिवद्भावेन गुणापत्तिर्नास्तीति वाच्यम् । लोपविधानेऽपि न धातुलोप इति सूत्रेण गुणनिषेधसिद्धेः । तथा च लोप एव विधीयताम्, अकारादेशविधानं व्यर्थमिति शङ्कायां न धातुलोप इति सूत्रप्रत्याख्यानपक्षे अल्लोपस्य स्थानिवद्भावेन गुणवारणायाकारादेशविधानमवश्यकमिति तदाशयः । अनेन सूत्रमतात् प्रत्याख्यानवादिमतं प्रबलमिति प्रत्याख्यानवादिसम्मतलक्ष्यमेव यथाकथञ्चित् सूत्रमत्रेऽपि साध्यं, न तु विपरीतमिति ध्वनितमिति भावः । एवञ्च प्रत्याख्यानविरुद्धफलकसूत्राशयकल्पनं वृत्तिकाराणामनुचितमिति सूचितं तदाह एवञ्चेति। अकचूस्वरौ तु कर्तव्याविति अकच इष्टत्वादेव, उत्तरमुनिप्रामाण्येन तद्विरोधे चेत्यर्थः । इदं = चिकीर्षिते इत्यध्याहृत्य व्याख्यानं न वृत्तिकृदुक्तार्थकम् । किन्तु उपसर्जनप्रतिषेधानुवादकं = बहुव्रीहिघटकोपसर्जनप्रतिषेधानुवादकमिति भावः । कैयटोक्तं विधायकत्वमाह यद्वेति ।

तस्य = उपसर्जनप्रतिषेधस्य । इदम् = बहुव्रीहेः सर्वनामत्वप्रतिषेधकं प्रकृतसूत्रम्। ननु सर्वनामानीति महासंज्ञां कुर्वता सूत्रकारेणापि उपसर्जनप्रतिषेधः सूचित इत्यनुवादकमेवेत्यत आह संज्ञाया इति । एवञ्च विधायकमेवेत्यर्थः । कैयट इति । अत्रारुचिबीजं तु महर्षीणां सर्वज्ञत्वभङ्ग इति बोध्यम् । एवञ्च वृत्तिकृदुक्तं नापूर्वम् । किन्तु उपसर्जनप्रतिषेधानुवादकमिति सिद्धम् । नन्वेवं सामानाधिकरण्यानुरोधात् प्रथमान्त एवोचितः कथं

सप्तम्यन्त इति चेदाह सूत्रे इति । अत एव = तस्य तदर्थत्वादेव । अन्यथा = प्रथमार्थत्वाभावे। मूलोक्तरीत्या = चिकीर्षित इत्यध्याहारेण ।

तदनुगुणनामेवेति। प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचकत्व-समानाधिकरणसर्वनामपदवत्त्वेन बोधकमहासञ्ज्ञया सर्वार्थोपस्थापक-सर्वादीनामनुकरणावश्यकत्वेनेतरेषामनुकरणे मानाभावः। नामपदस्वारस्येन प्राधान्येनेत्यस्य लाभः। उपसर्जनं हीतरविशेषणतयैवोपस्थापकमिति तेन तद्व्यावृत्तिः। पूर्वादिसङ्ग्रहाय स्वीयसर्वार्थेति। सञ्ज्ञाव्यावृत्तयेऽभिव्यक्तेतिन्यायमूलकं प्रसिद्धेतीति भावः। सर्वादिसूत्रस्य चायमर्थः - सर्वादीनि तदन्तानि चोक्तसर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवन्तीति। तत्र प्राप्ताप्राप्तविवेकन्यायेन सर्वनामपदवत्त्वांशे एव विधिः। सर्वार्थवाचकत्वस्य लोकतः सिद्धेः। एतेनान्वर्थसञ्ज्ञोपस्थितसर्वार्थवाचकस्य विशेष्यतया सर्वादीनीत्यस्य तद्विशेषणत्वात्तदन्तविधिरित्यपास्तम् । एकपदोपस्थाप्ययोरर्थयोः परस्परमुद्देश्यविधेयभावेनान्वयस्याव्युत्पन्नत्वात्। रूढ्यर्थयोगार्थयोरन्यतरवियोगेनान्यत्रान्वयायोगाच्च। तदन्ते सर्वार्थवाचकत्वं त्ववयवद्वारा बोद्ध्यम् । एतेन तदाक्षिप्तस्य विशेष्यतेत्यपास्तम् । तद्विनाऽनुपपत्त्य-भावेनाक्षेपायोगात्, आक्षिप्तस्य शाब्देऽन्वये मानाभावाच्च। केचित्तु आवृत्त्या एकस्योद्देश्यतापरस्य विधेयतेति वदन्ति। परन्त्वाद्यः पक्ष इतो लघुरिति बोद्ध्यम् । सन्निवेशादिति। तदनुमानादित्यर्थः। अत्रोपसर्जनत्वमितरविशेषणत्वेनार्थोपस्थापकत्वम् । तदोः स इति सूत्रे अदस एव दस्य नान्यस्येति नियमे द्वीयतेरप्रत्यये द्व इति प्राप्नोति, स्व इति चेष्यते, यथालक्षणमप्रयुक्ते - इति भाष्यन्तु प्रकृतसूत्र - नञ्सूत्रादिस्थानेकभाष्य-विरोधादेकदेश्युक्तिरिति न तद्विरोधः।

__भावबोधिनी :__ तदनुगुणानामेवेति । अन्वर्थसंज्ञानुगुणानामेवेत्यर्थः । आनुगुण्यमेवाह प्राधान्येनेति । तृतीयार्थो वैशिष्ट्यम्, तस्य विषयपदार्थैकदेशविषयतायामन्वयः । सा च विशेष्यताख्यैवेति । उपस्थितविशेष्यभूतेति आद्यदलस्यार्थः । प्रसिद्धत्वञ्च शीघ्रोपस्थितिविषयत्वम् । स्वीयत्वञ्च स्वप्रवृत्तिनिमित्तसमानाधिकरण-कृत्स्नधर्मावच्छिन्नत्वम् । धर्मत्रयस्यापि सर्वार्थेऽन्वयः । सर्वादीनामिति । लक्ष्यस्थसर्वादीनामित्यर्थः । लाभ इति । देवदत्तपदम्, देवदत्तस्य नामेत्यादौ तथैवानु-भवादिति भावः । प्राधान्येनेत्यस्य फलमाह उपसर्जनं हीति । इतरविशेषणतयैवेति । इतरविशेषणीभूतस्वार्थस्यैवोपस्थापकमित्यर्थः । इतरसम्बन्धस्वार्थस्यैव न तु स्वार्थमात्रस्येत्यर्थः । एवकारेण स्वार्थमात्रस्य व्यवच्छेदः । तेन प्राधान्येनेति विशेषणेन।

तत् उपसर्जनम् । स्वीयसर्वार्थेति । स्वार्थे स्वीयत्वविशेषणमित्यर्थः । स्वीयत्वानुपादाने तु पूर्वादिशब्दानां दक्षिणाद्यर्थवाचकत्वाभावेन सर्वार्थवाचकत्वं नेति संज्ञा न स्यात् । तदुपादाने तु स्वस्य यावन्तोऽर्थाः स्वप्रवृत्तिनिमित्तसमानाधिकरणतत्तद्धर्मवच्छिन्नाः तद्बोधकत्वान्न दोष इति भावः । अत्र प्रमाणं पूर्वादिशब्दानां गणे पाठ एव । अभिव्यक्तेति। यदि सर्वनामसंज्ञायाः पदकार्यत्वाभावेन नात्र तन्न्यायावकाश इत्याक्षेपः तदा नामपदेनैव प्रसिद्धत्वस्यापि लाभ इति बोध्यम् । इदमत्र बोध्यम् । प्राधान्येनान्त्याद्यदलाभावे अतिसर्वादौ दोषः । तथाहि वैयाकरणमते समासस्येव तद्घटकानामपि विशिष्टार्थे शक्तिः घटकानां केवलस्वार्थेऽपि शक्तिः । उपस्थितिस्तु समासादिवावयवादपि अवयवशक्ति-सहकृतसमुदायशक्त्या स्वार्थविशिष्टार्थान्तरस्यैव न तु केवलस्वार्थस्येति तत्त्वम् । ततश्चोक्तस्थले सर्वशब्दादपि सर्वातिक्रमणकर्तृरूपार्थस्योपस्थितौ तद्घटकसर्वरूपार्थस्य स्वीयत्वेन प्रसिद्धत्वाच्च तद्बोधकत्वं प्रकारतया सर्वशब्देऽप्यस्तीति सर्वनामत्वापत्त्या तदन्तत्वाद्विशिष्टस्यापि संज्ञा स्यात् । अतः प्रथमविशेषणं देयम् । दत्ते तु तस्यार्थस्योपस्थितिमुख्यविशेष्यत्वाभावेन न दोष इति ।

नन्वेवमप्युक्तस्थले दोषो दुर्वारः । सर्वशब्दादुपस्थितसर्वातिक्रमणकर्तृ-रूपार्थस्योक्तविशेषणत्रयघटितत्वेन संज्ञा स्यादिति चेन्न । विशेषणद्वयसत्वेऽपि स्वीयत्वाभावात् । स्वीयत्वमितरसमभिव्याहाराप्रयोज्यस्वशक्तिग्रहविशेष्यतावच्छेदक-समानाधिकरणकृत्स्नधर्मावच्छिन्नत्वम् । उक्तार्थीयशक्तिग्रहस्यातिसमभि-व्याहारप्रयोज्यत्वादिति । नन्वेवं स्वीयत्वविशेषणेनैव वारणसम्भवे आद्यविशेषणं व्यर्थमिति चेन्न । सर्वशब्दादुपस्थितविशिष्टार्थघटक सर्वरूपार्थीयशक्तिग्रहस्येतराप्रयोज्यत्वेन तद्रूपार्थे निरुक्तस्वीयत्वं प्रसिद्धत्वं चास्तीति तादृशार्थमादाय दोषापत्तेः । प्राधान्येनेत्युक्तौ तु यस्य च प्राधान्यं विशिष्टार्थस्य न तस्य स्वीयत्वं, यस्य च स्वीयत्वं विशिष्टार्थ-घटकसर्वरूपार्थस्य न तस्य प्राधान्येनोपस्थितिविषयत्वमिति न दोषः । तथा च विशेषणद्वयस्यापि अतिसर्ववारणमेव फलम्, द्वितीयस्य पूर्वादिसंग्रहोऽपि फलम्, न तु सर्वादिसूत्रेण सर्वाद्यन्तस्य संज्ञा विधीयते । अतिसर्वेत्यस्य तदन्तत्वेन तदर्थीयशक्तिग्रहस्येतरसमभिव्याहाराप्रयोज्यत्वेन तदर्थे विशेषणत्रयस्यापि सत्वेन तादृशसमासार्थमादाय दोषो दुर्वार इति चेन्न । न केवलं सर्वाद्यन्तस्य संज्ञा विधीयते किन्तु उक्तविशेषणत्रयघटितसर्वार्थवाचकस्य सर्वाद्यन्तस्यैवेति । अतिसर्वादावीदृश-विशेषणत्रयघटित सर्वार्थवाचकसर्वाद्यन्तत्वाभावेन दोषस्यैवानवकाशात् । अत एव तदन्ते सर्वार्थवाचकत्वं तु अवयवद्वारेति वक्ष्यते । परमसर्वादौ तु इत्थं निर्वाहः ।

केवलसर्वरूपार्थीयशक्तिग्रहस्येतरसमभिव्याहाराप्रयोज्यत्वेन तदर्थे स्वीयत्वं तस्यैवार्थस्य परमत्वविशिष्टसर्वत्वेन रूपेण सर्वशब्दाद्युपस्थित्या विशेष्यत्वं प्रसिद्धत्वञ्च वर्तत इति निरुक्तविशेषणत्रयघटितसर्वार्थवाचकसर्वाद्यन्तत्वमस्त्येवेति अतिसर्वादावेवं नेति विविच्य बोध्यम् । सूत्रार्थमाह सर्वादीति । सर्वादीनीति व्यपदेशिवद्भावलब्धार्थकथनम् । केवलसर्वशब्दस्य सर्वाद्यन्तत्वं व्यपदेशिवद्भावेनेत्यर्थः । ननु निरुक्तसर्वार्थ-वाचकत्वसमानाधिकरणसर्वनामपदवत्वस्य विधानेऽतिसर्वादौ सर्वाद्यन्तत्व-रूपोद्देश्यतावच्छेदकसत्वेन सर्वनामतापत्तिरत आह तत्रेति । सर्वनामपदवत्वांश एवेति। एवकारेण सर्वार्थवाचकत्वस्य व्यवच्छेदः । किन्तु तस्यानुवाद्यत्वमेवेत्यर्थः । ननु सिद्धस्यैवानुवाद्यत्वसंभवात् कथं तत्सिद्धिरिति चेत् तत्सिद्धिमाह लोकत इति । तथा च निरुक्तसर्वार्थवाचकत्वस्यापि उद्देश्यतावच्छेदककोटिप्रविष्टत्वेनातिसर्वादौ निरुक्तसर्वार्थवाचकत्वाभावेन न दोष इति भावः । ननु स्यादेतत् । यदि निरुक्तसर्वार्थवाचकत्वं सर्वत्र सिद्धं स्यात् तर्हि अनुवाद्यत्वं स्यात् । न चैतदस्ति, संज्ञायां, सर्वे अतिसर्वादौ चाभावात् । आद्यस्याप्रसिद्धार्थबोधकत्वात् द्वितीयस्य सर्वार्थप्रकारकबोधजनकत्वात् । एवञ्च निरुक्तसर्वार्थवाचकत्वविशिष्टसर्वनामपदवत्वस्य विशिष्टस्य विधेयत्वं स्यात् । ततश्च संज्ञोपसर्जनयोरपि सर्वनामपदबोध्यत्वं निरुक्तसर्वार्थविशेष्यकबोधजनकत्वमपि स्यादिति चेत् सत्यम् । संज्ञायां लोकतः, अतिसर्वादौ च समर्थः पदविधिरित्यतः सर्वातिक्रमणकर्तरि पूर्वमेव शक्तिर्गृहीता । अनेन तु न ज्ञातायाः शक्तेर्निषेधः क्रियते किन्तु सर्वाद्यन्ते सर्वार्थवाचकत्वरूपधर्मः तत्रैव सर्वनामपदस्य शक्तिश्च विधीयत इति वक्तव्यम् । निरुक्तसर्वार्थवाचकत्वस्य विधानेऽपि पूर्वगृहीतशक्तेरनपायात् संज्ञारूपसर्वादिप्रसिद्धार्थस्य अतिसर्वात् सर्वातिक्रमण-कर्तृरूपार्थस्यैवोपस्थितौ तद्विधानं व्यर्थमेव स्यात् । न च भाविसर्वार्थविधिं पर्यालोच्य पूर्वमेव शक्तिग्रहो न भवति । अतिक्रान्तस्सर्वोऽतिसर्व इति सर्वेत्यस्यापि संज्ञा करणीयेति कुतो न स्यादिति वाच्यम् । पूर्वं शक्तिग्रहे बाधकाभावेन शक्तिग्रहप्रवृत्तौ पुनश्शक्त्यन्तरविधानेन तन्निवारणासम्भवात् । न च तद्विधानस्याशक्यत्वेऽपि सर्वनामपदबोध्यत्वमात्रं स्यादिति वाच्यम् । निरुक्तसर्वार्थवाचकत्वस्य उद्देश्यतावच्छेदककोटिप्रवेशपूर्वकज्ञानेनोक्तस्थले तदभावेन संज्ञाभावात् । एवञ्च यत्र पूर्वं सर्वाद्यन्तत्वं सर्वार्थवाचकत्वञ्च लोकतोऽस्ति तत्र तमनूद्य संज्ञा विधीयत इति तात्पर्यात् । एतेनेति । अस्मदुक्तसूत्रार्थेनेत्यर्थः । अन्वर्थसंज्ञोपस्थितस्येति । सर्वनामानीति पदोपस्थितस्येत्यर्थः । उद्देश्यविधेयभावेनेति । सर्वार्थवाचकस्योद्देश्यत्वं

सर्वनामपदस्य विधेयत्वं बोध्यम् । एवकारोपस्थितयोरन्ययोगव्यवच्छेदयोः धातूपस्थितयोः फलव्यापारयोश्च परस्परमुद्देश्यविधेयभावेनान्वयदर्शनादाह रूढ्यर्थेति। तत्त्वञ्च संज्ञाया बोध्यम् । अन्यत्रेति । सर्वाद्यन्यत्रेत्यर्थः । किञ्चास्मिन् पक्षे सर्वाद्यन्तानि सर्वार्थवाचकानि सर्वनामपदवन्तीत्यर्थापत्त्या अतिसर्वादौ सर्वशब्दस्य निरुक्तसर्वार्थवाचकत्वाभावेऽपि समुदायस्य सर्वाद्यन्तत्वेन निरुक्तसर्वार्थवाचकत्वेन च संज्ञापत्तिरिति दोषोऽपि बोध्यः ।

ननु शेखरकृन्मतेऽपि सर्वाद्यन्तशब्दस्वरूपेष्वेव सर्वार्थवाचकत्व-विशेषणेनातिसर्वादावुक्तदोषो दुर्वार इत्यत आह तदन्त इति । अवयवद्वारेति । स्वरूपस्वाश्रयघटितत्वान्यतरसंबन्धेनेत्यर्थः । केवलसर्वशब्दे तदन्तत्वं व्यपदेशिवद्भावेन सर्वार्थवाचकत्वं स्वरूपसंबन्धेन । परमसर्वादौ तु तदन्तत्वं स्वत एव सर्वार्थवाचकत्वन्तु स्वाश्रयघटितत्वसंबन्धेन । स्वं सर्वार्थवाचकत्वं स्वाश्रयः सर्वः तद्धटितत्वं तस्येति । एवञ्च स्वरूपसंबन्धेन सर्वार्थवाचकत्वविशिष्टानि यानि सर्वादीनि तदन्तानि शब्दस्वरूपाणि स्वरूपस्वाश्रयघटितत्वान्यतरोद्देश्यत्वोभयघटितसामानाधिकरण्यसंबन्धेन सर्वनामपदवन्तीति सूत्रार्थः पर्यवसन्नः । केवले स्वरूपघटितसामानाधिकरण्यं तदन्ते स्वाश्रयघटितसामानाधिकरण्यम् । अतिसर्वप्रभृतीनां सर्वाद्यन्तत्वेऽपि स्वरूपतः सर्वार्थवाचकत्वविशिष्टसर्वाद्यन्तत्वाभावेन न दोष इति भावः । एतेनातिसर्वादौ समासार्थमादाय निरुक्तसर्वार्थवाचकत्वस्य स्वरूपसम्बन्धेन सत्वेन सर्वनाम-पदत्वापत्तिरित्यपास्तम् । स्वरूपेण सर्वार्थवाचकत्वस्य सर्वाद्यन्ते विशेषणादिति । एवञ्चावयवे निरुक्तसर्वार्थवाचकत्वं स्वरूपसम्बन्धेन यत्र तत्रैव तदन्ते सर्वनामत्वमिति तत्त्वम् । एतेनेति । अस्मदुक्तरीत्या निर्वाहिणेत्यर्थः । तदाक्षिप्तस्य अन्वर्थसंज्ञाक्षिप्तस्य । एवमेवास्त्विति शङ्कायामाह तद्विनेति । आक्षेपं विनेत्यर्थः ।

पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनं विना श्रुतपीनत्वस्यानुपपत्त्या तस्याक्षेपस्तथा न प्रकृते इति भावः । युक्त्यन्तरमाह आक्षिप्तस्येति । शाब्दे = शाब्दबोधे। मानाभावाच्चेति । वह्निमाहरेत्यादौ पात्रान्वयाभावादिति भावः । उपस्थितिपक्षोक्त-लक्ष्यदोषः अस्मिन् पक्षेऽपि बोध्यः । आवृत्त्येति । सर्वनामानीत्यस्येति बोध्यम् । आद्यपक्षः शेखरकृदुक्तः । इतो लघुरिति । उच्चारयितुस्तन्त्रं बोद्धुरावृत्तिरे-तदुभयानाश्रयणलाघवो बोध्यः । उपस्थित्याक्षेपावृत्तिवादिमतेषु सर्वाद्यन्तानि सर्वार्थवाचकानि सर्वनामपदवन्तीति सूत्रार्थः पर्यवसन्न इति अतिसर्वादौ प्राग्दोष उक्तः।

वस्तुतस्तु स परिहर्तुं क्षम एव । तथा हि समर्थः पदविधिरिति शास्त्राप्रयोज्यशक्ति-ग्रहविशेष्यतावच्छेदकसमानाधिकरणकृत्स्नधर्मावच्छिन्नत्वरूपस्वीयत्वावच्छिन्नः प्राधान्येनोपस्थितिविषयः प्रसिद्धो यः सर्वार्थः तादृशसर्वार्थवाचकानि सर्वाद्यन्तानीति सूत्रार्थः । अतिसर्वीयशक्तिग्रहस्य तच्छास्त्रप्रयोज्यत्वान्न दोषः । परमसर्वादौ तु पूर्वोक्तस्वीयत्वपरिष्कारे यथा निर्वाहस्तथेति वदन्ति । समभिव्याहारस्य कारणत्वं नेति यदुच्यते तदा इदमेव स्वीयत्वं पूर्वोक्तस्वीयत्वस्थाने प्रक्षेपणीयमिति बोध्यम् । तदनुमानादिति । सर्वादीनि प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचकत्व-समानाधिकरणसर्वनामपदवद्बोधकानि तथा तात्पर्यविषयत्वात्, पाणिनितात्पर्योन्नायकन्तु महासंज्ञाकरणमेवेति बोध्यम् । अत्र संज्ञोपसर्जनेति वार्तिके । ननूपसर्जनप्रतिषेधे भाष्यविरोधमुपन्यस्य परिहरति तदोऽस्स इति नियम इति । तत्र हि अनन्त्ययोः किम् ? हे स, परत्वात् त्यदाद्यत्वं बाधित्वा सत्वं स्यात् । ततो हल्ङ्यादिलोपे रुत्वविसर्गौ स्याताम् । वस्तुतस्तु अनन्त्यग्रहणं शक्यमकर्तुम् । न चोक्तदोषः । पुनः प्रसङ्गविज्ञानेनात्वसंभवादित्युक्त्वा सकृद्गताविति पक्षेऽपि अनन्त्ययोरिति मास्तु । अदस औ इत्यत्र अदस इति योगं विभज्य पुनस्सत्वविधानेन अदस एव दस्य सः नान्यस्येति नियामकत्वमुक्तमिति बोध्यम् । तत उक्तदोषमाह द्वीयतेरप्रत्यय इति । अश्रूयमाणप्रत्यये इत्यर्थः । क्यजन्तप्रकृतिकक्विपीत्यर्थः । द्व इति प्राप्नोतीति । नियमपक्ष इत्यर्थः । स्व इति चेष्यत इति । यथान्यासे इत्यर्थः । एवञ्च द्वित्वविशिष्टकर्मकेच्छाकर्तृरूपार्थकोपसर्जने द्वीशब्दे अत्वसत्वयोरङ्गीकारेण भाष्यविरोधः स्पष्ट एवेति भावः । एकदेश्युक्तिरिति । एवञ्च तत्रापि द्वरित्येव रूपमिति भावः ।

<u>**बालबोधिनी :**</u> संज्ञोपसर्जनीभूतास्तु न सर्वादयः । सर्वनामानीति महासंज्ञाकरणेन तदनुगुणानामेव गणे सन्निवेशादित्युक्तं मूले । तत्र तदनुगुणत्वं विशदयति प्राधान्येनेति । प्राधान्योपस्थितिविषयत्व, प्रसिद्धत्व, स्वीयत्वरूपधर्मत्रयस्य सर्वार्थेऽन्वयः । पदार्थान्तर-निष्ठविशेष्यतानिरूपित प्रकारतासम्बन्धेनोपस्थापकत्वमुपसर्जनत्वम् । इतराविशेषण-त्वेनोपस्थितिविषयत्वं प्राधान्यम् । प्राधान्येनोपस्थितिविषयो नाम उपस्थितविशेष्यभूत इत्यर्थः । प्रसिद्धत्वञ्च संज्ञादिभिन्नत्वम् । स्वीयत्वञ्च स्वप्रवृत्तिनिमित्तसमानाधिकरण-कृत्स्नधर्मावच्छिन्नत्वम् । प्राधान्येनोपस्थितिविषयः, प्रसिद्धः स्वीयश्च यः सर्वार्थः तद्वाचकसर्वाद्यन्तत्वं सर्वनामत्वम् । नामपदस्वारस्येनेति । नमयन्त्यन्यार्थं विशेषणीकुर्वन्तीति व्युत्पत्त्येत्यर्थः । स्वीयेति । तत्तत्पदवाच्यमित्यर्थः । प्राधान्येनेत्यस्य फलमाह उपसर्जनं हीति । उपसर्जनं हीतरविशेषणीभूतस्वार्थस्योपस्थापकमित्यर्थः । इतरविशेषणतयैवेति ।

एवकारेण स्वार्थमात्रस्य व्यवच्छेदः । तेन = प्राधान्येनेति विशेषणेन । तद्व्यावृत्तिः = उपसर्जनव्यावृत्तिः । स्वीयसर्वार्थेति । सर्वार्थे स्वीयत्वविशेषणमित्यर्थः। अन्यथा पूर्वादीनां दक्षिणाद्यर्थवाचकत्वाभावेन सर्वार्थवाचकत्वाभावात् संज्ञा न स्यात् । तद्विशेषणे तु तत्तत्पदवाच्यसर्वार्थबोधकत्वेन न दोषः । संज्ञाव्यावृत्तये प्रसिद्धेति विशेषणमित्याह संज्ञेति।

सूत्रार्थमाह सर्वादीति । उक्तसर्वार्थेति । प्राधान्येनोपस्थितिविषयप्रसिद्ध-स्वीयसर्वार्थेत्यर्थः । तत्र = विशिष्टमध्ये । सर्वनामपदवत्त्वांशे एवेति । एवकारेण सर्वार्थ-वाचकत्वस्य व्यवच्छेदः । तस्यानुवाद्यत्वमिति भावः । सर्वार्थवाचकत्वस्य सिद्धिप्रकारमाह लोकत इति । एवञ्च निरुक्तसर्वार्थवाचकत्वविशिष्टसर्वनामपदवत्त्वे आद्यस्योद्देश्यत्वं सर्वनामपदवत्त्वस्य विधेयत्वमिति भावः । एवमनयोः संज्ञासंज्ञिभावसिद्धिः। तथा च यत्र पूर्वं सर्वादीनां तदन्तस्य च प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचकत्वं लोकतस्सिद्धं तत्र तमनूद्य सर्वनामपदवत्वं विधीयत इति भावः । एतेनेति। उक्तरीत्या सर्वार्थवाचकस्य पदार्थैकदेशत्वादित्यर्थः । अन्वर्थसंज्ञोपस्थितेति । सर्वनामानीति महासंज्ञाबलादुप-स्थितेत्यर्थः । सर्वनामानीति अन्वर्थसंज्ञाबलादुपस्थितस्य पदार्थैकदेशस्य सर्वार्थवाचकस्य विशेष्यत्वं सर्वादीनीत्यस्य तद्विशेषणत्वमिति निरस्तमिति भावः । तत्रैव दोषान्तरमाह एकपदेति । उद्देश्यविधेयभावेनेति । सर्वनामेत्येकपदोपस्थाप्ययोः सर्वार्थवाचक-सर्वनामपदयोरित्यर्थः । सर्वनामानीत्यन्वर्थसंज्ञाबलादुपस्थितस्य सर्वार्थवाचकस्य उद्देश्यकोटिप्रविष्टत्वम्, संज्ञाया विधेयत्वञ्चानुपपन्नम् । उद्देश्यतावच्छेदकरूपेणोद्देश्यस्य सिद्धिं विना विधेयत्वेनाभिमतस्य तत्त्वेनान्वयासम्भवादिति भावः ।

ननु परमते कृतीष्टसाधनत्वयोः लिङुपस्थाप्ययोः परस्परान्वयस्य दृष्टत्वात्, धातोः पृथक् फलव्यापारौ शक्यौ चेत् तयोरुद्देश्यविधेयभावेनान्वयापत्तिरिति तद्वारणाय फलावच्छिन्नव्यापारे शक्तिं स्वीकुर्वतः ग्रन्थकारस्यापि एकपदोपस्थाप्ययोरुद्देश्य-विधेयभावेनान्वयस्येष्टत्वात्, समासेऽपि तथाऽन्वयो भवत्येवेति कारके, मञ्जूषायाञ्च वक्ष्यमाणत्वादिदमयुक्तमत आह रूढ्यर्थेति । एकपदोपस्थाप्ययोरर्थयोः परस्परमुद्देश्य-विधेयभावेनान्वयो न भवतीति नियमो योगरूढविषयकः । तत्र तथाऽन्वयः कुत्रापि न दृश्यते । केवलयौगिकेनोपस्थितयोस्तु तथाऽन्वयो भवत्येव । एवञ्च प्रकृते सर्वनाम-पदोपस्थापितयोः योगार्थरूढ्यर्थयोरुद्देश्यविधेयभावेनान्वयो नास्तीति भावः । प्रकृते रूढ्यर्थत्वञ्च संज्ञाया बोध्यम् ।

सर्वार्थवाचकत्वं तदन्ते कथमत आह तदन्ते इति । अवयवनिष्ठसर्वार्थवाचकत्वस्य

समुदाये आरोपः । सर्वाद्यर्थप्रधानसमासे तदन्ते एवायमारोपः । अतिसर्वादावुपसर्जने तु तस्यैव तत्त्वेन न समुदाये तदारोप इति भावः । येन विधिरिति सूत्रे कैयटोक्तं पक्षं दूषयति एतेनेति । उक्तरीत्या निर्वाहेणेत्यर्थः । तदाक्षिप्तस्य = अन्वर्थसंज्ञाक्षिप्तस्य सर्वार्थवाचकस्य। वस्तुत आक्षेपो न सम्भवतीत्याह तद्विनेति । सर्वार्थवाचकेति पदस्य आक्षेपं विनापीत्यर्थः। अनुपपत्त्यभावेनेति । यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनं विना पीनत्वस्यानुपपत्त्या तस्याक्षेपस्तथा प्रकृते सर्वार्थवाचकानीति पदाभावेऽपि अन्वर्थत्वस्यानुपपत्त्यभावेन न तस्याक्षेप इति भावः । कथं चिदाक्षेपे आह आक्षिप्तस्येति । शाब्दे = शाब्दबोधे । न हि शाब्दमशाब्देनान्वेतीति न्यायादित्यर्थः ।

प्राचां मतमाह केचित्त्विति । आवृत्त्या = सर्वनामानीत्यस्यावृत्त्या । एकस्य = एकबोध्यस्य योगार्थस्य सर्वार्थवाचकस्य । अपरस्य = द्वितीयस्य रूढ्यर्थस्य । पक्षद्वये सिद्धान्तमाह परन्त्विति । आद्यपक्षः = शेखरकृदुक्तः विशिष्टविधिपक्षः । इतो लघुरिति । द्वितीयपक्षे सर्वनामानीत्यस्यावृत्तिः कार्येति गौरवम् । किञ्च सर्वादीनि तदन्तानि च प्रसिद्धस्वीयसर्वार्थवाचकानि । तानि सर्वनामपदवन्तीति वाक्यभेदश्च । आद्यपक्षे आवृत्तिर्नास्ति, एकमेव वाक्यमिति लाघवमिति भावः ।

तदनुगुणानामेव गणे सन्निवेशादिति । तदनुमानादिति । सर्वार्थवाचकानुकरणानुमानादित्यर्थः । अत्र = संज्ञोपसर्जनीभूतास्तु न सर्वादय इति वार्त्तिके । इतरेति । इतरार्थनिष्ठविशेष्यतानिरूपित प्रकारताप्रयोजकत्वमुपसर्जनत्वम् । अतिसर्व इत्यत्र सर्वरूपार्थेतरातिक्रमणरूपार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकत्वं सर्वशब्दस्येति तस्योपसर्जनत्वम् । एवञ्चात्र लौकिकमेव न तु शास्त्रीयमुपसर्जनत्वमिति सिद्धम् ।

ननूक्तरीत्या लौकिकस्यैवोपसर्जनस्य ग्रहणे तदोः सस्साविति सूत्रभाष्यविरोधः । तथा हि । तदोः सः सावनन्त्ययोः (7-2-106) इति सूत्रे अनन्त्यग्रहणाभावेऽन्त्ययोः सत्वापत्तिरित्युक्त्वा ततः नैतदस्ति प्रयोजनम् । त्यदाद्यत्वमन्त्ययोर्बाधकं भविष्यति । तथा चानन्त्ययोरेव सत्वप्राप्त्या तद्ग्रहणं किमर्थमिति शङ्कितम् । तदुत्तरं द्विशब्देऽत्वं सावकाशम् । अनन्त्ये सत्वं सावकाशम् । उभयोः सावकाशयोः परत्वात् सत्वं प्राप्नोति। अन्त्ययोः तद्वारणायानन्त्ययोरिति वक्तव्यमित्युक्तम् । तदुत्तरं तन्न वक्तव्यम् । तर्हि तदादौ दस्य सत्वापत्तिरिति न च वाच्यम् । तदोः सः सौ, अदसः इति योगो विभज्यते । द इति वर्तते । अदसो दस्य स इत्यर्थः । पूर्वेण सिद्धे इदं व्यर्थं सन्नियमार्थं भविष्यति । दकारस्य चेत् सत्वं तर्हि अदस एवेति नियमाश्रयणेन त्यदादिस्थान्त्यदकारस्य सत्ववारणादनन्त्यग्रहणं

न वक्तव्यमित्युक्त्वा, यदि नियमः क्रियते तर्हि द्वीयतेरप्रत्यये द्व इति प्राप्नोति स्व इति चेष्यते इत्युक्तम् । अविद्यमानः प्रत्ययोऽप्रत्ययः । अश्रूयमाणप्रत्यय इत्यर्थः । द्वाविच्छतीति द्वीयति । इच्छार्थे क्यच् । ततः क्विपि अकारयकारापृक्तलोपाः । द्वीशब्दात् सुप्रत्यये ईकारस्य त्यदाद्यत्वे नियमपक्षे दकारस्य सत्वाभावे द्व इति प्राप्नोति । स्व इति चेष्यत इति तदाशयः। यदि संज्ञोपसर्जनप्रतिषेधवार्तिके लौकिकोपसर्जनस्यैव ग्रहणं स्यात्तदा द्वित्वविशिष्ट-कर्मकेच्छाकर्तृरूपार्थकोपसर्जने द्वीशब्दे अत्वसत्वयोः करणमसङ्गतं स्यादत आह एकदेश्युक्तिरिति । स्व इति चेष्यत इत्युक्तिः पूर्वपक्ष्येकदेशिन इति न तद्बलेनोप-सर्जनेऽप्यत्वादिप्रवृत्तिरिति भ्रमः कार्य इति भावः । तत्रापि द्व इत्येव रूपमिति बोध्यम् ।

तृतीयासमासे । द्वन्द्वे चेतिसूत्रस्थाकरोक्तरीत्या न बहुव्रीहौ इति सूत्रस्थाकररीत्या च प्रथमार्थे सप्तमी। अयमपि समासस्यैव निषेधो नावयवानाम् । समुदायस्येति। 'अकचस्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयम्' इति भाष्योक्तया एतत्प्रकरणविषयस्मृत्या एतत्प्रकरणस्थ-सप्तमीनिर्देशानां प्रथमार्थक़त्वमिति तस्यावयवसञ्ज्ञानिषेधकत्वाभाव उचितः। किञ्चावयवमात्रस्य निषेधे वर्णाश्रमेतराणामित्यत्र सर्वार्थवाचकसर्वाद्यन्तत्वेन समुदायसञ्ज्ञायां सुडापत्तिः, तस्य सञ्ज्ञानिषेधेऽपि सर्वार्थवाचकसर्वादित्वानपायात् । अवयवस्य व्यपदेशिवद्भावेन,समुदायस्य च द्वन्द्वे विद्यमानत्वेन निषेधे तु अवयवस्य निषेधे फलाभावः। न च त्वच्छब्दस्य तान्तत्वे काकचोर्विशेषेण फलं, द्वन्द्वावयवमात्रे सुन्दरादिविशेषणान्वयाभाववत् कुत्सादिविवक्षाया अभावात् । समुदाये तद्विवक्षायां समुदायोत्तरप्रत्ययेनावयवगतकुत्सादेरपि बोधेनोक्तार्थत्वादवयवेभ्यः पृथक्तदनुत्पत्तेः। अन्यथा तव प्रत्येकं कप्रत्ययोत्पत्त्यापत्तिः। अत एवोक्तं भाष्ये - अकज् हि न भवतीति विभाषा जसीति सूत्रे । समुदायकुत्साविवक्षायामिति तदर्थः। कृताकचा समासस्तु भवत्येव, तत्र सर्वार्थत्वादनेन विकल्पो भवत्येव, त्वदधरमधुरमधूनि पिबन्तमिति जयदेवप्रयोगबलेन अन्यार्थकत्वच्छब्दस्य सत्त्वेऽपि तस्य सर्वनामत्वे मानाभावात् , बहुसम्मतत्वाच्च। एतेन न बहुव्रीहावितिवदस्यापि द्वन्द्वे चिकीर्षिते इत्यर्थ इत्यपास्तं, फलाभावात्। जसाधारे शीभावे एव विकल्पविधायकस्य विभाषा जसीत्यस्यासङ्गतेश्चेति भावः। उद्भूतावयवभेदसमूहस्य द्वन्द्वे विशेष्यतयोपसर्जने सञ्ज्ञाया अप्राप्त्या द्वन्द्वे चेत्यपि न बहुव्रीहावितिवदिति तत्वम् । अत एव गोस्त्रियोरिति सूत्रे कुक्कुटमयूर्यौ इत्यादौ ह्रस्ववारणाय द्वन्द्वे नेति वचनमारब्धमिति दिक् । नाकजिति। समुदायनिष्ठकुत्साबोधकोऽकज्नेत्यर्थः।

<u>भावबोधिनी :</u> प्रकरणविषयस्मृत्येति । विभाषा दिक्समास इति सूत्रमारभ्य द्वन्द्वे

चेत्यन्तं प्रकरणतद्विषयकस्मृत्येत्यर्थः । अवयवसंज्ञानिषेधकत्वाभाव इत्यस्य द्वन्द्वे चेति सूत्रस्येत्यादिः । उचित इति । अवयवस्य संज्ञां निषिध्य अकच्स्वराभावः फलमिति वक्तव्यम् । अवयवेषु अकच्स्वरयोः भाष्यकृताऽङ्गीकृतत्वेनावयवसंज्ञानिषेधे फलाभाव इति भावः । अवयवमात्रस्य निषेध इति । द्वन्द्वे विद्यमानस्य निषेध इति सूत्रार्थः । व्यपदेशिवद्भावेनेति । तादात्म्यसंबन्धेनेति यावत् । अदन्ते काकचोर्विशेषाभावेन त्यदादीनामेकशेषविधानेन चाह तान्तत्व इति । अत एव = समुदायस्य सर्वनामत्वादेव। अवयवेभ्यश्चाकचो वक्तुमशक्यत्वादेव च । न भवतीति । समुदायादवयवाच्चेत्यर्थः । तत्र =वर्णाश्रमेतरकशब्दे । अनेन विभाषा जसीत्यनेन । एतेन वक्ष्यमाणयुक्त्याऽवयव-निषेधे फलाभावेन । शीभाव एव विकल्पविधायकेति । अस्य च समुदायार्थगत-कुत्साबोधकाकजभावद्वारा कप्रत्यये वर्णाश्रमेतरका इति एकमेव रूपं फलम् । द्वन्द्वे चिकीर्षित इति अर्थवादिमतेऽवयवस्य संज्ञाभावेऽपि समुदायस्य तत्सत्वेनाकचि वर्णाश्रमेतरके वर्णाश्रमेतरका इति रूपद्वयस्य दुर्वारत्वेन तदसङ्गतिः स्पष्टैवेति बोध्यम् । द्वन्द्वे विशेष्यतयेति । न चैवं समाहारद्वन्द्वात् भेदो न स्यादिति वाच्यम् । अवयवगत-संख्यानारोपारोपाभ्यामेकवचनद्विवचनादिना भेदात् । एवञ्च द्वन्द्वसामान्ये समूहस्यैव विशेष्यत्वमिति भावः । इतिवदिति । तद्वदुपसर्जनप्रतिषेधस्यान्वर्थसंज्ञासिद्धस्यानु-वादकमित्यर्थः । नन्वेवं वर्णाश्रमेतरादिद्वन्द्वघटकावयवानां सर्वनामत्वाभावेन स्मायादिविधौ विहितविशेषणाश्रयणं व्यर्थमिति चेन्न । मासपूर्वशब्दार्थं तस्यावश्यकत्वात्। यद्यपि प्रथमार्थे सप्तम्या तृतीयासमासस्य सर्वनामत्वनिषेधेनावयवस्य सर्वनामत्वमक्षतं तथापि समास इत्यनुवर्तमाने पुनस्समासग्रहणेन तृतीयासमासार्थवाक्यस्थस्य तृतीयासमासस्य च तद्घटकस्य च सर्वनामत्वनिषेध इति यदुच्यते तदा विहितविशेषणं व्यर्थमिति भावः । न चाशब्दात् ङिप्रत्यये ए इति रूपम् । हे सर्व ए इति स्थिते तत्र परादित्वेन ए इत्यस्य ङित्वात् तत्र स्मिन्वारणाय तद्विधायके विहितविशेषणमावश्यकमिति वाच्यम् । स्मिनि कर्तव्ये बहिरङ्गैकादेशस्यासिद्धत्वेन पञ्चमीसमासेन स्थानिवत्त्वेन वा अकारेण व्यवधानादित्याहुः । अत एव = द्वन्द्वसामान्ये समूहस्य विशेष्यत्वादेव ।

बालबोधिनी : तृतीयासमासे । प्राचोक्तिनिरासायाह प्रथमार्थे सप्तमीति । न च समासस्य निषेधेऽवयवानां तदभावात् मासपूर्वायेत्यादौ स्मायाद्यापत्तिरिति वाच्यम् । विहितविशेषणं कार्यमिति पूर्वं सिद्धान्तितत्वेनावयवस्य संज्ञासत्वेऽपि ङे इत्यादीनां ततो विहितत्वाभावेन स्मायादिवारणसंभवात् ।

द्वन्द्वे च । प्रत्यङ्गम् = प्रत्यवयवम् । अन्तरङ्गं वा । मुक्तसंशयम् =निस्संशयम् । क्रियाविशेषणमेतत् । एतत्प्रकरणेति । विभाषा दिक्समास इत्यारभ्य द्वन्द्वे चेति पर्यन्तमित्यर्थः । तस्य = द्वन्द्वे चे ति सूत्रस्य । द्वन्द्वे विद्यमानस्येत्यर्थस्वीकारे दोषमाह किञ्चेति । सुडापत्तिरिति । वर्णाश्रमेतराणामित्यादाववयवस्य संज्ञानिषेधेऽपि स्वीयसर्वार्थवाचकसर्वाद्यन्तत्वेन समुदायस्य सर्वनामसंज्ञायाम् आमि सर्वनाम्न इति सुडापत्तिः । तस्य = अवयवस्य फलाभाव इति । अवयवस्य संज्ञासत्वेऽपि विभक्तीनां ततो विहितत्वाभावेन न सुडाद्यापत्तिरिति तस्य निषेधे फलाभाव इति भावः । अवयवस्य व्यपदेशिवद्भावेनेत्यन्वयः ।

मनोरमायां 'यद्यपि त्वच्छब्दस्तान्त इति पक्षेऽवयवनिषेधेऽपि फलं सुवचमिति' भट्टोजीदीक्षितः तन्निरासायाह न चेति । तदेवाह द्वन्द्वावयवेति । मात्रपदं कात्स्न्ये । तेन समाहारेतरेतरयोगयोस्संग्रहः । अनेन समाहारे इवेतरेतरयोगेऽपि साहित्यस्य विशेष्यता सूच्यते । अभाव इति । एकार्थीभाववशादिति भावः । समहारेतरेतरयोगयोः उभयत्र समूहस्य विशेष्यतया अवयवस्य तद्विशेषणत्वेन पदार्थैकदेशत्वान्न तत्र विशेषणान्वय इति बोध्यम्। तद्विवक्षायाम् = कुत्साद्यर्थान्वयविवक्षायाम् । तदनुत्पत्तेरिति । उक्तार्थानामप्रयोग इति न्यायेनावयवेभ्यः न तदुत्पत्तिरिति भावः ।

अन्यथा तव = अवयवनिषेधवादिनः तव । प्रत्येकमिति । समुदायादवयवाच्चेत्यर्थः । अत एव = अवयवस्य निषेधे फलाभावादेव समुदायकुत्सामाश्रित्यावयवेभ्यः पृथक् प्रत्ययानुत्पत्तेरेव । भाष्ये इति । अकज् हीति । हिशब्दो यस्मादित्यर्थको भिन्नक्रमश्च। यस्मात् जसः कार्यं प्रत्येव विभाषा, अतोऽकच् न भवति । तत्र कर्तव्ये द्वन्द्वे चेत्यनेन सर्वनामत्वनिषेधादिति तदर्थः । 'जसः कार्यं प्रति विभाषा । अकज् हि न भवती' ति तत्रत्यं भाष्यम् । समुदायनिष्ठकुत्साबोधकोऽकज् न भवतीत्यर्थः । कृताकचा समासस्तु भवत्येव । तत्र सर्वाद्यन्तत्वादनेन विकल्पो भवत्येव । समुदायकुत्साविवक्षायां केनायं विकल्पः। द्वन्द्वस्य सर्वाद्यन्तत्वाभावादिति बोध्यमिति उद्योतः। अयं भावः । विभाषा जसीत्यनेन जसः कार्यं प्रत्येव विकल्पः । अन्यथा समुदायगतकुत्साविवक्षायां तस्मादकचि तन्मध्यपतितन्यायेन विशिष्टस्य सर्वनामत्वात् वर्णाश्रमेतरका इत्यत्र शीभावः स्यात् । एवञ्चोक्तरीत्याऽकज्विषये विकल्पाभावेन द्वन्द्वे चेत्यनेन नित्यं सर्वनामसंज्ञानिषेधादकचोऽप्राप्त्या कप्रत्यये तेन व्यवधानान्न शीभावापत्तिः। द्वन्द्वे चेत्यनेन यद्यवयवस्यैव सर्वनामत्वनिषेधः स्यात्तदा वर्णाश्रमेतरेति समुदायस्य सर्वार्थवाचकसर्वाद्यन्तत्वेन सर्वनामसंज्ञायामकचो दुर्वारतया, जसः कार्यं प्रत्येव विकल्पेऽकजभावस्य फलत्वेन

कथनमसङ्गतं स्यात् । एवं समुदायस्य सर्वनामत्वनिषेधेऽपि समुदायकुत्सामादायावयवेभ्योऽकजुत्पत्तौ विभाषा जसीति सूत्रस्थं भाष्यं पुनरसङ्गतं स्यात्। तथा च द्वन्द्वे चेत्यनेन समुदायस्यैव निषध इति, समुदायकुत्साविवक्षायामवयवेभ्यो न पृथक् प्रत्ययोत्पत्तिरित्यपि च तद्भाष्याल्लभ्यत इति भावः । समुदायेति । समासोत्तरं समुदायकुत्साविवक्षायामकज् नेति तदर्थः । वृत्तेः प्राक् कुत्सादिविवक्षायान्तु अन्तरङ्गत्वादकचि तदन्तेन समासो भवतीत्याह कृताकचेति । तथा च वर्णाश्रमेतरके वर्णाश्रमेतरका इति रूपद्वयम् । कुत्सिता वर्णाश्रमेतरा इत्यर्थे तु वर्णाश्रमेतरके इति रूपं तु न भवतीति बोध्यम् । तत्र = कृताकचा समासस्थले वर्णाश्रमेतरकशब्दे । अनेन = विभाषा जसीत्यनेन ।

ननु द्वन्द्वे चेत्यनेनावयवनिषेधस्य अन्यार्थकस्य त्वच्छब्दस्य तान्तत्वे काकचोर्विशेषेण फलमित्युक्तम् । वस्तुतस्तु तस्य सर्वनामत्वाभावात् न तदवयवनिषेधे फलमित्याह त्वदधरेति । सर्वनामत्वे मानाभावादिति । त्व इति गणेऽदन्तस्यैव पाठादिति भावः । ननु 'त्वच्चवसमसिमेत्यनुच्चानि' इति सर्वानुदात्तविधायकं फिट्सूत्रमेव गणे पाठस्य मानं भवत्वित्यत आह बह्विति । तान्तस्य सर्वादिगणे इत्यर्थः ।

एतेन = अवयवमात्रस्य निषेधे वर्णाश्रमेतराणामित्यत्र सर्वार्थवाचकसर्वाद्यन्तत्वेन समुदायसंज्ञायां सुडापत्त्या, विभाषा जसीति प्रागुक्तभाष्यविरोधापत्त्या च । फलाभावादिति। द्वन्द्वे चिकीर्षिते इति व्याख्यानेनावयवनिषेधे फलाभावादित्यर्थः । तथा सति सूत्रासङ्गतिरपीत्याह जसाधारे इति । अयं भावः । विभाषा जसीति सूत्रे द्वन्द्वे इत्यनुवर्तते । जसाधारे शीभावाख्ये कार्ये कर्तव्ये द्वन्द्वे चेति सर्वनामसंज्ञानिषेधोऽनेन सूत्रेण विकल्प्यते । यद्यत्र अवयवस्य जसाधारे शीभावाख्ये कार्ये कर्तव्ये निषेधविकल्प इत्युच्यते तर्हि अलौकिकप्रक्रियावाक्ये सुपो धात्विति लुग्विषयतायास्सत्वेन शीभावकर्तव्यताया अभावात् तदनुपपन्नमिति विभाषा जसीत्यसङ्गतं स्यत् । तत्सार्थक्याय तत्रानुवृत्तस्य द्वन्द्वपदस्य समुदायपरत्वमवश्यमाश्रयणीयम् । तत्साहचर्येण द्वन्द्वे चेत्यत्रापि तस्य समुदायपरत्वादवयवनिषेधकत्वाभावस्सिद्ध इति ।

न बहुव्रीहावितिवदिदं सूत्रमप्युपसर्जनप्रतिषेधानुवादकमित्याह उद्भूतेति । अयमाशयः । चार्थे द्वन्द्व इत्यनेन इतरेतरयोगसमाहारयोर्द्वन्द्वो विधीयते । उभयत्रापि समुदायस्यैव विशेष्यत्वम् । अवयवगतसंख्याविवक्षायामितरेतरयोगः । समुदायगतैकत्वविवक्षायां समाहार इति भेदः । एवञ्चोभयत्रापि समुदायविशेष्यकबोध एवेति बोध्यम् । तथा चोक्तरीत्या द्वन्द्वे समूहस्य विशेष्यतया अवयवानामुपसर्जनत्वेन सर्वनामत्वाभावात् तदन्तविधिनापि

विशिष्टस्य तदप्राप्त्या निषेधो व्यर्थ इति न वक्तव्यम् । न बहुव्रीहाविवितिवत् द्वन्द्वे चेति सूत्रमपि उपसर्जनप्रतिषेधानुवादकमिति नासङ्गतिः ।

समाहारद्वन्द्वे इति । इतरेतरयोगेऽपि समुदायस्य विशेष्यत्वे मानमाह अत एवेति । इतरेतरयोगद्वन्द्वे समुदायस्य विशेष्यतया वर्तिपदार्थस्योपसर्जनत्वादेवेत्यर्थः । सूत्रे = सूत्रभाष्ये । ह्रस्वेति । गोस्त्रियोरुपसर्जनस्येति सूत्रेणेत्यर्थः । अन्यथा कुक्कुटश्च मयूरी चेति द्वन्द्वे वृत्तिपदार्थस्योपसर्जनत्वाभावेन गोस्त्रियोरिति ह्रस्वस्य प्राप्तेरेवाभावात् तद्वारणाय कृतं द्वन्द्वे नेति निषेधवचनं व्यर्थं स्यादिति भावः । समुदायेति । विभाषा जसीत्यनेन जसाधारशी-भावाख्यकार्यं प्रत्येव वैकल्पिकसर्वनामसंज्ञाया उक्तत्वेन समुदायनिष्ठकुत्साबोधकोऽकज् नेत्यर्थः

प्रथमचरम। अत्र सूत्रे नेति न सम्बध्यते, प्रथमादिष्वसम्भवात् । जसीत्यनुवृत्तेर-र्थाधिकारादयमपि शीभावे एव विकल्पः तदाह -जसः कार्य प्रतीति। तयः- सङ्ख्याया अवयवे तयबिति । प्रत्यय इति। तदन्ता इत्यत्र हेतुरुक्तः। द्वितीयतृतीयौ-द्वेस्तीयः 'त्रेः सम्प्रसारणञ्चे' ति साधू । अर्थवदिति । प्रतिपदोक्तस्येत्यपि बोद्ध्यम् तेनान्नन्ते आद्युदात्तस्य 'द्वितीयाय भागाये'त्येवं, अनभावे तु स्मै भवत्येव ।

<u>भावबोधिनी :</u> असंभवादिति । संज्ञाप्राप्त्यसंभवादित्यर्थः । अन्नन्त इति । पूरणाद्भागे तीयादनित्यन्नन्तो द्वितीयशब्दः । तीयस्यानश्च प्रत्येकमर्थवत्त्वेऽपि अन्नन्ततीयस्यार्थवत्त्वाभावेनार्थवद्ग्रहणपरिभाषयैव व्यावृत्तिसंभवेन प्रतिपदोक्तपरिभाषया वारणं चिन्त्यमेव ।

<u>बालबोधिनी :</u> प्रथमचरम । असम्भवादिति । प्रथमादिषु प्राप्तेरेवाभावेन निषेधासम्भवात् नेति न सम्बध्यत इत्यर्थः । हेतुरुक्त इति । केवलतयस्य सर्वनामसंज्ञायां प्रयोजनाभावेन तदन्तो ग्राह्य इत्यर्थः । तद्ग्रहणे । केवलस्य संज्ञायां प्रयोजनाभावो हेतुः ।

तीयस्य ङित्सूपसंख्यानमिति वार्तिकविषयमाह द्वितीयेति । अर्थवदिति । अर्थवद्ग्रहणपरिभाषयाऽर्थवानेव तीयोऽत्र गृह्यते । जातीयरि तु समुदायस्यैवार्थवत्त्वं न तु तदेकदेशस्येति भावः । नन्वेवमपि पूरणाद्भागे तीयादन् इति तीयप्रत्ययान्तादन्प्रत्यये यस्येति लोपे निष्पन्नद्वितीयशब्दे अनः तीयप्रत्ययार्थेनैवार्थवत्त्वात् तत्रार्थवद्ग्रहणपरिभाषया वारणं न भवतीत्यत आह प्रतिपदोक्तस्येत्यपीति । तीयप्रत्ययान्तादन् प्रत्यये सति तीयेत्यस्य लाक्षणिकत्वान्न तस्यात्र ग्रहणमिति भावः ।

जराया । 'अष्टन' इत्यतो विभक्ताविति, 'अचिरे'त्यतोऽचीत्यनुवर्त्तते, तदादिविधिश्चेत्याह-अजादविति। 'जरसा'वित्यादौ तु व्यपदेशिवद्भावेन । विभक्तौ किम्? जराया इदञ्जारम् । प्रतिपत्तिलाघवाय जराया असुङ् न कृतः । पदाङ्गाधिकार इति । पदमङ्गं च विशेष्युं विशेषणेन तदन्तविधिरिति भावः। पदशब्दनोत्तरपदाधिकारः, केवलपदाधिकारश्च गृह्यते इति - 'येन विधि'रित्यत्राकरे स्पष्टम् । निर्दिश्यमानस्येति। 'षष्ठी स्थानेयोगे'तिसूत्रमावर्तते, आवृत्तस्य चायमर्थः - 'षठ्यन्तमुच्चार्यमाणमेव स्थानेन युज्यते, न प्रतीयमानमिति, तेनेदं सिद्धमिति भावः। नन्वयं जरशब्दो न जराशब्दोऽत आह - एकदेशेति। स्थानिवत्सूत्रेणेति भावः, 'जरा' इत्यक्तपरिमाणस्य ग्रहात् । अनेन स्थानिबुद्ध्यैव कार्यप्रवृत्त्या 'निर्दिश्यमानस्ये'तिपरिभाषाबाधाभावो बोद्ध्यः। 'येन विधिस्तदन्तस्ये'त्यस्य तु सञ्ज्ञासूत्रत्वात् सूत्रस्थजराशब्दो जराशब्दान्तपर इति तदन्ते आदेशप्रवृत्तौ परिभाषाविरोधः स्पष्ट एवेति दिक् । निर्जरसेति। अत्र 'स्वादिषु' इति पदत्वेन रुत्वं न, भत्वेन पदत्वबाधात् । सूत्रेषूत्तरस्थस्य पूर्वत्रापकर्षवदग्रे लेखो वैचित्र्यायेति बोद्ध्यम् । पक्षे इति। जरसादेशाभावपक्षे इति भावः। इदमर्वाचामनुरोधेन।

भावबोधिनी : व्यपदेशिवद्भावेनेति । औप्रत्ययस्याजादित्वं तेनेति भावः । प्रतिपत्तिलाघवायेति । तथापि स्वमते उच्चारणार्थस्यापीत्संज्ञावश्यकत्वेन उपदेशेऽजनुनासिक इत्, हलन्त्यम्, तस्य लोपः, ङिच्चेत्यादीनां पर्यालोचनीयत्वेन ज्ञानगौरवान्न कृत इति भावः । लक्ष्यदोषस्तु न । जराशब्दादाचक्षाणण्यन्तात् क्विपि जरित्यस्यासुङि अदन्तादेशे जसौ जरसादेशे तु जरसाविति रूपमिति वाच्यम् । तत्र टिलोपस्य स्थानिवत्त्वेन कस्याप्यप्राप्तेः । विशेषणेन तदन्तविधिरिति । एतेन येन विधिरित्यस्य प्रपञ्चभूतोऽयमिति सूचितम् । गृह्यत इति । तत्रापि = येन विधिरित्यस्यापि प्रवृत्तौ बाधकाभावादिति भावः । पदस्योदाहरणम् इष्टकेषीकामालानां चिततूलभारिष्वित्यादौ । तेन पक्वेष्टकचितमित्यादौ ह्रस्वः उत्तरपदाधिकारस्य तु ष्यङस्सम्प्रसारणमित्यादौ । तेन पुत्रान्ते पत्यन्ते चोत्तरपदे इत्यर्थः । आवर्तित इति । आवर्तितश्च नियमार्थः । जराया इति षष्ठी तु अनिर्धारितसम्बन्धविशेषा । तेन जराशब्दान्ताङ्गस्य व्यपदेशिवद्भावेन तदङ्गत्वप्राप्तजराशब्दस्य षष्ठी स्थान इत्यनेन स्थानपदार्थप्रतियोगिकसम्बन्धानुयोगिकत्वे पुनरारम्भात् । तदेवाह उच्चार्यमाणमेवेति । उच्चार्यमाणमित्यस्याध्याहारः । अत्र च षष्ठ्यन्तमित्यनेन षष्ठीप्रकृतिरेव ग्राह्या । तस्या एव तादृशसम्बन्धानुयोगिकत्वात् । स्थानिवत्सूत्रेणेति । अस्य शास्त्रीयैकदेशविकृत-न्यायत्वादिति भावः । अत्र च जरा इत्यस्य जर इत्यानुमानिकादेशः लौकिकः किं

नोपतिष्ठत इत्यत आह अक्तपरिमाणस्येति । स्वं रूपमित्यनेनानुपूर्वीविशेषावच्छिन्ने शक्तेर्गृहीततया जराशब्दे तदभावादिति भावः । अनेन स्थानिवत्सूत्रेण । ननु स्थानिवत्सूत्रेण जरशब्दे आदेशवत् निर्जरशब्दे जरसादेशः स्यादित्यत आह येन विधिरिति। संज्ञासूत्रत्वात् शक्तिग्राहकसूत्रत्वात् । परिभाषा निर्दिश्यमानपरिभाषा । रुत्वं नेति । न चार्न्वर्तिपदत्वाद्रुत्वं दुर्वारमिति वाच्यम् । उत्तरपदत्वे चेति निषेधात् । तत्प्रत्याख्यानपक्षे तु मध्ये यत् सुबन्तं तदपि भमित्यर्थात् । अग्रे लेख इति । यचि भमित्यस्येति शेषः ।

बालबोधिनी : जराया जरस् । व्यापदेशिवद्भावेनेति । जरसावित्यत्रौप्रत्ययस्याजादित्वं तेनेत्यर्थः । जारमिति । विभक्तिग्रहणाभावे प्रत्ययसामान्यस्य ग्रहणापत्त्या अजादितद्धितप्रत्ययपरत्वेन जरसापत्तिरित्यर्थः । नन्वर्धमात्रालाघवेन जराया असुङ् इत्येवास्तु जरसादेशविधानं मास्त्वित्यत आह प्रतिपत्तीति । प्रतिपत्तिः = प्रक्रिया । अत्र न्यासे इत्यंज्ञालोपयोः ङिच्चेत्यस्य चानुसन्धाने प्रक्रियागौरवमित्यर्थः। अथवा प्रतिपत्तिः ज्ञानम्। उपदेशेऽच् , हलन्त्यम् , तस्य लोपः, ङिच्च इत्येतेषां पर्यालोचनीयत्वेन ज्ञानगौरवमिति बोध्यम् । पदमङ्गं चेति । येन विधिरित्यस्य प्रपञ्चोऽयमिति ज्ञेयम् । उत्तरपदाधिकारे प्रयोजनम् इष्टकेषीकामालानामित्यत्रोत्तरपदाकाङ्क्षितमध्यहारलब्धं पूर्वपदात्मकं विशेष्यमादाय तदन्तविधौ पक्वेष्टकचितमित्यत्र ह्रस्वः । केवलपदाधिकारे प्रयोजनं वसुस्रंस्वित्यत्र तदन्तविधौ अनडुद्भ्यामित्यत्रेव परमानडुद्भ्यामित्यत्रापि दत्वसिद्धिः। अङ्गाधिकारे सान्तमहत इत्यत्र तदन्तविधौ परममहानित्यत्र प्रयोजनं दीर्घसिद्धिः ।

निर्दिश्यमानस्येति परिभाषासिद्धिप्रकारमाह षष्ठी स्थानेयोगेति । उच्चार्यमाणमिति। अध्याहारलभ्यमिदम् । षष्ठ्यन्तमिति । अतद्गुणसंविज्ञानबहुव्रीहिणा षष्ठीप्रकृतिः गृह्यते। जराशब्दत्वस्य परिच्छिन्नपरिमाणवृत्तित्वेन अक्तपरिमाणे एकदेशविकृतपरिभाषाया अप्रवृत्त्या कथं तया परिभाषया तत्र निर्वाह इत्यत आह स्थानिवत्सूत्रेणेति । ननु स्थानिवत्सूत्रेणातिदेशे जराशब्दत्वेऽपि तस्य निर्दिश्यमानत्वाभावात् कथमादेश अत आह अनेनेति । जराया इति सूत्रेणेत्यर्थः । परिभाषाविरोध इति । संज्ञाशब्दानां संज्ञासमानाधिकरणानुगतसंस्थान-वत्तत्तद्व्यक्तिबोधकत्वाभ्युपगमात् येन विधिरित्यस्य संज्ञासूत्रत्वेन सूत्रस्थजराशब्देन तदन्तोपस्थितावपि तत्र जराशब्दबुद्धेरभावेन तदन्ते आदेशप्रवृत्तौ निर्दिश्यमानस्येति-परिभाषया बाधः । जरशब्दस्य जराशब्दबुद्धित्वेन तत्र कार्यप्रवृत्तौ निर्दिश्यमानपरिभाषा-बाधाभाव इति भावः ।

निर्जरसेति । अत्र = निर्जरसेत्यत्र निर्जरस् इति सान्तस्य । पदत्वबाधादिति । आकडारादेका संज्ञेति नियमादिति भावः । अग्रे लेख इति । यचि भमित्यस्येति शेषः । तृतीयादिषु विभक्तिषु इनादीन् बाधित्वा परत्वाज्जरसिति प्राचां मतानुरोधेनेत्याह इदमिति। विभक्त्यादेशेभ्यः परत्वाज्जरसिति प्रतिपादनमित्यर्थः ।

परे तु - 'विभक्त्यादेशेभ्यः परत्वाज्जरस् ' इत्यसङ्गतं, विभक्त्यादेशानामेव पूर्वविप्रतिषेधेनेष्टत्वात् अत एव 'जराया' इति सूत्रे - 'अजरांसी'त्यत्र नुम्जरसोःप्राप्तयोर्विप्रतिषेधेन जरसिति भाष्योक्तं सङ्गच्छते। अन्यथा त्वद्रीत्या शिभावात्पूर्वमेव जरसः प्रवृत्तौ तदा सर्वनामस्थानत्वाभावान्नुमा विप्रतिषेधविचारासङ्गतिः स्पष्टैव। मम तु पूर्वविप्रतिषेधेन जरसः पूर्वं शिभावे प्रवृत्ते तत्सङ्गतिः स्पष्टैव। अत एव टाङसीति सूत्रे कैयटेनोक्तं - भाष्यकारः सन्निपातपरिभाषया जरसादेशमनभ्युपयन्नतिजरेण अतिजरादिति भाव्यं, न त्वतिजरसिनाऽतिजरसादिति गौरवमुद्भावितवान् इति। भवद्रीत्या पूर्वं जरसादेशे इनाद्यप्राप्त्या, तदभावपक्षे च तस्याप्राप्त्या 'सन्निपातपरिभाषया जरसादेशमनभ्युपयन्' इत्यस्यासङ्गतिः स्पष्टैव। वृत्तिकारोऽप्याह -अतिजरसिन अतिजरसादिति केचिदिच्छन्ति, यथा भाष्यं तथा नैतदिष्यते इति लक्ष्यते इति। नपुंसकद्वितीयैकवचनेऽपि लुग्बाधेन 'अतोऽमि'त्यमि सन्निपातपरिभाषया जरसभावः। न च तत्र न अकारान्तसन्निपातकृत एवाजादिः, किन्तु तदभावेऽपि, एषा तु सन्निपातलक्षणविधिं विना न यस्य प्रवृत्तियोग्यता तत्रैवेति अत्र भवत्येव जरसिति वाच्यम् मानाभावात् । 'टाङसी'ति सूत्रस्थेनातिजरेणेत्येतद्विषयकैयटेन विरोधाच्च।

<u>भावबोधिनी :</u> इष्टत्वादिति । विभक्त्यादेशानन्तरमपि जरस् अनिष्ट एव । क्वचित् सन्निपातविरोधात् क्वचिदजादित्वाभावादिति भावः । सन्निपातपरिभाषयेति । टाङसिङसामिनात्स्या इत्येव इनातोरिकारदीर्घोच्चारणं न कर्तव्यम् । रामेणेत्यादौ तु बहुवचने झल्येदित्यनन्तरमोसाङोः आपस्सम्बुद्धौ चेति न्यासः । ओसाङोरन्त एदिति प्रथमस्यार्थेन रामेणेत्यादिसिद्धिः । द्वितीये ओसाङोरित्यनुवृत्त्या इष्टसिद्धिरिति पूर्वपक्षे निर्जरशब्दे इनातोः कृतयोः जरसादेशे निर्जरसिना निर्जरसादित्यर्थमिकार-दीर्घोच्चारणमावश्यकमिति प्राप्ते इत्यस्य प्रतीकस्यार्थः । गौरवमिति । उक्तपूर्वपक्षे योगविभागाद्याश्रयणेन गौरवमित्यर्थः । तदभावपक्षे जरसादेशाभावपक्षे । तदप्राप्त्या जरसादेशाप्राप्त्या । अभावपक्षमुपक्रम्य तत्पक्षे तत्करणमयुक्तमित्यर्थः । लक्ष्यत इति । दृश्यत इत्यर्थः ।

बालबोधिनी : सिद्धान्तमाह परे त्विति । पूर्वविप्रतिषेधाश्रयणे मानमाह अत एवेति। नुम्जरसोरिति । नपुंसकस्य झलच इति नुमित्यर्थः । त्वद्रीत्या = विभक्त्यादेशेभ्यः परत्वाज्जरसिति स्वीकारे । तदा = जरस्प्रवृत्तिवेलायाम् । सर्वनामस्थानत्वाभावादिति । शि सर्वनामस्थानमित्यनेनेत्यर्थः । असङ्गतिरिति । सर्वनामस्थाने परे एव नुम्विधानात् जरस्प्रवृत्तिकाले तत्परत्वाभावेन नुमोऽप्राप्त्या तयोर्विप्रतिषेधविचारासङ्गतिरिति भावः । मम त्विति । पूर्वविप्रतिषेधेन जरसादेशात् पूर्वं विभक्त्यादेश इति वदतः परे तु मते इत्यर्थः। तत्सङ्गतिः = विप्रतिषेधविचारसङ्गतिः । कैयटसम्मतिमप्याह अत एवेति । तत्र हि टाङसीति सूत्रेण टाङस्योः स्थाने लाघवात् नादेश-अदादेशौ विधीयताम् इनादेशाऽऽदादेशविधाने गौरवमिति भाष्यकृदाह । तद्भाष्यं व्याचक्षाणः कैयट एवमाह । 'अन्ये तु सन्निपात-परिभाषाया अनित्यत्वं वदन्त अतिजरसिन अतिजरसादिति सिद्धये इन आच्च विहितावित्याहुः । भाष्यकारस्तु सन्निपातपरिभाषामाश्रित्य जरसादेशमनभ्युपयन् अतिजरेण, अतिजरादिति भाव्यमिति मत्वा गौरवमुद्भावितवान्' इति । इति भाव्यमित्यस्य इत्येव भाव्यमित्यर्थ इत्युद्योतकारः । गौरवमिति । इकारदीर्घोच्चारणरूपमित्यादिः । अन्ये तु मतरीत्या सन्निपातपरिभाषाया अनित्यत्वात् तदनाश्रयणम् भाष्यकारमतरीत्या तदाश्रयणमित्येव विशेषः, तदतिरिक्ते विशेषो नास्ति मतद्वये इत्यवगम्यते । अतिजरेण अतिजरादिति भाव्यमिति कैयटव्याख्यानेन पूर्वविप्रतिषेधो भाष्यकारस्यापीष्ट इति कैयटाशय इति ज्ञायते । भवद्रीत्येति । विभक्त्यादेशेभ्यः परत्वाज्जरसिति वदतो भवद्रीत्येर्थः । तदभावपक्षे इति । जरसादेशस्य वैकल्पिकत्वेन तदभावपक्षे इत्यर्थः । तस्य = जरसादेशस्य

स्वोक्तार्थे वृत्तिकारसम्मतिमप्याह वृत्तिकारोऽपीति । केचिदिच्छन्तीति । पूर्वविप्रतिषेधेन प्रथमतो विभक्त्यादेशे ततः सन्निपातपरिभाषाया अनित्यत्वात् जरसादेशे अतिजरसिन, अतिरसादिति केचिदिच्छन्तीति तदर्थः । यथा तु भाष्यमिति । भाष्ये तु पूर्वविप्रतिषेधेन विभक्त्यादेशे ततः सन्निपातपरिभाषया न जरसिति अतिजरेण अतिजरादित्येव भाव्यमिति दर्शनपूर्वकम् इनातौ प्रत्याख्याय नादेशाऽदादेशौ व्यवस्थापितौ। तथा च निरुक्तं रूपद्वयमेव भाष्यकाराभिप्रेतमिति वृत्तिकाराशय इति बोध्यम् ।

नन्वेवं सति, 'अथेह लुक् कस्मान्न भवति ? अतिजरसं पश्ये'ति जराया जरसिति सूत्रस्थं भाष्यं विरुध्येत । पूर्वं विभक्त्यादेशे अमि ततः सन्निपातपरिभाषाविरोधेन जरसोऽप्रवृत्तौ अतिजरसमिति प्रयोगस्यैवाभादित्यत आह नपुंसकेति । जरसभाव इति । एवञ्चातिजरमित्येव रूपमिति प्रागुक्तमतिजरसमिति भाष्यमेकदेशिनोक्तमिति बोध्यम् ।

शङ्कते न चेति । तत्र = नपुंसकद्वितीयैकवचने । तत्र अमादेशरूपसन्निपात-लक्षणविधिं विनापि द्वितीयैकवचनस्य स्वतः अजादित्वमस्ति । सन्निपातपरिभाषा तु सन्निपातलक्षणविधिं विना यस्य प्रवृत्तियोग्यता न भवति तत्रैव प्रवर्तत इति प्रकृते अतिजरसमित्यत्र निरुक्तरीत्या सन्निपातलक्षणविधिप्रवृत्तिं विनाऽपि स्वतोऽजादित्वेन जरसादेशप्रवृत्तियोग्यताया एव सत्वात् तदभावस्याभावेन तत्परिभाषाया अप्रवृत्त्या जरस् भवत्येवेति शङ्कितुराशयः । निराकरोति मानाभावादिति । सन्निपातलक्षणविधिप्रवृत्तिं विना यत्र तद्विघातविधेः प्रवृत्तियोग्यता न भवति तत्रैव सन्निपातपरिभाषायाः प्रवृत्तिरिति स्वीकारे मानाभाव इत्यर्थः । विरोधादिति । यदि प्रागुक्तनियमः स्वीक्रियेत तर्हि अतिजरेणेत्यत्र इनादेशरूपसन्निपातलक्षणविधिं विनापि टायास्स्वतः अजादित्वेन जरसादेशस्य प्रवृत्तियोग्यतायास्सत्वेन तदभावस्याभावेन सन्निपातपरिभाषाप्रवृत्तेरशक्यतया, तया परिभाषया जरसादेशमनभ्युपयन्निति कैयटग्रन्थो विरुध्येतेति भावः । तथा च सन्निपातपरिभाषाप्रवृत्तौ प्रागुक्तनियमो न युक्त इति फलितम् ।

ध्वनितश्चेदं 'जराया' इति सूत्रे भाष्ये। तत्र हि पूर्वपक्षिणा - 'अतिजरसं पश्येत्यत्र लुक् कस्मान्न इति पृष्टे, परेण- 'प्रथमैकवचनेऽप्यतिजरसं तिष्ठतीत्यत्रापि कुतो लुङ् न शङ्क्यते' इति पृष्टे, पूर्वपक्षिणा - 'प्रथमैकवचनेऽम्भावोत्तरमेव जरस् , तत्र जरसि कृते सन्निपातपरिभाषया न लुक्' -यद्वाऽम्भावे कृते सन्निपातपरिभाषया न जरसिति पाठभेदेन विशेष उक्तः। ततः परेण यद्येवम् - 'अतिजरसम् अतिजरसैरित्यत्र न प्राप्नोति जरस्' इति द्वितीयैकवचनादौ शङ्किते, सिद्धान्तिना - 'इष्टमेवैतदतिजरमतिजरैरिति भवितव्य'मिति। अत्र विशेषोपपादनेऽन्त्यपाठ एव युक्तः, अन्यथा लुकःप्रथमैकवचने तेनाभावे उपपादिते द्वितीयैकवचनेऽपि तेन न्यायेन लुकोऽप्राप्तौ विशेषोक्तिरसङ्गतेति बोद्ध्यम् । एवं स्त्रियां जरसादेशे कृते 'याडापः'इत्यादीनामाकारप्रश्लेषेण वारणं विफलमेव, तेषां परत्वात् । अतिखट्वशब्दे तेषां वारणाय तु प्रश्लेष आवश्यक इत्याहुः।

<u>भावबोधिनी :</u> ध्वनितं चेदमिति । अतिजरमिति रूपं ध्वनितमित्यर्थः ।

<u>**बालबोधिनी :**</u> ध्वनितश्चेदमिति । सन्निपातपरिभाषाप्रवुत्तावुक्तनियमो नाश्रीयत इति, पूर्वविप्रतिषेधेन विभक्त्यादेशानां पूर्वं प्रवृत्तिरित्येतदुभयमित्यर्थः । तत्र = जराया इति सूत्रे भाष्ये । यद्येवम् = सन्निपातपरिभाषया न जरस् इति चेत् । इष्टमेवैतत् = सन्निपातपरिभाषया जरसोऽप्राप्तिः । अन्यथेति । जरसि कृते सन्निपातपरिभाषया न लुगिति आद्यपाठस्वीकारे इत्यर्थः । तेन = सन्निपातन्यायेन । विशेषोक्तिः = जरसि कृते सन्निपातपरिभाषया न लुगिति विशेषोक्तिः । अतोऽन्त्यपाठ एव युक्त इति भावः ।

एवमिति । एवं सतीत्यर्थः । विभक्त्यादेशेभ्यः परत्वात् जरसङ्गीकारे इति भावः । स्त्रियां जराशब्दस्य विभक्त्यादेशात् पूर्वं परत्वाज्जरसि ततो याडाप इत्यादीनां प्रवृत्तेरेवाभावेन आकारप्रश्लेषेण तद्वारणं विफलं स्यादिति भावः । नन्वाकारप्रश्लेषो मास्त्वित्याशङ्क्य तस्यावश्यकतामाह अतिखट्वेति । तेषाम् = याडाप इत्यादीनाम् । इत्याहुरिति । अत्र भाष्यसन्दर्भे 'अम्भावे कृते सन्निपातपरिभाषया न जरस्'इति नपुंसकद्वितीयैकवचने सन्निपातपरिभाषया जरसादेशस्याप्रवृत्तिपतिपादनेन विभक्त्यादेशानां पूर्वविप्रतिषेधेन प्रथमं प्रवृत्तिरिति, सन्निपातपरिभाषायां प्रवृत्तियोग्यतेत्यादिनियमो नाश्रीयत इत्येतदुभयं सिद्धम्। अन्यथा परत्वात् जरसादेशाश्रयणे, सन्निपातपरिभाषायां निरुक्तनियमाश्रयणे वा तत्परिभाषाप्रवृत्तेर्वक्तुमशक्यत्वादिति भावः।

परे तु जरसादेशाद्विभक्तिसम्बन्धिकार्यमात्रं पूर्वविप्रतिषेधेन, तेन 'जराणा'मित्यादावामि पूर्वं नुटि जरसोऽभाव एव । एवञ्च 'ह्रस्वनद्याप' इत्यत्राऽऽकारप्रश्लेषे न फलं, नापि मानम् । अत एव 'ङ्याब्ग्रहणेऽदीर्घः'इतिवज्जरसादेशस्य स्थानिवत्त्वप्रतिषेधो वार्त्तिककृता नाऽऽरब्ध इत्याहुः।

<u>भावबोधिनी :</u> न फलमिति । अतिखट्वशब्दे नुट इष्टत्वादिति भावः ।

<u>बालबोधिनी :</u> विभक्त्यादेशेभ्यः परत्वाज्जरसिति प्राचीनमतम् । पूर्वविप्रतिषेधेन प्रथमतो विभक्त्यादेशा इति परे त्विति मतम् । पूर्वविप्रतिषेधेन न केवलं विभक्त्यादेशानामेव पूर्वं प्रवृत्तिः । किन्तु विभक्तिसम्बन्धिकार्यमात्रमित्याशयेन परमसिद्धान्तमाह परे त्विति । पूर्वं नुडिति । नुडत्र विभक्तिसम्बन्धिकार्यं, न तु विभक्त्यादेशः । जरसादेशाद्विभक्ति-सम्बन्धिकार्यमात्रस्य पूर्वं प्रवृत्तौ मानं सूचयन्नाह अत एवेति । नारब्ध इति । अन्यथा विभक्त्यादेशेभ्यः परत्वाज्जरसि तस्य स्थानिवत्त्वेन प्राप्तस्य आबन्तत्वप्रयुक्तस्य याडादेर्वारणाय जरसः स्थानिवत्वप्रतिषेधो वक्तव्यः स्यादिति भावः । पूर्वविप्रतिषेधाश्रयणे पूर्वं विभक्तिसम्बन्धिकार्यप्रवृत्तौ सन्निपातपरिभाषया जरसादेशस्याप्रवृत्त्या स्थानिवत्व-प्रतिषेधो न कर्तव्य इति भावः।

71 परिभाषाया अनित्यत्वमिति । इनातोरिकारदीर्घोच्चारणम् , एसि कर्तव्ये ऐस्करणञ्च तदनित्यत्वे मूलमिति तदभिमानः। षष्ठ्येकवचने इति। एकसूत्रोपात्तत्वात्स्यादेशविषयेऽपि पूर्वविप्रतिषेध इति तद्भावः। एतच्च भाष्येति। इनातोरिकारदीर्घोच्चारण-प्रत्याख्यानपरभाष्येत्यर्थः, इष्टमेवैतत्सङ्गृहीतमतिजरमतिजरैरिति भवितव्यमिति 'जराया'इतिसूत्रस्थभाष्येति चार्थ इत्यन्यत्र विस्तरः।

भावबोधिनी : प्रत्याख्यानेति । तदुपायश्च पूर्वमुक्तः ।

बालबोधिनी : तदनित्यत्वे = सन्निपातपरिभाषाया अनित्यत्वे एकसूत्रेति । टाङसीति सूत्रेत्यर्थः । तद्भावः = तदभिमानः । सन्निपातपरिभाषाया अनित्यत्वाश्रयणे भाष्यविरोधमाह इनातोरिति । भाष्यान्तरमप्याह इष्टमेवेति । तृतीयाबहुवचने सन्निपातपरिभाषया जरसभावस्य भाष्यारूढत्वेन तद्विरोधात् तस्यानित्यत्वाश्रयणं न युक्तमिति भावः ।

पद्दन्नो। आदेशैः स्वानुरूपाः स्थानिन आक्षिप्यन्ते इत्याह - पाददन्तेति। 'अनुदात्तस्य चर्दुपधस्ये'त्यतोऽन्यतरस्यामित्यनुवर्त्तते। अत एव तुल्यास्यसूत्रादिभाष्ये- 'आस्ये तुल्यः' 'पादेनोपहतं' 'मासेन पूर्वाये'त्यादिप्रयोगाः, 'हृदयस्य प्रिय'इति सौत्रप्रयोगश्चोपपन्ना भवन्ति। 'ये च तद्धिते' इति सूत्रस्थे- 'वा केशेषु'इतिवार्त्तिके वाग्रहणन्तु तत्र सूत्रे वाग्रहणासम्बन्धबोधकम् । यद्यपि निशाशब्दस्य निश्शब्दप्रकृतिकत्वेन भागुरिमतसिद्धतयाऽऽपो वैकल्पिकत्वेन च वाक् वाचेत्युभयवन्निश्निशयोः सूत्रे निश्ग्रहणं विनापि सिद्धिः,तथापि सुटि हलन्तस्यासाधुत्वबोधनायात्र ग्रहणमिति वृत्त्यनुसारिणः।

भावबोधिनी : स्वानुरुपा इति । आनुरूप्यञ्च तत्तल्लिङ्गविशिष्टार्थः आनुपूर्व्याञ्च । अत एव पदशब्दे चरणशब्दे च न पदादेशः ।

नन्वन्यतरस्यामित्यनुवृत्तौ पद्दन्नित्यतः प्राक्तने वाग्रहणं न कुर्यादित्यत आह ये चेति । बोधकमिति । एवञ्च तस्य मण्डूकानुवृत्तिरिति भावः ।

बालबोधिनी : पद्दन्नोमास् । प्राचीनमतानुसारेणाह आदेशैरित्यादि । स्वानुरूपा इति । अर्थतो वर्णतश्चेत्यर्थः । पदाद्यादेशैः अर्थतो वर्णतश्चानुरूपाः स्थानिन आक्षिप्यन्त इति भावः । वर्णत इत्युक्तेर्न चरणशब्दस्य पदादेशः अर्थत इत्युक्तेः श्लोकपादार्थकस्य पादशब्दस्य न पदादेशः। एवं प्राचामाशयमाह अन्यतरस्यामित्यनुवर्तत इति । अनुदात्तस्य चर्दुपधस्यान्यतरस्यामिति सूत्रादित्यर्थः । तत्र मानमाह अत एवेति । तदनुवृत्त्या पदाद्यादेशानां वैकल्पिकत्वादेवेत्यर्थः । भाष्ये इति । जातावेकवचनम् । उपपन्ना भवन्तीति । अन्यतरस्यामित्यस्यानुवृत्त्यभावे पदाद्यादेशानां नित्यत्वेन आस्ये इत्यादिप्रयोगाणामनुपपत्तिः स्यात् ।

नन्वत्र सूत्रेऽन्यतरस्यां ग्रहणानुवृत्तौ तदुत्तरे ये च तद्धिते इति सूत्रेऽपि तदनुवृत्त्यैव सिद्धे वा केशेष्विति तत्सूत्रस्थवार्तिके वाग्रहणानर्थक्यमित्यत आह ये च तद्धिते इति । तत्र

सूत्रे = ये च तद्धिते इति सूत्रे । वाग्रहणेति । वार्थकान्यतरस्यां ग्रहणेत्यर्थः । भागुरिमतसिद्धतयेति ।

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

इति तन्मतमित्यर्थः । निश्निशयोरिति । मातृमात्रोरिति । मातृमात्रोरितिवत् प्रयोगः । अनयोश्शब्दपरत्वेनार्थभेदात् विरूपाणामपीत्यनेन नैकशेषः । वृत्त्यनुसारिण इति । अनेनारुचिस्सूचिता ।

परे तु - 'अनुदात्तस्येति' सूत्रे 'ऽन्यतरंतरस्या' मित्यस्य स्वरितत्वं नास्ति। अत एव 'शीर्षश्छन्दसी' ति सूत्रे 'शीर्षन्निति प्रकृत्यन्तरं द्रष्टव्यम् ,आदेशत्वे हि छन्दसि शिरश्शब्दस्य प्रयोगो न स्यादि' त्युक्तं भाष्ये। अन्यथा विकल्पानुवृत्त्याऽऽदेशत्वेऽपि दोषाभावेन तदसङ्गतिः स्पष्टैव। 'ये च तद्धिते' इत्यत्र च- 'आदेशत्वाय शिरसो ग्रहणं कर्त्तव्य' मित्युक्तं, 'वा केशेषु' इति च वक्तव्यमित्युक्तम् । तस्मात् शसादिविषयाणि प्रकृत्यन्तराण्येव पदादयः। एवं मांस्पृत्स्नवोऽपि। अत एव नस्पृतोः स्थानिवद्भावादाबन्तत्वमादाय 'नसां' 'पृता' मित्यादौ न नुडादिः, नासिकाया नस् यत्तस्क्षुद्रेषु' इति वार्तिके आदेशत्वमेव, 'नासिकाया' इत्युक्तेः। अत एव तद्विषये 'नासिकाक्षुद्र' इत्यादि न । अत एव पदादिषु, 'मांस्पृत्स्नूनामुपसङ्ख्यान' मिति वार्तिके स्थानिनिर्देशो न कृत इत्याहुः।

<u>**भावबोधिनी :**</u> आदेशत्वे हीति । शीर्षन्नित्यस्येति शेषः । अन्यथा = स्वरितत्वे । ननु शीर्षश्छन्दसीत्यत्र शिरस् इत्यननुवृत्तौ ये च तद्धिते इत्यत्र स्थानिलाभो न स्यादित्यत आह ये चेति। वक्तव्यमिति । ये च तद्धिते इत्यत्रान्यतरस्यामित्यननुवर्त्य वार्तिके वाग्रहणं कर्तव्यमिति भावः । तस्मादिति । अन्यतरस्यामित्यनुवृत्तेः भाष्यासम्मतत्वादित्यर्थः । प्रकृत्यन्तराण्येवेति । एवञ्च सर्वविभक्तिषु पादादयोऽपि स्वातन्त्र्येण प्रयोक्तव्या इति भावः । अत एव = प्रकृत्यन्तरत्वेनादेशत्वाभावादेव । आदेशत्वमेवेति । नसित्यस्येति शेषः ।

<u>**बालबोधिनी :**</u> सिद्धान्तमाह परे त्विति । अन्यतरस्यामित्यस्य स्वरितत्वाभावे भाष्यसम्मतिमाह अत एवेति । स्वरितत्वाभावादेवेत्यर्थः । आदेशत्वे हीति । शीर्षन्नित्यस्येति शेषः । अन्यथा = स्वरितत्वाङ्गीकारे । तदसङ्गतिः = भाष्यासङ्गतिः । ननु शीर्षश्छन्दसीत्यत्र शिरसोऽननुवृत्तौ ये च तद्धिते इत्यत्र स्थानिलाभो न स्यादित्यत आह ये चेति ।

अन्यतरस्यामित्यस्य स्वरितत्वे मानान्तरमाह व केशेष्विति । तस्य स्वरितत्वे ये च तद्धिते इति सूत्रेऽपि अन्यतरस्यांग्रहणस्य सम्बन्धात् केशेषु शीर्षण्य इति शिरस्य इति च रूपद्वयसिद्धौ तदर्थं कृतं वा केशेष्विति वार्तिकं व्यर्थं स्यादिति भावः । तस्मात् = अन्यतरस्यामित्यनुवृत्तौ मानाभावात् । प्रकृत्यन्तराण्येवेति । एवञ्चोभयोरपि स्वातन्त्र्येण प्रयोक्तुं शक्यत्वात् प्रागुक्तभाष्यप्रयोगाणामन्येषाञ्च नानुपपत्तिरिति भावः । एवं मांसपृत्स्नवोऽपीति । (मांसपृत-नासानूनां) मांस्पृत्स्नवो वाच्याः शसादौ वेति वार्तिकेऽपिं प्रकृत्यन्तराण्येव द्रष्टव्यानीति भावः ।

पदादीनामादेशत्वाभावं समर्थयति अत एवेति । तेषामादेशत्वाभावादेवेत्यर्थः । ह्रस्वनद्याप इत्यत्र आकारप्रश्लेषे फलाभावस्यानुपदमुक्तत्वेन न तेनात्र निर्वाह इति भावः । अत एव = प्रकृत्यन्तरत्वादेव । अन्यथा पद्दन्नोमासिति सूत्रे, मांस्पृत्स्नूनामिति वार्तिके च स्थानिनिर्देशः कुर्यादिति भावः ।

प्रत्याहार इति। व्याख्यानादौटष्टकारेणेति भावः। अक्लीबस्येति । पर्युदास परतयाऽप्यस्य भाष्ये व्याख्यानात् , लघुत्वाच्चेति भावः। प्रसज्यप्रतिषेधेन व्याख्याने अत एव ज्ञापकात्केषाञ्चिदसमर्थसमासानां साधुत्वं बोद्ध्यम् । स्वादिषु । 'सु'रत्र प्रथमैकवचनम्। आदिशब्देन कबन्तानां ग्रहणं, व्याख्यानात् , तदाह - कप्प्रत्ययावधीति। तदन्तेष्वित्यर्थः। यचि भम् । समाहारद्वन्द्वे सौत्रत्वान्न टच् । 'यची'त्यनेन - स्वादेर्विशेषणात्तदादिविधिः। असर्वनामेति। तेन सुपादवित्यादौ पादः पन्न। भसञ्ज्ञा पदत्वकार्यप्रतिबन्धरूपेऽशास्त्रीयेऽपि कार्ये भवति, न पदान्तसूत्रस्थभाष्यप्रामाण्यात् ।

<u>भावबोधिनी :</u> टाटकोरण् स्यादित्यत आह व्याख्यानादिति । तस्यैतदतिरिक्तफलाभावादिति भावः । अक्लीबसम्बन्धीति । सुडित्यर्थः । सम्बन्धश्च स्वप्रकृतिकत्वम् । प्रथमैकवचनमिति । न तु सप्तमीबहुवचनम् । असर्वनामस्थान इति विशेषणादिति भावः । कबन्तानामिति । न तु सुप्प्रत्ययपर्यन्तानाम् । तथा हि सति सुप्यसर्वनामस्थान इत्येव ब्रूयात् । असर्वनामस्थान इत्युक्तेः सुबित्यस्य प्रत्याहारत्व-संभवात् ।

न च सिद्धान्ते कपः पकारेण प्रत्याहारमाश्रित्य सुबित्येव कुतो नोक्तमिति वाच्यम्। प्रत्यासत्त्या सुपः पकारेण प्रत्याहारापत्तेः । यदि तु व्याप्तिन्यायः नस्तद्धित इति ज्ञापकञ्च आश्रीयते तदा वक्तुं युक्तमेव । अत्र प्रत्ययग्रहणपरिभाषया स्वादयो यस्माद्विहितास्त-दादेस्तेषु परतः पदत्वादिकम् । तेन तस्यापत्यमित्यादिप्रकृतिविशेषाणां स्वादिघटकत्वेऽपि

तेषु परतो न पदत्वमिति बोध्यम् । भवतीति । अत एव दत इत्यादौ न जश्त्वम् । भाष्य इति । तत्र हि वेतस्वानित्यादौ पदत्वप्रतिबन्धाय भत्वमादृतम् ।

बालबोधिनी : सुडनपुंसकस्य । प्रत्याहार इति । न त्वागमः । सर्वनामस्थाने चासम्बुद्धाविति सूत्रे असम्बुद्धाविति पर्युदासादिति भावः । सुडिति औटष्टकारेण प्रत्याहारः। तस्य तदतिरिक्तफलाभावादित्याशयेनाह व्याख्यानादिति । औटष्टकारोच्चारण-सामर्थ्यमूलकादित्यर्थः । टाटकारेण तु न, तस्य टाङसिङसामित्यादौ विशेषणार्थत्वात् । पर्युदासपरतयापि । अपिशब्देन पक्षान्तरस्य समुच्चयः। आद्यपक्षे औचित्यमाह लघुत्वाच्चेति । अत्र तु प्रसज्यप्रतिषेधपक्षोऽपि युक्त एवेत्याह प्रसज्यप्रतिषेधेनेति । तत्र हेतुमाह ज्ञापकादिति। सुट् स्त्रीपुंसयोरिति वक्तव्येऽनपुंसकस्येति ज्ञापकादिति भावः । पर्युदासपरतया व्याख्याने नपुंसकभिन्नसम्बन्धिस्वादिपञ्चवचनानीत्यर्थः ।

स्वादिष्वसर्वनामस्थाने । असर्वनामस्थाने इति विशेषणात् सुरत्र प्रथमैकवचनम्। न सप्तमीबहुवचनमित्याह प्रथमैकवचनमिति । व्याख्यानादिति । स्वादिष्वित्यत्रादिपदेन सुपामेव ग्रहणे सुप्सु इत्येव वदेत् । तथाऽनुक्त्वा आदिग्रहणरूपाद्व्याख्यानादित्यर्थः। अधिकग्रहणे विनिगमनाविरहाच्च कबन्तानां ग्रहणमित्याह तदन्तेष्विति । कप्रत्ययावधीति। कप्रत्ययान्तेत्यर्थः ।

यचि भम् । य् च अच्चेति समाहारद्वन्द्वे टजापत्तिरित्यत आह सौत्रत्वान्नेति । इतरेतरयोगे तु द्विवचनापत्तिः । समासान्तविधेरनित्यतायाः क्लृप्तत्वात् इतरेतरयोगे सौत्रत्वादेकवचनमिति नोक्तमिति भावः । विशेषणात् = विशेष्यीकरणात् । तेनेति । यचि भमित्यत्र असर्वनामस्थानेत्यस्य सम्बन्धेनेत्यर्थः । पादः पन्नेति । भसंज्ञाभावादित्यर्थः । ननु दतः दतेत्यादौ भसंज्ञाप्रयुक्तकार्याभावेन तस्या अप्रवृत्तौ पदसंज्ञायां जश्त्वापत्तिरत आह भसंज्ञेति । भाष्यप्रामाण्यादिति । न पदान्तेति सूत्रे भाष्ये वेतसशब्दात् ड्मतुपि टिलोपे वेतस्वानित्यत्र तसौ मत्वर्थे इति सान्तस्य भसंज्ञा पदत्वप्रतिबन्धद्वारा रुत्वाभावार्थेत्युक्तम्। एवं दतः, दतेत्यादौ पदत्वप्रतिबन्धद्वारा जश्त्वाभावाय भसंज्ञा भवत्येवेति न जश्त्वापत्तिरिति भावः ।

आकडारा । 'प्राक्कडारा'दिति नावधिः, तत्पुरुषो द्विगुश्चेति लिङ्गात् , समावेशार्थं हि तदित्याह - कडारा इत्यादि । व्याप्त्यर्थकाऽऽङा 'आ चार्थात्' इति वक्तुं युक्तम् । एकैवेति। सङ्ख्यावाच्येकशब्दोपादानादवधारणं सम्पद्यते इति भावः। या परेति । द्वयोः सावकाशयोः परा । निरवकाशत्वे तु सैवेत्यर्थः। आभ्यामेव बाधसिद्धिस्तु न । अन्यत्र तव्यदादौ

कृत्कृत्यप्रत्ययसञ्ज्ञादीनां समावेशदर्शनेन विरोधाभावाद्विप्रतिषेधाप्रवृत्तेः । लौकिकस्य तक्रकौण्डिन्यन्यायस्यापि लोके सञ्ज्ञाविषयेऽदर्शनेन शास्त्रेऽपि सञ्ज्ञाविषयेऽप्रवृत्तेश्च । तेनेति । अनवकाशत्वेनेत्यर्थः । परोदाहरणन्तु - 'अपादानमुत्तराणि कारकाणि बाधन्ते' इत्याद्याकरे स्पष्टम् । विरोधाद्यभावेन विप्रतिषेधसूत्राद्यप्रवृत्तावपि परत्वादेरन्यत्र बलवत्वेन दृष्टतयाऽत्रापि तेन व्यवस्था। अपादानादिसञ्ज्ञानां समावेशे तु तत्कार्ययोः पर्यायापत्तिर्दोषः। भपदसञ्ज्ञयोः समावेशे तु 'राज्ञ' इत्यादौ नलोपस्यापत्तिर्बोध्या । न च 'राजन्य' इत्यादौ 'सुप्तिङन्त'मिति पदत्वं दुर्वारम् , परया भसञ्ज्ञया तु न बाधस्तस्या अन्तरङ्गत्वादिति वाच्यम्। समानावधिकाया अन्तरङ्गाया अप्यनया बाध्यसामान्यचिन्तयाऽपवादत्वेनैव बाधादित्याहुः। आकडारस्थसञ्ज्ञासु च यथोद्देशपक्ष एवेत्यदञ्च्यङ्शब्दे निरूपयिष्यते।

भावबोधिनी : समावेशार्थं हीति । तत्पुरुषसंज्ञासमावेशार्थमित्यर्थः । तदिति । द्विगुश्चेति सूत्रमित्यर्थः । आचार्थादिति । चार्थपदघटित चार्थे द्वन्द्व इति सूत्रमभिव्याप्येत्यर्थः । संख्यावाचीति । अन्याद्यर्थवाचित्वे तु अवधारणलाभो न स्यादिति भावः । वस्तुतस्तु असहायवाचित्वेऽपि तत्सुलभम् । ननु परत्वादिनैव सिद्धे सूत्रं व्यर्थमत आह आभ्यामेवेति । परत्वनिरवकाशत्वाभ्यामेवेत्यर्थः । अन्यत्र = आकडारादन्यत्र । निरवकाशत्वेनापि बाधो नेत्याह लौकिकस्येति । स्पष्टमिति । तत्र हि आकरे धनुषा विध्यतीत्यत्र व्यधधातोः निस्सरणहेतुकप्राणिवियोगानुकूलव्यापारार्थकत्वेन धनुषः बाणनिस्सरणं प्रति अवधिकत्वात् विशिष्टार्थं प्रति करणत्वाच्च पञ्चमीतृतीययोस्तृतीयैवेति स्पष्टमित्यर्थः । उत्तराणीत्यस्य उत्तराणि कारकाणीत्यर्थः । विरोधादित्यादिना तक्रन्यायबाधदर्शनपरिग्रहः । सूत्रादीत्यादिना तक्रन्यायः । अन्यत्रासंज्ञाया अन्यत्र व्यवस्थेति । अन्यथा सूत्रस्य वैयर्थ्यमेव स्यादिति भावः । नलोपस्यापत्तिरिति । भत्वप्रयुक्ताल्लोपस्येष्टत्वेन पदत्वप्रयुक्तमापाद्यत इति भावः । न च लोपो न इति न्यासेनैव विशिष्टलोपसिद्धावकारलोपविधानं तन्मात्रलोपार्थमिति समावेशेऽपि न दोष इति वाच्यम्। तथा सत्यन्तस्याङ्गस्य लोप इत्यर्थेनालोऽन्त्यस्येत्यनेन नस्यैव लोपापत्तेः । न च नलोपः प्रातिपदिकेत्यनेनैव सिद्धे तद्विधानसामर्थ्यादलोऽन्त्यपरिभाषाप्रवृत्त्या निर्दिश्यमान-न्यायेनान एव लोपसिद्धिरिति वाच्यम् । नलोपः प्रातिपदिकेति नलोपे तस्य नलोपः सुप्स्वरेत्यनेनासिद्धत्वात् प्रथमयोरिति पूर्वसवर्णाभावः । अनेन नलोपे तु नासिद्धत्वमिति पूर्वसवर्णदीर्घ इति तत्सम्पादनेन सामर्थ्योपक्षयात् । तस्मात् समावेशे नलोपः स्यादेवेति भावः । पदत्वमिति । सुबन्तात् तद्धितोत्पत्त्या अन्तर्वर्तिसुपमाश्रित्येति भावः । दुर्वारमिति। न च सत्यपि पदत्वे न बाधकमिति वाच्यम् । नलोपापत्तेः । न च ये चाभावकर्मणोरिति

प्रकृतिभावः । तेन नस्तद्धितस्यैव बाधात् । न च प्रकृतिभावस्य येन केनापि प्राप्तो विकारो नेत्येवार्थ आवश्यकः । अत एव सिद्धान्ते अल्लोप इति लोपो न । किञ्च पदत्वान्नलोपे भत्वादल्लोपे च कृते नस्तद्धित इत्येतन्मात्रबाधकत्वे ये चाभावेत्यस्य वैयर्थ्यापत्तेश्चेति वाच्यम् । एवमपि राज्ञः कर्म भावो वा राज्यमित्यादौ कुत्वापत्तेरेव दोषत्वात् । अत एव राजन्य इत्यादावित्यादिपदोपादानमिति बोध्यम् । ननु कार्यकालपक्षे संज्ञानां तत्तद्विध्येकवाक्यतापन्नानां भिन्नकालप्रवृत्तिकत्वात् भिन्नदेशीयत्वाच्च बाधासंभवः। किञ्च अल्लोपोऽन इत्येकवाक्यतापन्नभंसंज्ञया नलोपः प्रातिपदिकेत्येकवाक्यतापन्न–पदसंज्ञायाः अल्लोपोऽन दृष्ट्या नलोपस्यैवासिद्धत्वात् बाध्यत्वाभावेन नलोपोऽत्र दुर्वार एवेत्यत आह आकडारस्थेति ।

बालबोधिनी : आकडारादेका संज्ञा । आङ्मर्यादायाम् , न तु अभिविधौ । अत्र प्राक्कडारात् (2-1-3) इति नोत्तरावधिः । किन्तु कडाराः कर्मधारये (2-2-38) तस्योत्तरावधित्वे अधिकलाभात् । प्राक्कडारादित्युत्तरं तत्पुरुषसंज्ञासमावेशाय द्विगुश्च (2-1-23) इति चकारकरणाल्लिङ्गात् । संज्ञाद्वयसमावेशार्थो हि चकारः । प्राक्कडारादिति यद्यवधिः स्यात्तर्हि एकसंज्ञानियमाप्रवृत्तौ संज्ञाद्वयसमावेशस्य निराबाधतया चकारकरणं व्यर्थं स्यादित्याशयेनाह लिङ्गादिति । तत् = द्विगुश्चेति सूत्रम् । आचार्थादिति । आङत्र व्याप्त्यर्थकः । चार्थे द्वन्द्व इति सूत्रमभिव्यप्येत्यर्थः । न तु मर्यादार्थकः । समाहारे द्वन्द्वबहुव्रीहिसंज्ञयोः समावेशापत्तेः । युक्तमिति । कडाराः कर्मधारये इत्यनन्तरं विधायकसंज्ञानामभावेनानुपयोगात् मर्यादार्थकाङा आकडरादिति कथनं न युक्तम् । किञ्च आकडारादित्यत्र प्राक्कडारादिति नावधिरित्यर्थलाभाय द्विगुश्चेति लिङ्गज्ञानस्यापेक्षितत्वेन प्रतिपत्तिगौरवश्चेति भावः । संख्यावाचीति । अन्याद्यर्थव्यवच्छेदः । एकैवेत्याधारणं यदि न स्यात्तर्हि संज्ञाद्वयसमावेशेऽपि प्रत्येकमेकत्वस्याक्षतत्वेनैकग्रहणं व्यर्थं स्यादिति भावः ।

परेति । यथाऽन्यत्र चरितार्थयोः करणापादानसंज्ञयोः धनुषा विध्यतीत्यादावेकत्र लक्ष्ये युगपत्प्राप्तौ परत्वादपादानसंज्ञां बाधित्वा करणसंज्ञेति तत्प्रयुक्तं कार्यं पूर्वं प्रवर्तत इति भावः । निरवकाशत्वे इति । अन्यतरस्याः संज्ञाया इत्यादिः । ननु विप्रतिषेधे परं कार्यमित्यनेन, येन नाप्राप्तन्यायेन च बाधसिद्धाविदं सूत्रं व्यर्थमित्यत आह आभ्यामेवेति । परत्वानवकाशत्वाभ्यामेवेत्यर्थः । सिद्धिस्तु नेति । तत्राद्ये आह अन्यत्रेति । आकडारीयसंज्ञाभिन्ने इत्यर्थः । द्वितीये आह लौकिकस्येति । अदर्शनेनेति । ग्राम इति संज्ञया वाराणसीति संज्ञायाः, कृष्णदेवदत्तादिसंज्ञया वृष्ण्यन्धकादिसंज्ञायाश्च बाधादर्शनादि-

त्यर्थः । अप्रवृत्तेरिति । तक्रकौण्डिन्यन्यायाप्रवृत्तेरित्यर्थः । ननु परस्य बलवत्त्वे तुल्यबलविरोधस्य नियामकत्वेन संज्ञाविषये तादृशविरोधाभावेन एका संज्ञेत्यनेन परैव कुतःप्रवर्तत इति शङ्कायामाह विरोधेति । अन्यत्र = संज्ञाभिन्नस्थले । अत्र = आकडारीयसंज्ञाविषये । तेन = परत्वेन । एकैव संज्ञेति व्यवस्थाभावे दोषमाह पर्यायापत्तिरिति। धनुषा विध्यतीत्यादौ करणापादानसंज्ञयोस्समावेशे तत्प्रयुक्त-कार्ययोःतृतीयापञ्चम्योः पर्यायापत्तिरिति भावः ।

संज्ञाद्वयसमावेशे दोषमाह भपदेति । राज्ञ इत्यादौ भपदसंज्ञाद्वयसमावेशे सर्वथा निरवकाशत्वात् भत्वप्रयुक्तात्लोपे जाते ततः पदत्वप्रयुक्तनलोपापत्तिरिति भावः । ननु राजश्वसुराद्यत् इति यत्प्रत्ययान्ते राजन्यशब्दे अन्तर्वर्तिविभक्त्या राजन् इत्यस्य परामपि भसंज्ञां बाधित्वा पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वात् पदसंज्ञायां तत्प्रयुक्तनलोपापत्तिरिति शङ्कते न चेति । समाधत्ते समानेति । बाध्यसामान्येति । अत्र च सिति चेति सूत्रं मानम् । तद्धि भवदीय इत्यादौ पदत्वार्थम् । अन्तरङ्गत्वात् सुप्तिङन्तमिति पदत्वे तद्वैयर्थ्यं स्पष्टमेव। एवञ्च बाध्यसामान्यचिन्तया अन्तरङ्गाया अपि भसंज्ञायाः पदसंज्ञया बाध इति भावः । ननु कार्यकालपक्षे संज्ञापरिभाषयोर्विधिदेशीयत्वेन तत्रत्यपरत्वस्यैव बाधप्रयोजकत्वेन आकडारीयसूत्रेण परत्वव्यवस्थायामनुपपत्तिरत आह यथोद्देशपक्ष इति अपादानमुत्तराणि कारकाणि बाधन्त इति भाष्यमत्र प्रमाणमिति भावः। एतच्च संज्ञाशास्त्राणां कार्यकालपक्षे विधिदेशीयत्वमिति मतमाश्रित्य । वस्तुतस्तु तत्पक्षेऽपि तासां स्वदेशीयत्वस्यैव सिद्धान्तितत्वेन कार्यकालत्वेऽपि न दोष इति गुरुप्रसादशेषे स्पष्टम् ।

भपदसञ्ज्ञाविधावङ्गप्रकरणे भस्येत्यस्य पाठेनाङ्गमित्यनुवर्त्याङ्गं सत् पदं भवति, भं भवतीत्यर्थेन ताभ्यां तस्य समावेश एव न पर्याय इति बोद्ध्यम् । पुरुषसञ्ज्ञापरस्मै-पदसञ्ज्ञयोरपि 'णलुत्तमो वा' इति ज्ञापकात्समावेशः। गुरुलघुसञ्ज्ञे वर्णस्य,नदीघिसञ्ज्ञे तदन्तस्येति भिन्नावधिकत्वात्समाविशतः। 'उभे अपि वर्णस्ये'ति पक्ष आकरे उपलभ्यमानोऽप्येकदेशिन एव, समावेशानुपपादनादिति दिक् । यलोप इति। 'हलि सर्वेषा'मित्यनेनेत्यर्थः।

<u>**भावबोधिनी :**</u> भस्येति । अस्येति । अनुवृत्त्येति । यस्मात्प्रत्ययविधिरित्यतः पदसंज्ञाविधायकसूत्रयोरनुवृत्त्येत्यर्थः । समावेश इति । अङ्गसंज्ञाया उपजीव्यत्वादिति भावः । समावेशफलन्तु औपगव इत्यादौ अङ्गत्वादादिवृद्धिः भत्वादोर्गुणः । एवं पार्श्वमित्यादावादिवृद्धिः सिति चेति पदत्वादोर्गुणाभाव इति बोध्यम् । ज्ञापकादिति ।

मिपः परस्मैपदसंज्ञायामेव उत्तमपुरुषसंज्ञा तस्यां सत्यामेव तदादेशणल उत्तमत्वादिति भावः । तत्फलन्तु शेषात्कर्तरीत्यस्य णलुत्तमस्येत्यस्य च प्रवृत्तिः भिन्नावधिकत्वादिति। नन्वस्यापत्यमिः अस्य स्त्री ईत्यादौ समानावधिकत्वेन लघुगुरुघिनदीसंज्ञानां प्राप्तौ घिनदीसंज्ञयोः तदन्ते चारितार्थ्येन लघुगुरुसंज्ञयोरकारादौ चारितार्थ्येन परत्वाल्लघुगुरुसंज्ञे घिनदीसंज्ञयोर्बाधिके स्यातामिति चेन्न । एरजित्यादिनिर्देशेन तत्समावेशज्ञापनात् । एकदेशिन एवेति । न च तवापि एरजित्यादिज्ञापकाश्रयणावश्य–कत्वेन वर्णसंज्ञावादिनो ममापि दीर्घो लघोरिति ज्ञापकात् समावेशः । अन्यथा अभ्यासे निरवकाशत्वात् घिसंज्ञायाः प्रवृत्तौ लघुसंज्ञाया अभावेन तदसङ्गतिः स्पष्टैवेति वाच्यम्। असखीति पर्युदासेन प्रातिपदिकावयवस्यैव घिसंज्ञाविधानेनाभ्यासेकारस्य तदभावेन ज्ञापकत्वासंभवादिति बोध्यम् । अनुपपादनादिति । भाष्यकारैरिति शेषः ।

बालबोधिनी : आकडारसूत्रेण एकैव संज्ञेति नियमसत्वेऽपि क्वचिल्लिङ्गात् ज्ञापकाद्वा संज्ञाद्वयसमावेश इत्याह । भपदेति । ताभ्याम् = भपदसंज्ञाभ्याम् । तस्य = अङ्गस्य । एवमङ्गसंज्ञया भपदसंज्ञयोः समावेशमुक्त्वा पुरुषपरस्मैपदसंज्ञयोरपि तमाह ज्ञापकादिति । परस्मैपदानां णलतुस् इत्यादिना । परस्मैपदानां तिबादीनां णलादय आदेशा विधीयन्ते । णलुत्तमो वेति सूत्रेण उत्तमस्य णलो णित्वं विकल्प्यते । यदि परस्मैपदपुरुषसंज्ञयोः समावेशो न स्यात्तर्हि परस्मैपदस्य मिपो णलादेशे तस्योत्तमपुरुषसंज्ञाभावे णलुत्तमो वेति व्यर्थं स्यात्। तद्व्यर्थं सत् निरुक्तसंज्ञाद्वयसमावेशं ज्ञापयतीति भावः । परस्मैपदस्य स्थानिनो मिप उत्तमपुरुषसंज्ञकत्वेन तदादेशस्य णलोऽपि परस्मैपदसंज्ञया साकमुत्तमत्वं सिद्ध्यतीति तात्पर्यम् । आकडारसूत्रेण समानावधिकयोरेव संज्ञयोः सहानवस्थानं बोध्यते न तु भिन्नावधिकयोरिति नदीघिसंज्ञाभ्यां गुरुलघुसंज्ञयोस्समावेशो भवतीत्याह गुरुलघुसंज्ञे इति। वर्णस्य नदीघिसंज्ञे इति पक्ष एकदेशिन इत्याह उभे इति । तस्यैकदेश्युक्तित्वे बीजमाह समावेशेति । नदीगुरुसंज्ञयोः , घिलघुसंज्ञयोश्चेत्यर्थः ।

अल्लोपोऽनः। तपरकरणं किम् ? अनितेः क्विपि 'आन' इत्यादौ लोपाभावाय । अन्त्वं त्वत्रैकदेशविकृतन्यायेनेत्यन्यत्र विस्तरः। पूर्वस्मादिति । 'अचः परस्मि' न्नित्यत्र 'पूर्वविधौ' इत्यस्यावृत्त्या पञ्चमीसमासाश्रयणादयमर्थो लभ्यते इति भावः। तेन प्रत्यैषिषन्नित्यादिसिद्धिः, अन्यथा जुस् स्यात् । अत एव 'उभे अभ्यस्त' मिति सूत्रे 'उभे' ग्रहणं यत्रोभे श्रूयेते तत्रैवाभ्यस्तसञ्ज्ञार्थम् , ऐर्त्सन् इत्यत्राभ्यस्तलक्षणो जुस् मा भूदित्युक्ते, शपैकादेशस्य पूर्वविधाविति पञ्चमीसमासेन स्थानिवत्त्वाज्जुसोऽप्राप्तेरसति प्रयोजने उभेग्रहणं

सहार्थम् इत्युक्तम् । तेन उभे यत्र श्रूयेते इत्यर्थेऽपि प्रत्यैषिषन्निति सिद्धये आवश्यकेन पञ्चमीसमासेन तत्सिद्धावुभेग्रहणं सहार्थमिति तद्भावः। इति पक्षे त्विति। तुनाऽस्यानित्यत्वं सूचितम्। 'प्रविगणय्ये'ति भाष्योदाहरणमपि तदनित्यत्वे एव सङ्गच्छते । अत एव हे 'गौ' रित्यत्र वृद्धेः स्थानिवत्त्वान्न सम्बुद्धिलोपः । 'पूर्वस्मान्निमित्तत्वेनाऽऽश्रिता'दिति व्याख्याने तु न मानम् । केचित्तु - पूर्वस्मादव्यवहितपरस्यैव कार्ये स्थानिवत्वम् , 'प्रविगणय्ये'त्यादौ तु स्थानिवद्भावलब्धाकारस्यैव व्यपदेशिवद्भावेन लघुपूर्वत्वमादाय न दोष इति तदनित्यत्वे न मानमित्याहुः।

भावबोधिनी : तपरकरणं किमिति । नन्वत्र तपरकरणाभावे लोपनिषेधस्यैव विधेयत्वं स्यात् । न च प्रसक्तेरभावेन निषेधोऽसङ्गत इति वाच्यम् । नस्तद्धित इत्यनेन प्रसक्तेस्सत्वात् । न च न संयोगादिति सूत्रं व्यर्थम् । लोपाभावाभावबोधकत्वेन चारितार्थ्यादिति चेन्न । विभाषा ङिश्योरित्युत्तरसूत्रे लोपाभावस्याप्राप्त्या विकल्पस्यैव वैयर्थ्यापत्तेः । किञ्चानेनैव औक्ष्णः वृत्तघ्न इत्यादौ लोपाभावे सिद्धे षपूर्वहन्नित्यस्य वैयर्थ्यापत्तेः । अणि परे लोपाभावः स्याच्चेदेषामेवेति एषामण्येवेति वा नियामकत्वं स्यादिति ब्रूषे तर्हि ये चाभावकर्मणोरित्यस्य वैयर्थ्यापत्तिः । न च तत्रापि नियमार्थत्वं स्यादिति वाच्यम् । तथाहि – सति अण्यन् प्रकृत्या स्यादित्यर्थकस्य अन्निति सूत्रस्य वैयर्थ्यापत्तेः। तस्मादलोप इति न्यासेऽपि अकारस्य लोप इत्यर्थेन न दोष इति भावः । लोपाभावायेति। न चाकृतव्यूहपरिभाषया तपरकरणाभावे दीर्घ एव न स्यादिति वाच्यम् । तस्यासत्वादनित्यत्वाद्वेत्यदोषात् ।

बालबोधिनी : अल्लोपोऽनः । तपरकरणप्रयोजनमाह अनितेरिति । अनधातोः क्विपि अनुनासिकस्य क्विझलोरिति दीर्घे आनिति । तस्य द्वितीयाबहुवचने आन इत्यादौ स्थानिवद्भावेन अन्त्वात् लोपापत्तिरिति तद्वारणाय तपरकरणमिति भावः । एकदेशेति । यद्यपि एकदेशविकृतन्यायो लौकिकः प्राग्दीव्यत इति विकृतनिर्देशादशास्त्रीयकार्येऽपि प्रवर्तते इति अशास्त्रीयस्याप्यन्त्वस्य तेन निर्वाहो भवतीति भासते तथापि अर्धाधिकविकारेण न तेनात्र निर्वाहः किन्तु आनुमानिकस्थानिवद्भावेनेति बोध्यम् ।

रषाभ्यां णो नः । पूर्वस्मादपि विधौ स्थानिवद्भाव इत्यर्थलाभप्रकारं, तस्यासाधारणं फलञ्चाह अचःपरस्मिन्नित्यत्रेति । पञ्चमीसमासेति । पूर्वस्मात् विधिरित्यर्थः । तेनेति । निरुक्तार्थलाभेनेत्यर्थः । प्रत्यैषिषन्निति । प्रत्येतुमिच्छतीत्यर्थे प्रतिपूर्वादिण्धातोः सनि 'णौ गमिरबोधने' इत्युत्तरेण सनि चेति सूत्रेणाबोधनेऽर्थे इणो गमित्यादेशे प्रतिजिगमिषतीति ।

बोधने तु प्रतीषिषतीति भवति । सन्नन्ताल्लङि प्रथमपुरुषबहुवचने शपि झोऽन्तादेशे सनकरशबकारयोः पररूपे पुनरन्तादेशाकारेण पररूपे प्रत्यैषिषन्निति रूपम् । अत्र प्रत्यैषिष + झि इत्यवस्थायां सर्वे सर्वपदादेशा इति न्यायेन झविशिष्टस्यान्तविशिष्ट आदेश इत्यर्थे अन्तिभावे कृते झेर्जुसित्यत्र समुदायस्य स्थानित्वेनाल्विधित्वाभावादनल्विधाविति निषेधाभावे स्थानिवद्भावात् झिग्रहणेन ग्रहणाज्जुस् प्राप्नोति । अथवा झेर्जुसित्यत्र झस्यैव स्थानित्वमित्युच्यते तर्हि अन्तादेशात्पूर्वमपवादत्वात् जुस् प्राप्नोति । पूर्वविधावित्यस्य पञ्चमीसमासाश्रयणेन पूर्वस्मात् परस्य विधौ कर्तव्ये आदेशः स्थानिवदित्यर्थो लभ्यते । प्रकृते सनकारशबकारयोरेकादेशस्य पररूपस्य पूर्वस्मादपि विधौ जुसि कर्तव्ये स्थानिवत्वे शपा व्यवधानात् सिजभ्यस्तविदिभ्यश्चेति जुसापत्तिर्नास्तीति भावः । अन्यथा = पञ्चमीसमासानाश्रयणे । तदाश्रयणे मानमाह अत एवेति । उभे अभ्यस्तम् (6-1-5) इति सूत्रे भाष्ये उभेग्रहणस्येदं तर्हि प्रयोजनम् । यत्रोभे शब्दरूपे श्रूयेते तत्राभ्याससंज्ञा यथा स्यात् । ईर्त्सन्ति, ईर्त्सन् ऐर्त्सन् । अन्यथा आद्ये अदभ्यस्तादित्यद्भावः स्यात् । नाभ्यस्ताच्छतुरिति द्वितीये नुम्प्रतिषेधः प्रसज्येत । तृतीये सिजभ्यस्तविदिभ्यश्चेति नुम् स्यादिति दोषो दर्शितः । अर्धितुमिच्छतीत्यर्थे ऋधृधातोः सनि सनीवन्तर्धेति इडभावपक्षे द्विर्वचनात् परत्वात् प्रतिपदविधेर्बलवत्वात् आप्ज्ञाप्यृधामीत् इतीत्वं रपरत्वञ्च । पूर्वत्रासिद्धीयमद्विर्वचने इति धकारस्य चर्त्वेन तकारे त्सशब्दस्य द्वित्वे अत्र लोपोऽभ्यासस्येति अभ्यासलोपे ईर्त्सीति । लटः शतृप्रत्यये ईर्त्सन् । सन्नन्ताल्लङि झिप्रत्यये शपि पररूपे अन्तादेशे पुनः पररूपे ऐर्त्सन् इति । अत्राभ्यस्तलक्षणो जुस् मा भूदिति यत्रोभे श्रूयेते तत्रैवाभ्यस्त-संज्ञेत्यर्थसम्पादनाय सूत्रे उभेग्रहणमित्युक्तम् । तदुत्तरं पूर्वविधावित्यत्र पञ्चमीसमासमाश्रित्य पूर्वस्मात् परस्य विधौ कर्तव्ये स्थानिवत्वाश्रयणेन ऐर्त्सन् इत्यत्र सनकरशबकारयोरेकादेशस्य पररूपस्य स्थानिवत्त्वे तेन व्यवधानान्न जुसः प्राप्तिरित्यसति प्रयोजने उभेग्रहणं सहार्थमित्युक्तम् । उभे यत्र श्रूयेते इत्यर्थस्वीकारे ऐर्त्सन् इत्यादौ दोषवारणेऽपि प्रत्यैषिषन्नित्यादौ जुस्वारणाय निरुक्तरीत्या अवश्यं पञ्चमीसमास आश्रयणीयः । तेनैव ऐर्त्सन्नित्यादौ दोषवारणे उभेग्रहणं सहार्थमिति भाष्याशयः ।

तुनेति । अस्य = पूर्वविधावित्यत्र पञ्चमीसमासस्य । प्रविगणय्येति । प्रविपूर्वात् गणयते : क्त्वायां ल्यपि, ल्यपि लघुपूर्वादिति णेरयादेशः । उक्तस्यानित्यत्वाभावे गणधातोर्णिचि कृतस्य अतो लोपस्य पूर्वविधाविति स्थानिवत्त्वे लघुपूर्वत्वाभावेन णेरयादेशो न स्यादिति भावः । भाष्योदाहरणमपीति । अपिना निष्ठायां सेटीति सूत्रस्थं सेड्ग्रहणमपि अस्यानित्यत्वे मानं बोध्यम् । तथा हि निष्ठायां सेटीति सूत्रेण णेर्लोपो विधीयते । निष्ठायां

सेड्ग्रहणं क्रियते अनिटि प्रतिषेधो यथा स्यात् । संज्ञपितः पशुरित्युक्तम् । संपूर्वकज्ञपधातोः 'मारणतोषणनिशामनेषु ज्ञा' इति मारणेऽर्थे मित्वाण्णिचि पुकि 'सनीवन्तर्धभ्रस्जदम्भु' इति सूत्रेण सनि इड्विकल्पविधानात् , यस्य कस्यचिद्विभाषया इड्विहितस्ततो निष्ठाया इण् न स्यादित्यर्थकेन यस्य विभाषेति सूत्रेण इट्प्रतिषेधेऽनिटि णिलोपवारणाय सेड्ग्रहणं कृतम् । सेड्ग्रहणसामर्थ्याच्च णेरनिटीति सूत्रेणापि लोपो न भवतीति भाष्याशयः । ततो भाष्ये यस्य विभाषेति सूत्रे एकाच इत्यधिकारात् तत्रैवायं निषेधः । ज्ञपिश्चानेकाजिति न तत्रेट्प्रतिषेध इति अनिटो निष्ठाया अभावात् तत्प्रयोजनं प्रत्याख्यातम् । तदुक्तं भाष्ये 'इड्भावार्थं तु तन्निमित्तत्वाल्लोपस्य' इति सेड्ग्रहणप्रयोजनं दर्शितम् । अयं भावः । निरुक्तरीत्या अनिड्व्यावृत्त्यर्थं न सेड्ग्रहणम् । किन्तु इटि कृते णिलोपो यथा स्यात् अकृते मा भूदिति कालावधारणार्थं सेड्ग्रहणम् । अक्रियमाणे सेड्ग्रहणे कारितमित्यादौ कारि + त इति स्थिते णिलोपेडागमयोः प्राप्तयोः परमपीटं बाधित्वा नित्यत्वाण्णिलोपे, एकदेशविकृतस्यानन्यत्वात् कार इत्यपि करोतिर्भवतीति एकाच इतीट्प्रतिषेधात् इण् न स्यात् । सेड्ग्रहणे तु इटि परतो णिलोपे क्रियमाणे एकाच इति इट्प्रतिषेधो न प्रवर्तते । निर्वृत्तस्य प्रतिषेद्धुमशक्यत्वात् । पञ्चमीसमासस्य नित्यत्वे हि पूर्वं णिलोपेऽपि तस्य स्थानिवद्भावेन णिचा व्यवधानादेव इण्निषेधाप्रवृत्तौ, तदर्थं कृतं सेड्ग्रहणं व्यर्थं स्यादिति भावः । तत्सूत्रभाष्यव्याख्याने प्रदीपे 'एतच्च प्रयोजनं पूर्वस्मादपि विधौ स्थानिवद्भाव इत्यनाश्रित्योक्तमिति । तदाश्रयणे हि णिलोपस्य स्थानिवत्वेनैकाचः परत्वाभावादिण्निषेधाप्राप्तेः पूर्वं णिलोपेऽपि दोषाभावात् कालावधारणार्थं कृतं सेड्ग्रहणं व्यर्थं सत् तदनित्यत्वं ज्ञापयतीति भाव' इत्युद्योतकारः । अत एव = तदनित्यत्वादेव । वृद्धेरिति । गोतो णिदिति णिद्वद्भावे अचो ञ्णितीति वृद्धेरित्यर्थः । न सम्बुद्धिलोप इति । एङन्तत्वाभावादित्यर्थः । पञ्चमीसमासस्य नित्यत्वे तु पूर्वस्मात् परस्य विधौ कर्तव्ये वृद्धेरौकारस्य स्थानिवत्त्वे हे गौरित्यत्र एङ्ह्रस्वादिति सम्बुद्धिलोपापत्तिरिति भावः ।

अचः परस्मिन्निति सूत्रभाष्यव्याख्याने प्रदीपे ननु पूर्वस्मादपि विधौ स्थानिवद्भावे कथं हे गौरित्यादि सिध्यतीत्याशङ्क्य कैयटः 'उच्यते । अचो यः पूर्वस्तस्मान्निमित्तत्वेनाश्रितादित्याश्रयणात् । तथा हि - गोशब्दे ओकारत् पूर्वो गकारो, न च तस्माद्विधिरिति' इति समाहितवान् । तद्दूषयति पूर्वस्मादिति । स्पष्टञ्चोद्योते' वस्तुतो निमित्तत्वेनाश्रितादित्यव्यवधानोपलक्षणम् । न च तस्मादिति । ओकारेण व्यवधानादित्यर्थः । तदंशे निर्दिष्टपरिभाषाबाधे मानाभावादिदमेव युक्तम् । निमित्तत्वेनेत्यादेः शब्दमर्यादयाऽलाभाच्च। अत एव 'तथा हि गोशब्द' इत्यादि सार्थकम् । अन्यथोक्तार्थस्योपपादनानपेक्षत्वेन तद्वैयर्थ्यम्' इति ।

वस्तुतः पूर्वविधावित्यत्र पञ्चमीसमासस्यानित्यत्वाश्रयणं न भाष्यरूढमित्याशयेनाह केचित्त्विति। भाष्यतत्त्वविद इत्यर्थः। अव्यवहितेति। निर्दिष्टांशबाधे मानाभावादित्यर्थः। तेन हे गौरित्यत्र ओकारेण व्यवधानान्न दोष इति भावः। ननु पञ्चमीसमासस्य नित्यत्वे प्रविगणय्येत्यादावतिप्रसङ्गः। प्रविपूर्वकगणधातोः णिचि अतो लोप इत्यल्लोपे ततः क्त्वाप्रत्यये ल्यबादेशे ल्यपि लघुपूर्वादिति णेरयादेशे प्रविगणय्येति रूपम्। तत्राल्लोपस्य स्थानिभूतादकारात् पूर्वत्वेन दृष्टणकारात् परस्य णेरयादेशे कर्तव्ये स्थानिवद्भावप्रवृत्तौ तेन व्यवधानेन लघुपूर्ववर्णात् परत्वाभावात् अयादेशाप्राप्त्या तदसिद्धिप्रसङ्ग इत्यत आह व्यपदेशिवद्भावेनेति। णकारस्येव स्थानिवद्भावलब्धाकारस्यापि लघुपूर्वत्वात् ततःपरस्य णेरयादेश इति भावः।

वस्तुतस्तु ससहाये व्यपदेशिवद्भवाप्रवृत्त्या प्रविगणय्येत्यादौ तेन निर्वाहो न भवतीत्यरुचिं मनसि निधाय केचित्तु इत्युक्तम्। पूर्वविधावित्यत्र पञ्चमीसमासाश्रयणं ग्रन्थकृत्सम्मतमेव। प्रविगणय्येत्यादौ दोषवारणं तु ल्यपि लघुपूर्वादिति सूत्रोद्योतोक्तदिशा द्रष्टव्यम्। तथा हि-विगणय्येत्यादावल्लोपस्य स्थानिवत्त्वे तस्य, णकारस्य च वर्णग्रहणे जातिग्रहणमिति न्यायेन लघुपूर्वत्वेनाश्रयणात् णेरयादेशः सुलभः। लघुपूर्वो यो वर्णस्ततः परस्य णेरयादेश इति लघुपूर्वशब्देन वर्णस्यैव ग्रहणम्। न च वर्णग्रहणे जातिग्रहणात् प्रतिचिकीर्ष्येत्यादौ णेरयादेशापत्तिरिति वाच्यम्। जातिग्रहणेनानेकग्रहणेऽपि वर्णद्वयस्यैव ग्रहणेनादोषादिति स्पष्टमुद्योते। एवञ्च पञ्चमीसमासो नागेशसम्मतः। प्रत्यैषिषन्निति तस्यासाधारणं फलं बोध्यम्।

पूर्वत्रासिद्धे नेति। अतिदेशदृष्ट्या त्रिपाद्या असिद्धत्वेन न्यायसिद्धानुवादोऽयम्। तत्फलन्त्वतिदेशान्तराणां वतिघटितानां त्रिपाद्यां प्रवृत्तिबोधनम्। अत एव 'अमी' 'क्षीरपेणे'त्यादौ मीत्वणत्वे भवतः। अत्रैकारस्यादस्सम्बन्धित्वं, पे इत्यस्यैकाजुत्तरपदत्वञ्चान्तवद्भावाधीनम्। तस्य दोष इति। इदं वाचनिकमेव। 'न मु ने' इति सूत्रे 'न' इति योगविभागस्तु भाष्ये न दृश्यते। अत एव सिद्धकाण्डं वार्तिककृताऽऽरब्धं, 'नलोपः सु' बिति सूत्रञ्च सूत्रकृता।

<u>**बालबोधिनी :**</u> पूर्वत्रासिद्धे न स्थानिवदिति न्यायसिद्धानुवादरूपमित्याह अतिदेशेति। अचः परस्मिन्नित्येतद्दृष्ट्येत्यर्थः। स्थानिवत्सूत्रं तु लिङ्गात्तत्र प्रवर्तत एवेति बोध्यम्। अनुवादफलमाह तत्फलमिति। अन्तरङ्गपरिभाषावारणायाह वतिघटितेति। अत एव = वतिघटितानामतिदेशान्तराणां त्रिपाद्यां प्रवृत्तिबोधनादेव। मीत्वमिति। अदे इत्यवस्थायाम्

अदसोऽसेरिति सूत्रेण मत्वमीत्वञ्चेत्यर्थः । अत्रैकारस्यादस्सम्बन्धित्वस्याशास्त्रीयत्वेन न स्थानिवत्सूत्रलभ्यमिति भावः । णत्वमिति । एकाजुत्तरपदे ण इत्यनेनेत्यर्थः । अत्रापि उत्तरपदत्वस्याशास्त्रीयत्वमिति बोध्यम् । अन्तादिवच्चेति सूत्रस्य त्रिपाद्यां प्रवृत्तिस्वीकारादेव निरुक्तमुभयं सिद्धमिति भावः ।

तस्य दोष इति । पूर्वत्रासिद्धे नेति वचनस्य बाध इत्यर्थः । न मुने इति सूत्रे नेति योगविभागसिद्धार्थानुवादकं तस्य दोष इति वचनमिति प्राचोक्तं खण्डयन् योगविभागस्य भाष्यानारूढत्वमाह न मु ने इति । अत एव = तस्य भाष्यासम्मतत्वादेव । वार्तिककारासम्मतिमाह सिद्धकाण्डमिति । सूत्रकारासम्मतिमाह नलोप इति ।

प्रकारार्थमिति । प्रकारः सादृश्यं, तच्च सुप्त्वेन । 'मांस्पचनी'त्यादावपि 'न लुमते'तिनिषेधानित्यत्वाच्छसादिपरत्वं बोद्ध्यम् । शब्दत्वेन सादृश्यमित्यन्ये, तन्न ; 'वा शोकष्यञ्रोगेष्वि' त्यस्य वैयर्थ्यापत्तेः, 'नासिकाया यत्तस्क्षुद्रेषु नस्' इति भाष्यपठित-वार्त्तिकस्य वैयर्थ्यापत्तेश्च । 'आसन्यं प्राणमूचुः' इत्यत्रापि तद्वदेव शसादिपरत्वम् । अत्र 'सुप्रभृतिष्वि'ति वाच्ये 'शस्प्रभृतिषु' इत्युक्त्याऽन्यत्र क्वचिदेव प्रवृत्तिर्बोद्ध्यते। अत एव पद्हृन्निशां ग्रहणं चरितार्थम् । तेषां द्विविधानामपि कोशसिद्धतया तत्र व्यवस्थार्थताया एव वक्तव्यतया सुप्रत्ययमात्रे प्रवृत्तौ तस्या असंभवेन तद्वैयर्थ्यं स्पष्टमेव । प्रकारार्थत्वे प्रमाणमाह-भाष्ये इति । तत्र हि - 'शस्प्रभृतिष्वित्युच्यते, अशस्प्रभृतिष्वपि दृश्यते - शलादोषणी ककुद्दोषणी याचते महादेवः' इत्युक्तम् । आद्यस्याध्रिगुप्रैषे पठ्यमानस्य शलाकाकारे दोषणी इत्यर्थः। छान्दसः कादिलोपः। एतेन दोषेत्यकारान्तस्य दूषणवचिनो दोषन्नादेश इत्यपास्तम् । तेन पदङ्घ्रिरिति । न च कोशस्थपदादीनां पादाद्यादेशत्वे पादादिभ्यः पृथक् पदादिवचनं तत्र व्यर्थम् । न हि स्थान्यादेशयोः पृथगुपादाने प्रयोजनमस्ति, स्थान्युपादानेनैव तदर्थाभिधानसमर्थादेशस्याप्यर्थबोधनात् । अत एव नसाद्यादेशानां कोशेऽनुपन्यास इति वाच्यम् । पदादीनां भाष्यरीत्याऽनादेशत्वात् । तत्त्वेपि - 'तृज्वत्क्रोष्टु'रिति-वद्व्यवस्थार्थमस्यावश्यकत्वेन सौ परतो हृदादीनां प्रयोगार्थं प्रकारार्थत्वस्यावश्यकत्वात्। स्पष्टश्चेदं 'वा शोके'ति सूत्रे मूले । कोशे शब्दा अर्थपरा एव । शक्तिग्रहस्तु पदत्वहेतुकानुमानेन सामान्यत एव । एवञ्च - विष्णुर्नारायण इत्यादौ विष्णुपदार्थाऽभिन्नो नारायणपदार्थ इति क्रमेण बोध इत्यादि मञ्जूषायां नामार्थवादे विस्तरेण निरूपितम् । 'एतत्पदममुकवाचक'मिति शक्तिग्रहस्तु - स्वस्वप्रसिद्धमादाय तत्तत्पुरुषस्यानियतःपश्चान्मनसैव । 'अघ्न्ये देवि सरस्वति इडे काव्ये विहव्ये एतानि तेऽघ्न्ये नामानी'त्यादौ यत एतानि तव नामानि अतस्त्वदभिन्ना

एषामर्था इति बोधः । अत एव 'नामन्त्रिते समानाधिकरणे' इति सूत्रभाष्ये 'सामान्यवचन'मित्यस्य इदं प्रत्युदाहरणं दत्तम् । अन्यथैकार्थबोधकत्वरूपसामानाधिकरण्यस्याप्यभावात्तदसङ्गतिः स्पष्टैव । एकशेषस्तु न, तथा सति तत्तच्छब्दस्वरूपस्य सम्यग्बोधानापत्तेः । अनेकशब्दानां स्वरूपबोधनपूर्वकमेकार्थबोधने कोशतात्पर्यात् । अत एव 'यत्तदेतेभ्य' इत्यादौ पाणिनिनैकशेषो न कृतः । एतेन 'कोशे शब्दानां शब्दपरता, अत एवैकशेषो न, अर्थपरत्वन्तु न सम्भवति, इतःपूर्वं शक्तिग्रहाभावात् । 'एते शब्दा एकार्था' इति बोधः । एवञ्चात्र प्रकारार्थत्वाऽभावेऽपि न क्षतिः' इत्यपास्तमिति दिक् । सङ्ख्यावि । सायेभ्य इति वक्तव्ये पूर्वग्रहणमुत्तरपदे इत्यधिकृतस्य षष्ठ्यन्तत्वलाभाय । एतेन द्व्यह्नप्रिय इत्यैवेतदुदाहरणमित्यपास्तम् ।

<u>**बालबोधिनी :**</u> पद्दन्नोमासिति सूत्रेण शसादिभ्योऽन्यत्रापि पदाद्यादेशसाधनोपायमाह मूले प्रभृतिग्रहणं प्रकारार्थमिति । अर्थान्तरव्यवच्छेदायाह सादृश्यमिति । न लुमतेति । मांसस्य पचनी मांस्पचनीत्यादौ न लुमतेति प्रत्ययलक्षणनिषेधस्यानित्यत्वात् ङस्परत्वेन मांस् आदेश इति बोध्यम् । शब्दत्वेन सादृश्यमिति प्राचोक्तौ दोषमाह शोकेति । वा शोकष्यञ्रोगेषु (6-3-51) इति सूत्रेण शोकादिषु परेषु हृदयशब्दस्य हृदादेशो विधीयते। हृच्छोकः हृदयशोकः । सौहार्दम् सौहृदय्यम् । हृद्रोगः हृदयरोगः । इति । शब्दत्वेन सादृश्ये पद्दन्नोमासिति सूत्रेणैव सिद्धौ वा शोकेति सूत्रस्य वैयर्थ्यं स्पष्टमेव । एवमेव नासिकाया इति भाष्यवार्तिकस्य च वैयर्थ्यं स्पष्टमेव । नस्नासिकाया यत्तस्क्षुद्रेष्विति भाष्यवार्तिकम् । यत्तस्क्षुद्रेषु परतो नासिकाया नस्भावो वक्तव्यः । यथा नासिकायां भवो नासिकायै हितमिति वा नस्यम् । भवे शरीरावयवाच्च इत्यनेन , हिते शरीरावयवाद्यत् इत्यनेन यत्प्रत्ययः । अपादाने चाहीयरुहोरिति तसिप्रत्यये नस्तः । नासिकया क्षुद्रः । सुप् सुपेति समासे नः क्षुद्रेति । अत्र नासिकापदघटितप्रयोगवारणाय वार्तिकमारब्धम् । शेखरव्याव्याने विषमपदविवृतिकाराः वार्तिकस्य वैयर्थ्यापत्तेरिति वचनमयुक्तम् । नासिकाशब्दप्रयोगाभावाय तदावश्यकत्वादिति वदन्ति । शेखरव्याख्याने गुरुप्रसादशेषे शब्दत्वेन सादृश्यग्रहणे पद्दन्निति सूत्रेणैव नसादेशसिद्धौ पुनः नासिकापदघटित-वार्तिकारम्भसामर्थ्यात् यत्तस्क्षुद्रेषु नश्शब्दस्यैव प्रयोगो न तु नासिकाशब्दस्येत्यर्थलाभेन तद्वारणाय कृतस्य नासिकाया इति वार्तिकस्य वैयर्थ्यापादनं युक्तमेवेति शास्त्रिपादाः।

तद्वदेव = न लुमतेति निषेधानित्यत्वादेव । आसन्यं प्राणमूचुरिति । आस्ये भवः। शरीरावयवाच्चेति भवार्थे यत्प्रत्यये आस्यशब्दस्य आसन्नादेशः । ये चाभावकर्मणोरिति

प्रकृतिभावात् टिलोपो न । प्राणशब्दसमभिव्याहारादेवमेव व्युत्पत्तिः । न त्वासनशब्दस्यासन्नादेशः । मूलोक्तरीत्या सुप्त्वेन सादृश्यग्रहणे सुप्रभृतिष्विति वक्तव्ये शस्प्रभृतिष्विति कथनेन तदन्यत्र सुटि पदाद्यादेशानां क्वाचित्कत्वं बोध्यत इत्याह अत्रेति। पद्दन्नित्यत्रेत्यर्थः । अन्यत्र = सुटि । तत्फलमाह अत एवेति । सुटि पदाद्यादेशानां क्वाचित्कत्वादेवेत्यर्थः । तथाऽनङ्गीकारे आह तेषामिति । अन्यथेत्यादिः । द्विविधानामपीति। स्थानिनामादेशानाञ्चेत्यर्थः । तत्र = तेषु पदाद्यादेशेषु । व्यवस्थार्थतयेति । सुटि तेषां प्रयोगस्य क्वाचित्कत्वमिति व्यवस्थेत्यर्थः । तस्याः = व्यवस्थायाः । तद्वैयर्थ्यम् = तेषां ग्रहणवैयर्थ्यम् । शस्प्रभृतिषु इत्यनुक्त्वा सुप्रभृतिष्वित्युक्तौ सुटि क्वाचित्कत्वबोधनासम्भवेन पदादीनां पादादीनाञ्च द्विविधानामपि कोशसिद्धतया तेषां ग्रहणं व्यर्थं स्यादिति भावः ।

प्रभृतिग्रहणस्य प्रकारार्थत्वे भाष्यं प्रमाणमाह तत्र हीति । भाष्ये हीत्यर्थः । आद्यस्य = शलादोषणीत्यस्य । अध्रिगुप्रैषे = होतृकर्तृके अध्रिगुं प्रति प्रैषे । ककुद्दोषणीति । व्यस्तं पदद्वयम् । पदादीनां प्रकृत्यन्तरत्वमेवेति सिद्धान्तमुपस्थापयति पदादीनामिति । पदादीनां प्रकृत्यन्तरत्वेऽपि प्रभृतिग्रहणस्य प्रकारार्थत्वमावश्यकमित्याह तत्वेऽपीति । अनादेशत्वेऽपीत्यर्थः । अस्य = पद्दन्नित्यस्य ।

ननु कोशपठितपदादीनां लोकप्रसिद्धार्थशब्दानुकरणत्वेन शब्दपरत्वात् तेषु अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।

शास्त्रार्थस्तेषु कर्तव्य इति न्यायेन पदाद्यादेशप्रवृत्यसम्भवात् 'पदङ्घ्रिश्चरणेऽस्त्रियाम् स्वान्तं हृन्मानसं मनः' इत्यादेः प्रभृतिग्रहणस्य प्रकारार्थत्वे प्रयोजनत्वप्रदर्शनमसङ्गतमित्यत आह कोशे इति । अर्थपरा एवेति-अनुकरणत्वे प्रमाणाभावात् अर्थविशिष्टशब्दपरा इत्यर्थः ।

ननु कोशस्थपदानां तत एवार्थबोधसम्भवेन कोशार्थबोधात्पूर्वं शक्तिग्रहाज्ञानात् कथं तेषामर्थपरत्वमत आह शक्तिग्रहेति । अनुमानेनेति । इदं पदमर्थबोधकम् । पदत्वाद्गोपदवदित्यनुमानम् । सामान्यत इति । इदं पदमर्थबोधकमिति सामान्यत इत्यर्थः। एवञ्च = कोशस्थपदानामर्थपरत्वात् । तथा चोक्तरीत्या पदत्वहेतुकानुमानेन सामान्यतः पदप्रकारकशक्तिग्रहे जाते ततः कोशादिना विशेषार्थबोधो जायत इति भावः । एतत्पदमिति। अयमाशयः । लोके पुरुषस्य पदत्वहेतुकानुमानेन विष्ण्वादिपदानि सामान्यतोऽर्थबोधकानीति पदप्रकारकशक्तिग्रहो जायते । तेषां सामान्यतोऽर्थपरत्वेन विष्णुर्नारायण इत्यादौ विष्णुपदार्थाभिन्नो नारायणपदार्थ इति क्रमेण बोधो भवति । लोके वृद्धव्यवहारादिना

पर्यायपदेषु कस्यचित् पुरुषस्य विष्णुपदे पूर्वं विशिष्य शक्तिग्रहो जायते, कस्यचित् नारायणादिपदे । यस्य यत्र शक्तिग्रहो जायते, अर्थात् विष्णुपदं विष्ण्वर्थवाचकमिति तस्य तदुत्तरं विष्णुपदं नारायणार्थवाचकमिति मानसबोधो जायत इति । एवं रीत्याऽन्यत्रोहनीयम्। प्रसिद्धमिति । अर्थमित्यर्थः ।

पर्यायपदघटितश्रुतावपीयमेव व्यवस्था । तत्रापि तेषामर्थपरत्वमेवेत्याह अघ्न्ये इति । हेतुहेतुमद्भावेनान्वयमाह यत इति । अत्रार्थे भाष्यसम्मंतिमाह अत एवेति । इदम्= 'अघ्न्ये देवि' इति श्रुतिवचनम् । तेषां पदपरत्वेऽसङ्गतिमाह अन्यथेति । तथाबोधमनङ्गीकृत्य तेषां शब्दपरत्वाङ्गीकारे इत्यर्थः । तदसङ्गतिः = सामान्यवचनमित्यस्य प्रत्युदाहरणदानासङ्गतिः । ननु कोशस्थपर्यायपदेषु समानार्थकेषु विरूपाणामपि समानार्थानामिति वार्तिकेनैकशेषापत्तिरत आह एकशेषस्तु नेति । तत्प्रवृत्तौ दोषमाह तथेति । ननु स्वरूपबोधो मास्तु इत्यत आह अनेकेति । कोशतात्पर्यादिति । तथा च 'भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः । कृतोऽत्र भिन्नलिङ्गनामनुक्तानां क्रमादृते ' इत्युक्तं कोशकारैः । अस्यायमर्थः । भेदस्य = लिङ्गभेदस्य स्वरूपभेदस्य चाख्यानाय द्वन्द्वैकशेषसङ्करा न कृता इति । लिङ्गभेदाख्यानाय यथा - 'ह्रादिनी वज्रमस्त्री स्यात् कुलिशमित्यस्य स्थाने कुलिशह्रादिनीवज्रा इति द्वन्द्वो न कृतः । स्वरूपभेदाख्यानाय विष्णुर्नारायणः कृष्ण इत्यदावेकशेषो न कृतः । एवं स्वरव्ययं स्वर्गनाक इत्यदौ स्वर्गादिसम्बन्धिनां भेदख्यापनाय एकलिङ्गानां मध्ये भिन्नलिङ्गपाठो न कृतः । अस्यापवादः'भिन्नलिङ्गानामनुक्तानां क्रमादृते' इति । भिन्नलिङ्गानामिति भिन्नस्वरूपाणामप्युपलक्षणम् । तेन समानलिङ्गानां समानस्वरूपाणां द्वन्द्वः एकशेषश्च कृत एव । अधिकं तावद्विषम्यादिषु द्रष्टव्यम् ।

अत एव = निरुक्तरीत्या कोशतात्पर्यस्वीकारादेव । एकशेषो न कृत इति । यत्तदादीनामेकशेषे तु तत्तच्छब्दस्वरूपस्य सम्यक् बोधानापत्तिरित्यर्थः । प्राचोक्तं खण्डयति एतेनेति । निरुक्तसिद्धान्तविरोधेनेत्यर्थः अत एव = अर्थपरत्वाभावात् । एवञ्च = शब्दपरत्वे च ।

संख्याविसायपूर्वस्य । संख्या च विश्च सायश्च संख्याविसायाः । ते पूर्वे यस्मादिति विग्रहः । अत्र संख्याविसायेभ्य इति वक्तव्ये पूर्वपदग्रहणसामर्थ्यात् अधिकृतस्य सप्तम्यन्तस्य उत्तरपदे इत्यस्य षष्ठ्यन्तत्वेन विपरिणामः । तेन संख्यादिपूर्वस्योत्तरपदभूतस्याह्नशब्दस्याहन्नादेश इत्यर्थो लभ्यते । यदि सप्तम्यन्तमेव स्यात्तर्हि संख्यादिपूर्वस्याह्नशब्दस्योत्तरपदे परे अहन्नादेश इत्यर्थः स्यात् । तथा सति द्व्यह्नप्रिय इत्यत्रैव स्यात् न तु

द्व्यह्न इत्यादावित्याशयेनाह सायेभ्य इति । एतेन = अधिकृतस्योत्तरपदे इत्यस्य षष्ठ्यन्ततया व्याख्यानेन ।

विश्वपा इति। 'विश्वं पातीति विग्रहे 'आतोऽनुपसर्गे'इति प्राप्ते वासऽरूपन्यायेन 'आतो मनिन्क्वनिब्वनिपश्चे'ति चेन विच्। स चाऽऽदन्तेभ्यो लोकेऽपि, 'कीलालप आगतम्' इति विभाषा पूर्वाह्ण इति सूत्रे भाष्यप्रयोगात् । क्विपस्त्वादन्तेभ्यो भाष्यानुक्तक्विब्भ्योऽनभिधानमेव । अत एव 'यूस्त्र्याख्या' वित्यत्र विजुक्तो भाष्ये, न तु क्विप् । अत एव 'शंस्था' इत्यादिप्रयोगेषु भाष्यकृता ईत्वं न कृतम्' इति केचित् । अन्ये क्विपमेवाहुः। दीर्घाज्ज । चेन 'इची'त्यनुकर्षः। 'दीर्घच्छस्येवे'ति नियमपरं 'दीर्घाच्छसी'त्येव तु न सूत्रितम् , 'दीर्घादेव शसी'ति विपरीत नियमापत्तेः। प्रत्याहारेषु जातिपक्षाश्रयणादत्र प्राप्तिः। न्याय्यत्वादिति । जसि पूर्वसवर्णदीर्घनिषेधस्य न्याय्यत्वादित्यर्थः। धातोः किं - हाहानिति। अव्युत्पन्नमिदम् । अस्य क्रियाशब्दत्वे तु सानिति प्रत्युदाहरणम् ।

भावबोधिनी : चेन विजिति । चकारेणानुवर्त्य विहितविजित्यर्थः । तस्य छांदसत्वादाह स चेति । लोके इत्यत्र प्रमाणमाह कीलालप इति । पञ्चम्यन्तमेतत् । कप्रत्यये तु आतो लोप इटि चेति लोपे ह्रस्वान्तः स्यादिति भावः । ननु कीलालप इति प्रमाणभाष्ये क्विबेवास्त्वित्यत आह क्विपस्त्विति । भाष्यानुक्तक्विप इति । अत एव ध्यायतेः क्विविधिरिति संगच्छते । आदन्तविषये क्विबसार्वत्रिक इति भावः । अत एव = असार्वत्रिकत्वादेव । अत एव = क्विबनङ्गीकारादेव । शंस्था इति । स्थः क चेति चेन विच एवानुवृत्तिरिति भावः । विश्वपा इत्यादौ तु नेत्वम् ईत्वविधौ पिबतेर्ग्रहणादिति ध्येयम् । ईत्वं न कृतमिति । प्रत्ययलक्षणेन हलादिक्ङित्परकत्वं बोध्यम् । न च वर्णाश्रय इति निषेधः । तस्य वार्तिकमते वर्णप्राधान्यविषयत्वात् । भाष्यमते तु नेत्वस्यावकाशः । प्रत्ययलक्षणसूत्रस्य नियामकत्वेनाल्विधित्वेन स्थानिवद्भावाप्राप्तेः । अत एवाह अन्ये त्विति । क्विप्पक्षे वार्तिकमते त्वीत्वमवकारादाविति वचनेनैव समाधेयमिति निष्कर्षः । नियमपरमिति । अयमत्र वाक्यार्थः । दीर्घाच्छसीति न्यासः । दीर्घाच्छसि पूर्वसवर्णदीर्घ इति सूत्रार्थः । प्रथमयोरित्यनेनैव सिद्धे नियामकमिदमिति । एवञ्च चकारो न कर्तव्य इति भावः । विपरीतनियमापत्तेरिति । एवञ्च ह्रस्वान्ते पूर्वसवर्णदीर्घाप्राप्त्या अतो गुण इति प्रवृत्तौ तस्मादिति नत्वञ्च स्यादिति बोध्यम् । न च नत्वविधानात् ज्ञापकात् विपरीतनियमो नेति वाच्यम् । वातप्रमीन् हूहूनित्यादौ चरितार्थत्वादिति । दीर्घात् सुटीति न्यासेन दीर्घात् सुटि पूर्वसवर्णदीर्घो नेत्यर्थे तु न

कोऽपि दोष इति बोध्यम् । केचित्तु नृन्पे , कानाम्रेडित इत्यादिनिर्देशेन विपरीतनियम- वारणसम्भवेन दीर्घच्छसीत्यपि सुवचमित्याहुः । सानिति । अः = विष्णुः तेन सहित इति विग्रहः ।

<u>**बालबोधिनी :**</u> आतो धातोः । चेन विजिति । आतो मनिन् इति सूत्रस्थचकारेण समुच्चितः अन्येभ्योऽपि दृश्यन्त इति सूत्रविहितो विजित्यर्थः । स च = अन्येभ्य इति विहितः चकारेण समुच्चितो विच् । विच आदन्तेभ्यो लोकेऽपि प्रवृत्तौ मानमाह कीलालप इति । पञ्चम्यन्तमेतत् । कीलालप आगतम् । हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य इति रूप्यप्रत्यये कीलालपारूप्यम् । कीलालं पिबतीति कीलालपाशब्दो विजन्तः । कप्रत्यये तु आतो लोप इटि चेति आलोपे कीलालप इति ह्रस्वान्तः स्यात् । भाष्यप्रयोगेऽपि क्विबेवास्त्विति शङ्कायामाह क्विप इति । आदन्तेभ्यः क्विपोऽनभिधाने मानमाह अत एवेति । न तु क्विबिति। तत्र मानमाह अत एवेति । आदन्तेभ्यः क्विपोऽभावादेवेत्यर्थः । शंस्था इति । स्थः क च इति सूत्रेण कप्रत्ययः, चात् विजपि भवति । शंस्थः, शंस्था । क्विपि तु ईत्वापत्तिरिति भावः । स्थः क चेति सूत्रभाष्ये वासरूपेण क्विबपि भविष्यतीत्युक्तम् । तत्पक्षे ईत्वमवकारादाविति वचनाद् भाष्यकारवचनप्रामाण्याद्वा प्रत्ययलक्षणेनेत्वाभाव इति कैयटः। वस्तुतो भाष्ये क्विपूपदेन सादृश्याद् विजुच्यते इतीत्वाप्रसक्तिरेवेति बोध्यम् इत्युद्योतकारः। केचिदिति । विश्वप इति विजन्त इति केचित् भाष्यानुयायिन इत्यर्थः । विजन्त इति ग्रन्थकृत्सम्मतम् । यूस्त्र्याख्याविति प्रागुक्तं भाष्यमत्र मानम् । अत एवोद्योते क्विपूपदेन सादृश्याद् विजुच्यते इतीत्वाप्रसक्तिरित्युक्तम् । अन्ये इति । कैयटादय इत्यर्थः । अत एव प्रदीपे शंस्थ इत्यत्र क्विपि ईत्वमवकारादाविति वचनेनेत्वं वारितम् । घुमास्थेति सूत्रे भाष्ये ईत्वे वकारप्रतिषेध इत्युक्तम् । वकारादौ प्रत्यये परे ईत्वं न भवतीति तदर्थः । क्विपो वकारादित्वेन तस्मिन् परे शंस्थ इत्यत्रेत्वं न भवतीति कैयटाशयः । वकारप्रतिषेध इत्यस्य वकारस्य निमित्तभावेन प्रतिषेध इत्यर्थः । घृतपावान इत्यत्र आतो मनिन् इति क्वनिपि ईत्वाभाव इति भावः । तदुत्तरं भाष्ये 'स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । वनिबेव भविष्यति, न क्वनिबिति' इत्युक्त्वा वकारप्रतिषेध इति वार्तिकं प्रत्याख्यातम् । तत्र कैयटः 'क्वनिप् तु छन्दसि दृष्टानुविधानान्न भविष्यति । भाषायामपि अन्येभ्योऽपि दृश्यत इति दृशिग्रहणात् प्रयोगानुसरणार्थात् प्रयोगाभावात् पादिभ्यो नास्ति क्वनिबिति भाष्यकारस्याभिप्रायः । तत्र वार्तिकारम्भो ज्यायानित्याहुः । स्थः क च इति क्विपि शंस्था इत्यत्र ईत्वस्यादर्शनात् । भाष्यकारमतेन त्वीत्वं प्राप्नोति प्रत्ययलक्षणेन यथा अतृणेडित्यत्रेमागमः' इति । अनेन क्विबन्तत्वपक्षः, वकारप्रतिषेध इतीत्ववारणञ्च

कैयटसम्मतमिति ज्ञायते । तत्र भाष्ये उद्योते 'अत्रेदं चिन्त्यम् । प्रत्ययलक्षणसूत्रं नियमार्थमिति भाष्यमतेऽप्राप्तेः वस्तुतस्तु क्विप्यपीत्वं भवत्येव । सूत्रे हलीत्यस्यानजादिपरत्वात् । अत एव ध्यायतेः सम्प्रसारणमिति वार्तिके धीध्र्यायतेर्दधातेर्वा इति भाष्यं सङ्गच्छते । शंस्थाः इत्यत्र, अम्बाम्ब इति सूत्रस्थे संव्येष्ठा इत्यत्र च विजेव । चेन क्विबिति तत्सूत्रस्थभाष्ये क्विप्पदेन सादृश्याद्विजेवोच्यत इति चिन्त्योऽयं कैयट' इति । केचित्तु इत्यनेनापि स्वाशयप्रदर्शनं ग्रन्थकृतः शैलीति बोध्यम् ।

दीर्घाज्जसि च । चेनेति । नादिचीति सूत्रादित्यर्थः । अत्र सूत्रे चकाराभावे ह्रस्वाकारादिचि दीर्घाकारात्तु जसीति व्यवस्था संभाव्येतेति भावः । चेनानुवृत्त्यकरण-प्रयुक्तलाघवादाह दीर्घादिति । नियमपरमिति । अयं भावः । प्रथमयोः पूर्वसवर्ण इत्यनन्तरं तस्माच्छस इत्यतः प्राक् दीर्घाच्छसि इति सूत्र्यते । दीर्घात् शसि परे पूर्वसवर्णदीर्घ इति तदर्थः । प्रथमयोरित्यनेनैव सिद्धे इदं व्यर्थं सत् दीर्घाद् यदि पूर्वसवर्णदीर्घस्तर्हि शस्येवेति नियमाय भवति । एवं न्यासे चकारो न कर्तव्यः । तस्माच्छस इति सूत्रे शस्ग्रहणमपि न कार्यम् । अनुवृत्त्यैव तत्सिद्धेरिति । तन्निरस्यति विपरीतनियमापत्तेरिति । शसि यदि पूर्वसवर्णदीघस्तर्हि दीर्घादेवेति विपरीतनियमापत्तेरित्यर्थः । तथा सति ह्रस्वान्ते शसि परे पूर्वसवर्णदीर्घाप्राप्त्या अतो गुणे नत्वे रामन् इत्यनिष्टमापद्येतेति भावः । यदि तु विपरीत-नियमवारणाय पक्षिमत्स्यमृगान् हन्तीति सूत्रनिर्देशः प्रमाणत्वेनाश्रीयते तर्हि प्रतिपत्तिगौरवमिति बोध्यम् ।

प्रकृतसूत्रविषये पूर्वसवर्णदीर्घप्राप्तिमुपपादयति प्रत्याहारेष्विति । अत्र = दीर्घविषये। न्याय्यत्वादिति । यद्यपि विश्वपाशब्दात् जसि पूर्वसवर्णदीर्घेऽपि क्षतिर्नास्ति तथापि निषेधाश्च बलीयांस इति न्यायेन न्याय्यत्वादिह पूर्वसवर्णदीर्घनिषेधः प्रस्तुतः । इदमिति । गन्धर्वविशेषवाचीदमित्यर्थः । क्रियाशब्दत्वे इति । हा = शोकव्यञ्जकशब्दं जहातीति व्युत्पत्तावित्यर्थः । सानिति । अः = विष्णुः तेन सहितः साः । तानित्यर्थः ।

परे तु क्त्वः श्न इत्यादिसिद्ध्यर्थम् आतोऽनाप इति वक्तव्यमित्युक्ते आत इति योगविभागेन तत्संसाध्य तत्प्रत्याख्यातं भाष्ये । एवञ्च साशब्दादेर्यद्यभिधानं तदा योगविभागेन लोप इष्ट एव । सूत्रे धातुग्रहणमाबन्तनिवृत्त्यर्थमेव , भाष्यवार्तिककृतोरज्ञानकल्पनापेक्षये-दृशार्थकल्पनस्यैवौचित्यात् । आबन्तादाचारक्विबेव न, तत्क्विबन्ताद्वा कर्तृक्विब्न अनभिधानादिति न तत्र सूत्रवार्तिकयोर्विरोधः। अत एव 'प्रथमयो'रिति सूत्रभाष्ये - 'पररूपं बाद्ध्यसामान्यचिन्तया दीर्घमात्रस्य बाधक'मिति पक्षे रामानित्यादिसिद्ध्यर्थम्

'अतो दीर्घ' इति, 'सुपि चे'ति चानुवर्तमाने 'बहुवचने झल्ये'दिति सूत्रे 'बहुवचने' इति योगविभागेन पररूपबाधकं दीर्घं विधाय, रामाणामित्यादावनेन दीर्घे परत्वात्कृते अग्नीनामित्यादौ सावकाशस्य नुटोऽप्राप्तिमाशङ्क्य, 'ह्रस्वनद्याप' इति सूत्रे 'आज्जसे' रित्यत आद्ग्रहणानुवृत्त्या समाधाय, कीलालपामित्यादौ - नुड्विधायके आतो धातोरित्यनुवर्त्य लोपेन नुड्बाधकेन समाहितम् । नुड्विधायके आब्ग्रहणं न कार्यमिति तदाशयः । अधात्ववयवाकारान्तानां लोपाभावे तु तदसङ्गतिः स्पष्टैवेत्याहुः।

भावबोधिनी : सानित्यादौ सर्वथा लोप एवेति मन्वानः स्वमतमाह परे त्विति । एवञ्चेति । आरम्भप्रत्याख्यानयोस्सतोश्च इष्ट एवेति आरम्भप्रत्याख्यानयोः फलैक्यायावश्यं कृत इति योगविभागेन लोपोऽङ्गीकार्यः । अन्यथा प्रत्याख्यानमेवासङ्गतं स्यादिति भावः । तर्हि धातुग्रहणमत आह सूत्र इति । सानित्यादौ वार्तिकमते लोपः, भाष्यमते तदभावे तु प्रत्याख्यातुर्भाष्यकृतः त्वद्रीत्या अज्ञानश्चेत्याह भाष्यवार्तिककृतोरिति । ईदृशार्थ इति । यद्यभिधानं तदा लोप इत्यर्थः । ननु त्वन्मतेऽपि सूत्रवार्तिककृतोः अज्ञानं दुर्वारमित्यत आह आबन्तादिति । मालेवाचरति मालातीत्यादौ आचारक्विब्दर्शनादाह तत्क्विबन्ताद्वेति । अनभिधानादिति । अत्र च प्रमाणं भाष्ये आचारक्विबन्तात् कर्तरि क्विपः क्वाप्यदर्शनमेव । अत एव सानित्यादौ लोपाङ्गीकारादेव। पररूपम् = अतो गुण इति पररूपम् । दीर्घं विधायेति । आतोऽनाप इति लोपस्तु न । आदन्ताद्विहितप्रत्ययनिमित्तकभसंज्ञकस्येत्यर्थात् । एवं रामाणामित्यादौ उत्तरत्रापि बोध्यम्। नुड्बाधकेनेति । आमि परतो लोपविधानादिति भावः । आतो धातोरिति। यथाश्रुते त्वालोपस्तु न । परत्वान्नुटः प्रवृत्तेः । तद्बाधनायैव पुनरनुवर्त्य लोपविधानादिति बोध्यम् । तदाशय इति । आज्जसेरित्यतोऽनुवृत्तिं कुर्वत इत्यर्थः । निगमयति अधात्विति। तदसङ्गतिरिति । सामित्यादावात इति विभक्तसूत्रेण लोपानङ्गीकारे कीलालपामित्यादौ नुड्विधायके आलोपेन नुड्वारणपरभाष्यासङ्गतिरित्यर्थः । सामित्यादौ नुडापत्तेरिति भावः। इदन्तु भाष्यमेकदेश्युक्तम् । रामानित्यादौ तस्मादिति नत्वापत्तेः । तस्मादिति सूत्रे तस्मादित्यनेन सवर्णदीर्घग्रहणेऽपि बहुवचन इति विभक्तसूत्रेण विहितस्य दीर्घस्याग्रहणात्।

बालबोधिनी : सिद्धान्तमाह परे त्विति । उक्ते इति । वार्तिककृतेति शेषः । तत् = क्त्वः श्न इत्यादिकं संसाध्य । तत् = आतोऽनाप इति । यद्यभिधानमिति । आकारान्त-धातुप्रकृतिकातिरिक्तानामाकारान्तप्रातिपदिकानामनभिधानमनेन सूचितम् । क्त्वः, श्न

इत्यादीन्यनुकरणस्थलानि । साशब्दादीनामभिधानेऽपि आरम्भप्रत्याख्यानयोः फलैक्याय आत इति योगविभागेन लोप इष्ट एव । अन्यथा सानित्यादौ वार्तिकमते लोपः प्रवर्तते । भाष्यमते तदभाव इति फलभेदः स्यादिति भावः । एवञ्च आतोऽनाप इति वार्तिककृदुक्तन्यासेन, तत्प्रत्याख्यानपरभाष्येण च आकारान्तधातुप्रकृतिकातिरिक्ता-नामाकारान्तप्रतिपदिकानामनभिधानम् । अभिधाने वार्तिकारम्भप्रत्याख्यानभाष्ययोः फलैक्याय धातुपदस्य आबन्तनिवृत्तिमात्रफलकत्वमेव वाच्यम् । न तु अधात्ववयवा-कारान्तनिवृत्तिरिति बोध्यम् । तदेवाह सूत्रे इति । तथा च सूत्रकारादिमतेषु धातुग्रहणस्याबन्तनिवृत्तिफलकत्वेन सानित्यादौ लोपस्येष्टत्वेन तत् प्रत्युदाहरणं भवितुं नार्हति रमा इत्यद्येव तद्व्यावर्त्यमिति भावः। अत्र मानमाह भाष्यवार्तिकेति । ईदृशार्थेति । सूत्रस्थधातुपदस्य धातुभिन्नावयवाकारान्तेषु लोपनिवर्तकस्य अक्षरमर्यादया लाभेऽपि सूत्रवार्तिकभाष यकाराणां मतैक्याय तस्याबन्तनिवृत्तिमात्रफलकत्वं वक्तव्यमिति भावः । ननु धातुपदस्य प्राचोक्तं सानिति प्रत्युदाहरणदानमसङ्गतम् । सूत्रवार्तिकयोः फलैक्याय धातुपदस्याबन्तनिवृत्तिमात्रफलकत्वादिति परे त्विति कथनमयुक्तम् । आबन्तादाचार-क्विबन्तात् कर्तृक्विपि निष्पन्नात् शसि धातुत्वादातो लोपप्राप्त्या, धातुपदस्य आबन्तनिवृत्ति-फलकत्वस्य वक्तुमशक्यतया सूत्रवार्तिकयोः फलभेदस्य दुर्वारत्वादित्यत आह आबन्तादिति । न विरोध इति । फलभेदो नास्तीत्यर्थः । एवञ्च सानित्यदेरभिधाने लोपस्येष्टत्वेन न तत् प्रत्युदाहरणमिति भावः ।

आबन्तभिन्नाधात्ववयवाकारान्तानां लोपाङ्गीकारे भाष्यान्तरं मानमाह अत एवेति। आबन्तभिन्नाधात्ववयवाकारान्तानां साशब्दादीनां लोपस्येष्टत्वादेवेत्यर्थः । अयं भावः । अतो गुणे इति पररूपं स्वविषये यद्यत् प्राप्नोति तत्सर्वं बाध्यमेवेति बाध्यसामान्यचिन्तया अकः सवर्णे दीर्घस्य, प्रथमयोः पूर्वसवर्णदीर्घस्य च बाधकमिति पक्षे रामानित्यादावनिष्टं प्रप्नोतीति शङ्का कृता भाष्ये । तदुत्तरं बहुधा समाधाय भाष्यकारः अथवा योगविभागः करिष्यत इति समाधानान्तरं दर्शितवान् । तथा हि - बहुवचने झल्येत् (7-3-103) इति सूत्रे बहुवचने इति योगो विभज्यते । तत्र अतो दीर्घो यञीति सूत्रादतो दीर्घ इति सुपि चेति चानुवर्तते । बहुवचने सुपि परे अतो दीर्घः स्यादिति पररूपबाधकतया पूर्वस्यातो दीर्घे जसि अकः सवर्णे दीर्घ इति दीर्घः, शसि प्रथमयोः पूर्वसवर्णः सिध्यतीति । एवं सति षष्ठीबहुवचने आमि रामाणामित्यादौ नुटं बाधित्वा परत्वात् नित्यत्वाच्च बहुवचनें इति योगविभागेन पूर्वं दीर्घे ह्रस्वान्तत्वाभावात् नुट् न प्राप्नोतीत्यक्षेपः कृतः । तदुत्तरं ह्रस्वनद्याप इति सूत्रे आज्जसेरसुगिति सूत्रात् आदिति पदमनुवर्तते । अकारेण चाण्त्वादाकारो गृह्यते ।

तथा च राम + आम् इत्यत्र पूर्वं दीर्घेऽपि नुट् भविष्यतीति समाहितम् । ततस्तुल्ययुक्त्या कीलालपाशब्दादाम्प्रत्यये आकारान्तात् नुट् स्यादिति शङ्कायां, ह्रस्वनद्याप इति सूत्रे आतो धातोरित्यस्यानुवर्तनेन सा परिहृता । ह्रस्वनद्याप इति सूत्रे आतो धातोरित्यनुवर्तते आमि परे आतो धातोर्लोपो भवतीति तदर्थः । कीलालपामित्यत्र नुटं बाधित्वा आतो लोपे इष्टं सिध्यतीति तदर्थः । ननु नपुंसके कीलालपानाम्, ब्राह्मणकुलानामित्यादौ ह्रस्वो नपुंसके इति ह्रस्वत्वे तुल्ययुक्त्या बहुवचने इति योगविभागेन दीर्घत्वे आतो धातोरित्यधिकारादालोपप्रसङ्ग इति चेत् 'नपुंसकस्य न' इत्यप्यनुवर्तिष्यत इति न लोपप्रसङ्ग इत्यप्युक्तं भाष्ये । ह्रस्वनद्यापसूत्रे आज्जसेरिति सूत्रात् आदित्यनुवृत्त्या अकारेण चाण्त्वदाकारस्यापि ग्रहणात् तेनैवेष्टसिद्ध्या आब्ग्रहणं न कार्यमिति लाघवमिति आदित्यस्यनुवृत्तिं कुर्वतो भाष्यकारस्याशयः । आतो धातोरित्यत्र धातुपदस्य यथाश्रुतार्थकत्वमङ्गीकृत्य अधात्ववयवाकारान्तानां साशब्दादीनां लोपाभावस्वीकारे ह्रस्वनद्याप इति यथाश्रुतसूत्रे आद्ग्रहणानुवृत्त्यभावपक्षे हाहामित्यादौ ह्रस्वान्तत्वाभावेन नुटः प्रसङ्ग एव नास्तीति लोपे सवर्णदीर्घे वा रूपे नास्ति विशेषः । आद्ग्रहणानुवृत्तिपक्षे अदन्तान्नुडित्यर्थे हाहामित्यादौ नुट्प्रसङ्गात् फलभेदेन, नुड्विधायके आतो धातोरित्यनुवर्त्य लोपेन नुड्वारणपरभाष्यासङ्गतिरिति भावः ।

क्त्वः श्न इति । क्त्वाप्रत्ययस्य इडित्याद्यर्थकं 'क्त्व इट्' 'श्नःशस्येत्त्वम्' इत्यादिप्रयोगस्थमत्रोदाहरणम् । एतेनाऽऽचारक्विबन्तात्कर्तृक्विपा एते प्रयोगा निर्वाह्या इत्यपास्तम् । आचारक्विबन्तप्रकृतिककर्तृक्विबन्तस्य भाष्ये क्वाप्यनुपन्यासेन तेभ्यः कर्तृक्विपोऽनभिधानस्यैव लाभाच्च ।

भावबोधिनी : क्त्वो ल्यप्, श्नः शानज्झावित्यनयोः सौत्रत्वकल्पनेनैव सिद्धे योगविभागो व्यर्थ इत्यत आह क्त्वेति । एतेन प्रयोगस्थस्यैवोदाहरणत्वेन ।

बालबोधिनी : एतेन = निरुक्तरीत्या क्त्वः, श्न इति प्रयोगस्थानामुदाहरणत्वेन । निर्वाह्या इति । तथा च क्त्वः, श्न इत्यादिसाधनाय आत इति योगविभाग अनावश्यक इति तदाशयः । आचारक्विबन्तेति । आदन्तप्रकृतिकेत्यादिः । तेभ्यः = आदन्तप्रकृतिकाचारक्विबन्तेभ्यः । क्त्व इट् इत्येवं स्वारसिकप्रयोगाणां दृष्टत्वेन गत्यन्तराभावेन आत इति योगविभागेनैव ते साधनीया इति भावः ।

जसि च। ह्रस्वस्य गुण इति वर्त्तते । ह्रस्वस्य । 'सम्बुद्धौ चे'त्यतः सम्बुद्धाविति वर्त्तते। शेषोघ्य। 'यू स्त्र्याख्यौ' इत्यतो यू इति 'ङिति ह्रस्वश्च' इत्यतो ह्रस्व इति च वर्तते।

'शेष' पदार्थमाह - अनदीत्यादि । तदन्तमिति । अनुवृत्तयुभ्यां शेषपदार्थस्य विशेषणात्तदन्तलाभ इति भावः। ननु 'मत्यै' इत्यत्रानवकाशत्वान्नदीसञ्ज्ञैव भविष्यतीति शेषग्रहणं व्यर्थमत आह - एकसञ्ज्ञेति । अधिकारादिति । 'कडाराः कर्मधारये' इत्येतत्पर्यन्तं तस्य बुद्धिस्थत्वादित्यर्थः। स्पष्टार्थमिति । स्पष्टतया तदन्तविधिलाभार्थमिति भावः। मात्रे इति । 'ऋतो ङी'ति तु 'यू' इत्यनुवृत्तावेव तात्पर्यग्राहकमिति भावः।

__भावबोधिनी :__ जसि च । ह्रस्वस्य गुणो जसि चेत्येकसूत्रत्वे दोषश्चिन्तनीयः । ननु जि चेत्येवास्तु, अङ्गेन प्रत्ययाक्षेपात् जादौ प्रत्यय इत्यर्थः । एवञ्च सति जुसि चेति सूत्रं न कर्तव्यमिति लाघवमिति चेन्न । जसाद्यपेक्षया जादित्वस्य मुख्यत्वेन पट्टुजातीय एव स्यात् । न तु हरये इत्यादाविति दोषापत्तेः । न च जिति चेति न्यासः, इत्थञ्च न दोष इति वाच्यम् । इदानीं प्रयोजनसंभवेन पट्टुजातीये जस्येत्संज्ञायां गुणापत्तेः । किञ्चात्र ह्रस्वस्येति पदमनुवर्तते न वा ? आद्ये अबिभयुरित्याद्यसिद्धेः, द्वितीये ग्रामण्य इत्यादौ गुणापत्त्या यथान्यास एव युक्त इति बोध्यम् । यूङ्तीति । ह्रस्व इति चेति । यद्यपि यूस्त्र्याख्यावित्यत्र यूशब्दो दीर्घपरः तथापि इह शब्दानुवृत्त्या ह्रस्वपरः । न च ह्रस्वाविति व्यर्थम् । शब्दानुवृत्तौ तस्य तात्पर्यग्राहकत्वात् । ह्रस्व इत्यननुवृत्तौ यूस्त्र्याख्यावित्येतत् दीर्घस्त्रीलिङ्गविषयः । प्रकृतसूत्रे दीर्घपुँलिङ्गविषयमिति व्यवस्था स्यात् । न चासखीति पर्युदासः । पतिस्समास इति सूत्रञ्च शब्दानुवृत्तौ तात्पर्यग्राहकमिति ह्रस्वानुवृत्तिर्व्यर्थेति वाच्यम् । ग्राहकशास्त्रप्रवृत्त्या दीर्घविषयमपीदं सूत्रमिति संभाव्येतेति ह्रस्वानुवृत्तेरावश्यकत्वात् । एवञ्च ह्रस्वानुवृत्तिः ग्रहणकशास्त्राप्रवृत्तौ तात्पर्यग्राहकमिति बोध्यम् । अनवकाशत्वादिति । ननु गवां पत्यै ब्राह्मण्यै इत्यादौ पतिस्समास एवेति घिसंज्ञाभावेन तत्र ङिति ह्रस्व इति नदीसंज्ञा सावकाशेति चेन्न । पतिस्समास इति नियमः भर्तृपर्यायपतिशब्दस्यैव । स्वामिपर्यायस्य तु समासेऽसमासे वा घिसंज्ञा । अत एव सीतायाः पतये नम इति सिध्यति । एवञ्चोक्तस्थलेऽपि घिसंज्ञाप्राप्तिरस्तीति नदीसंज्ञा निरवकाशैवेति व्याख्यानादिति केचित् । वस्तुतस्तु पतिस्समास इति पतिशब्दसामान्य-ग्रहणं युक्तम् । अत एव पत्यावैश्वर्य इति सूत्रे स्वामिवाचकपतिशब्दस्य पत्याविति निर्देशस्संगच्छते । नदीसंज्ञा सावकाशेति तु न । सावकाशत्वञ्चोद्देश्यतावच्छेदकाना-क्रान्तत्वम् । उक्तस्थले पतिस्समास इति नियमेन घिसंज्ञाभावेऽपि घिसंज्ञोद्देश्यताव-च्छेदकाक्रान्तत्वमव्याहतमेवेति नदीसंज्ञा अनवकाशैव । सीतायाः पतये नम इति प्रयोगस्तु महाकविप्रयुक्तत्वात् साधुरिति वदन्ति । मूलस्थाधिकारादिति । पदस्यार्थमाह आकडारा इति । आकडारादेकेति परिभाषा, न त्वधिकारसूत्रम् । तथा सति तत्र तत्र

संबन्धार्थं मण्डूकप्लुत्याद्याश्रयणगौरवम् । फलन्तु नेति भावः । मात्रे इतीति । यद्यपि ऋतो ङीति ङिद्ग्रहणेन ऋकारान्तस्य ङावेव गुण इति नियमेन न दोषः । न च ङौ ऋकारान्तस्यैवेति विपरीतनियमापत्तिः व्यावर्त्याप्रसिद्धेः । न च मात्रे इत्यादौ गुणार्थमेव नियमोऽस्त्विति वाच्यम् । तथा सति ङिग्रहणपरित्यागेनैवेष्टसिद्धेः इति पाठान्तरम् । ङिग्रहणस्य वैयर्थ्यापत्तेरिति । तथापि यूग्रहणाननुवृत्तौ पित्रेत्यादौ नाभावादिदोषापत्त्या यूग्रहणानुवृत्तावेव ङिपदस्य तात्पर्यग्राहकत्वं युक्तमित्याह ऋत इति ।

बालबोधिनी : शेषो घ्यसखि । यू इति । यू स्त्र्याख्याविति सूत्रात् यू इत्यनुवर्तते । ङिति ह्रस्वश्चेति सूत्रादनुवृत्तेन ह्रस्वपदेन सामानाधिकरण्यानुरोधात् पूर्वसूत्रे यू इत्यस्य दीर्घपरत्वेऽप्यत्र ह्रस्वपरत्वं बोध्यम् । ह्रस्वौ याविवर्णोवर्णौ इति फलितार्थः । तदेतदभि-प्रेत्याह अनुवृत्तयुभ्यामिति । यूपदह्रस्वपदानुवृत्तिफलितार्थकथनमिदमिति भावः। शेषपदार्थस्यानुवृत्तयूभ्यां प्रत्येकमन्वयः। अध्याहृतं शब्दस्वरूपं यूभ्यां विशेष्यते । तदन्तविधिरित्याशयः। नन्विति । सूत्रे शेषग्रहणाभावे मतिशब्दस्य ङिति ह्रस्वश्चेति नदीत्वपक्षेऽपि घिसंज्ञा स्यात् । तथा सति मत्यै इत्यत्र नदीत्वादाडागमे वृद्धौ घित्वात् घेर्ङितीति गुणेऽयादेशे मतयै इत्यनिष्टं स्यादिति शेषग्रहणं कृतम् । वस्तुतस्तु शेषग्रहणाभावेऽपि आकडारादेका संज्ञेति एकसंज्ञाधिकारादनवकाशया नदीसंज्ञया घिसंज्ञाया बाधात् न दोष इति शेषग्रहणं व्यर्थमिति शङ्कितुराशयः । समाधत्ते एकसंज्ञेति । बुद्धिस्थत्वादिति मूले अधिकारपदं बुद्धिस्थपरम् । कडाराः इत्येतत्पर्यन्तम् एका संज्ञेत्यस्य बुद्धिस्थत्वादिति । मूलस्यार्थः। आकडारादेकेति परिभाषासूत्रम् । नत्वधिकारः । तथात्वे तत्र तत्र सम्बन्धार्थं मण्डूकप्लुत्याद्याश्रयणप्रयुक्तगौरवं स्यात् । प्रधानोपकारकत्वमात्रेणाधि-कारसादृश्यात् परिभाषाप्यधिकारशब्देनोच्यत इति ग्रन्थकृदाशयः । स्पष्टतयेति । शब्दस्वरूपं विशेष्यमध्याहृत्य य्वोरित्यस्य तद्विशेषणत्वेन तदन्तविधिबोधार्थमिति भावः ।

यू किम् ? मात्रे इति । प्रकृतसूत्रे यूग्रहणानुवृत्तिर्मास्तु । ह्रस्वग्रहणानुवृत्त्या आकारान्तेषु विश्वपादिषु न दोषः । अदन्तस्य सत्यपि घित्वे नास्ति क्षतिः। तृतीयाविभक्तौ रामेणेत्यादौ घिसंज्ञायामपि इनादेशेन बाधात् आङो नेति नादेशापत्तिर्नास्ति । घेर्ङितीति गुणविधायके इक्परिभाषोपस्थित्या रामस्येत्यत्र घित्वेऽपि क्षतिर्नास्ति । अच्च घेरित्यत्र इदुद्भ्यामित्यनुवृत्त्या रामे इत्यादौ सप्तम्येकवचने न दोषः। द्वन्द्वे घीत्यस्य विषये हरिहरावित्यत्रापि न दोषः। अजाद्यदन्तमित्यस्यादन्तं चेदजाद्येवेति नियमाश्रयणात् । ईदग्नेः सोमवरुणयोरितीत्वविधानात् ज्ञापकात् अजादि चेददन्तमेवेति न विपरीतनियम इति यूग्रहणं

किमर्थमिति मूलकारस्याशय इति स्पष्टं सदाशिवभट्टीयादिषु । ननु यूग्रहणानुवृत्त्यभावेऽपि मात्रे इत्यादौ ऋकारान्तस्य घित्वेऽपि घेर्ङितीति गुणो न भवति । तथाहि ह्रस्वान्तमात्रस्य यदि घिसंज्ञा स्यात्तर्हि ऋदन्ताङ्गस्य ङौ परे घेर्ङितीति गुणे सिद्धे ऋतो ङीति सूत्रे ङिग्रहणं व्यर्थं सत् ऋकारान्तेषु घित्वप्रयुक्तगुणस्याप्रवृत्तिं ज्ञापयतीति मात्रे इत्यादौ घित्वेऽपि नास्ति दोष इति यू इत्यस्य मात्रे इति प्रत्युदाहरणं भवितुं नार्हति । किन्तु पित्रेत्यत्र घित्वे आङो नेति नाभावापत्तिरिति तद्वारणमेव फलमिति यूग्रहणस्य पित्रेति प्रत्युदाहरणमत आह ऋतो ङीति । ऋतो ङीति सूत्रे ङिग्रहणस्य ऋकारान्तेषु घेर्ङितीति न भवतीति ज्ञापकत्वकल्पनापेक्षया लाघवात् घिसंज्ञासूत्रे यूग्रहणानुवृत्तिज्ञापनमेव वरमिति भावः ।

आङो ना । पुंसीति तु नोक्तम् । अमुना कुलेनेत्यत्र मुत्वस्यासिद्धत्वान्नुमनापत्तौ, पुंस्त्वाभावेन नाभावस्याप्यनापत्तौ रूपासिद्धेः । 'न मु ने' इति निषेधस्तु न नुमि ; 'न मु टादेश' इति वार्तिकविरोधात् । अत एव सूत्रकृता 'क्त्वि' इतिवत् 'नि' इति नोक्तम् । तथा सति तन्त्रेण नकारनिर्देशोऽपि सम्भाव्येत । आगन्तुनाऽकारेण तस्यापि 'ने' इति निर्देशेन तन्त्रस्वीकारे त्वत्यन्तं ज्ञानगौरवमिति न किञ्चिल्लाघवमिति स्पष्टं भाष्ये । आङितीति । ङकारविशिष्टा संज्ञा, न त्वस्य ङस्येत्वम् । अत एव हरिणा, 'मत्या' इत्यादौ न गुणः । एवम् 'औङ आप' इत्यत्रापि । अत एवासम्भवे एवापवादत्वमिति वार्तिकमतेऽपि रमे इत्यादौ न याट् । घेर्ङिति । 'सुपि चे'त्यतः 'सुपी'ति वर्त्तते । तेन पट्वीति सिद्धम् । न च घेर्ङि इत्येव सूत्रं कार्यं, ङकारादावित्यर्थः । 'प्रवाहवा'-इत्यत्र 'आङ्याजयारामुप-सङ्ख्यान'मित्याङादेशस्तु 'ङा'इत्येव वक्तुं शक्य इति वाच्यं ; 'मत्या'मित्यादौ 'आण्नद्याः' इत्यस्यानापत्तेः, अल्विधित्वेन स्थानिवत्त्वाभावात् । इद्ग्रहणे त्वनुबन्धकार्यत्वात्स्थानिवत्त्वं स्पष्टमिति दिक् । ङसिङ । एङो द्वित्वेऽप्यस्वरितत्वाद्यथासङ्ख्यं न । 'ङितश्चे'ति तु नासूत्रि, 'ऋत उ'दित्यत्र ऋदन्तान्ङितोऽति परे पूर्वपरयोरुदित्यर्थे 'जाग्रती' त्यादौ दोषः स्यादिति । ङसोरित्येव सिद्धे ङसिग्रहणं स्पष्टार्थम् ।

<u>भावबोधिनी :</u> ननु न मुने इत्यत्र ना इत्यस्य नकारस्य च तन्त्रेण निर्देशः नाशब्दे आतो लोपः उच्चारणार्थकाकारेण गुणेन सह नेति निर्देशः । एवञ्च नाभावे नकारे च कर्तव्ये मुत्वं नासिद्धमिति सूत्रार्थः । इत्थञ्च अमुनेति लिङ्गद्वयेऽपि सिद्धमिति चेत्तत्राह न मुने इतीति । न मु टादेश इतीति । न मु टादेश इति छेदः । नुमागमस्तु न टादेश इति भावः । अत एव = न मुने इत्यत्र नुमोऽग्रहणादेव । तथा सति = क्त्वीति निर्देशे सति। न मुने इति निर्देशेऽपि उभयग्रहणं भविष्यतीत्याह आगन्तुकेति । न किञ्चिल्लाघवमिति। यत्किञ्चिन्मात्रालाघवाय ईदृशज्ञानगौरवं न सोढव्यमिति भावः । किञ्च न मुने

इत्यत्रोभयग्रहणे नपुँसके अमुष्मै इत्यादिसिद्धिः । अद ए इत्यवस्थायां स्मायादेशे मुत्वे तत्सिद्धिर्वक्तव्या । नुमि कर्तव्ये कृते च मुत्वस्य यद्यच्छास्त्रं प्रत्यसिद्धत्वं प्राप्तं तत्सर्वं नेत्यर्थे न स्मायादिं प्रति सिद्धत्वापत्त्या परत्वान्मुत्वे ततो नुमि ततोऽदन्तत्वाभावेन स्मायाद्यप्रवृत्तेः । अमुनेति सिद्ध्यर्थं न मुन इत्यस्योक्तार्थावश्यकत्वात् । अथ न मुन इत्यस्य स्थाने अमुनेति न्यासः । इत्थञ्च आङो ना पुँसीति न्यासे न कोऽपि दोषः । न च स्त्रीलिङ्गेऽप्यमुनेति रूपं स्यादिति वाच्यम् । यत्रेदं निपातनं विना इष्टरूपालाभः तत्रैवेदं निपातनम् । स्त्रीलिङ्गे उक्तनिपातनं विनापि इष्टरूपसिद्ध्याऽदोषादित्याहुः । अत एवेति । इत्संज्ञाभावादित्यर्थः । इत्संज्ञायान्तु ङमुटीव बोध्ये ङित्वं स्यादिति भावः । अपवादत्वाद्गुणं बाधित्वा नाभावप्रवृत्तौ अदोष इत्यत आह मत्येत्यादाविति । अत एव ङित्वाभावादेव । असंभव एवापवादत्वमिति । उत्सर्गे कृतेऽपवादस्याचारितार्थ्य एवापवादत्वमित्यर्थः । एवञ्चापवादस्य निरवकाशत्वात् पूर्वं प्रवृत्तिः । तत उत्सर्गस्य निमित्तसत्वे प्राप्तिः, असत्वे तु नेति विवेको बोध्यः । इदमेव वार्तिकमतम् । उत्सर्गे कृतेऽपवादस्य चारितार्थ्यं यत्र तत्र येन नाप्राप्तन्यायेन बाधः । तत उत्सर्गस्य निमित्तसत्वेऽपि न प्रवर्तत एव । उत्सर्गे कृते अपवादस्य चारितार्थ्यं यत्र तत्रोत्सर्गापेक्षया पूर्वप्रवृत्तिकत्वरूपापवादत्वमेवेति भाष्यमतम् । वार्तिकमतेऽपीति । अपिना पूर्वोक्तभाष्यमतपरिग्रहः । न याडिति । रमा औ इत्यवस्थायामुत्सर्गयाडागमे कृतेऽपवादस्य शीभावस्याचारितार्थ्यमेव । निर्दिश्यमानस्यौङः याटा व्यवधानादिति नात्र येन नेति न्यायेन बाधः । किन्तु निरवकाशत्वात् पूर्वं शीभावप्रवृत्तौ तस्य स्थानिवत्त्व एव ङित्वात् याडागमः स्यात् । न चात्राल्विधित्वमनुबन्धकार्ये तन्निषेधाभावादिति भावः । तेन= घेर्ङिति सुपीत्यर्थेन अस्याङ्गाधिकारस्थत्वेनाङ्गसंज्ञानिमित्ते ङितीत्यर्थात् वारि चित्रीयतीत्यादौ चित्रङ्शब्दे न दोष इत्यत आह पट्वीति । न च ङीबादिषु टकारोऽनु-बन्धोऽस्तु टाप् ङीष् ङीन् इति । इत्थञ्च प्रकृते न दोष इति वाच्यम् । गौरीशब्दादाचारक्विपि अनुदात्तङित इत्यात्मनेपदार्थं ङीबादिषु ङकारस्यावश्यकत्वात् । वस्तुतस्तु ङीबादीनामौपदेशिकङित्वाभावात् सिद्धान्ते गौरीयतीत्येव रूपमिति ङीबादिषु टकार एवानुबन्धः । इत्थञ्च पट्वीत्यादौ दोषाभावेन सुपीति विशेषणं व्यर्थमेवेति बोध्यम् । ङकारादाविति । हरये इत्यादौ ङकारादित्वं भूतपूर्वगत्या बोध्यम् । उपसंख्यानमिति । सुपः स्थाने इत्यर्थः । अल्विधित्वेनेति । अयं भावः – घेर्ङितीत्युक्तौ ङीत्यस्यैव आण्नद्या इत्यत्रानुवृत्त्या नद्यन्तात् परेषां ङकारादिप्रत्ययानामाडागम इत्यर्थः स्यात् । ततश्च मत्यामित्यादौ निरवकाशत्वात् पूर्वमामि तस्य स्थानिवत्त्वेन

ङकारादित्वमादायाडागमः कर्तव्य इति अनल्विधाविति निषेधो बोध्य इति । न चात्राडागमाभावेऽपि मत्यामिति सिध्यतीति वाच्यम् । तदभावे ह्रस्वनद्याप इति नुटः प्राप्तेः । तदङ्गीकारे तु परत्वादाटा नुड्बाधो बोध्यः । न चोत्तरत्र षट्चतुर्भ्यश्चेत्यत्र षष्ठीबहुवचनस्यैवामः सम्भवेन तत्साहचर्यात् ह्रस्वनद्याप इत्यत्रापि तथैवेति नात्र दोष इति वाच्यम् । तथापि रमायामित्याद्यसिद्धेः । याडाप इत्यत्रापि ङीत्यस्यानुवृत्त्या ङकारादिप्रत्ययस्य याडित्यर्थेन आमः स्थानिवत्त्वेन ङकारादित्वसम्पादनेऽनल्विधाविति निषेध इति । इद्ग्रहणे त्विति । ङितीत्युक्तावित्यर्थः । अनुबन्धकार्यत्वादिति । स्थानिवत्त्वेन ङित्वस्यैव सम्पादनादिति भावः । दिगिति । तदर्थस्तु ङीत्येवास्तु रमायामित्यादौ ङकारादित्वमेव सम्पादयामः । न चानल्विधाविति निषेधः । अनुबन्धकार्ये तन्निषेधाभावात् । याडागमस्य वस्तुगत्याऽनुबन्धभूतङकारप्रयोज्यत्वादिति केचित् । वस्तुतस्तु अनुबन्धकार्ये इत्यस्यानुबन्धत्वप्रयोज्यकार्य इत्येवार्थो वक्तव्यः, न तु वस्तुगत्याऽनुबन्धप्रयोज्यकार्य इति । अन्यथा प्रपठ्येत्यादावनुबन्धभूतककार-प्रयोज्यवलादित्वनिमित्तकेट्कारणीभूतस्थानिवत्त्वस्यानल्विधाविति निषेधानापत्तेः । अनुबन्धत्वप्रयोज्येत्युक्तौ तु वलादित्वप्रयोज्येटः अनुबन्धत्वाप्रयोज्यत्वेन अनल्विधाविति निषेधस्सुलभ एव । एवञ्च प्रकृते याडागमस्यानुबन्धाप्रयोज्यत्वेनानुबन्धकार्य इत्यस्याप्राप्तौ अनल्विधाविति निषेधेन ङकारादित्वाभावात् याडागमानापत्त्या ङितीत्येव वक्तव्यम् । तथा सति याडागमस्य ङित्वप्रयोज्यत्वेनानुबन्धत्वप्रयोज्यत्वमस्तीति अनुबन्धकार्य इत्यनल्विधावित्यस्य निषेधे स्थानिवत्त्वं सुलभमित्याहुः । द्वित्वेऽपीति । सतीति शेषः । यथासंख्येति । तत्र सूत्रे स्वरितेनाधिकार इत्यतः स्वरितेनेत्यनुवर्त्य स्वरितयुक्तसमसम्बन्धिविधेरेव यथासंख्यत्वबोधनादिति भावः । स्पष्टार्थमिति । द्विवचनबलेन ङसेर्ग्रहणसिद्धिः । अतीत्यनुवर्तनादोसि नातिप्रसङ्गः । तदनुवृत्ति-विशिष्टस्यैकादेशवारणायेति भावः ।

बालबोधिनी : आङो ना । पदलाघवादस्त्रियामित्यस्य स्थाने पुँसीति कुतो नोक्तमित्याह पुंसीति । तत्र दोषमाह रूपासिद्धेरिति । नपुंसके अमुनेत्यत्र अदसोऽसेरिति मत्वोत्वे अमु+आ इत्यवस्थायां मुत्वस्यासिद्धत्वात् इकोऽचि विभक्ताविति नुमनापत्तौ पुंस्त्वाभावेन प्रकृतसूत्रेण नाभावानापत्तौ अमुनेति रुपासिद्धिरिति भावः । प्रियत्रिणा कुलेनेत्यादौ प्रियत्रि+आ इत्यवस्थायां नपुंसकत्वात् इकोऽचीति नुमागमे हलादिविभक्तिपरत्वाभावेन षट्त्रिचतुर्भ्यो हलादिरिति स्वरासिद्धिरपि दोष इति बोध्यम् ।

ननु नमुने इत्यत्र नेति ना इत्यस्य उच्चारणार्थकाकारस्य न इत्यस्य च तन्त्रेण निर्देशः। एवञ्च नाभावे, नकारे (नुमि) च कर्तव्ये मुत्वं नासिद्धमिति सूत्रार्थः । तथा च मुत्वस्य सिद्धत्वात् पुंसीत्युक्तावपि अमुना कुलेनेत्यादौ इकोऽचीति नुमा इष्टसिद्धेः न दोष इत्याह न मुने इति । नुमि निषेधाप्रवृत्तौ बीजमाह वार्तिकविरोधादिति । न मुने इत्यसिद्धत्वनिषेधो यदि नुमि प्रवर्तेत तर्हि न मु टादेशे इति न मुने इति सूत्रस्थभाष्यवार्तिकविरोधः स्यात् । नुमः टादेशत्वाभावात् वार्तिकस्वारस्यभङ्गापत्तेरित्यर्थः । सूत्रसम्मतिमप्याह अत एवेति । नुम्विषये न मुने इति निषेधाप्रवृत्तेरिष्टत्वादेवेत्यर्थः । क्त्वीति । क्रमश्च क्त्वि, जृव्रश्च्योः क्त्वि इत्यत्र क्त्वायाः 'क्त्वि' इति निर्देशवत् ना इत्यस्य 'नि' इत्येव निर्दिशेत् । तथा सति = नीति निर्देशे सति । संभाव्येतेति । तथा निर्देशाभावेन तन्त्रेण नकारनिर्देशस्य सम्भावनापि नास्तीति सूत्राक्षरमर्यादया लभ्यत इति भावः ।

ननु नमुने इति सूत्रेऽपि उच्चारणार्थकाकारेण नुमोऽपि तन्त्रेण निर्देश इति उभयोरपि ग्रहणं भवतीत्यत आह आगन्तुनेति । ज्ञानगौरवमिति । तन्त्रेण निर्दिश्य आकारान्तस्य ना इत्यस्य, उच्चारणार्थकाकारस्य नकारस्य च ग्रहणे ज्ञानगौरवमिति पुंसीति न्यासो नोचित इति भावः । अत एव = आङो ङ्कारस्येत्वाभावादेव । न गुण इति । अन्यथा स्थानिवद्-भावेन ङित्वस्य नादेशेऽतिदेशात् ङित्वप्रयुक्तकार्यापत्तिरिति भावः । हरिणेत्यत्रापवादत्वात् नाभावेन गुणस्य बाध इत्यरुचेराह मत्येति । इत्यत्रापीति । ङ्कारविशिष्टा संज्ञा न तु ङस्येत्वमिति शेषः ।

अत एव = औङो ङस्येत्वाभावादेव । वार्तिकमतेऽपीति । अपिना भाष्यमतपरिग्रहः । बाधकताबीजविषये वार्तिककारभाष्यकारयोः मतभेदोऽस्ति । तथाहिअसम्भव एव बाधकताबीजमिति वार्तिककारस्य मतम् । उत्सर्गप्रवृत्तावपवादस्याचारितार्थ्य एवापवादत्व-मित्यर्थः । विरोधो बाधकारणम् । न विशेषविधानमेवेति तस्य दर्शनम् । विरोधाभावेऽपि विशेषविधानमात्रेणैव बाधकत्वमिति भाष्यकारमतम् । सत्यपि सम्भवे बाधनं भवतीति तस्याशयः । विशेषशास्त्रस्य चारितार्थ्यासम्भव एवोत्सर्गबाधकत्वम् । तक्रकौण्डिन्यन्यायो नात्र शास्त्रे आश्रीयत इति वार्तिककारस्याशयः । लोके हि सत्यपि सम्भवे बाधनं भवति । यथा सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति एवं शास्त्रेऽपीति भाष्यकाराशयः। येन नाप्राप्तन्यायस्य तक्रकौण्डिन्यन्यायविषयत्वमेव । सर्वथा निरवकाशत्वादेव बाधकत्वे माठरकौण्डिन्यन्यायो दृष्टान्तः । अत्र पक्षे भाष्यमते अपवादप्रवृत्त्यनन्तरं निमित्तसत्वे उत्सर्गप्रवृत्तिरिष्टैव । असम्भव एव बाधकत्वमिति वार्तिकमतेऽपि एतत् तुल्यमेव । रमे

इत्यत्र रमा + औ इत्यवस्थायाम् उत्सर्गे याडागमे कृते निर्दिश्यमानस्य औङः याटा व्यवधानात् शीभावो न प्राप्नोतीति सर्वथा निरवकाशत्वात् याटं बाधते । मतद्वयेऽपि ङकारस्येत्वाभावात् शीभावेत्तरं न याडिति भावः ।

घेर्ङिति । सुपीत्यनुवृत्त्या ङिति सुपीत्यर्थलाभस्य प्रयोजनमाह तेनेति । पट्वीति। अन्यथा पटुशब्दात् वोतो गुणवचनादिति ङीपि ङित्प्रत्ययपरत्वेन गुणापत्तिरिति भावः । लाघवात् घेर्ङीति न्यासो भवत्विति शङ्कते न चेति । ङा इत्येवेति । आङ्याजयारामुपसंख्यानमिति वार्तिकेन टाप्रत्ययस्य आङ् अयाच् अयार् आदेशा विधीयन्ते । प्रवाहुना इति प्राप्ते टायाः आङादेशे घेर्ङितीति गुणे प्रवाहवेति रूपम् । अत्र वार्तिके आङित्यस्य स्थाने ङा इति न्यासेन ङकारादिप्रत्ययत्वेन गुणः सिध्यतीति घेर्ङीति वक्तव्यमिति शङ्कितुराशयः । समाधत्ते मत्यामिति । घेर्ङीति न्यासे आण्नद्या इति सूत्रेऽपि ङीत्यस्यानुवृत्तौ ङकारादौ प्रत्यये परे आडागम इत्यर्थस्स्यात् । मत्यामित्यादौ ङेरामि स्थानिवत्त्वेन ङादित्वमादाय आडागमः कार्यः । परन्तु ङादित्वस्यालुधर्मत्वेन तदाश्रये विधावाटि अनल्विधावति निषेधेन स्थानिवत्त्वाभावे आण्नद्या इत्यस्याप्रवृत्तौ मति + आम् इत्यत्र ह्रस्वनद्याप इति नुडापत्तिः । घेर्ङितीति यथासूत्रे तु परत्वादाटा नुटो बाधात् कृते आडागमे सकृद्गतिन्यायेन नुटोऽप्रवृत्तिस्सिध्यतीति भावः । इद्ग्रहणे त्विति । ङितीत्युक्तावित्यर्थः। अनुबन्धकार्यत्वादिति । स्थानिवत्त्वेन ङित्वस्यातिदेशादित्यर्थः ।

ङसिङसोश्च । एङो द्वित्वेऽपीति । एङा द्वयोर्ग्रहणेऽपीत्यर्थः । प्रकृतसूत्रे एङ इत्यनुवर्तते । यद्यपि ङसिङसौ द्वौ, एङौ च द्वौ तथापि यथासंख्यं नेष्यते । स्वरितेनाधिकार इति सूत्रात् स्वरितेनेत्यनुवर्त्य 'यथासंख्यमनुदेशस्समानां स्वरितेन' इत्यभ्युपगम्य यत्र स्वरितत्वं प्रतिज्ञातं तत्रैव यथासंख्यविज्ञानात् प्रकृतेऽस्वरितत्वेन न दोष इति भावः । नासूत्रीति । ङितश्चेति सूत्र्यते तर्हि ऋत उदिति सूत्रेऽपि तस्यानुवृत्तिः स्यात् । तथा सति ऋदन्तात् ङितोऽति परे उकार एकादेश इत्यर्थे जागृ + अति इत्यवस्थां सार्वधातुकमपिदिति ङिद्वद्भावस्यातिदेशात् तस्मिन्नति परे उत्वापत्तिर्दोष इति भावः ।

अच्च घेः । इदुद्भ्यामिति किम् ? 'घेःपरस्य ङेरौदच्चे'ति, ङिप्रकृतेर्घेरौदच्चेति वाऽर्थो मा भूदिति। अदौतोस्तपरत्वं मुखसुखार्थम् । इत्सञ्ज्ञायाश्च 'तस्य लोप' इति तयोर्लोपः। न चौतो विभक्तित्वात् 'न विभक्तौ' इति निषेधात्कथमित्सञ्ज्ञेति वाच्यम् । मुखसुखार्थमित्यस्य तदेव प्रयोजनं, न तु कार्यान्तरं, नापि प्रयोगे श्रवणमित्यर्थात्तत्त्वप्रतिज्ञयैव 'न विभक्ता' वित्यस्य तत्राप्रवृत्तेः । अत एव 'इद्वृद्धौ' 'पत्यावैश्वर्ये' इत्यादिनिर्देशाःसङ्गच्छन्ते।

यदि तूच्चारणार्थानां विनैव शास्त्रमपगमः स्यात्तदा इत्सञ्ज्ञकानामपि तद्वदेव निवृत्तिरस्तु, किं 'तस्य लोपः' इत्यनेन ? ; स्वभाववादस्योभयत्रापि समत्वात् । ध्वनितश्चेदं 'तस्य लोप' इत्यत्र भाष्ये इति दिव औत्सूत्रे निरूपयिष्यामः । न चैवमग्नावित्यत्रौतः स्वरितत्वापत्तिः, न च 'प्रत्ययाप्रत्यययो'रित्येव सिद्धे पुनः तिति प्रत्ययग्रहणं कर्तव्यमिति वार्तिकादौपदेशिकप्रत्ययत्ववत्येव तत्प्रवृत्तिरिति वाच्यम्, तस्याः परिभाषाया लक्ष्यसिद्धये भाष्यकृता क्काप्यनाश्रयणात् । स्पष्टश्चेदं तित्स्वरितमित्यत्र कैयटे । 'अङ्गस्य' इति सूत्रे भाष्ये तु तत्प्रत्याख्यानायैकदेशिना सोक्ता, न तु सिद्धान्तिनेति स्पष्टं तद्विदाम् । 'श्नान्नलोप' इति सूत्रे भाष्येऽपि ध्वनितस्तदभाव, इति वाच्यम् ; 'प्रत्ययग्रहण'मित्यस्य विधानकालिकप्रत्ययत्ववद्ग्रहणमित्यर्थात् । अत एवाऽऽदेशेषु दित्त्वमाश्रित्य तत्प्रत्याख्यानेन फलभेदो नेति दिक् ।

भावबोधिनी : घेः परस्येति । पञ्चम्यन्तत्वे इत्यर्थः । घिप्रकृतेरिति । षष्ठ्यन्तत्वे इत्यर्थः । विधेयत्वेन तपरत्वं व्यर्थमत आह अदौतोरिति । विभक्तित्वादिति । विभक्तियोग्यत्वादित्यर्थः । अत एव इत्संज्ञालोपाङ्गीकारादेव । उच्चारणार्थत्वप्रतिज्ञामात्रेण निवृत्तिवादिप्राचीनमते प्रतिबन्द्योत्तरमाह यदीति । स्वभावादस्य प्रतिज्ञामात्रेण निवृत्तिरिति वादस्य । उभयत्रेति । इत्संज्ञातदभावस्थले चेत्यर्थः ।

नन्वग्नावित्यादौ तदेव प्रयोजनं न तु कार्यान्तरमिति पूर्वग्रन्थरीत्या वक्ष्यमाणदोषस्यैवानवकाशः । तत्समाधानस्यागतिकगतित्वेन समाधानान्तरं वक्तुं शङ्कते न चेति । एतेनायं ग्रन्थः पूर्वग्रन्थविरुद्ध इत्यपास्तम् । तत्प्रत्याख्यानाय = अङ्गस्येत्यस्य प्रत्याख्यानाय । सोक्तेति । ब्राह्मणभिस्सेत्यादावैसादेशवारणायेति बोध्यम् । ध्वनितस्तदभाव इति । तत्र हि नान्नलोप इत्येवास्तु, न च नन्दन इत्यादौ नात्परस्य नुमो लोपापत्तिः । ङिदित्यनुवर्त्य ङित् यो नकारस्तस्मात् परस्येत्यर्थात् । न चैवमपि यज्ञानामित्यादौ दोष इत्येवं तावद्भाष्यं प्रवृत्तम् । तिति प्रत्ययाप्रत्यययोरिति सत्वे नन्दन इत्यादौ दोषस्यैवानवकाश इति तदभावो ध्वनित इति बोध्यम् । प्रत्ययग्रहण-मित्यस्येति । तिति प्रत्ययग्रहणमित्यस्येत्यर्थः । अत एव = औपदेशिकप्रत्ययग्रहणादेव। तत्प्रत्याख्यानेन = तितिप्रत्ययग्रहणमित्यस्य प्रत्याख्यानेन। फलभेदो नेति । यदि वार्तिकरीत्या आदेशेषु स्यात् तदा दित्वमाश्रित्य वार्तिकप्रत्याख्यानेन सह फलभेदः स्यादित्यर्थः ।

बालबोधिनी : अच्च घेः । इदुद्भ्यमिति किमिति । इदुद्भ्यामिति सूत्रानुवृत्तिः किमर्थेति

प्रश्नः । तदनुवृत्तौ दोषमाह घेः परस्येति । घेरित्यस्य पञ्चम्यन्तत्वे घेः परस्य ङेः औदच्चेत्यर्थः, ङेरित्यस्य षष्ठ्यन्तत्वात् तत्साहचर्येण घेरित्यस्यापि षष्ठ्यन्तत्वात् ङिप्रकृतेः घेरौदच्चेत्यर्थो वा मा भूदिति तदनुवृत्तिरावश्यकी । तस्य ङेरित्यनेन सम्बन्धात् घेरित्यस्य पञ्चम्यन्तत्वसम्भावना नेति भावः । अदौतोः तपरत्वं तपरशास्त्रप्रवृत्त्यर्थमिति भ्रमं वारयति मुखसुखार्थमिति । उच्चारणार्थस्यापीत्संज्ञालोपौ भवत इत्याह इत्संज्ञायामिति । विभक्तित्वात् = विभक्तित्वयोग्यतायास्सत्वात् । अत एवेत्वप्रवृत्तिकाले औतो विभक्तित्वज्ञानाभावेऽपि न क्षतिः । तत्त्वेति । मुखसुखार्थत्वेत्यर्थः । तत्र = अदौतोः । अत एव = मुखसुखार्थस्यापि इत्संज्ञालोपयोरङ्गीकारादेव । सङ्गच्छन्त इति । अन्यथा तकारश्रवणं स्यादित्यर्थः

उच्चारणार्थानामित्संज्ञां विनैव निवृत्तिरिति दीक्षिताद्युक्तिं दूषयति यदि त्विति । उभयत्र = मुखसुखार्थत्वे इत्संज्ञायाञ्च । तद्वदेव = विनैव शास्त्रम् । अत्रार्थे मानमाह ध्वनितमिति । उच्चाराणार्थानामित्वे दोषमाशङ्कते न चेति । अस्य परेण वाच्यमित्यनेनान्वयः । स्वरितत्वापत्तिरिति । तित्स्वरितमित्यनेनेत्यर्थः । अवान्तरसमाधानं न चेति । तस्याः परिभाषायाः = प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति परिभाषायाः । कैयटे इति । अनेकप्रयोजनदर्शनाच्चानुबन्धानां तकारस्तत्कालग्रहणार्थश्च स्यात् स्वरितार्थश्च । प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय इति परिभाषा तु भाष्यकारवार्तिककाराभ्यां न क्वचिदाश्रितेति तित्स्वरितमिति सूत्रभाष्ये प्रदीपे स्पष्टम् । नन्वङ्गस्येति सूत्रे भाष्ये प्रत्ययाप्रत्यययोरिति परिभाषा आश्रितेति शङ्कायामाह अङ्गस्येति । तत्प्रत्याख्यानाय = अङ्गस्येत्यस्य प्रत्याख्यानाय । एकदेशिनेति । सा = प्रत्ययाप्रत्ययपरिभाषा । अङ्गसंज्ञासूत्र-प्रयोजनानामन्यथासिद्धत्वनिरूपणावसरे भाष्ये 'अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यामेवैतानि सिद्धानि । क्वचित् 'अर्थवद्ग्रहणे नानर्थकस्य' इत्येवं न भविष्यति । क्वचित् प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणं भवतीत्युक्तम् । तत्र प्रदीपे 'इयङुवङोस्तु नायं परिहारः । वर्णग्रहणेषु परिभाषाद्वयस्यानुपस्थाना' दिति कैयटेनोक्तम् । वर्णग्रहणेषु प्रत्ययाप्रत्ययपरिभाषाया अनुपस्थित्या एनामाश्रित्याङ्गाधिकारप्रत्याख्यानपरं भाष्यमेकदेशिवचनमिति भावः । स्पष्टञ्चोद्योते तत्रैव' नैतानीत्यादि ग्रन्थ एकदेश्युक्तिरिति तात्पर्यम् ' इति ।

ध्वनित इति । श्नान्नलोपः (6-4-23) इति सूत्रे भाष्ये ' अथ किमर्थं श्नमः शकारस्य ग्रहणं क्रियते न नान्नलोप इत्येवोच्येत ? इत्याक्षिप्य ' नान्नलोप इतीयत्युच्यमाने नन्दिता नन्दक इत्यत्रापि प्रसज्येत' इति समाहितम् । प्रत्ययाप्रत्यययोरिति परिभाषासत्वे नशब्दस्य प्रत्ययत्वाभावादेव नलोपाप्रसक्तौ तत्र तद्दोषप्रदर्शनमसङ्गतं स्यादिति तेनैतदभवो

ध्वनित इति भावः । एवञ्च प्रत्ययाप्रत्ययपरिभाषाया अभावेन तथा वारयितुमशक्य-त्वादग्नावित्यत्र स्वरितत्वापत्तिरिति शङ्कितुराशयः । समाधत्ते प्रत्ययेति । तिति प्रत्ययग्रहणमिति वार्तिकस्थप्रत्ययपदस्य विधानकालिकप्रत्ययत्ववति लक्षणा । अत एव= उक्तरीत्या लक्षणास्वीकारादेव । आदेशेषु = औदादिषु । तत्प्रत्यख्यानेन = तिति प्रत्ययग्रहणमिति वार्तिकप्रत्याख्यानेन । वार्तिके प्रत्ययग्रहणेन औपदेशिकप्रत्ययस्य ग्रहणादेव, औदादिष्वादेशेषु नैष तकारः किन्तु दकार इति तित्वाभावात् स्वरितत्वा-पत्तिर्नास्तीति तद्वारणाय कृतं तिति प्रत्ययग्रहणमिति वार्तिकं प्रत्याख्यातं भाष्यकृता । कृत इद्धातोरित्याद्यादेशानां दित्वेन तित्वाभावात् न तित्स्वरितमित्यस्य प्रसक्तिरिति तद्वारणोपायो विफल इति तदाशयः । औपदेशिकप्रत्ययत्वाग्रहणे तु दित्वमाश्रित्य तिति प्रत्ययग्रहणमिति वार्तिकप्रत्याख्यानपक्षे तित्वाभावात् स्वराप्राप्तिः । वार्तिकारम्भपक्षे च विधानोत्तर स्थानिवद्भावेन प्रत्ययत्वस्य सत्वात् स्वरप्राप्त्या च फलभेदस्य स्पष्टत्वात् प्रत्याख्याना-सङ्गतिरिति फलैक्याय वार्तिकस्थप्रत्ययपदस्य विधानकालिकप्रत्ययत्ववति लक्षणाऽवश्यमङ्गीकार्येति भावः ।

अनङ् सौ । 'सा'विति प्रथमैकवचनम् , 'असम्बुद्धा'विति पर्युदासात्। नकाराकारस्तूच्चारणार्थ इत्सञ्ज्ञकः । अलोऽन्त्यात् । अवध्यवधिमतोः साजात्यादाह - पूर्वो वर्ण इति । अत एव 'शिष्ट' इत्यादौ 'शा' इति समुदायस्य 'शास इ'दितीत्त्वं न । पञ्चम्यन्ताल्ग्रहणाच्च शस्य न। सर्वनामस्थाने । 'नोपधाया' इति, 'ढ्रलोपे' इत्यतो 'दीर्घ' इति चाऽनुवर्त्तते । 'अपृक्त' इति पुंस्त्वमविवक्षितम् ; अत एवापृक्तं हलिति सङ्गच्छते । अपृक्तप्रदेशेषु हल्ग्रहणेनैव सिद्धे सञ्ज्ञाविधानमदृष्टार्थम् । हल्ङ्याप् । 'सुतिसी'ति पृथक् पदम् । हलन्तादिति । सुतिसीनां प्रत्ययत्वेनोपस्थितस्य 'यस्मात्स विहितस्तदादे' रित्यस्य विशेष्यत्वेन तदन्तलाभ इति भावः । एवं ङ्याबंशे द्वेधा तदुपस्थित्या ङ्याबन्तान्तादित्यर्थो द्रष्टव्यः । हल्ङ्याब्भ्यः किमिति । 'राम' इत्यादौ दीर्घान्तत्वाभावान्न दोष इति प्रश्नः । 'दीर्घात्किं ?, निष्कौशाम्बिः, अतिखट्व' इत्यारभ्य 'संयोगान्तलोपस्या-सिद्धत्वा'दित्यन्तोऽपपाठः, मनोरमायां दर्शनात् । सखेति । यद्यप्यत्रैव 'सख्युरसम्बुद्धा'विति लेख उचितस्तथापि नान्तलक्षणदीर्घेणैव सिद्धेः , 'अत उपधायाः' इत्यपेक्षया नित्यत्वेन तस्यैवौचित्याच्चात्र नोक्तम् । अचो ञ्णि । 'मृजेर्वृद्धि'रित्यतो 'वृद्धि'रित्यनुवर्तते, 'अङ्गस्ये'ति चाधिकृतं, तदाह अङ्गस्य वृद्धिरिति । ख्यत्यादिति। उच्चारणार्थाकारेण कृतयणः प्रयोगस्थस्यानुकरणादविशेषेणोभयोर्ग्रहणमित्याह - खितीत्यादि । ङस्यादिपरस्तादृश खि-खी-ति- ती- शब्दप्रकृतिक एव सम्भवतीति भावः।

भावबोधिनी : नकाराकारः = नकारोत्तराकारः।इत्संज्ञकइति। स्वमते उच्चारणार्थस्येत्संज्ञालोपाभ्यामेवापहारस्यानुपदमेवोक्तत्वादिति भावः। ननु सोर्डेत्येवास्तु, डित्वसामर्थ्यादभस्यापि टेर्लोपेन सखेति सिद्ध इति चेन्न। ऋदुशनस्पुरुदंसेत्यत्रापि डा इत्यस्यानुवृत्तौ उशना इत्यत्र टिलोपे उशन् आ इत्यवस्थायां सर्वनामस्थाने चेति दीर्घापत्तेः। शा इति समुदायस्येति। इदं चिन्त्यम्। अलोऽन्त्यस्य प्रवृत्तेः। न च नानर्थक इति निषेधः तस्याः प्रत्याख्यातत्वात्। ननु अल इत्यत्र विभक्तिविपरिणामेण पूर्वोऽलेत्यर्थादुक्तदोषो नेत्यत आह पञ्चम्यन्तेति। शस्य नेति। अन्त्यत्वेन आसित्यस्य ग्रहणे शस्य स्यादिति भावः। अदृष्टार्थमिति। पृथक्पदमिति। एकपदत्वे तु जातितद्भिन्नेति न्यायेनापृक्तपदस्यैव विशेषणत्वेन पूर्वनिपातः स्यादिति भावः। द्वेधेति। ङ्यापः प्रत्ययत्वेन तदाद्यंशोपस्थित्या ङ्याबन्ततदादित्वस्य सुतिस्यंशे उपस्थिततदाद्यंश-विशेषणेन ङ्याबन्तान्तादित्यर्थः। अस्य फलन्तु बहुश्रेयसीत्यादौ सुलोपः। यद्येक एव तदन्तविधिस्तदा ङ्याबन्तो यस्तदादिरित्यर्थेन यस्तदादिः बहुश्रेयसीति, यच्च ङीबन्तं श्रेयसीति उपसर्जनप्रत्यये तदादिनियमादिति सुलोपो न स्यात्। तदन्तविधिद्वये तु ङ्यबन्तान्तस्य तदादित्वेन न दोष इति भावः। राम इत्यादाविति। राजेत्यादिहलन्ते तु संयोगान्तलोपेन सिद्धिरिति भावः। इदञ्च मूले प्रथमहल् किम् ? राजेति ग्रन्थो नेत्यभिप्रायेण। तत्सत्वे तु हल्ङ्याप् किमित्यस्य ङ्याभ्यः किमित्येवार्थः। समुदाय-द्वाराऽवयवप्रश्ने तात्पर्यादिति बोध्यम्। अत्र सूत्रे प्रथमहल्पदमावश्यकमनावश्यकं वेति पूर्वपक्षो मनोरमातो ज्ञातव्यः। उचित इति। अत उपधाया इति वृद्ध्या इष्टसिद्धिरिति भावः। नित्यत्वेनेति। नान्तलक्षणदीर्घस्येत्यर्थः। कृते प्रवृत्तिस्तु पर्जन्यन्यायेन बोध्या। अविशेषेणेति। रूपे विशेषाभावेनेत्यर्थः। उभयोः ह्रस्वदीर्घान्तियोः न तु ख्यत्यशब्दयोः। आपत्यस्य सख्यशिश्वीति निर्देशासङ्गतेः। ङसादीत्यादिना ङस्परिग्रहः तादृशः ख्य् त्य् इत्याकारकः। एवकारेणान्यव्यवच्छेदः। तथा हि अपत्यशब्दात् णिचि क्विपि अपत्य् इति न सिध्यति। यलोपापत्तेः। न च स्थानिवत्त्वम्, यलोपे तन्निषेधादित्येवं क्रमेण बोध्यम्।

बालबोधिनी : अनङ् सौ। सप्तमीबहुवचनभ्रमनिरासायाह साविततीति। तत्र गमकमाह पर्युदासादिति। अत्र सूत्रे सख्युरसम्बुद्धाविति सूत्रादसम्बुद्धावित्यनुवर्तते। यदि सावित्यनेन सप्तमीबहुवचनस्यैव ग्रहणं स्यात्तर्हि सम्बुद्धौ अनङः प्राप्तेरेवाभावेन तद्व्यावृत्त्यर्थं कृतोऽनुवृत्तिप्रयासो व्यर्थः स्यादिति भावः। इत्संज्ञक इति। उच्चारणार्थानामपि इत्संज्ञालोपाभ्यामेव निवृत्तेरिष्टत्वादित्यर्थः।

अलोऽन्त्यात् । अन्त्यस्याल्त्वेन साजात्यात् पूर्वोऽपि स एव गृह्यत इत्याह अवधीति। अन्त्यस्यालोऽवधित्वेनावधिमान् पूर्वोऽपि स एवेति भावः । अवधिमतो वर्णस्यैव ग्रहणे फलमाह अत एवेति । शिष्ट इति । अत्र शासुधातौ सकारात्पूर्वस्य शा इति समुदायस्योपधात्वे शास इदङ्हलोः इति इत्वापत्तिरित्यर्थः । न च समुदायस्योपधात्वेऽपि अलोऽन्त्यपरि-भाषयाऽन्त्यस्यैवेत्वमिष्टं सिध्यतीति वाच्यम् । नानर्थकेऽलोऽन्त्यविधिरिति निषेधात् अलोऽन्त्यपरिभाषायाः प्रवृत्तिर्नास्ति । वस्तुतस्तु अत्रैव सूत्रे भाष्ये नानर्थकपरिभाषायाः प्रत्याख्यानात् अलोऽन्त्यपरिभाषया इष्टसिद्ध्या न दोष इति बोध्यम् । पञ्चम्यन्तालुग्रहणस्य प्रयोजनमाह पञ्चम्यन्तेति । अलित्यिस्याभावे शिष्ट इत्यत्र शास्धातौ आस् इति संघातात् पूर्वशकारस्योपधात्वादित्वप्रसङ्ग इति भावः

सर्वनामस्थाने । नोपधाया इति । सम्पूर्णं सूत्रमनुवर्तते । न इति लुप्तषष्ठीकं पदमिति भावः ।

अपृक्त एकाल् । ननु अपृक्तशब्दस्य पुंस्त्वादपृक्तं हल् इति प्रयोगः कथं संगच्छत इत्यत आह पुंस्त्वमविवक्षितमिति । अपृक्तप्रदेशेषु = अस्तिसिचोऽपृक्ते, गुणोऽपृक्ते, वेरपृक्तस्येत्यादिषु ।

हल्ङ्याब्भ्यो दीर्घात् । पृथक्पदमिति । सुतिसीति समाहारद्वन्दः । तस्यापृक्तपदेन कर्मधारयसमासे तु विशेषणस्यापृक्तपदस्य पूर्वनिपातापत्तिरिति भावः । तदन्तलाभ इति । सुतिसीनां प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया तदादीत्युपतिष्ठते । सुतिसीत्यस्य तद्विशेषणत्वेन तदन्तविधिरिति भावः । एतेन शब्दस्वरूपं विशेष्यमध्याहृत्य तदन्तविधिरिति कैश्चिदुक्तं निरस्तम् । द्वेधा तदुपस्थित्येति । ङ्यापोः प्रत्ययत्वेन तदाद्यंशोपस्थितौ एका तदन्तविधिः। तस्य सुतिसीत्यनेनोपस्थिततदादेर्विशेषणत्वेनान्या तदन्तविधिरिति ङ्यबन्तान्तेत्यर्थो लभ्यत इति भावः । अत एव बहुश्रेयसीत्यादौ सुलोपस्सिद्ध्यति ।

हल्ङ्याब्भ्यः किम् ? ग्रामणीः इति । राम इति । राजेत्यादौ राजन् स् इति स्थिते उपधादीर्घे संयोगान्तलोपेन तत्सिद्धेरिति भावः । एतच्च मूले प्रथमहल् किम् ? राजेति ग्रन्थो नास्तीत्यभिप्रायेण । तत्सत्वे तु हल्ङ्याब्भ्यः किमित्यस्य ङ्याब्भ्यः किमित्येवार्थः। समुदायद्वाराऽवयवप्रश्ने तात्पर्यात् ।

सखेति । उचित इति । णिद्वद्भावेन तत्प्रयुक्तोपधावृद्ध्या इष्टसिद्धिरिति भावः । उभयोरिति । खितिशब्दयोः खीतीशब्दयोश्चेत्यर्थः । अत एव ख्यत्यादिति विकृतनिर्देशः सार्थकः । अन्यथा खित्योरिति खीत्योरिति वा वदेदिति भावः ।

सुसखेति । 'न पूजना'दिति निषेधात् 'राजाहः सखिभ्य' इति टज्न । समुदायस्येति। 'असखी'त्यस्य सखिभिन्नावयवाविति वर्णसञ्ज्ञापक्षेऽर्थः। अत्र पक्षे पर्युदासेन तद्भिन्नप्रातिपदिकान्त्येवर्णादेरेव ग्रहणात् 'कृतं सख्या' इति वाक्ये न दोषः। सिद्धान्तिसम्मते तदन्तसञ्ज्ञापक्षे सखिभिन्नावित्यर्थः। पर्युदस्यमानसमर्पकसखिशब्दे तदन्तग्रहणन्तु न, विशेष्यासन्निधानादिति भावः। एतत्सर्वं हरदत्तानुरोधेन ।

भावबोधिनी : सखिभिन्नावयवाविति । असखीति समासस्य लक्षणया ईदृशार्थलाभः । वर्णसंज्ञापक्षेऽपि = घिसंज्ञा वर्णयोरेवेति पक्षे । नन्वेवं कृतं सख्येति समुदायस्य सखिभिन्नत्वेन तदवयवेकारमादाय दोष इत्यत आह अत्र पक्ष इति । वर्णसंज्ञापक्षे इत्यर्थः । ग्रहणादिति । असखीत्यस्य लक्षणया सखिभिन्नप्रातिपदिकावयवे-वर्णोवर्णयोर्ग्रहणादित्यर्थः । न दोष इति । यस्य प्रातिपदिकत्वं न तस्य सखिभिन्नत्वं यस्य च सखिभिन्नत्वं न तस्य प्रातिपदिकत्वमिति न दोष इति भावः । तदन्तसंज्ञापक्षे इति । घिसंज्ञा इवर्णोवर्णान्तयोरिति संज्ञापक्षे इत्यर्थः । न चात्र पक्षेऽपि कृतं सखीति समुदायस्य सखिभिन्नत्वेन दोषो दुर्वार इति वाच्यम् । असखीति पर्युदासेन सखिभिन्नसखिसदृशप्रातिपदिकस्यैव ग्रहणेनादोषात् । ननु असखीत्यत्र सखिशब्दे तदन्तग्रहणेन सख्यन्तभिन्नावित्यर्थेन सुसख्यादिशब्दानां घिसंज्ञा न स्यादित्यत आह पर्युदस्यमानसमर्पकेति ।

बालबोधिनी : सुसखेति । शोभनः सखेति प्रादिसमासः । सुसखिशब्दस्य घित्वमस्तीति हरदत्तदीक्षितादयः । नास्तीति नागेशः । प्राचीनमतमाह असखीत्यस्येति । अयं भावः । शेषो घ्यसखीति घिसंज्ञा वर्णस्येत्येकः पक्षः, तदन्तस्येत्यन्यः पक्षः । तत्र वर्णसंज्ञापक्षे असखीत्यस्य सखिभिन्नावयवावित्यर्थः । एवञ्च सखिभिन्नावयवौ याविदुतौ तयोः घिसंज्ञेति वर्णसंज्ञापक्षे सूत्रार्थः फलति । शोभनः सखा सुसखेत्यत्र सुसखीति समुदायस्य सखिभिन्नत्वेन तदवयवस्येकारस्य घिसंज्ञा भवति । अत्र पक्षेऽसखीति पर्युदासेन सखिभिन्न-प्रातिपदिकान्त्येवर्णादेरेव ग्रहणात् 'कृतं सखि' इति समुदायस्य सखिभिन्नत्वेऽपि तस्याप्राति-पदिकत्वेन तदवयवेकारस्य न घित्वप्रसङ्ग इति 'कृतं सख्या' इति वाक्ये न दोषः।

ननु वर्णसंज्ञापक्षे सुसखिशब्दस्य घित्वेऽपि सिद्धान्तभूते तदन्तसंज्ञापक्षे तद्दुर्लभम्। तथा हि - तत्पक्षेऽसखीति समासावयवसखिशब्देन तदन्तविधौ सख्यन्तभिन्नेवर्णोवर्णान्तयोः घिसंज्ञेति सूत्रार्थलाभात् सुसखिशब्दस्य सख्यन्तत्वेन तद्भिन्नत्वाभावेन घित्वं न स्यादिति चेदुच्यते । सामानाधिकरण्येनान्वययोग्यस्य विशेष्यस्य स्वतोऽध्याहारवशाद्वा सन्निधाने

तत्र तद्विशेषणत्वात् तदन्तविधिः वक्तुं शक्यते । प्रकृतेऽसखीति पर्युदासस्थले पर्युदस्यमानसखिशब्दस्य विशेषणत्वेनान्वययोग्यविशेष्यस्यासन्निधानात् , शब्दरूप-विशेष्यस्यातिप्रसङ्गाच्च तदन्तविधिर्न सम्भवति । एवञ्च तदन्तसंज्ञापक्षे सखिभिन्नौ इवर्णोवर्णान्तावित्येवार्थः, न तु सख्यन्तभिन्नाविति सुसखिशब्दस्य पक्षद्वयेऽपि घित्वं सुलभमेवेति दीक्षितादयः । तदेवाह सखिभिन्नेति । अत्र पक्षे = वर्णसंज्ञापक्षे । तद्भिन्नेति। सखिभिन्नेत्यर्थः । प्रातिपदिकस्यैव ग्रहणमित्यर्थः । न दोष इति । कृतं सखीति समुदायस्य सखिभिन्नत्वेऽपि तस्याप्रातिपदिकत्वात् तदवयवेकारस्य न घित्वप्रसङ्ग इति भावः । सिद्धान्तभूते तदन्तसंज्ञापक्षे आह सखिभिन्नाविति । ननु तदन्तसंज्ञापक्षे सख्यन्त-भिन्नेवर्णान्तयोः घिसंज्ञेत्यर्थे सुसखिशब्दस्य घित्वं दुर्लभमित्यत आह पर्युदस्यमानेति ।

'यस्येति च'ति सूत्रभाष्यात्तु- सखिशब्दस्य तदवयवे लक्षणया सख्यवयवभिन्नयोरिदुतोरित्यर्थः। यथा 'अत्वसन्तस्ये' ति सूत्रेऽधातोरित्येतद्घटकधातुपदस्य 'पिण्डग्रः' इत्यादिसिद्ध्यर्थं धात्ववयवे लक्षणाऽऽकरे दृश्यते । तदन्तसञ्ज्ञापक्षेऽप्यसखीति य्वोरेव् विशेषणं, ततस्तदन्तविधिः; 'उतश्च प्रत्यया'दितिवत् । ततश्च सख्यवयवभिन्नेवर्णाद्यन्तमित्यर्थः। तदन्तविधिश्च शेषपदार्थविशेषणतया । एवञ्च प्रकृते नैव घिसञ्ज्ञेति लभ्यते । तत्र हि भाष्ये - 'इवर्णस्य ईति किमुदाहरणम् ? अतिसखेरागच्छति, यद्यत्र लोपो न स्यात्तदा कृतदीर्घस्य पूर्वान्तवद्भावेन सखिशब्दत्वात् अतिदेशविषये प्रतिपदोक्तपरिभाषाया अप्रवृत्त्योपसर्जनह्रस्वत्वे कृतेऽपि घिसञ्ज्ञा न स्यात् । लोपे तु लक्षणप्रतिपदोक्तपरिभाषया दोषः' इत्युक्तम् । भवद्रीत्या हि विशिष्टस्य सखिभिन्नत्वेन घिसञ्ज्ञा निर्बाधैवेति तदसङ्गतिः स्पष्टैव।

<u>**भावबोधिनी :**</u> पिण्डग्र इत्यादिसिद्ध्यर्थमिति । अस्त्वस्य प्रत्ययाप्रत्ययसाधारण्येन प्रत्ययग्रहणपरिभाषाप्रवृत्त्या असन्तत्वेन धातुभिन्नत्वाच्च प्राप्तदीर्घवारणार्थमित्यर्थः । इतिवदिति । असंयोगपूर्वत्वविशेषणविशिष्टस्योतः धातुविशेषणत्ववदित्यर्थः । प्रकृते सख्यन्तसख्यादिशब्दे । अतिसखीति । सखिशब्दात् सख्यशिश्वीति ङीष् तत उपसर्जनह्रस्वः । पञ्चम्यन्तप्रयोगस्तु घिसंज्ञा इष्टेति सूचनाय । सखिशब्दत्वादिति । अस्य च न स्यादित्यत्र संबन्धः । सख्यवयवभिन्नेवर्णान्तत्वादिति भावः । ननु असखीत्यत्र लक्षणप्रतिपदोक्तपरिभाषोपस्थित्या प्रतिपदोक्तसख्यवयवभिन्नेवर्णान्त इत्यर्थः । ततश्चैकादेशे कृतेऽपि घिसंज्ञा भवति लाक्षणिकत्वादस्येत्यत आह अतिदेशविषय इति। अप्रवृत्त्येति । अस्यापि न स्यादित्यत्रान्वयः । अतिदेशोपपन्नलाक्षणिकस्य वारणविषये

सूत्रे एवाप्रवृत्तिस्तस्या इति भावः । एवञ्चास्यामवस्थायां सख्यवयवभिन्नेवर्णान्त इत्येवार्थसम्भवेन उक्तस्थले घिसंज्ञा न स्यादेवेति भावः । न दोष इति । लोपपक्षेऽति-देशाभावेन लक्षणपरिभाषाप्रवृत्त्या प्रतिपदोक्तसख्यवयवभिन्नेवर्णान्त इत्यर्थेन लाक्षणिकातिसखिशब्दस्य च तथात्वेन घिसंज्ञासिद्ध्या न दोष इत्यर्थः । तदसङ्गतिरिति। लोपे वा एकादेशे वा समुदायस्य सखिरूपत्वाभावेन संज्ञासिद्ध्या तदुपपादन-भाष्यासङ्गतिरित्यर्थः ।

बालबोधिनी : प्राचीनमतं प्रदर्श्य सिद्धान्तमाह यस्येति चेति । भाष्यात्तु इत्यस्य लभ्यत इत्यनेनान्वयः । वर्णसंज्ञापक्षे आह सख्यवयवभिन्नयोरिदुतोरिति । तदवयवे लक्षणास्वीकारे भाष्यारूढं दृष्टान्तमाह यथेति । पिण्डग्र इति । पिण्डं ग्रसते पिण्डग्रः । ग्रसधातोः क्विपि ततः सुप्रत्यये हल्ङ्यादिलोपे रुत्वविसर्गयोः पिण्डग्र इति रूपम् । अत्वसन्तस्य चाधातोरिति सूत्रे धातुशब्दस्य यथाश्रुतार्थकत्वे पिण्डग्रस्शब्दस्य असन्तत्वादधातुत्वाच्च दीर्घापत्तिः । तद्वारणाय धातुपदस्य तदवयवे लक्षणा स्वीकार्या । धात्ववयवभिन्नो योऽस् तदन्तस्य दीर्घ इत्यर्थ इति पिण्डग्र इत्युपपन्नं भवति । तद्वदसखीत्यस्य तदवयवे लक्षणया वर्णसंज्ञापक्षे सख्यवयवभिन्नयोरिदुतोः घिसंज्ञेत्यर्थलाभेन सुसखिशब्दघटकस्येकारस्य सख्यवयवत्वेन तद्भिन्नत्वाभावेन तस्य न घिसंज्ञेति भावः ।

आकरे दृश्यत इति । उगिदचाम् (7-1-70) इति सूत्रभाष्यकैयटग्रन्थ-सन्दर्भादयमर्थः फलतीति भावः। तथा हि-उगिदचां सर्वनामस्थानेऽधातोः । अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात् सर्वनामस्थाने परे इति सूत्रार्थः । गोमन्तमिच्छतीत्यर्थे सुप आत्मनः क्यजिति क्यचि निष्पन्नगोमत्यशब्दस्य धातुत्वात् ततः कर्तरि क्विपि यलोपाल्लोपयोः गोमत् शब्दनिष्पत्तिः । अथवा गोमानिवाचरतीत्यर्थे क्विपि धातुत्वात् कर्तरि क्विपि तच्छब्दनिष्पत्तिः । ततः सुप्रत्यये अत्वसन्तस्येति दीर्घे उगिदचामिति नुमि गोमानिति रूपम् ।

ननु गोमच्छब्दस्य क्यजन्तस्य आचारक्विबन्तस्य वा धातुत्वात् कथं नुमागम इत्याशङ्क्य 'उगित्यञ्चतिग्रहणात् सिद्धमधातोः' इत्युक्तं भाष्यकृता । अञ्चतेः उगित्वादेव सिद्ध्या 'उगित् सर्वनामस्थाने' इत्येव वक्तुं शक्यत इति अञ्चुग्रहणं व्यर्थं सत् धातोश्चेदुगितः कार्यं तर्हि अञ्चतेरेव नान्यस्योगितो धातोरिति नियमाय भवति । तेन उखास्रत् पर्णध्वदित्यादौ स्रंसु ध्वंसुधात्वोरुगित्वेऽपि निरुक्तनियमेनैव नुमो वारणादधातुग्रहणं व्यर्थमित्याक्षिप्य भाष्यकृता 'इदं तर्हि प्रयोजनमधातुभूतपूर्वस्यापि यथा स्यात् । गोमन्तमिच्छति गोमत्यति

गोमत्यतेरप्रत्यये गोमानिति' इत्युक्तम् । कर्तृक्विबन्तस्य गोमच्छब्दस्य प्रातिपदिकत्वेऽपि धातुत्वं न जहातीति अज्ग्रहणकृतनियमेन गोमानित्यत्र नुमोऽप्राप्तौ तदर्थमधातुग्रहणं कृतम्। उगिदचां सर्वनामस्थाने इत्येकं वाक्यम् । तत्राधातोरित्यभावेऽपि अज्ग्रहणादधातोरुगित इति लाभादधातोरुगितः नलोपिनोऽञ्चतेश्च नुमागम इति वाक्यार्थःफलति । अधातोरिति द्वितीयं वाक्यम् । उक्तो नुमागमः अधातुभूतपूर्वस्यापि भवतीति तदर्थः । अवस्थान्तरेऽपि यस्याधातुत्वं दृष्टं तस्य सम्प्रति धातुत्वेऽपि नुम् यथास्यादिति अधातुग्रहणमिति तात्पर्यम्। ननूक्तरीत्या गोमानित्यत्र नुम्साधनेऽपि अत्वसन्तस्य चाधातोरिति सूत्रेण अधातोरेव दीर्घविधानात् गोमदित्यस्यात्वन्तस्य धातुभिन्नत्वाभावेन कथं दीर्घत्वमित्याक्षिप्य कैयटेन 'उच्यते । अधातोरिति तत्र योगविभागः क्रियते । तत्र चासन्तस्येत्यनुवृत्त्याऽत्वन्तस्य पर्युदासाभाव' इति समाहितम् । अत्वसन्तस्य चेति सूत्रे अधातोरिति योगविभागसामर्थ्यात् तत्रासन्तस्येत्येकदेशस्यानुवृत्तिः । न तु अत्वन्तस्येति । तस्याधातोरिति पर्युदासाभावात् गोमानित्यत्र दीर्घस्सिद्ध्यति । विभक्तेऽधातोरित्यत्रासन्तस्येत्यनुवृत्त्या असन्तो यो धातुभिन्नस्तस्योपधाया दीर्घ इत्यर्थे पिण्डग्र इति असन्तस्य समुदायस्य धातुभिन्नत्वेन दीर्घापत्तिः । अतस्तद्वारणायावश्यं धातुपदस्य तदवयवे लक्षणां स्वीकृत्य धात्ववयवभिन्नो योऽस् तदन्तस्येत्यर्थो वक्तव्यः । प्रकृतेऽसो धात्ववयवत्वेन न दीर्घापत्तिरिति पिण्डग्र इति सिध्यति । एवञ्चोगिदचामिति सूत्रस्थभाष्यकैयटग्रन्थसन्दर्भेण निरुक्तार्थस्सिद्ध्यतीत्यभिप्रायेण धात्ववयवे लक्षणाऽऽकरे दृश्यत इत्युक्तं नागेशेनेति बोध्यम् । स्पष्टञ्च तत्रैवोद्योते 'तत्र चासन्तस्येति योगविभागसामर्थ्यादेकदेशानुवृत्तिः । तेन पिण्डग्रः' इत्यादौ दीर्घाभावः' इति ।

ननु सिद्धान्तभूते तदन्तसञ्ज्ञापक्षे शेषो घ्यसखीत्यस्य सख्यवयवभिन्नयोरिवर्णोवर्णान्तयोरित्यर्थेन सुसखीति समुदायस्येवर्णान्तस्य सख्यवयवभिन्नत्वात् घित्वं दुर्वारमित्यत आह तदन्तसंज्ञापक्षेऽपीति । य्वोरेव विशेषणमिति । सख्यवयवभिन्नौ यौ इवर्णोवर्णौ तदन्तयोरिरित्यर्थः । तत्र दृष्टान्तमाह उतश्चेति । असंयोगपूर्व इति उत इत्यस्य विशेषमम् । असंयोगपूर्वत्वविशिष्टस्य तस्य प्रत्ययविशेषणतया तदन्तविधिः । स्पष्टञ्च उतश्च (6-4-106) इति सूत्रे भाष्ये । यथा 'नास्माभिरसंयोगपूर्वग्रहणेनोकारान्तं विशेष्यते। किं तर्हि ? उकारो विशेष्यते । उकारो योऽसंयोगपूर्वस्तदन्तात् प्रत्ययादिती'ति। प्रकृतेऽपि असखीति य्वेरेव विशेषणम् । विशिष्टस्य तस्य शेषपदार्थविशेषणतया तदन्तविधौ सख्यवयवभिन्नौ याविवर्णोवर्णौ तदन्तं घिसंज्ञमित्यर्थलाभेन वर्णसंज्ञापक्षे इवात्र पक्षेऽपि नास्ति घित्वापत्तिरिति भावः ।

सखिशब्दस्य तदवयवे लक्षणास्वीकारे यस्येति चेति भाष्यं प्रमाणयति तत्र हीति। यस्येति चेति सूत्रभाष्ये हीत्यर्थः । इत्युक्तमिति। अयं भावः । यस्येति चेति सूत्रे भाष्ये 'इवर्णस्य ईति किमुदाहरणम् ? हे दाक्षि, दाक्ष्या, दाक्षेयः' इत्युक्त्वा ततः पदस्य विभज्यन्वाख्यानपक्षे युगपत्प्रसङ्गसत्वेऽपि क्रमेणान्वाख्याने तत्सिद्ध्यतीत्यभिप्रायेण 'नैतानि सन्ति प्रयोजनानि । सवर्णदीर्घत्वेनाप्येतानि सिद्धानी'त्युक्तम् । तदुत्तरम् 'इदं तर्हि अतिसखेरागच्छति, अतिसखेः स्वम् । यदि लोपो न स्यादुपसर्जनह्रस्वत्वे कृते असखीति प्रतिषेधः प्रसज्यते' इति प्रयोजनं दर्शितम् । अयं भावः । इवर्णस्येकारे लोपविधानस्य अतिसखेरित्यत्र घिसंज्ञासम्पादनं फलम् । सखिशब्दात् स्त्रियां 'सख्यशिश्वीति भाषायाम्' इति ङीषि सखि + ई इत्यत्र यस्येति चेति इकारलोपे सखीशब्दनिष्पत्तौ, सखीमतिक्रान्त इति प्रादिसमासे उपसर्जनह्रस्वे अतिसखिरिति रूपम् । अत्रासखीति निषेधाप्रवृत्त्या घिसंज्ञायामतिसखेरिति सिद्ध्यति । यद्यत्र इवर्णस्येकारे परे लोपविधानं न स्यात्तर्हि ङीषि सखि + ई इत्यवस्थायां सवर्णदीर्घे, कृतदीर्घे पूर्वान्तवद्भावेन सखिशब्दत्वातिदेशे, प्रादिसमासोत्तरमुपसर्जनह्रस्वे ततः कृतदीर्घे पूर्वान्तवद्भावेनातिदिष्टस्य सखिशब्दत्वस्य स्थानिवद्भावेन ह्रस्वान्तेऽतिदेशात् सख्यवयवत्वेनासखीति निषेधेनातिसखिशब्दस्य घिसंज्ञा न स्यात्। ननु कृतदीर्घेऽतिदिष्टस्य सखिशब्दत्वस्योपसर्जनह्रस्वोत्तरं स्थानिवद्भावेन ह्रस्वान्तेऽतिदेशेऽपि तस्य लाक्षणिकत्वेनासखीत्यत्र लक्षणप्रतिपदोक्तपरिभाषया प्रतिपदोक्तस्यैव ग्रहणसम्भवेन निषेधाप्रवृत्त्या लोपाभावेऽपि अतिसखिशब्दस्य घित्वं भवत्येवेति चेन्न । अतिदेशविषये लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तेः । ईकारे परे इवर्णस्य लोपे गोस्त्रियोरिति ह्रस्वे निष्पन्नस्य सखिशब्दस्य लाक्षणिकत्वेनासखीति पर्युदासस्थले लक्षणप्रतिपदोक्तपरिभाषया तस्याग्रहणेन निषेधाप्रवृत्त्या घिसंज्ञा भवत्येवेति भाष्यकाराशयः। लोपपक्षेऽतिदेशाभावेन लक्षणप्रतिपदोत्तपरिभाषा प्रवर्तत इति भावः । हरदत्तमतानु-रोधेनासखीत्यस्य सखिभिन्नत्वमित्यर्थे लोपाभावेऽपि अतिसखीतिसमुदायस्य सखिभिन्नत्वेन घिसंज्ञा निर्बाधैवेति इकारस्येकारे परे लोपविधानस्यातिसखेरागच्छतीति फलप्रदर्शन-परभाष्यासङ्गतिरिति ग्रन्थकृदाशयः । भवद्रीत्या = असखीत्यस्य सखिभिन्नाव-यवावित्यर्थाङ्गीकर्तृहरदत्तादिरीत्या । विशिष्टस्य = अतिसखीत्यस्य । तदसङ्गतिरिति । इकारस्येकारे परे लोपविधानस्यातिसखेरागच्छतीति फलप्रदर्शनपरभाष्यासङ्गतिरित्यर्थः ।

न च लोपेऽपि लिङ्गविशिष्टपरिभाषया दोषः। सखिशब्दस्य तदवयवपरत्वेन प्रातिपदिकग्रहणाभावात् । प्रातिपदिकत्ववदुपस्थापकपदोपादानं हि प्रातिपदिकग्रहणम् । ख्यत्यात्सूत्रे - 'किमर्थं विकृतनिर्देशः, न सखिपतिभ्यामित्यवोच्येत? ; अतिसखेरित्यत्र

मा भूत् ?' इति भाष्येऽपि ङ्यन्तप्रकृतिक एवायम् । विहितविशेषणानाश्रयणेनेव प्रतिपदोक्तपरिभाषानाश्रयणनैवैतद्भाष्यं प्रवृत्तमिति न तद्विरोध इत्यलम् ।

भावबोधिनी : ननु असखीत्यत्र लिङ्गविशिष्टपरिभाषोपस्थित्या प्रतिपदोक्तसखि-शब्दप्रकृतिकस्त्रीप्रत्ययान्तं प्रतिपदोक्तसखिशब्दस्वरूपञ्च यच्छब्दस्वरूपं तदवयव-भिन्नेवर्णान्त इत्यर्थेनातिसखिशब्दे तत्त्वाभावेन घिसंज्ञाप्रवृत्त्या तदङ्गीकारपर-भाष्यस्यैकदेश्युक्तित्वेन तद्विरोधोऽस्माकमिति शङ्कते न चेति । विरोधं द्रढयति सखीति। प्रातिपदिकत्ववदुपस्थापकेति । न चैवं धर्मिग्राहकप्रमाणभूतकुमारश्रमणेति सूत्रघटितकुमारशब्दस्य तत्प्रकृतिके लक्षितस्य प्रातिपदिकत्ववदुपस्थापकत्वाभावेन ज्ञापकत्वमेव न संभवतीति वाच्यम् । लक्षणा द्वेधा । स्वारसिका निरूढा चेति । आद्या अन्वयानुपपत्तिमूलका । द्वितीया अनादितात्पर्यविषया । कुमारश्रमणेत्यत्र कुमारस्य यथाश्रुतार्थे सुपेत्यनेनान्वयानुपपत्त्या तत्प्रकृतिके स्वारसिकलक्षणा । अन्वयानुप-पत्तिज्ञानञ्च यथाश्रुतार्थोपस्थित्यनन्तरमेवेति लक्ष्यार्थबोधात्पूर्वं प्रातिपदिकत्ववदुप-स्थापकत्वेन ज्ञापकत्वोपपत्तेः प्रकृते निरूढलक्षणेति पूर्वमुपस्थित्यभावेन भेदो बोध्यः। ननु सखिभिन्नावयव इत्यस्मदुक्तार्थ एव साधुः न तु सख्यवयवभिन्न एवेति त्वदुक्तार्थः । अतिसखिशब्दस्तु सख्यन्तनिष्पन्नः तथात्वे सखिपतिभ्यामित्यत्र लक्षणपरिभाषोप-स्थित्या अतिसखेरित्यत्रोत्ववारणं कुर्यात् न दृश्यते । तस्मात् सखायमतिक्रान्त इति अतिसखिरित्येव । एवञ्चात्र घिसंज्ञा मन्मत एव संभवति न त्वन्मते । सख्यवयवत्वादिति। यस्येति सूत्रस्थं भाष्यमेकदेश्युक्तिरिति न तद्विरोधोऽस्माकमिति प्राचीनोक्तिनिरासार्थं भाष्यमुपन्यस्यति ख्यत्येति । प्रतिजज्ञे ङ्यन्तप्रकृतिक एवेति । तथात्वे लक्षणपरिभाषया कुतो न वारितमित्यत आह विहितविशेषणमिति । त्वन्मते सखिपतिभ्यामित्यत्र विहितविशेषणेनातिसखेरित्यत्र उत्ववारणाकरणादेकदेश्युक्तिरिति । एवञ्चोभयमते एकदेश्युक्तित्वकल्पनस्यावश्यकत्वेन यस्येति सूत्रस्थभाष्यमेव समीचीनमिति तद्विरोधस्य त्वन्मते स्फुटत्वेन सखिभिन्नावयवेत्यादित्वदुक्तार्थो हेय एवेति भावः । किञ्च सखिपतिभ्यामित्यत्र लिङ्गविशिष्टपरिभाषाया अप्युपस्थित्या प्रतिपदोक्तसखिशब्द-प्रकृतिकस्त्रीप्रत्ययान्तात् परस्येत्यर्थेनोत्वं दुर्वारमेव । अतो विकृतनिर्देशः कर्तव्य एव । शेखरकृता तु लिङ्गविशिष्टपरिभाषाया अनाश्रयणेन प्रतिबन्द्युत्तरं दत्तमिति केचित् ।

89 **बालबोधिनी :** ननु अतिसखिशब्दस्थले सखि ई इत्यत्र यस्येति चेति लोपपक्षे सखिशब्दत्वातिदेशाभावेन लक्षणप्रतिपदोक्तपरिभाषायाः प्रवृत्तौ बाधकाभावेनासखीति पर्युदासस्थले प्रतिपदोक्तस्यैव सखिशब्दस्य ग्रहणलाभात् अतिसखिरित्यत्र तस्य

लाक्षणिकत्वेन निषेधाप्राप्त्या घिसंज्ञा सिद्ध्यतीति न दोष इत्युक्तम् । तन्न युक्तम् । लिङ्गविशिष्टपरिभाषया असखीत्यत्र लिङ्गबोधकप्रत्ययविशिष्टस्य सखीशब्दस्यापि ग्रहणलाभेन तस्यापि निषेधात् लोपेऽपि घिसंज्ञानापत्तिरूपदोषस्तदवस्थ एवेति शङ्कते न चेति । समाधत्ते सखिशब्दस्येति । प्रातिपदिकग्रहणाभावमुपपादयन्नाह प्रातिपदिकत्वेति । सखीत्यत्र सखिपदं यस्येति सूत्रभाष्यप्रामाण्यात् लक्षणया तदवयवोपस्थापकं न तु प्रातिपदिकत्ववदुपस्थापकमिति न तत्र लिङ्गविशिष्टपरिभाषायाः प्रवृत्तिरिति भावः ।

ननु निरुक्तरीत्या सखिशब्दस्य तदवयवपरत्वे ख्यत्यात्परस्य (6-1-112) इति सूत्रस्थभाष्यविरोधः । तथाहि - तत्र हि भाष्ये 'किमिदं ख्यत्यादिति ? नैवं शक्यम्, गरींयांश्चैव निर्देशः स्यात् । इह च प्रसज्येत । अतिसखेरागच्छति, अतिसखेः स्वम्' इत्युक्तम् । ख्यत्यादिति विकृतिनिर्देशं विना सखिपतिभ्यामिति निर्देशे अतिसखेरित्यत्राप्युत्वापत्तिरिति भाष्यकाराशयः । कैयटरीत्या अतिक्रान्तः सखा येनेति बहुव्रीहिः । सखिशब्दस्य तदवयवपरत्वे इवर्णस्य सख्यवयवभिन्नत्वाभावेन घिसंज्ञा न स्यादित्यतिसखेरिति भाष्यासङ्गतिः । प्राचीनोक्तरीत्या सखिभिन्नावयवार्थत्वे तु घिसंज्ञा निर्बाधैवेति तत्सङ्गतिरित्यत आह ङ्यन्तप्रकृतिक इति । सखीमतिक्रान्तोऽतिसखिरिति ङ्यन्तप्रकृतिक एवाऽयम् । पूर्वोक्तरीत्या इवर्णस्येकारे परे लोपे उपसर्जनह्रस्वे निष्पन्नस्य सखिशब्दस्य लाक्षणिकत्वेनासखीति पर्युदासस्थले लक्षणप्रतिपदोक्तपरिभाषया तस्याग्रहणात् निषेधाप्रवृत्तौ अतिसखेरिति भाष्यमुपपद्यत इति भावः । ननु तुल्ययुक्त्याऽतिसखेरित्यत्रापि लक्षणप्रतिपदोक्तपरिभाषयैवोत्ववारणसम्भवे ख्यत्यादिति विकृतनिर्देशस्यातिसखेरिति फलप्रदर्शनमसङ्गतम् । सखिपतिभ्यामित्युक्तावपि तत्र प्रतिपदोक्तस्यैव ग्रह्यतया अतिसखेरित्यत्र निष्पन्नस्य सखिशब्दस्य लाक्षणिकत्वादत आह विहितविशेषणेति । एङ्ह्रस्वादित्यत्र विहितविशेषणं ह्रस्वग्रहणं तथाऽत्रापि सखिपतिभ्यामिति विहितविशेषणम्। सखिपतिभ्यां विहितयोर्ङसिङसोरित्यर्थः । अतिक्रान्तः सखा येनेति विग्रहं स्वीकुर्वता कैयटेनापि विकृतनिर्देशस्यातिसखेरिति फलप्रदर्शनपरभाष्यसाङ्गत्याय सखिपतिभ्यामित्यस्य विहितविशेषणत्वं नैवाश्रयणीयम् । अन्यथा विकृतनिर्देशाभावेऽपि ङसिङसोः सखिशब्दाद्विहितत्वाभावेनोत्वस्य प्राप्तेरेवाभावात् विकृतनिर्देशस्यातिसखेरित्यत्रोत्व-वारणरूपफलप्रदर्शनमसङ्गतं स्यात् । एवञ्च ख्यत्यादिति सूत्रभाष्यं विहितविशेषणाना-श्रयणेनैव प्रवृत्तमिति कैयटेनावश्यमङ्गीकार्यतया तद्वत् सखीमतिक्रान्त इति विग्रहं स्वीकृत्य ङ्यन्तप्रकृतिकत्वमङ्गीकुर्वताऽपि सखिपतिभ्यमित्यत्र लक्षणप्रतिपदोक्तपरिभाषानाश्रयणेनैव तद्भाष्यं प्रवृत्तमिति वक्तव्यतया न तद्विरोध इति भावः ।

ख्यत्यादिति सूत्रे प्रदीपे अतिक्रान्तः सखा येनेति बहुव्रीहिः। सखिपतिभ्यामुत्तरावत्र ङसिङसावित्युत्वप्रसङ्गः । अथ तु विहितविशेषणपक्ष आश्रीयते सखिपतिभ्यां यौ विहितौ ङसिङसाविति, तदाऽत्रोत्वाप्रसङ्गः । व्याप्तिस्तु प्रसज्येत इति कैयटः । तत्रैवोद्योते अतिक्रान्तः सखा येनेति । इदं चिन्त्यम् । यस्येति चेति सूत्रभाष्यप्रमाण्येन तदन्तेऽपि घिसंज्ञानिषेधेन तत्र गुणाप्राप्तेः । तस्मात् सखीमतिक्रान्त इति विग्रहः । एवञ्च समासान्तविधौ लिङ्गविशिष्टपरिभाषाभावस्य ङ्याप्सूत्रभाष्ये उक्तत्वेन समासान्ताप्रसक्तिरेव । उपसर्जनह्रस्वत्वे च सखिशब्दत्वम्, लाक्षणिकत्वाच्च न घित्वप्रतिषेधः । प्रकृतभाष्यं तु लक्षणप्रतिपदोक्तपरिभाषानाश्रयणेन प्रवृत्तमिति बोध्यम् , विहितविशेषणानाश्रयणवत् इति स्पष्टम् । अतिसखिशब्दस्य घिसंज्ञाप्रतिपादननिरूपणे तत्रैव भाष्यप्रदीपे कैयटेन अतिसखेरित्यत्र असखीति घिसंज्ञाप्रतिषेधो न भवति । ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् केवलस्यैव सखिशब्दप्रतिषेधविज्ञानादित्युक्तम् । तच्च नागेशेनोद्योते इदं चिन्त्यम्, तस्य प्रत्ययविधिविषयत्वात् । यस्येति चेति सूत्रस्थभाष्यप्रामाण्येनात्र शब्दरूपं विशेष्यमादायापि तदन्तविधिरिति बोध्यम् । अधिकं यस्येति चेत्यत्र निरूपयिष्याम इत्युक्त्वा निरस्तम् ।

अत्र सन्दर्भे विशेषज्ञानाय यस्येति चेति सूत्रभाष्यप्रदीपोद्योतावपि द्रष्टव्यौ । तत्र सूत्रे भाष्यप्रदीपे इवर्णस्येकारे परे लोपस्यातिसखेरिति फलमिति भाष्यव्याख्यानावसरे 'असतीकारलोपे एकादेशस्य पूर्वं प्रति अन्तवद्भावात् घिसंज्ञाप्रतिषेधः स्यात् । प्रसज्यप्रतिषेधे चायं दोषो न तु पर्युदासे, तदन्तस्य सखिशब्दादन्यत्वात् संज्ञायाः सिद्धत्वात्। ङीषि तु लोपे कृते ह्रस्वत्वे च कृते लाक्षणिकत्वात् सखिरूपस्य घिसंज्ञायाः प्रतिषेधाभाव इत्युक्तम् । तत्रोद्योते 'वस्तुतः पर्युदासेऽपि दोषः । वर्णसंज्ञापक्षे लक्षणाया आवश्यकत्वेन सख्यंश एव लक्षणाङ्गीकारे सख्यवयवभिन्नेवर्णस्येत्यर्थात् । तदन्तसंज्ञापक्षेऽपि अनुभूतविशेषणेवर्णेनैव तदन्तविधिस्वीकारेण सख्यवयवभिन्नेवर्णान्तस्येत्यर्थात् । किञ्च तव प्रसज्यप्रतिषेधेऽपि न दोषः । अतिसखीति समुदायनिष्ठघिसंज्ञायास्तेन वारयितुमशक्यत्वात् संज्ञाविधौ तदन्तग्रहणे मानाभावात्' इत्युक्त्वा नागेशभट्टः कैयटवचननिरासपूर्वकं सखिशब्दस्य तदवयवे लक्षणां समर्थितवान् । एवं प्रागुक्तरीत्या सुसखिशब्दस्य घित्वविषये महान् विचारः प्रवृत्त इति बोध्यम् ।

पतिः समा। एवकार इष्टतोऽवधारणार्थः। स्मृतिपुराणेषु 'पतये' 'सखिने'त्यादि व्याकरणानिष्पन्नत्वेनासाध्वेव । त्रिशङ्क्वाद्ययाज्ययाजनादाविव तपोमाहात्म्येना-

साधुप्रयोगेऽपि ऋषीणां दोषाभावात् । याज्ञे कर्मण्येवासाधुप्रयोगे दोषाच्च । अस्माकमपि स्मृतिपुराणाध्ययनविधिबलात्, तेषां तपोबलाच्च यज्ञमध्येऽपि तदन्तर्गततत्पाठे दोषाभावः। स्वातन्त्र्येणेदृशं प्रयुञ्जाना अस्मदादयः प्रत्यवयन्त्येव । अत एव नदीसञ्ज्ञासूत्रे भाष्ये - छन्दोवत्कवयः कुर्वन्तीत्युक्त्वा न ह्येषेष्टिरस्तीत्युक्तम् । यू 'स्त्र्याख्या' विति सूत्रे हरदत्तग्रन्थे स्पष्टतरञ्चैतत् । 'समासे' इत्युक्तेः बहुच्पूर्वे न घित्वम् । अत एव 'पतिर्वृत्तावेवे' ति नासूत्रि। वर्णसञ्ज्ञापक्षे पत्यवयवेकार इत्यर्थः। तदन्तसञ्ज्ञापक्षे पत्यवयवेकारान्त इत्यर्थः। सूत्रे पतिशब्दश्च तदवयवेकारे लाक्षणिकः। एतेन - 'शेषो घ्यसखिपती' 'पतिसखी समास एवे' ति वा सूत्र्यतामित्यपास्तम् । 'यस्येति चे' ति सूत्रस्थभाष्यरीत्या सुपतिना सुसख्येत्यादीष्टासिद्ध्या तथा न्यासस्य कर्त्तुमशक्यत्वादिति स्पष्टमेवेति दिक् ।

<u>भावबोधिनी :</u> असाध्वेवेति । अन्यथोक्तोपपत्तीनां गौणत्वेनानादर इति भावः । तर्हि तेषां दोष इत्यत आह त्रिशङ्क्वादीति । याज्ञे इत्यस्यास्मदादीनामिति शेषः । नन्वेवमपि याज्ञे कर्मणि तदुक्तासाध्वनुवादेनास्मदादीनां दोष एवेत्यत आह अस्माकमपीति । स्वातन्त्र्येणेत्यस्य याज्ञे कर्मणीत्यादिः । प्रत्यवपूर्वेणः झौ रूपम् । प्रत्यवाययुक्ता इत्यर्थः । अत एव = यज्ञादन्यत्रासाधुप्रयोगे दोषाभावादेव । एतच्चासाधुवादमात्रमेव दोषस्तु नास्त्येवेति भावः । ननु लाघवात् पतिस्समपूर्व इत्येव युक्तमित्यत आह समास इति । अत एव पतिशब्दे घित्वस्यानिष्टत्वादेव । नन्वेवमपि केवलपतिशब्द एवानेन नियमेन व्यावर्तयितुं शक्यः न तु पत्यन्त इति बहुच्पूर्वस्य घित्वं दुर्वारमित्यत आह वर्णसंज्ञेति । घिसंज्ञा वर्णस्येति पक्षे इकारस्यैव प्राप्तेरित्यर्थः । एवञ्च बहुपतिशब्दे नैव घित्वमिति भावः । इकारान्त इत्यर्थ इति । यद्यपि तदन्तपक्षे पतिशब्दस्यैव प्राप्त्या पतिस्समास एव वा संज्ञा इत्येवार्थ उचितः । तथाप्यस्मिन्नर्थे बहुपतिशब्दे घित्वापत्त्या पक्षयोरैक्याय लक्षणाया आवश्यकत्वेन शब्दस्वरूपाध्याहारेण पत्यवयवेकारान्त इत्यर्थ आवश्यकः । इत्थञ्च बहुपतिशब्दे न घित्वावकाश इति भावः । प्राचीनमतेऽप्येवमेवेति बोध्यम् । एतेन = अवयवलक्षणाङ्गीकारेण । सुपतिनेति । आद्यन्यासस्य स्वमते सखिपत्यवयवेकारभिन्नस्येत्यर्थेन सुसख्येतिवत् सुपत्येत्यापत्तेरिति भावः । इष्टासिद्ध्येति । अन्त्यन्यासे सुपतिनेतिवत् सुसखिनेत्यापत्तिः । तच्च स्वमतेऽनिष्टमिति भावः । प्राचीनमतेऽप्ययं न्यासोऽशक्यः । वर्णसंज्ञापक्षे सखिपत्यवयवेकारः समास एवेत्यर्थेन तदन्तसंज्ञापक्षे पतिसख्यवयवेकारान्तः समास एवेत्यर्थेन बहुपत्येतिवत् बहुसख्येत्यापत्तेः । तच्च तन्मतेऽनिष्टमिति भावः ।

बालबोधिनी : पतिः समास एव । ननु पतिः समासे इत्येवास्तु । लाघवादेवकारो मास्तु । पूर्वसूत्रेणैव घिसंज्ञासिद्धौ आरम्भसामर्थ्यादेवास्य नियमार्थत्वसिद्धेरित्यत आह इष्टत इति । अन्यथा विनिगमकाभावात् समासे पतिरेव घिसंज्ञक इति विपरीतनियमापत्तिः। तथा सति अतिसखेरित्युदाहरणप्रदर्शनपरभाष्यविरोधः स्यात् । तद्वारणाय, समासे एव पतिशब्दस्य घिसंज्ञेतीष्टसम्पादनाय चैवकारः कृत इति भावः । विपरीतनियमवारणाय धात्वादेरित्यादिज्ञापकानुसरणे प्रतिपत्तिगौरवमिति मनोरमायां स्पष्टम् ।

ननु पतिस्समास एवेत्यभिप्रेतनियमपक्षेऽपि सीतायाः पतये नमः, नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ इत्यादि स्मृतिपुराणप्रयोगविरोधोऽत आह स्मृतीति । नन्वसाधुशब्दप्रयोगो दोषायेत्यत आह त्रिशङ्क्वादीति । असाधुप्रयोगेऽपीति । यज्ञकर्मणोऽन्यत्रापीत्यर्थः । वस्तुतस्तु याज्ञे कर्मण्येवासाधुप्रयोगे प्रत्यवाय इति भाष्यसम्मतं सिद्धान्तमाह याज्ञे इति । याज्ञे कर्मणि ऋष्युक्तानामसाधूनामस्माभिरुच्चारणे प्रत्यवाय इत्यत् आह अस्माकमपीति । तदन्तर्गतेति । स्मृत्यन्तर्गतेत्यर्थः । प्रत्यवयन्तीति । प्रत्यवाययुक्ता भवन्तीत्यर्थः । स्वातन्त्र्येणासाधुशब्दप्रयोगे प्रत्यवायसत्वे भाष्यं प्रमाणयति अत एवेति । सूत्रे समासग्रहणस्य फलमाह बहुचूपूर्वे इति । तद्धितवृत्तौ बहुपत्या इत्यत्रेत्यर्थः । तदेवाह अत एवेति । बहुचूपूर्वे घिसंज्ञाया अनिष्टत्वादेवेत्यर्थः । नासूत्रीति । अन्यथा तत्रापि घित्वापत्तिरित्यर्थः । सूत्रे इति । असखीत्यत्र सखिशब्दस्येव पतिशब्दस्यापि तदवयवे लक्षणा । वर्णसंज्ञापक्षे, तदन्तसंज्ञापक्षे च पूर्ववदेवार्थो वर्णनीयः । एतेन = अवयव-लक्षणाङ्गीकारेण । तथा न्यासाकरणे हेतुमाह यस्येति चेति । शेषो घ्यसखिपती इति न्यासे सखिशब्दस्येव पतिशब्दस्यापि तदवयवे लक्षणया पत्यवयवभिन्नो य इकारस्तदन्तस्यैव घिसंज्ञेति लाभेन पत्यवयवेकारान्तस्य तन्निषेधात् सुसख्येत्यादाविव सुपतिनेत्यदावपि घिसंज्ञा न स्यात् । पतिसखी समास एबेति द्वितीयन्यासे सुपतिनेत्यत्रेव सुसख्येत्यत्रापि घित्वापत्तौ नाभावे तदसिद्धिरिति भावः ।

नित्यं बहुवचनान्त इति । 'किमः सङ्ख्यापरिमाणे' इत्यनेन किंशब्दाद्बहुत्वसङ्ख्यावच्छिन्नसंख्येयविषयप्रश्ने एव डतिरिति भाष्ये स्पष्टत्वादिति भावः। बहुगण । सङ्ख्याप्रदशेष्वेतत्सञ्ज्ञाकरणज्ञानरूपप्रकरणसत्वेऽपि तन्मूलक-कृत्रिमाऽकृत्रिमन्यायस्य न प्रवृत्तिः, कर्त्तरि कर्मेत्यादाविव । अत एव 'सङ्ख्याया अतिशदन्ताया' इति शदन्तपर्युदासः सङ्गच्छते, न हि शदन्ता कृत्रिमा सङ्ख्याऽस्ति । तस्मात्सङ्ख्याप्रदेशेषूभयगतिः। किञ्च लोकप्रसिद्धमहासञ्ज्ञाकरणेन प्रदेशेषु

लोकप्रसिद्धार्थस्याप्यवगतिरिति स्पष्टं भाष्ये। अत एव 'पञ्चकृत्व' इत्यादिसिद्धिः। एतन्न्यायोपयोगस्त्वभ्यासाम्रेडितादिसञ्ज्ञाविषये द्रष्टव्यः। सूत्रे बहुगणग्रहणन्तु - तयोर्नियतविषयपरिच्छेदहेतुत्वाभावेनासङ्ख्यात्वात्। बहुत्वादि हि त्र्यादिसङ्ख्याव्यापको धर्मविशेषः। अत एव भाष्ये - एतत्सूत्रमतिदेशार्थं यदयमसङ्ख्यां सङ्ख्येत्याह इत्युक्तम्। यत्तु भाष्ये - 'एकादिकया चापि सङ्ख्यायते' इत्युक्तं, तस्यायमर्थः बह्वादिकयाऽपि स्वव्याप्यत्रित्वादिसङ्ख्यया सङ्ख्यायते। कतिशब्दोऽपि सङ्ख्यानकरणीभूतार्थ-विषयप्रश्नार्थकतया सङ्ख्यानकरणम्। एवं वत्वन्तेऽप्यूह्यम्। यद्वा - चापि शब्दौ वाक्यालङ्कारे। एकादिकया सङ्ख्यायते, साऽपि प्रदेशेषु यथा गृह्येतेति लोकप्रसिद्धमहा-सञ्ज्ञाकरणमिति तदर्थः। एतेन 'अर्थान्तरवाचित्वे सति बहुत्ववाचिनश्चेत् संख्याकार्यं तर्हि बहुगणयोरेव' इति नियमार्थं तत् तेन भूर्यादीनां न। तेषां वैपुल्याद्यर्थान्तरवाचित्वात् वैपुल्यं विशालता। विशेष्यविशेषणदलाभ्याम् अबहुत्ववाचिन एकशब्दस्य बह्वर्थमात्रवाचिनां त्र्यादीनाञ्च न व्यावृत्तिः। यद्वा 'अनियतसंख्यावाचिनश्चेद् बहुगणयोरेव' इति नियमः अनन्तशब्दवदनन्तवाचिशतशब्दस्य सङ्ख्याकार्याभाव इष्ट एवेत्यपास्तम्। सङ्घवैपुल्यवाचकयोर्नेह ग्रहणं, परस्परसाहचर्येण त्र्यादिसङ्ख्याव्यापकधर्मवाचिनोरेव ग्रहणात्। 'वतु' इति सानुबन्धनिर्देशो ब्राह्मणवदित्यादिव्यावृत्त्यर्थः। डतिस्तद्धित एव, वतुसाहचर्यादित्यलम्। 'ष्णान्ता' इत्यतः 'ष' डिति वर्तते, सङ्ख्ये ति च प्रकृतं, तदाह - डत्यन्तेति। अत एव 'षट्कती'ति डडनुवादेन थुग्विहितः। अत एव सञ्ज्ञाविधावपि प्रत्ययग्रहणे तदन्तग्रहणम्। सङ्ख्येति किं? पतयः।

<u>**भावबोधिनी :**</u> ननु संख्यापरिमाणे डतेर्विहितत्वेन संख्येत्यनेन एकत्वादिसंख्याया अपि ग्रहणौचित्येनैकवचनान्तत्वमपि स्यादत आह किम इति। तन्मूलेति। ज्ञानरूपप्रकरणमूलक इत्यर्थः। कर्मेत्यनेन क्रियाया एव ग्रहणम्। अत एव न्यायप्रवृत्तेरेव। शदन्तेति। पञ्चाशदित्यादयः। तस्मात् = उक्तज्ञापकात्। उभयगतिरिति। उभयोः कृत्रिमाकृत्रिमयोः गतिः ज्ञानमित्यर्थः। प्रमाणान्तरमाह किञ्चेति। लोकप्रसिध्येत्यत्र संख्येतीत्यादिः। अत एव = उभयोर्ग्रहणादेव। संख्या इति। कृत्वसुजिति बोध्यम्। एतन्न्यायेति। अभ्यासाम्रेडितशब्दाभ्यामसकृदावृत्तिद्वित्रिरुक्तिरूपलौकिकार्थस्य न ग्रहणमिति भावः। इदमत्र बोध्यम्। यद्यप्येतावता क्वचित् ज्ञापकेन उभयोरन्यत्र कृत्रिमस्यैवेति निरूपितम्। तथापि व्याख्यानात् क्वचिदकृत्रिमस्यैव ग्रहणम्। अत एव कर्तरि कर्मव्यतिहारे इत्यादौ न दोषः। स्पष्टश्चेदमन्यत्र। ननु बहुगणयोरपि संख्यावाचकत्वेन प्रदेशेषु संख्यापदेन ग्रहणं सिद्धमित्यत आह सूत्रे इति। नियतविषयेत्यादि। नियतो योऽयं विषयपरिच्छेदः विषयज्ञानम्। नियतत्वञ्च

संशयाप्रयोजकत्वम् । हेतुत्वं प्रयोजकत्वम् । तथा च संशयाप्रयोजक–विषयज्ञान–प्रयोजकत्वाभावेन संख्यावाचकत्वाभावादित्यर्थः । इदञ्च संख्यावाचकशब्दानां स्वरूपकथनम् । बहवो घटाः एवं गणाः घटा इत्युक्ते तज्जन्यज्ञानस्य त्रयो वा चत्वारो वा घटा इति नियमेन संख्याप्रकारकसंशयजनकत्वेनोत्तरसंख्यावाचकत्वाभावः । एकादिशब्दानां तु तादृशसंशयाजनकज्ञानप्रयोजकत्वेन संख्यावाचकत्वमिति भावः । असंख्यात्वात् = संख्यावाचकत्वाभावात् । उक्तार्थमेवोपपादयति बहुत्वादि हीति । त्र्यादीत्यस्य त्रित्वादीत्यर्थः । अत एव = बहुगणयोः संख्यावाचकत्वाभावादेव । असंख्यामिति । असंख्यावाचकबह्वादिव्यक्तिमित्यर्थः .। संख्यां संख्यावाचिकाम् । बह्वादीनामपि संख्याशब्दवाच्यत्वं भाष्यात् प्रतीयत इत्यर्थः । तद्भाष्यमुपन्यस्यार्थमाह यदि त्वित्यादिना । इत्युक्तमिति । तत्र हि संख्याप्रदेशे कृत्रिमत्वात् बह्वादय एव गृह्येरन् न त्वेकादय इत्याशङ्क्य अथवा महतीयं संज्ञा संख्यायते ज्ञायते अनयेति संख्या । एकादिकया चापि संख्यायत इत्युक्तम् । बह्वादिकयापीति । भाष्यस्थचापिपदग्राह्येत्यादिः। स्वव्याप्येत्यादिः । स्वशब्देन बहुत्वादेर्ग्रहणम् । संख्यानकरणीभूतेति । तादृशार्थः तत्र त्रित्वादिः ऊह्यमिति । यावन्तो घटास्तावन्तो घटा इत्यादौ यावत्तावच्छब्दयोः त्रित्वादिसंख्यया संख्यानकरणत्वाभावेन शब्दमर्यादया संख्यापदवाच्यत्वं नेति भावः । यावद्राशिस्तावद्राशिरित्यादौ यावत्तावदोः संख्यानकरणत्वाभावेनास्वरसादाह यद्वेति । अलङ्कार इति । तेन भाष्ये बह्वादीनां न ग्रहणमिति भावः । सापीति । एकादिरपीत्यर्थः। यथागृह्यते इति । एवञ्च एकत्वादीनां ग्रहणार्थमेव महासंज्ञाकरणेन तेषामेव संख्यानकरणत्वं भाष्यसम्मतम् । बह्वादयस्तु कृत्रिमत्वादेव गृह्यन्त इति भावः । एतमेवार्थं किञ्चेत्यनेन प्रागेवावोचत् । एतेन = बहुगणयोः संख्यापदवाच्यत्वाभावप्रतिपादनद्वारा विध्यर्थत्वाङ्गीकारेण । बहुवाचिनः = बहुत्वावच्छिन्नवाचिनः । नियमार्थमिति । बहुगणयोः संख्यापदवाच्यत्वाभिमानेन नियमः बहुगणयोश्च वैपुल्यसंघस्वरूपार्थान्तरवाचकत्वाच्चेति बोध्यम् । भूर्यादीत्यादीना अनन्तशब्दपरिग्रहः । तेषां भूर्यादीनाम् । वैपुल्यादीत्यादिना अशेषरूपार्थपरिग्रहः । अनियतसंख्येति । बहुत्वगणत्वानन्तत्वभूरित्वादयोऽनियताः संशयजनकत्वात् । एकत्वादिकं तु न तथेति भावः । शतशब्दस्यानन्तार्थत्वे दोषः अस्मिन्नियमेऽतिरिच्यत इत्यत आह इष्ट एवेति । त्र्यादीति । त्रित्वादीत्यर्थः । एकस्य साहचर्याश्रयणदशायामेकस्य त्रित्वादिव्यापकधर्मविशिष्टवाचकत्वमङ्गीकृत्यैव तदाश्रयणम्। तत्साहचर्येणान्योऽपि तथाभूत एव गृह्यत इति बोध्यम् । व्यावृत्त्यर्थ इति । न च वत्यन्तादार्हियार्थककनादीनां योग्यताभावादेव नोत्पत्तिरिति वाच्यम् । ब्राह्मणवच्छालाप्रिय

इत्यादौ द्विगुसंज्ञाद्वारा तत्स्वरापत्तेः । ब्राह्मणवद्वोप्रिय इत्यादौ टजापत्तेश्च । तद्धित एवेत्येवकारेण पातेर्डतिरित्यौणादिकव्यावृत्तिः । तेन पतय इत्यत्र षट्त्वाभावेन जसो लुङ् न । अत एव डत्यन्तस्य षट्संज्ञाङ्गीकारादेव । विहित इति । अन्यथा केवलडतेः संख्यात्वेऽपि प्रातिपदिकत्वाभावेन कतिशब्दघटकडतेः डट् न स्यादिति भावः । अत एव = डटमनूद्य थुग्विधानादेव । तदन्तग्रहणमिति । डति चेति सूत्रे बहुगणेति सूत्रे चेत्यर्थः ।

बालबोधिनी : नित्यं बहुवचनान्त इति । तत्रोपपत्तिमाह किम इति । ननु किमः संख्यापरिमाणे इत्यत्र संख्यापदेनैकत्वसंख्याया अपि ग्रहणमित्यत आह बहुत्वेति । भाष्ये इति । किमः संख्यापरिमाणे डति च (5-2-41) इति सूत्रे भाष्ये 'बहुष्विति वक्तव्यम्। इह मा भूत् कियान् कियन्ती । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । किमित्येतत् परिप्रश्ने वर्तते, परिप्रश्नश्चानिर्ज्ञाते, अनिर्ज्ञातं च बहुषु । द्व्येकयोः पुनर्निर्ज्ञातम् । निर्ज्ञातत्वाद् द्व्येकयोः परिप्रश्नो न भवति । परिप्रश्नाभावात् किमेव तावन्नास्ति कुतः प्रत्यय' इति । यत्तदेतेभ्यः परिमाणे वतुप् इति सूत्रे परिमाणग्रहणस्य सर्वतो मानार्थत्वात् किमः संख्यापरिमाणे इति सूत्रे पुनस्तद्ग्रहणसामर्थ्यात् अत्रस्य परिमाणशब्दः परिच्छेदकपरः । संख्यापरिमाणमिति कर्मधारयः । किमः प्रश्नार्थकत्वेन संख्यारूपपरिच्छेदविषयके प्रश्ने वर्तमानात् किमोऽस्येति षष्ठ्यर्थे डतिर्भवतीति सूत्रार्थो लभ्यते । कियान् वृक्ष इत्यादौ कियान् इति न संख्याप्रश्नः किन्तु परिमाणमात्रप्रश्नः । का संख्या परिमाणमस्य वर्गस्येति यद् वर्गावयवगतसंख्याविशेषविषयः प्रश्नस्तदा कति वर्ग इति डतिप्रत्ययः प्राप्नोतीत्याशङ्क्य तद्वारणाय सूत्रे बहुष्विति वक्तव्यमित्याक्षिप्य न वक्तव्यमिति प्रकारान्तरेण भाष्यकृता समाहितम् । तस्यायमाशयः । यदीया संख्या पृच्छ्यते तत्रैव प्रत्ययोत्पत्तिर्भाव्या । यदा वर्गावयवगतसंख्याविशेषप्रश्नस्तदा अवयवेष्वेव प्रत्ययोत्पत्तिः । न तु व्यवहितसंख्यासम्बन्धे वर्गे । तथा च कति गावोऽस्मिन् वर्गे इति, कति गावोऽयं वर्ग इति वा भवितुमर्हति । परिमाणोपाधौ प्रकृत्यर्थे कियान् इति प्रयुज्यते । तत्रैव संख्याप्रश्ने कियन्त इति । स्पष्टञ्चैतत् कैयटे । किमित्यस्य परिप्रश्नार्थकत्वेन द्व्येकयोः सन्देहाभावेन प्रश्नाभावात् न तत्र डतिः । बहुत्वव्याप्यसंख्यानां बहुत्वादस्य नित्यबहुवचनान्तत्वं युक्तमेवेति भावः ।

बहुगणवतुडति संख्या । ननु बहुगणादीनां संख्यासंज्ञाकरणे तस्य कृत्रिमत्वात् संख्यापदघटितप्रदेशेषु कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय इति न्यायेन बह्वादीनामेव ग्रहणं स्यात् । एकद्व्यादीनामकृत्रिमानां ग्रहणं न स्यादित्यत आह संख्येति । एतत्संज्ञा =

संख्यासंज्ञा । तन्मूलेति । बहुव्रीहिः । संख्यासंज्ञाकरणज्ञानरूपप्रकरणमूलक इत्यर्थः । न प्रवृत्तिरिति । अयं भावः । संख्याशब्दो लोके एकद्व्यादिषु प्रसिद्धः । व्याकरणे तु बह्वादिषु सङ्केतितः । ततश्च संख्यपदघटितसूत्रेषु कस्य ग्रहणमिति तात्पर्यसन्देहे कृत्रिमाकृत्रिमन्यायबीजस्य अत्र शास्त्रे बह्वादीनां संख्यासंज्ञेति ज्ञानरूपप्रकरणस्य प्रसिद्धतया तेन तात्पर्यनिर्णये बह्वादीनामेव ग्रहणं स्यान्नत्वेकद्व्यादीनामिति शङ्कितुराशयः । उभयगतिरिह भवतीति परिभाषया कृत्रिमाकृत्रिमयोरुभयोरपि ग्रहणं भवतीति समाधातुराशयः । सङ्ख्याया अतिशदन्तायाः कन् इति सूत्रस्थः त्यन्तपर्युदसोऽस्याः परिभाषाया ज्ञापकः । प्रकृतसूत्रे संख्यापदेन कृत्रिमस्य बह्वादेरेव ग्रहणं स्यात् तर्हि तेषु त्यन्तशदन्तयोरभावेन ततः कनः प्राप्त्यभावेन तद्व्यावृत्त्यर्थं कृतः तिशदन्तपर्युदासो व्यर्थस्सन् उभयगतिरिह भवतीति परिभषां ज्ञापयति । ततश्च संख्याप्रदेशेषूभयोरपि ग्रहणं सिद्धम् । कृत्रिमाकृत्रिमन्यायाप्रवृत्तौ दृष्टान्तमाह कर्तरीति । कर्तरि कर्मव्यतिहारे, शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे इत्यत्र कर्मादिभ्यां कारकप्रकरणोक्तकृत्रिमस्य ग्रहणं नास्ति किन्तु अकृत्रिमक्रियाया एव । तदप्रवृत्तौ बीजमाह अत एवेति । न्यायाप्रवृत्तेरेवेत्यर्थः शदन्तेति । तिशदन्तेति तात्पर्यम् ।

संख्याप्रदेशेषु कृत्रिमाकृत्रिमयोरुभयोरपि ग्रहणे प्रमाणान्तरमाह किञ्चेति । स्पष्टं भाष्ये इति । तत्र सूत्रे भाष्ये 'अथवा महतीयं संख्येति संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनम् । अन्वर्थसंज्ञया यथा विज्ञायेत । संख्यायते अनयेति संख्येति । एकादिकया चापि संख्यायते' इति । लोकप्रसिद्धार्थस्य ग्रहणे गमकमाह अत एवेति । संख्याप्रदेशेषु उभयोर्ग्रहणादेवेत्यर्थः । पञ्चकृत्व इत्यादिसिद्धिरिति । संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् इत्यादौ संख्यापदेन लोकप्रसिद्धस्यापि ग्रहणादेव पञ्चकृत्वो भुङ्क्ते इत्यादिसिद्धिरिति बोध्यम् ।

ननु कृत्रिमाकृत्रिमन्यायस्य पाणिनीये सर्वथाऽनङ्गीकार एवेति शङ्कायामाह एतन्न्यायेति । अभ्यासाम्रेडितादिसंज्ञाविषये कृत्रिमाकृत्रिमन्यायवशात् लोकप्रसिद्धस्यासकृदावृत्तिद्वित्रिवारंकथनरूपस्यार्थस्य ग्रहणं नास्तीति भावः । शब्दकौस्तुभे भट्टोजीदीक्षितः संख्यासंज्ञासूत्रे वैपुल्यवाचिनो बहुशब्दस्य, सङ्घवाचकस्य गणशब्दस्य च संख्यासंज्ञा स्यादित्याशङ्क्य सङ्ख्यायतेऽनयेत्यन्वर्थसंज्ञाबलात् संख्यावाचिनोरेव बहुगणशब्दयोरिह ग्रहणम् । तच्च नियमार्थम् । अनियतबहुत्ववाचिनां मध्येऽनयोरेव संख्यासंज्ञा न तु भूर्यादीनामिति समाहितवान् । त्र्यादयो नियतबहुत्ववाचकास्संख्याशब्दाः । बहुगणशब्दौ

चानियतबहुत्ववाचकौ संख्याशब्दाविति दीक्षितस्याशयः । वस्तुतः तयोस्संख्या-वाचित्वाभावेन दीक्षिताद्युक्तं न युक्तमित्याशयेन सिद्धान्तमाह सूत्रे इति । कृतमिति शेषः । तयोः = बहुगणयोः असंख्यात्वात् = संख्यावाचकत्वाभावात् । नियतेति । नियतविषय-परिच्छेदहेतुत्वं संख्यात्वम् । नियतो यो विषयपरिच्छेदः = विषयज्ञानं तस्य हेतुत्वमित्यर्थः । नियतत्वञ्च संशयाजनकत्वम् । त्रित्वाद्यवान्तरधर्मप्रकारकसंशयाजनकं यद् विषयज्ञानं तत्प्रयोजकत्वं संख्यात्वमिति भावः । एकद्व्यादीनां तादृशसंशयाजनकज्ञानप्रयोजकत्वेन संख्यात्वम् । बहवो घटा इत्युक्तौ तज्जन्यज्ञानस्य त्रित्वादिधर्मप्रकारकसंशयप्रयोजकत्वेन बहुगणयोः लोकप्रसिद्धसंख्यावाचकत्वं नास्तीति भावः । असंख्यात्वात् = संख्यावाचकत्वाभावात् । बहुत्वादीति । आदिना गणत्वपरिग्रहः । त्र्यादीति । त्रित्वादीत्यर्थः । धर्मविशेष इति । न तु जातिरूप इत्यर्थः । बहुगणयोः संख्यावाचकत्वाभावे मानमाह अत एवेति । तयोरसंख्यात्वादेवेत्यर्थः । भाष्ये इति । बहुगणेति सूत्रं न संख्यासंज्ञाविधायकम् । किन्त्वसंख्या संख्यवद् भवतीत्यतिदेशसूत्रम् । अत एव न तत्र कुत्रिमाकृत्रिमन्यायप्रवृत्तिरिति भाष्यकाराशयः । तथा हि 'संख्यासंज्ञायां संख्याग्रहणं संख्यासम्प्रत्ययार्थम्' इति वार्तिककृतोक्तम् । संख्यासंज्ञायां संख्याग्रहणं कर्तव्यम् । बहुगणवतुडतयः संख्यासंज्ञा भवन्ति, संख्या च संख्यासंज्ञा भवतीति वक्तव्यम् । एकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्येति सम्प्रत्ययार्थं संख्याग्रहणमिति तदर्थः । यद्यपि लोकत एव एकादिकायाः संख्यात्वेन ग्रहणं सिद्धम्, तथापि अक्रियमाणे हि संख्याग्रहणे एकादिकायाः संख्यायाः संख्येत्येष सम्प्रत्ययो न स्यात् । अकृत्रिमत्वादित्यवश्यं संख्याग्रहणं कर्तव्यमित्युक्तम् । ततः कात्यायनवार्तिकप्रत्याख्यानाय 'यथा लोके तथा व्याकरणे । उभयगतिः पुनरिह भवति । यथा कर्मप्रदेशेषु चोभयगतिर्भवति । कर्मणि द्वितीयेति कृत्रिमस्य ग्रहणम् । कर्तरि कर्मव्यतिहारे इत्यत्राकृत्रिमस्य इति समाधानपरम्परायाम् 'अथवा नेदं संज्ञाकरणम् । तद्वदतिदेशोऽयम् । बहुगणवतुडतयः संख्यवद्भवन्तीति । स तर्हि वतिनिर्देशः कर्तव्यः ? न कर्तव्यः । न ह्यन्तरेण वतिमतिदेशो गम्यते । तद्यथा एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह । ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यसंख्यां संख्येत्याह, संख्यावदिति गम्यते' इति । तत्र प्रदीपे 'संख्याकार्यातिदेशोऽयमित्यर्थः । यदि हि संज्ञा स्यात् टिघुभादिसंज्ञावदेकाक्षरा क्रियते । तस्माल्लौकिकार्थाभिधायी संख्याशब्द उपादीयमानोऽति-देशार्थत्वमस्य बोधयति' इति कैयटः । नियतविषयपरिच्छेदहेतुर्हि संख्या । एवञ्च बहुत्वादेरसंख्यात्वमिति भाव इत्युद्योतकारः । एवञ्चास्यातिदेशसूत्रत्वेन संज्ञासूत्रत्वाभावेन नात्र कृत्रिमाकृत्रिमन्यायप्रवृत्तिरिति भाष्यकाराशयः ।

बहुगणयोर्निरुक्तरीत्या संख्यवाचकत्वाभावे भाष्यविरोधमाशङ्क्य परिहरति यत्त्विति । संख्याप्रदेशेषु कृत्रिमत्वात् बह्वादीनामेव ग्रहणं स्यात् न त्वेकद्व्यादीनामित्याशङ्क्य 'संख्यासंज्ञायां संख्याग्रहणं संख्यासम्प्रत्ययार्थम्' इत्युक्तं वार्तिककृता । तस्य प्रत्याख्यानाय भाष्यकृता' अथवा महतीयं संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः । कुत एतत् ? लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम् । अन्वर्थसंज्ञा यथा विज्ञायेत - संख्यायतेऽनया संख्येति । एकादिकया चापि संख्यायते' इति समाधानान्तरमुक्तम् । भाष्यस्थापिशब्देन बह्वादीनामपि ग्रहणात् तेषामपि संख्यात्वं भाष्यसम्मतमिति शङ्कितुराशयः । समाधत्ते तस्यायमर्थ इति । एकादिकया चापीत्यत्रापिशब्देन बह्वादिकं गृह्यते एकादिकया संख्यानकरणात् साक्षात्तेषां संख्यार्थकत्वम्। बहुत्वादिव्याप्यत्रित्वादिसंख्यया संख्यानकरणात् बह्वादीनां परम्परया संख्यार्थकत्वेऽपि साक्षात्तदभाव इति न प्रागुक्तभाष्यविरोध इति भावः ।

कतिशब्दस्यापि परम्परया संख्यार्थकत्वमाह कतीति । वत्वन्तडत्यन्तयोः यावदादिशब्दकतिशब्दयोः । यद्यपि संख्यानकरणीभूतार्थप्रतिपादकत्वं साक्षादुपपादयितुमशक्यं तथापि कतीत्यादौ संख्यानकरणीभूतत्रित्वादिरूपार्थविषयप्रश्नार्थकतया परम्परया संख्यार्थकत्वं बोध्यम् । एवञ्च बह्वादीनां साक्षात् संख्यानकरणत्वाभावेऽपि परम्परया कथञ्चित् तत्वसिद्ध्या एकादिकया चापि संख्यायते इत्यत्रापिशब्देन बह्वादिग्रहणेऽपि न भाष्यविरोध इति भावः । वत्वन्तेऽपीति । यावदित्यादावित्यर्थः । ऊह्यमिति । परम्परया संख्यानकरणत्वमिति शेषः । संख्यायते अनेनेति संख्या । बाहुलकात् करणेऽङिति बोध्यम् । एकत्वादिषु योगार्थो लोकप्रसिद्धः । बह्वादिषु परम्परया । तत्र साक्षादवयवार्थस्य बाधात् परम्परयाऽपि संख्यानकरणीभूतार्थे संख्यापदस्य वृत्तिः स्वीक्रियत इति भावः ।

वस्तुतस्तु बह्वादीनां संख्यात्वं नास्ति । एकादिकया चापीति भाष्ये अपिशब्दो वाक्यालङ्कारे । लाघवादित्याह यद्वेति । साऽपि = एकादिरपि । प्रदेशेषु = संख्यापदघटितप्रदेशेषु । यथा गृह्येतेति । संख्यापदेन यथा बह्वादीनां ग्रहणं तथा एकद्व्यादीनामपीत्यर्थः। संख्याया अकृत्रिमस्यापि ग्रहणे हेतुमाह लोकप्रसिद्धमहासंज्ञाकरणमिति ।

कैयटोक्तिमनूद्य दूषयति एतेनेति । नियतविषयपरिच्छेदहेतुत्वाभावेन बहुगणयोरसंख्यात्वेनेत्यर्थः। 'अथवा महतीयं संज्ञा क्रियते' इति भाष्यं व्याख्यातुः कैयटस्यायमभिप्रायः । टिघुभादिवत् लघुभूतां संज्ञामकृत्वा संख्येति महत्याः संज्ञायाः करणात् तदर्थानुगतानामुपात्तानामेव संज्ञा सिध्यति । यथा सर्वादीनामेव सर्वनामसंज्ञा न त्वधिकानाम् । तेन

बहुगणशब्दयोः संघवैपुल्यवाचिनोः संज्ञा मा भूत्, एकादीनां तु कथं स्यात् ? इत्याशङ्क्य कैयटेनत्थं समाहितम् । नैष दोष इत्यादि । अयं भावः । संख्येति योगो विभज्यते । विभक्तसूत्रे तत्रान्वर्थसंज्ञाकरणेन तावदनुरूपः संज्ञी सर्व आक्षिप्यते । एवञ्च संख्यानकरणीभूताः संख्यासंज्ञका इत्यर्थः । तेनैकादीनां तावद्ग्रहणं भवति । एवञ्च संख्याप्रदेशेषु कृत्रिमस्य बह्वादेरकृत्रिमस्यैकद्व्यादेश्च संग्रहः । बहुगणवतुडतीति द्वितीयं सूत्रम् । तत्र संख्येत्यनुवर्तते। संख्यात्वेन तेषामपि संख्येति विभक्तसूत्रेणैव तत्सिद्धौ बहुगणेति सूत्रं व्यर्थं सत् नियमाय भवति । अर्थान्तरवाचित्वे सति बहुत्ववाचिनश्चेत् संख्याकार्यं तर्हि बहुगणयोरेवेति । तेन संघवैपुल्यवृत्त्योः बहुगणशब्दयोः, अर्थान्तरवाचित्वेन भूर्यनन्तादीनाञ्च न संख्यासंज्ञा । बह्वर्थवाचित्वेऽपि अर्थान्तरवाचित्वाभावेन त्र्यादीनाम्, असहायाद्यर्थान्तरवाचित्वेऽपि बहुत्ववाचित्वाभावेनैकशब्दस्य च नियमशरीराप्रविष्टत्वेन न तेषां व्यावृत्तिरिति भावः । अथवा अनियतसंख्यावाचिनां चेद्बह्वादीनामेवेति नियमः क्रियते । अनियत-संख्यावाचित्वाभावेन भूर्यादीनां निवृत्तिरिति कैयटस्याशयः । बह्वादीनां संख्यावाचित्वेन संख्येति विभक्तसूत्रेणैवान्वर्थसंज्ञाबलात् लोकप्रसिद्धैकद्व्यादीनां, कृत्रिमबह्वादीनाञ्च संख्याप्रदेशेषु ग्रहणसिद्धौ बहुगणवतुडतीति द्वितीयसूत्रं नियमाय भवति । तेन भूर्यादीनां निवृत्तिरिति कैयटो मनुते । वस्तुतस्तु बह्वादीनां संख्यावाचित्वं नास्ति । विध्यर्थमेव संख्यासंज्ञासूत्रम् । महासंज्ञाकरणसामर्थ्यात् संख्याप्रदेशेषु लौकिकसंख्याया अपि ग्रहणम्। रामार्जुनगतिस्तयोरितिवत् बहुगणशब्दयोः परस्परसाहचर्यात् त्र्यादिसंख्याव्यापकार्थ-वाचिनोरेव बहुगणयोर्ग्रहणम् । न तु संघवैपुल्यवचनयोरिति व्यर्थाऽन्वर्थसंज्ञा । तस्मात् संख्याप्रदेशेषु लोकप्रसिद्धयोगार्थस्यापि ग्रहणार्थं लघुभूतां टिघुभादिरूपामेकाक्षरसंज्ञामकृत्वा महती संज्ञा कृतेति भाष्याशयः । असंख्यां संख्येत्याहेति भाष्येण बह्वादिषु संख्यायत इति योगार्थाभावबोधनात् कैयटोक्तो योगविभागो व्यर्थ इति नागेशाशयः । तदेवाह अपास्त-मिति ।

ननु संख्येतिमहासंज्ञाकरणसामर्थ्यात् संख्याप्रदेशेषु एकद्व्यादिग्रहणलाभेऽपि संघवैपुल्यवाचकयोर्बहुगणयोः संज्ञावारणं कथमित्यत आह संघवैपुल्येति । परस्परेति । अवैपुल्यार्थकगणशब्दसाहचर्याद्बहुशब्दस्य, असंघार्थकबहुशब्दसाहचर्याद्गणशब्दस्य च तादृशस्यैव ग्रहणमिति भावः । वतु इत्युकारानुबन्धनिर्देशस्य फलमाह वतु इति । अन्यथा तेन तुल्यं क्रिया चेद्वतिरिति तदन्तस्यापि ग्रहणं स्यादिति भावः । तद्धित एवेति । एवकारेण पातेर्डतिरित्यौणादिकव्यावृत्तिः ।

डति च । डत्यन्तेति । न च संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति निषेधेन षट्संज्ञाविधायकेऽत्र सूत्रे कथं प्रत्ययग्रहणपरिभाषया डत्यन्ते तदन्तविधिरिति वाच्यम् । अत्र सूत्रे संख्येत्यनुवर्तते । केवलडतेः संख्यासंज्ञाया अभावेनान्वयानुपपत्त्या नात्र तदन्तविधिनिषेध इति बोध्यम् । तदेवाह अत एवेति । तदन्तविधिमङ्गीकृत्य डत्यन्तस्य संख्यासंज्ञाङ्गीकारादेवेत्यर्थः । 'षट्कतिकतिपयचतुरां थुक्' इति सूत्रेण डटि थुगागमो विधीयते । षण्णां पूरणः षष्ठः । विहित इति । यदि डतेरेव केवलप्रत्ययस्य संख्यासंज्ञा स्यात्तर्हि तस्य प्रातिपदिकत्वाभावे प्रातिपदिकसंज्ञकात् संख्यावाचकाड्डट् इत्यर्थकेन तस्य पूरणे डट् इति सूत्रेण डचोऽप्राप्त्या तदनुवादेन कतिशब्दात् थुग्विधानं व्यर्थं स्यादिति भावः। अत एवेति । डति चेति सूत्रे संख्यापदानुवृत्त्या डत्यन्तस्यैव तद्विधानेनेत्यर्थः । संख्यापदानुवृत्तेः फलमाह पतय इति । पातेर्डतिरित्यौणादिकडतिप्रत्ययान्तस्य पतिशब्दस्य षट्संज्ञायां षड्भ्यो लुगिति जसो लुगापत्तिरिति भावः।

इदमत्र बोध्यम् । डति चेति सूत्रे भाष्ये तत्प्रत्याख्यानसन्दर्भे 'डतिग्रहणं द्विः क्रियते । संख्यासंज्ञायां, षट्संज्ञायाञ्च । एकं शक्यमकर्तुम् । यदि तावत् संख्यासंज्ञायां क्रियते षट्संज्ञायां न करिष्यते । ष्णान्ता षडित्यत्र डतीत्यनुवर्तिष्यते । अथ षट्संज्ञायां क्रियते संख्यासंज्ञायां न करिष्यते । डति चेत्यत्र संख्यासंज्ञाप्यनुवर्तिष्यते' इत्युक्तम् । तत्र प्रदीपे संख्यासंज्ञायामेव डतिकरणे वतुसाहचर्यात् तद्धित एव डतिर्गृह्यते न तु पातेर्डतिः कृत् । षट्संज्ञायामेव तत्करणे संख्यासंज्ञाया अनुवर्तनादन्वर्थत्वाच्च तस्याः संख्याप्रश्नविषय एव डतिर्गृह्यते, न त्वौणादिक' इति तद्भाष्यं व्याख्यातवान् कैयटः । तन्मतमनुसृत्य संख्येति प्रकृतेऽनुवर्तत इति व्याख्यातं ग्रन्थकृता । वस्तुतस्तु तन्न शेखरकाराभिप्रेतम् । स्पष्टञ्चोद्योते कैयटव्याख्यानसन्दर्भे । यथा 'चिन्त्यमेतत् । तस्मादुणादीनामव्युत्पन्नत्वान्न तत्र डतिरिति तस्याग्रहणमित्युचितम् । व्युत्पत्तावपि पातेः कतिनापि सिध्यतीति न तत्र डतिनियम इति बोध्यम्' इति । एवञ्च तदनुवृत्तिरनावश्यकीति फलितम् ।

प्रत्ययस्य । अनेकसञ्ज्ञाकरणात् आवृत्त्या, विभक्तिविपरिणामेन च तद्भावितसञ्ज्ञाश्रयणम् , अतो न सङ्करः। तेन 'हन्ती'त्यादौ 'श्लौ'विति द्वित्वं न, तदाह - लुक्श्लुलुप्शब्दैरिति। 'अदर्शनं लोप' इत्यतो 'ऽदर्शन'मित्यनुवर्तते । प्रदेशेषु भाविसञ्ज्ञाविज्ञानान्नान्योन्याश्रयः। एकसञ्ज्ञाप्रकरणादन्यदेशस्थत्वेन लोपसञ्ज्ञया आसां समावेशः; तेन प्रत्ययलक्षणसिद्धिः।

<u>भावबोधिनी :</u> आवृत्त्येति । एकस्यानेककरणादेवासङ्करे सिद्धे आवृत्तिर्विफलेति तु

न । लुक्शब्दकृतस्य श्लुसंज्ञा श्लुशब्दकृतस्य लुक्संज्ञेत्येवं क्रमेण वैपरीत्यापत्तेः । प्रत्यासत्त्या लुगादिशब्दकृतलुगादिसंज्ञेत्युक्तौ आवृत्तेरविशेषः ।

बालबोधिनी : प्रत्ययस्य लुक्श्लुलुपः। अनेकसंज्ञाकरणादिति । अदर्शनं लोप इति सूत्राददर्शनमित्यनुवर्तते । प्रत्ययस्यादर्शनं लुक्श्लुलुप्संज्ञकं स्यादित्यर्थो लभ्यते । तथा सत्येकस्य प्रत्ययादर्शनस्य लुगादिसंज्ञात्रयलाभेन लोपस्थलेऽपि लुगादिप्रयुक्तकार्यापत्तिः। एवं लुगादिसंज्ञानां परस्परं साङ्कर्यप्रसङ्ग इति हन्तीत्यादौ शब्लुकि श्लौ इति द्वित्वादिप्रसङ्ग इत्येकस्यानेकसंज्ञाकरणं व्यर्थं स्यात् । तद्विधानसामर्थ्यादत्र लुक्श्लुलुप इत्यावर्तते । विभक्तिविपरिणामेनान्वयः । लुक्श्लुलुप्शब्दैर्विहितं प्रत्ययादर्शनं क्रमाल्लुगादिसंज्ञं स्यादित्यर्थलाभेन न परस्परं साङ्कर्यप्रसङ्ग इति भावः । एकस्यानेकसंज्ञाविधानसामर्थ्यादत्र तद्भावितसंज्ञाश्रयणमित्याह आवृत्त्येति । स्पष्टश्चैतत् प्रत्ययलोपसूत्रे भाष्ये प्रत्ययादर्शनं तु लुमत्संज्ञमित्यादिना । हन्तीति । उपलक्षणं चैतत् । श्लावपि लुग्विधिः प्राप्नोति जुहोतीति। उतो वृद्धिर्लुकि हलीति । लुप्यपि लुग्विधिप्रसङ्गः । हरतकीति । लुक् तद्धितलुकीति । हरीतक्यादिभ्यश्चेत्यणो लुप् । तथा लुकि लुब्विधिः । लवणः सूप इति । युक्तवद्भावःस्यात् । लवण इत्यत्र लवणाल्लुक् ।

नान्योन्याश्रय इति । अस्य सूत्रस्य शाटकं वयेति कुविन्दं प्रति कस्यचिदुक्तौ वाने सति शाटकसिद्धिः, शाटकसिद्धौ च वानं, शाटकं वयेत्युक्तेरिति प्रसक्तान्योन्याश्रयस्य भाविसंज्ञाश्रयणेन यथा निरासस्तथाऽत्रापि यस्य लुक्श्लुलुप्संज्ञा भाविन्यस्तददर्शनं तथेत्यर्थेन नान्योन्याश्रय इति भावः । एकसंज्ञेति । आकडारादेका संज्ञेति प्रकरणाविषयत्वेन न लुगादिभिर्लोपसंज्ञाबाध इत्यर्थः । तत्फलमाह तेनेति ।

षड्भ्यो । 'जश्शसोः शि'रित्यतो 'जश्शसो'रिति वर्त्तते । 'षड्भ्य'इति विहितविशेषणं, तेन गौणे न । 'परमपञ्चे'त्यादौ तु विशिष्टस्यापि सङ्ख्याप्रकारकसङ्ख्येयविशेष्यकबोधजनकत्वेन सङ्ख्यावाचितया षट्त्वमस्त्येवेति न दोषः। स्पष्टश्चेदं 'षट्प्रधान एष समासः' इत्यादिना सर्वादिसूत्रे भाष्ये । कैयटस्य तु प्रमाद इत्यन्यत्र निरूपितम् ।

भावबोधिनी : विहितविशेषणमिति । नन्वेवं परमकतिशब्दाज्जसादेः लुङ् न स्यादिति चेन्न । विहितविशेषणपरभाष्यप्रामाण्येन तस्यानभिधानात् । यद्वा लुगभावस्येष्टत्वात् । गौणे प्रियपञ्चान इत्यादौ । नन्वनयैव रीत्या परमपञ्चन्शब्दे लुङ् न स्यादित्यत आह परमेति । एष समासः = परमपञ्चेति समासः । अन्यत्र = नामिसूत्रे ।

बालबोधिनी : षड्भ्यो लुक् । षड्भ्यः परयोरिति व्याख्याति मनोरमायां भट्टोजीदीक्षितः। षड्भ्य इति बहुवचननिर्देशोऽर्थप्राधान्यसूचनार्थः । अन्यथा सर्वनाम्नः स्मै इत्यादिवत् षष इत्येव वदेत् । षडर्थगतसंख्याभिधायिनोरिति फलितार्थः । तेन गौणे नेति तदाशयः । तन्निराकुर्वन् सिद्धान्तमाह विहितविशेषणमिति । अङ्गाधिकारे यदुच्यते गृह्यमाण-विभक्तेस्तद्भवतीति सर्वादिसूत्रस्थं भाष्यम् । गृह्यमाणानां सम्बन्धिनी या विभक्तिः तदर्थगतसंख्याकर्मादिवाचिनी तस्या इत्यर्थ इति कैयटः । गृह्यमाणाद्विहितविभक्तेरित्येवार्थ इति नागेशभट्टः । तथाऽत्रापि षड्भ्य इत्यस्य विहितविशेषणत्वेन प्रियपञ्चान इत्यत्र गौणे नेत्यर्थः । तिसृभ्य इत्यत्र यथा योगभेदेन शब्दबाहुल्याद्बहुवचनं तद्वत् षड्भ्य इत्यत्र बहुवचनस्योपपत्तिः, षट्संज्ञकानां बहुत्वाच्चेति बोध्यम् । परमपञ्चेत्यत्राव्याप्तिवारणोपायमाह परमपञ्चेति । परमपञ्चेत्यत्र संख्येयमुख्यविशेष्यकबोधः । प्रियपञ्चेत्यादौ अन्यपदार्थ-मुख्यविशेष्यकबोध इति विशेषः । षट्प्रधान एष इति । परमपञ्चेत्यर्थः । कैयटस्य प्रमाद इति । स्पष्टञ्चैतत् प्राक् । अन्यत्र = सर्वादि सूत्रभाष्यप्रदीपोद्योतादौ । स्पष्टञ्च नामीति सूत्रव्याख्यावसरे च ।

प्रत्ययलोपे । 'प्रत्ययस्ये'त्यनुवृत्या सिद्धे आद्यप्रत्ययग्रहणमवयवलोपे माभूत् । तेन 'आघ्नीये' त्यादौ नानुनासिकलोप इति स्पष्टं भाष्ये । इदमेव प्रत्ययग्रहणं ज्ञापकम् - अवयवेऽपि प्रत्ययत्वव्यवहारस्य । एवञ्च 'आदेशप्रत्यययोः' 'इदुदुपधस्ये'त्यनयोर्लक्षणादि नाश्रयणीयं, सात्पदाद्योरिति च चरितार्थम् ।

भावबोधिनी : अवयवलोपे मा भूदिति । प्रत्ययावयवलोपे प्रत्ययलक्षणं मा भूदेवमर्थमित्यर्थः । आघ्नीयेति । आङ्पूर्वाद्धन्तेः आङो यमहन इत्यात्मनेपदे विधिलिङि सीयुटि लिङस्सलोपे उत्तमैकवचने रूपम् । नानुनासिकलोप इति । प्रत्ययलक्षणेन सीयुटो झलादित्वापत्त्या झलादित्वनिमित्तकः अनुदात्तोपदेश इत्यादिना नकारलोपः स्यादित्यर्थः । अवयवेऽपि = प्रत्ययावयवेऽपि । चरितार्थमिति । सातिग्रहणं चरितार्थमित्यर्थः ।

बालबोधिनी : प्रत्ययलोपे प्रत्ययलक्षणम् । अनुवृत्त्येति । प्रत्ययस्य लुक्श्लुलुपःइति सूत्रात् प्रत्ययस्येत्यनुवृत्त्या सिद्धे आद्यप्रत्ययग्रहणसामर्थ्यात् प्रत्ययत्वपर्याप्त्यधिकरणस्य लोपे एव प्रत्ययलक्षणम् , न तु तदवयवलोपे इत्यर्थः सिध्यति । तत्फलमाह आघ्नीयेति । आङ्पूर्वकहन्धातोः विधिलिङि उत्तमपुरुषैकवचने आङो यमहन इत्यात्मनेपदे इटि, इटोऽत् इत्यकारादेशे, सीयुटि सलोपे आहन् ईय् अ इति जाते गमहन इत्युपधालोपे हो हन्तेरिति

घत्वे आघ्नीयेति रूपम् । अत्र सीयुटस्सकारस्य प्रत्ययावयवस्य लोपे प्रत्ययलक्षणेन झलादिप्रत्ययपरत्वेन अनुदात्तोपदेश इंत्यनुनासिकलोपो न ।

प्रत्ययग्रहणं ज्ञापकमिति । लोपे प्रत्ययलक्षणमित्येतावदेव भवतु । आद्यप्रत्ययग्रहणं मास्तु । लक्षणशब्दो निमित्तार्थकः । प्रत्ययनिमित्तं कार्यं लोपे भवतीत्युक्ते प्रत्यासत्त्या प्रत्ययस्यैव लोप इति विज्ञास्यते। क्रियमाणेऽपि प्रत्ययग्रहणेऽन्यप्रत्ययलोपे अन्यप्रत्ययनिमित्तकार्यवारणाय प्रत्यासत्तिराश्रयणीया । एवञ्च तयैव प्रत्ययस्य लोप इत्यर्थसिद्धौ तद्ग्रहणं व्यर्थम् । प्रत्ययस्य लुक्श्लुलुप इति सूत्रस्थं प्रत्ययग्रहणं सामर्थ्यात् प्रत्ययत्वपर्याप्त्यधिकरणस्य कृत्स्नप्रत्ययस्य लोपप्रतिपादने समर्थम् । अनेनैवेष्टसिद्धावाद्य-प्रत्ययग्रहणं व्यर्थं सदवयवेऽपि प्रत्ययत्वव्यवहारं ज्ञापयतीति भावः । तत्फलमाह एवञ्चेति। लक्षणादीति । प्रत्ययपदस्य तदवयवे लक्षणा नावश्यकी । वैयधिकरण्येनान्वयश्च नैव कार्य इति भावः । चरितार्थमिति । यदि प्रत्ययावयवस्य प्रत्ययत्वेन व्यवहारो न स्यात्तर्हि सातेस्सकारस्य प्रत्ययत्वाभावेन षत्वाप्राप्त्या सात्पदाद्योरिति तन्निषेधाय साद्ग्रहणं कृतं व्यर्थं स्यादिति बोध्यम् ।

स्थानिवत्सूत्रेण सिद्धे इदं सूत्रं नियमार्थमिति भाष्यम् । 'प्रत्ययस्यासाधारणं रूपं यत्राश्रीयते तत्रैवे'ति । न चैवं 'दाधर्त्ती'ति सूत्रे - 'तेतिक्ते इति किं निपात्यते'? आत्मनेपदम्, नैतदस्ति - 'आनुदात्तङित' इत्येव सिद्धम् , नियमार्थं तर्हि भविष्यति -अत्रैव यङ्लुगन्तस्य, नान्यत्र बेभिदीति'- इत्युक्तम् । अस्य नियमत्वे तेनात्मनेपदं दुर्लभं ङित्वस्य प्रत्ययाप्रत्ययसाधारणत्वादिति वाच्यम् । 'आत्मनेपद'मित्यस्यैव सिद्धान्त्युक्तित्वात् । ततो 'विध्यर्थमिद'मिति वार्तिकानुसारिणा 'अनुदात्तङित इत्येव सिद्ध'मिति शङ्किते तदनुसार्यैकदेशिन एव तत्समाधानमित्यदोषादित्यन्यत्र विस्तरः। प्रत्ययलोपे प्रत्ययवदिति सिद्धे 'लक्षण'ग्रहणं प्रत्ययनिमित्तकमेव न तु प्रत्ययस्थानिकमित्यर्थलाभार्थं, तेन 'नखभिन्न' इत्यादावैसादिकं नेत्येके। अतिदेशेनाऽऽहार्यतद्बुद्धिसंपादनेऽप्युच्चारणप्रसङ्गरूप-षष्ठ्यर्थाभावान्नैसादीति तद्व्यर्थमित्यपरे । कार्यमिति । प्राधान्यात्कार्यातिदेशोऽयमिति भावः। 'इहापि 'परिवी'रिति शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यती'ति भाष्येण तृज्वत्सूत्रे शास्त्रकार्यातिदेशयोरैक्यकथनेन चातिदिश्यमानकार्याणामुत्पत्तिदेश एव देश इत्यङ्गीकारात्परिवीरित्यत्र तुग्दीर्घौ पर्यायेण न; किन्तु दीर्घ एव परत्वात् , अन्यथाऽनेनैवोभयोर्विधानात्परत्वाभावेन पर्यायो दुर्वार इति बोद्धव्यम् । तदाह - जसि चेति गुणे प्राप्ते इति । जसि चेति विहितेऽनेन गुणे प्राप्ते इत्यर्थः ।

भावबोधिनी : तत्रैवेति । अत एव सुदृषत्प्रासाद इत्यत्रान्तर्वर्तिजसः प्रत्ययलक्षणेन दृषदित्यस्यासन्तत्वेन अत्वसन्तस्येति दीर्घो न । अस्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वात्। आत्मनेपदमिति । किमिति प्रश्नस्योत्तरमिदम् । नैतदस्तीति । प्रयोजनमिति शेषः । विध्यर्थमिदमित्यस्याल्विधावित्यादिः । अल्विधौ स्थानिवत्त्वाप्राप्तेः । अन्यत्र = परिभाषेन्दुशेखरे । भाष्यवार्तिकमतयोरनेकोदाहरणेषु वैरूप्यस्य संभवेन तद्वारणाय यत्नः कर्तव्यः । नखभिन्न इत्यादाविति । नखैर्भिन्नमिति विग्रहे अन्तर्वर्तिभिसः प्रत्ययलक्षणेन प्राप्तैस् नेति भावः । इहापीति । कार्यातिदेशेऽपीत्यर्थः । परिवीरिति । परिपूर्वात् वेञः क्विपि सम्प्रसारणे हल इति दीर्घः । शांस्त्रपरविंप्रतिषेधेनेति । शास्त्ररूपं यत्परं तद्विप्रतिषेधेनेत्यर्थः । ऐक्यकथनेनेति । इदञ्च स्थानिवत्सूत्रे स्वेनैव प्रतिपादितमिति बोध्यम् ।

बालबोधिनी : भाष्याभिमतं प्रत्ययलक्षणसूत्रस्य नियमार्थत्वमाह स्थानिवत्सूत्रेणेति। अयं भावः । प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्तिककृन्मतम् । नियमार्थमिति भाष्यकारमतम्। तथाहि - तृहधातोर्लङि प्रथमपुरुषैकवचने तिपि श्नमि हलृङ्यादिलोपे, तृणह इमिति सूत्रेणेमागमे ढत्वे जश्त्वे अतृणेडिति रूपम् । अत्र हलादिपिन्निमित्तकेमागमे कर्तव्ये अल्विधित्वेन स्थानिवद्भावाप्रवृत्त्या तत्र प्रत्ययलक्षणप्रवृत्तये प्रत्ययलक्षणसूत्रं विध्यर्थम्। एवं मित्राणि शास्तीति मित्रशीरित्यादौ शास इदङ् इतीत्वस्याल्विधित्वेन स्थानिवद्भावो न प्रवर्तत इति तदर्थं प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्तिककारस्याशयः । न च प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वे गवे हितं गोहितमित्यादावपि तत्प्रवृत्त्या लुप्तस्य ङेप्रत्ययस्य प्रत्ययलक्षणेन अवाद्यादेशापत्तिरिति वाच्यम् । प्रत्ययलोपे तल्लक्षणमित्येव सिद्धे प्रत्ययग्रहणेन यत्र प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव प्रत्ययलक्षणप्रवृत्त्या एचोऽयवायाव इत्यत्राच्त्वस्य प्रत्ययासाधारणधर्मत्वाभावेनादोषात् । प्रत्ययलक्षणसूत्रे भाष्ये 'किमर्थं पुनरिदमुच्यते' ? इत्याशङ्क्य 'प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य' इति समाहितं वार्तिककृता । शास्त्रेण करणेनाचार्यः स्मर्ता सद् विद्यमानं वस्तु निमित्तत्वेनान्वाचष्टे । ततश्च उगिदचामिति गोमन्तौ, यवमन्तौ इत्यत्रैव स्यात् । गोमान्, यवमानित्यत्र न स्यात् । इष्यते च स्यादिति । तच्चान्तरेण यत्नं न सिध्यति । अतः प्रत्ययलक्षणवचनमिति तदभिप्रायः । 'न च स्थानिवद्भावेन सिध्यति, अतृणेडित्यादावल्विधित्वा' दिति कैयटः । तत्रैव भाष्ये 'कानि पुनरस्य योगस्य प्रयोजनानि' इत्याशङ्क्य अपृक्तलोपे शिलोपे च कृते नुम् , अमामौ, गुणवृद्धी , दीर्घत्वमिम् , अडाटौ, श्नम्विधिरिति प्रयोजनानीति समाधाय तदुत्तरं नैतानि सन्ति प्रयोजनानि स्थानिवद्भावेनाप्येतानि

सिद्धानीत्याक्षिप्य 'यत्र तर्हि स्थानवद्भावो नास्ति तदर्थमयं योगो वक्तव्य' इति प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वं दर्शितम् । अत्र मते प्रत्ययस्य यत्र प्राधान्येनाश्रयणं तत्रैव प्रत्ययलक्षणसूत्रप्रवृत्त्या टिड्ढाणञित्यत्र अणो योऽकार इति प्रत्ययस्याप्राधान्येनाश्रयणात् तत्र प्रत्ययलक्षणाप्रवृत्त्या चित्रायां जाता चित्रेत्यत्र न ङीबापत्तिः । तृणह इमित्यत्र प्रत्ययस्य प्राधान्येनाश्रयणात् अतृणेडित्यत्र प्रत्ययलक्षणं भवत्येवेति भावः।

स्थानिवत्सूत्रेणैव निर्वाहे प्रत्ययलक्षणसूत्रं नियमार्थम् इति भाष्यकारमतम् । न चानल्विधाविति निषेधेनाल्विध्यर्थमिदमावश्यकमिति वाच्यम् । वर्णाश्रये नास्ति प्रत्ययलक्षणमिति निषेधेनाल्विधौ प्रत्ययलक्षणप्रवृत्तेरनिष्टत्वात् । न च अचः परस्मिन् इत्यत्रेवात्रापि स्थानिवदित्यनुवृत्त्या प्रत्ययलोपे स्थानिवद्भवतीत्यर्थेनैवेष्टसिद्धौ प्रत्यय-लक्षणग्रहणसामर्थ्यात् यत्र प्रत्ययत्वतद्व्याप्यान्यतरधर्मपुरस्कारेण प्रत्ययस्य प्राधान्येन निमित्ततयाश्रयणमलश्चाप्राधान्येन तत्कार्यं प्रत्ययलोपे सति भवतीत्यर्थो लभ्यते । अनेन वर्णाश्रयपरिभाषाया वर्णप्राधान्यविषयत्वं सिद्धम् । एवञ्चाप्राधान्येनालाश्रयणे प्रत्ययलक्षण-निषेधाप्रवृत्त्या तत्र विध्यर्थमिदं सूत्रमावश्यकम् । अत एव अतृणेडित्यत्रेमागमस्य, मित्रशीरित्यत्रेत्वस्य च सिद्धिरिति वाच्यम् । तृणह इम् इत्यत्र हलीत्यस्यनुवृत्तिर्न क्रियते । किन्तु नाभ्यस्याचीति सूत्रात् नेति अचीति चानुवर्त्याजादौ नेति व्याख्यानेनाल्विधित्वाभावात् स्थानिवत्त्वेनैवेष्टसिद्धिः । शास इदङ् इत्यत्र शास इदित्येको योगः, अङीत्यपरः पूर्वेणैव सिद्धेऽङीति योगस्य अजादौ यदि स्यादङ्येवेति नियमार्थत्वाश्रयणेन पूर्वयोगे हलीत्यस्या-करणात् अल्विधित्वाभावेन मित्रशीरित्यत्रापि स्थानिवत्त्वेनैवेष्टसिद्धिरिति प्रत्ययलक्षणसूत्रं नियमार्थम् । प्रत्ययस्य यत्रासाधारणं रूपमाश्रीयते तत्रैवेति । तत्फलं तु शोभना दृषदोऽस्य सुदृषत्प्रासाद इत्यत्रान्तर्वर्तिजसः प्रत्ययलक्षणेन दृषदित्यस्यासन्तत्वेन अत्वसन्तस्येति दीर्घो न । अस्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वात् । न चातुसाहचर्यात् श्रूयमाणासन्त एव दीर्घ इति वाच्यम् । अनेन सूत्रेण साहचर्यपरिभाषाया अप्यनित्यत्वज्ञापनात् सुदृषदित्यत्र दीर्घनिवृत्तिः फलमुचितमेव । एतेन सोः परं लोमौषसी वर्जयित्वा मन्नन्तमसन्तञ्चाद्युदात्तं स्यादित्यर्थके सोर्मनसी अलोमोषसीति सूत्रे पर्युदासेन श्रूयमाणासन्तस्यैव ग्रहणमिति न सुदृषत्प्रसाद इत्यत्र स्वरस्य प्राप्तिरिति नियमो व्यर्थ एवेत्यपास्तम् ।

भाष्यमते नियमस्वरूपमाह प्रत्ययस्येति । प्रत्ययत्वतद्व्याप्यान्यतरधर्म-पुरस्कारेणेत्यर्थः । अत्र पक्षे भाष्यान्तरविरोधमाशङ्क्य परिहारमाह न चेति । एवमिति । प्रत्ययत्वतद्व्याप्यान्यतरधर्मपुरस्कारेण यत्र प्रत्ययस्य प्राधान्येनाश्रयणं तदेव कार्यं प्रत्ययलोपे

सति भवतीति प्रत्ययलक्षणसूत्रस्य नियमार्थत्वाश्रयणेनेत्यर्थः। आत्मनेपदमिति किमिति प्रश्नस्योत्तरम् । अस्य = प्रत्ययलक्षणसूत्रस्य । तेन = अनुदात्तङित इत्यनेन । विध्यर्थमिदमिति । प्रत्ययलक्षणसूत्रमित्यर्थः । अन्यत्र = उद्योतादौ । यङ्लुगन्तशेखरेऽपि 'तस्य सूत्रस्य नियमार्थत्वमेव सिद्धान्ते इति भाव' इति प्रत्ययलक्षणसूत्रस्य नियमार्थत्वं भाष्यसम्मतं स्पष्टीकृतं नागेशभट्टेन ।

लक्षणग्रहणफलमाह प्रत्ययलोपे इति । लक्षणशब्दस्य निमित्तपरत्वे प्रयोजनमाह तेनेति । नखभिन्न इति । नखैर्भिन्नो नखभिन्न इत्यत्रान्तर्वर्तिभिसः प्रत्ययलक्षणेन तत्स्थानिक ऐसादेशो नेत्यर्थः । एके = प्राञ्चः । तद्व्यर्थमिति । लक्षणग्रहणं व्यर्थमित्यर्थः । अपरे = सिद्धान्तिनः ।

अत्र शास्त्रे कार्यस्य प्राधान्यात् प्रत्ययलक्षणसूत्रेण कार्यस्यातिदेश इत्याह प्राधान्यादिति । ननु प्रत्ययलोप इति सूत्रेण कार्यस्यातिदेश इति चेदतिदिश्यमानानामेकदेशस्थत्वात् विप्रतिषेधासङ्गतिरित्याशङ्क्य समाधत्ते इहापीति । कार्यातिदेशेऽपीत्यर्थः । परिवीरिति । परिपूर्वात् वेञः क्विपि सम्प्रसारणे हल इति दीर्घे परिवीरिति । अत्र क्विब्निमित्तकयोः तुग्दीर्घत्वयोः प्राप्तयोः परत्वाद्दीर्घ इति भाष्येण कार्यातिदेशेऽपि तेषामुत्पत्तिदेश एव देश इति सिद्धम् । शास्त्रपरेति । शास्त्ररूपं यत्परं तद्विप्रतिषेधेनेत्यर्थः । अन्यथा = कार्यातिदेशेऽपि उपदेशदेशत्वानङ्गीकारे । अनेनैव = प्रत्ययलक्षणसूत्रेणैव । उभयोः = तुग्दीर्घयोः । अतिदिश्यमानकार्याणामुपदेशदेशत्वं दीक्षितस्याप्यभिप्रेतमित्याह तदाहेति । अनेन = प्रत्ययलक्षणसूत्रेण । गुणे प्राप्ते = गुणस्यातिदेशे। जसि चेति कथनेन गुणस्यातिदेशेऽपि तस्य तद्देशत्वमेव न त्वेतद्देशत्वमिति मूलग्रन्थकृतस्तात्पर्यमिति स्पष्टम्। अतिदिश्यमानकार्याणामुत्पत्तिदेश एव देश इति बहुत्र स्पष्टीकृतं ग्रन्थकृता ।

न लुमता । 'लु'शब्दयुक्ता लुमन्तस्तदाह - लुगित्यादि । अङ्गकार्यमिति । लुप्तप्रत्यये परतो यः पूर्वस्तत्प्रकृतिभूतो लब्धाङ्गसञ्ज्ञकस्तदुद्देश्यकं यत्कार्यमाङ्गमनाङ्गं वेत्यर्थः । तेन 'पञ्चे'त्यादौ पदसञ्ज्ञा भवति । राजपुरुषादौ भसञ्ज्ञा च न । अङ्गसञ्ज्ञा तु यथोद्देशत्वात्प्रत्ययसत्ताकाले जाता तिष्ठत्येव । तत्काले कार्याभावादप्रवृत्तावपि प्रत्ययलक्षणेन सा । तस्या लब्धाङ्गसञ्ज्ञककार्यत्वाभावेन निषेधाप्रवृत्तेः। स्पष्टश्चेदं 'युवोरनाका'वित्यत्र कैयटे । 'न लुमते'त्यस्यानित्यत्वादङ्गसञ्ज्ञायामप्रवृत्तिरिति तत्त्वमिति कश्चित् । अत एव पञ्चभिः क्रोष्टीभिः क्रीतं कुलमिति 'तद्धितार्थे'ति सामासे-ठकः 'अध्यर्धे'ति लुकि 'लुक्तद्धिते'ति स्त्रीप्रत्ययलुकि च 'पञ्चक्रोष्टृ'इत्यत्र तृज्वत्त्वम् । तदुक्तं भाष्ये-

तृज्वदितिसूत्रे 'न चापरं निमित्तमाश्रीयते, किं तर्हि, अङ्गस्य क्रोष्टुस्तृज्वदिति,अङ्गसञ्ज्ञा च भवति प्रत्ययलक्षणेने' ति । न चोरदत्त्ववत्तृज्वत्त्वेऽपि परनिमित्ताश्रयणमिति 'पञ्चक्रोष्टृ' इत्यस्यासिद्धिरिति वाच्यम् 'उर'दित्यत्र शब्दतः परस्य निमित्तत्वानाश्रयणेऽपि अङ्गसञ्ज्ञाद्वारोरदत्त्वस्यापि परनिमित्तकत्वेन स्थानिवत्त्वप्रवृत्तिरित्येव 'लिट्यभ्यासस्ये'ति सूत्रस्थभाष्याशयात् । नियमतः परबुद्धेः पूर्ववृत्तितया परनिमित्तत्वात् । अत एव 'चर्करीति' 'अजर्घा' इत्यादावत्त्वप्रवृत्तिः । 'अचिश्नु' इत्यादावजादिप्रत्यय इत्यर्थस्तु- 'अङ्गस्ये'ति षष्ठ्या 'निमित्ते' इत्यद्ध्याहारेण तस्य विशेष्यतया यथाकथञ्चिदुपपाद्यः । आकडाराधिकारस्थेषु कार्यकालत्वस्याभावाच्च ।

भावबोधिनी : प्रत्यासत्तिलभ्यमर्थमाह लुप्त इति । तेनेति । लुप्तप्रत्यये परत इत्यर्थाश्रयणेनेत्यर्थः । भवतीति । पदसंज्ञायाः परनिमित्तकत्वाभावादिति भावः । लुप्तप्रत्ययनिमित्तककार्यमित्यर्थे तु न स्यादिति ज्ञेयम् । वार्तिकमते सूत्रोदाहरणमाह राजेति । भाष्यमते तु प्रत्ययलक्षणसूत्रस्य नियामकत्वेन स्थानिवत्त्वेन जातप्रत्ययत्वातिदेशे अनल्विधाविति निषेधेन भसंज्ञाया अनवकाश इति ध्येयम् । न चात्र लुकः पूर्वमन्तरङ्गत्वात् भसंज्ञाऽस्त्विति वाच्यम् । अन्तारङ्गानपीति न्यायेन लुकः प्रवृत्तेः । लुकोऽन्तरङ्गनिमित्तविनाशकत्वस्य सत्वात् लुगनन्तरं न लुमतेति निषेधेनान्तरङ्गाप्रवृत्तेः । ननु नेदमुदाहरणम् । अन्तरङ्गानपीति न्यायेनाङ्गसंज्ञायाः पूर्वं लुकः प्राप्तेः । निषेधस्य चाङ्गसंज्ञोपजीव्यत्वादिति महदाशङ्कायामाह अङ्गसंज्ञा त्विति । तिष्ठत्येवेति । लुगनन्तरमपीति शेषः । अङ्गसंज्ञाविषये तु तन्न्यायाप्रवृत्तिः । अन्तरङ्गनिमित्तविनाशाभावात् प्रत्ययलक्षणसत्वात् न लुमतेति निषेधस्तु नेति तत्त्वम् । कार्यकालपक्षेऽप्युपपत्तिमाह तत्काल इति । प्रत्ययसत्ताकाल इत्यर्थः । अप्रवृत्तावपीति। यदा कार्यं तदा संज्ञेति भावः । सेति । अङ्गसंज्ञा । न लुमतेति भसंज्ञानिषेधरूपे कार्ये कर्तव्ये भवतीत्यर्थः । नन्वङ्गसंज्ञायां न लुमतेति निषेधः स्यादित्यत आह तस्या इति । अङ्गसंज्ञाया इत्यर्थः । निषेधं प्रत्युपजीव्यत्वादिति भावः । सूत्रस्थाङ्गपदस्य प्रकृत्यर्थकत्वमङ्गीकृत्याङ्गसंज्ञायां न लुमतेति निषेधश्चाश्रित्य तस्यानित्यत्ववादिनं परिहसति क्वचिदिति । अङ्गपदस्य लब्धाङ्गकपरत्वादेव निषेधानवकाशे तदुक्तार्थो हेय इति भावः । अत एव = अङ्गसंज्ञायां निषेधाभावादेव । तृज्वत्वं स्त्रियाञ्चेत्यनेन बोध्यम्। अङ्गस्य क्रोष्टुरिति । अङ्गावयवस्य क्रोष्टुरित्यर्थः । उरदत्ववदिति । उरदित्यत्र कार्यकाले अङ्गसूत्रोपस्थित्या यस्मात्प्रत्यय इत्यनुवृत्त्या प्रत्ययनिमित्तकोरदत्ववदित्यर्थः । असिद्धिरिति । न लुमतेति निषेधेनेति बोध्यम् । अङ्गसंज्ञाद्वारा परनिमित्तकस्य

स्थानिवत्त्वाङ्गीकारे हरिणेत्यादौ नाभावस्य स्थानिवत्त्वेन यणापत्तिः । न च न पदान्त इत्यंशेन निषेधः । परपदस्थाजादेशाभावात् । प्राचीनमते तु न दोषः । तन्मते निषेधस्य सत्वात् । न च स्वादिष्विति पदसंज्ञायां स्थानिवत्त्वेन पदत्वेनेति वाच्यम् । पदान्तसाधककार्यस्यापि पदान्तकार्यत्वात् । तस्मात् परम्परया परनिमित्तकस्य स्थानिवत्त्वमित्युक्तम् । स्वमतरीत्या युक्तमिति । नन्वेवं तृज्वत्वस्यापि अङ्गद्वारा परनिमित्तकत्वेन न लुमतेति निषेधः स्यादिति चेन्न । तत्र व्याख्यानात् साक्षात् परनिमित्तकत्वस्यैव ग्रहणमित्याशयात् । एवञ्च तृज्वत्वस्याङ्गद्वारा परनिमित्तकत्वेऽपिं न क्षतिरिति भावः । अत एव = उरदित्यत्र शब्दतः परनिमित्तत्वानाश्रयणादेव । चर्करीत्यजर्घा इति । हननशब्दप्रकृतिकक्यजन्तात् सनि जिहननीयिषतीत्यादौ अभ्यासाच्चेति कुत्ववारणाय अङ्गाधिकारस्थमभ्यासनिमित्तकं कार्यमङ्गाभ्यास-निमित्तकप्रत्ययनिमित्तकमेवेति वक्तव्यम् । एवञ्च प्रकृते यङः प्रत्ययलक्षणाश्रयणे न लुमतेति निषेधः स्यादिति भावः । वस्तुतस्तु इदं चिन्त्यम् । गुणो यङ्लुकोरिति गुणेनेष्टसिद्धेः। ननु कार्यकालपक्षस्याक्षेपस्य चोत्तरत्र दूषयिष्यमाणत्वेन अचि श्नु इत्यत्र प्रत्ययलाभो न स्यादित्यत आह अचि श्निवत्यादाविति । आकडाराधिकारस्थाङ्गसंज्ञायाः कार्यकालत्व-मङ्गीकृत्य तत्काले कार्याभावादित्युक्तम् । वस्तुतस्तु तदेव नेत्याह आकडारेति।

<u>बालबोधिनी :</u> न लुमताङ्गस्य । लु इत्येकदेशोऽस्यास्तीति लुमान् । लुशब्दयुक्त इत्यर्थः । लुमतेति लोपक्रियानिरूपिता करणे तृतीया । सूत्रार्थमाह लुप्तेति । लुप्तप्रत्ययाव्यवहितपूर्वत्वेन साक्षादवच्छिन्ना लुप्तप्रत्ययाङ्गसंज्ञावत्पर्याप्तधर्मेण साक्षात् परम्परया वा अवच्छिन्ना च या उद्देश्यता तादृशोद्देश्यताके कार्ये कर्तव्ये प्रत्ययलक्षणं न भवतीति न लुमताङ्गस्येति सूत्रार्थः । पूर्वान्तग्रहणस्य फलमाह तेनेति । लुप्तप्रत्ययाव्यवहित-पूर्वत्वावच्छिन्नत्वनिवेशेनेत्यर्थः । पञ्चेति । पञ्चेत्यत्र प्रत्ययलक्षणेन सुबन्तत्वमाश्रित्य सुप्तिङन्तं पदमिति प्रकृतिप्रत्ययसमुदायस्य पदसंज्ञा क्रियते । लुप्तप्रत्यये परतो यः पूर्वः प्रकृतिभूतः तदुद्देश्यककार्यत्वाभावात् पदसंज्ञायां कर्तव्यायां न लुमतेति निषेधाप्रवृत्तिरिति भावः ।

प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्तिकमतेनैतत्सूत्रोदाहरणमाह राजपुरुषादाविति। अत्र प्रत्ययलक्षणेनाजादिस्वादिपरत्वमाश्रित्य भसंज्ञायां प्राप्तायां न लुमताङ्गस्येति प्रत्ययलक्षणनिषेधः । सुप्तिङन्तमिति पदसंज्ञायाः प्रकृतिप्रत्ययसमुदायोपाधित्वेन लुप्तप्रत्ययाव्यवहितपूर्वत्वावच्छिन्नोद्देश्यताकत्वाभावेन निषेधाप्रवृत्तिः। भसंज्ञायास्तु निरुक्तोपाधिकार्यत्वान्निषेधप्रवृत्तिरिति भावः । स्थानिवत्सूत्रे णसिद्धे प्रत्ययलक्षणसूत्रं

नियमार्थमिति भाष्यमतेऽनल्विधाविति निषेधेन प्रत्ययत्वानतिदेशात् राजपुरुषादौ न भसंज्ञा। सर्वमतसाधारण्येनैतत्सूत्रोदाहरणं तु कतीत्यादि । यथोद्देशपक्षे लब्धाङ्गसंज्ञक इत्यस्य प्रयोजनमाह अङ्गसंज्ञेति । प्रत्ययसत्ताकाले इति । लोपात्पूर्वमित्यर्थः। लब्धाङ्गसंज्ञक इति विशेषणाभावे अन्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधत इति न्यायेन अङ्गसंज्ञातः पूर्वं लुकि तस्या निरुक्तोपाधिकार्यत्वात् न लुमतेति प्रत्ययलक्षणनिषेधेन यथोद्देशेऽपि सा न स्यात् । तद्विशेषणोपादाने तु अन्तरङ्गनपीति न्यायेन पूर्वं लुक्यपि लब्धाङ्गसंज्ञकत्वाभावेन न लुमतेति निषेधाप्रवृत्त्या प्रत्ययलक्षणेनाङ्गसंज्ञाया निराबाधतया लुकोऽन्तरङ्गनिमित्तविनाशकत्वाभावेन तन्न्यायाप्रवृत्त्या लुकःपूर्वमङ्गसंज्ञासिद्धिरिति भावः । कार्यकालपक्षेऽपि तद्विशेषणसार्थक्यमाह तत्काले इति । प्रत्ययस्य सत्ताकाले इत्यर्थः । प्रत्ययलक्षणेनेति । लुगुत्तरमिति शेषः । सा = अङ्गसंज्ञा । संज्ञायाः कार्यार्थत्वात् प्रत्ययसत्ताकाले कस्यापि कार्यस्याभावादङ्गसंज्ञाया अप्रवृत्तावपि लुगुत्तरं प्रत्ययलक्षणेन सा भवत्येव । ननु न लुमतेति निषेधः कुतो नेत्यत आह तस्या इति । अङ्गसंज्ञाया इत्यर्थः। निषेधेति । न लुमतेति सूत्रेणेत्यर्थः ।

कैयटे इति । युवोरनाकौ (7-1-1) इति सूत्रे 'अङ्गस्य युवोरनाकौ भवतो यत्र तत्रस्थयोरिति । यत्र तर्हि समासाद्विभक्तिर्नास्ति । नन्दनदधि कारकदधि । एवं तर्हि न वा परं निमित्तं संज्ञा च प्रत्ययलक्षणेन । न चेह परं निमित्तमाश्रीयते । अस्मिन् परतो युवोरनाकौ भवत इति । किं तर्हि । अङ्गस्य युवोरनाकौ भवत इति । अङ्गसंज्ञा च प्रत्ययलक्षणेन' इति भाष्यव्याख्याने प्रदीपे 'न वा परमिति । न हीह विभक्तिः प्रत्ययान्तरं वा परं निमित्तत्वेनोपात्तमिति प्रत्ययलक्षणत्वमनाकयोर्नास्तीति न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधस्यायमविषयः । केवलमङ्गस्य युवोरनाकौ भवत इत्युच्यते । अस्ति च प्रत्यलक्षणेनाङ्गसंज्ञा । न हि तस्यां विधीयमानायां न लुमताङ्गस्येति प्रतिषेधः प्रवर्तते । लब्धाङ्गसंज्ञस्य कार्यान्तरे विधातव्ये स प्रतिषेधः प्रवर्तते । न चाङ्गसंज्ञाङ्गस्य कार्यमिति प्रतिषेधाभाव' इत्युक्तं कैयटेन । तत्रैवोद्योते' न लुमता तस्मिन्निति वार्तिकरीत्या प्राप्तेः सूत्रेऽप्यङ्गपदं पूर्वोपलक्षणमेवेति चिन्त्यमेतत् । तस्मान्निषेधानित्यत्वादङ्गसंज्ञा भवतीत्येव भाष्याशय' इति स्पष्टम् । अयं भावः । न लुमताङ्गस्येति सूत्रे अङ्गस्येत्यङ्गाधिकारनिर्देशात् ञ्निति कित्स्वरस्य चानाङ्गत्वात् निषेधो न प्राप्नोतीति तद्वक्तव्यमित्युक्तं वार्तिककृता । लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानमिति तद्वार्तिकम् । लुमति प्रतिषेधे एकपदाश्रयो यः स्वरः तस्य प्रत्ययलक्षणप्रतिषेधो वक्तव्य इति तदर्थः। ञ्नित्कितां प्रत्ययानां लुकि कृते प्रत्ययलक्षणेन तत्प्रयुक्तस्वराणां प्राप्तौ प्रत्ययलक्षणप्रतिषेधेन तन्निवृत्तिः फलम् । गर्गा इत्यादौ यञादेर्लुकि प्रतत्ययलक्षणेन 'ञ्निति' इत्याद्युदात्तत्वं न भवति । अत्रिशब्दात् इतश्चानिञ

इति ढकि तस्य अत्रिभृग्विति लुकि प्रत्ययलक्षणेन कित इत्यन्तोदात्तत्वं न भवति । तत्सन्दर्भे न लुमता तस्मिन्निति न्यासान्तरं दर्शितं वार्तिककारेण । लुमता यो लुप्तः प्रत्ययः तस्मिन् परतस्तन्निमित्तकं तत्प्रकृतिभूतस्य यत्कार्यमाङ्गमनाङ्गं वा तन्न भवतीति तदर्थः । अत्रय इत्यत्र कित इति सूत्रेणान्तोदात्तो न भवति । तद्धितस्यैव कितोऽन्तोदात्तत्वविधानात्। राशदिभ्यां त्रिप् अदेस्त्रिर्निच्चेति त्रिबन्तोऽत्रिशब्द आद्युदात्तः । अत्र न्यासे निरुक्तरीत्याऽङ्ग-संज्ञाविषयेऽपि प्रत्ययलक्षणनिषेधः । ततः 'न लुमताङ्गस्येत्येव सिद्धम् । कथम् ? न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते । किं तर्हि ? योऽसौ लुमता लुप्यते तस्मिन् यदङ्गं तस्य यत्कार्यं तन्न भवति' इत्युक्त्वा वार्तिककृदुक्तन्यासं निरस्तवान् भाष्यकारः । अङ्गस्येत्यस्य स्वरितत्वाप्रतिज्ञानात्तत्र लुप्तप्रत्ययनिरूपिताङ्गसंज्ञकस्य यत्कार्यं प्रत्ययनिमित्त-माङ्गमनाङ्गं वा तन्न भवतीत्यर्थः । उत्क्राम संक्रामेत्यत्र क्रमेर्लोटि मध्यमपुरुषैकवचने शपि, अतो हेरिति हेर्लुकि क्रमः परस्मैपदेष्विति दीर्घः । नात्र न लुमतेति निषेधः । लुप्तप्रत्ययनिरूपिताङ्ग-संज्ञकस्य कार्ये एव तत्प्रवृत्तेः । प्रकृते क्रम इति सूत्रेऽनुवृत्तस्याङ्गस्य परस्मैपदपरशिन्निरूपित-स्यैव ग्रहणेन लुप्तपरस्मैपदप्रत्ययनिरूपिताङ्गसंज्ञकस्य कार्यत्वाभावान्न प्रत्ययलक्षणनिषेधः। संजिगमिषेत्यादौ हेर्लुकि गमेरिट् परस्मैपदेष्विति सनः कार्यम्, न तु लुप्तप्रत्ययनिरूपिताङ्ग-संज्ञकस्येति न दोषः । अवधि भवता दस्युः, अगायि भवता ग्रामः, अध्यगायि भवताऽनुवाकः इत्यत्र तलोपे कृते लुङीति हनिणिङादेशाप्राप्तिरूपदोषो नास्ति। लुङ्निमित्ताङ्गत्ववतः चिणन्तस्य कार्याभावात् न लुमतेति निषेधाप्रवृत्तौ प्रत्ययलक्षणेनेष्टसिद्धेः न लुमता तस्मिन्निति न्यासः प्रत्याख्यातः।

न लुमता तस्मिन्निति न्यासारम्भपक्षे लुमता लुप्तो यः प्रत्ययः तस्मिन् परतस्त-न्निमित्तकं तत्प्रकृतिभूतस्य यत्कार्यमाङ्गमनाङ्गं वा तत्र प्रत्ययलक्षणं नेत्यर्थादङ्गसंज्ञाविषयेऽपि न लुमतेति निषेधलाभेन तदनुरोधात् प्रत्याख्यानपक्षेऽपि फलैक्यसम्पादानाय न लुमताङ्गस्येत्यङ्गपदस्य प्रकृतिमात्रोपलक्षकत्वमाश्रयणीयम् । एवञ्च सूत्रमतेऽपि लुप्तप्रत्यये परतो यः पूर्वस्तत्प्रकृतिभूतः तदुद्देश्यकमाङ्गमनाङ्गं वेत्यर्थ उचित इति 'न हि अङ्गसंज्ञायां विधीयमानायां न लुमताङ्गस्येति प्रतिषेधः प्रवर्तते । लब्धाङ्गसंज्ञस्य कार्यान्तरे विधातव्ये स प्रतिषेधः प्रवर्तत' इति कैयटग्रन्थः चिन्त्य इति नागेशाशयः । ननूक्तरीत्या अङ्गसंज्ञायामपि न लुमतेति प्रत्ययलक्षणनिषेध इति शङ्कायामाह न लुमतेति । तत्त्वमिति । इदमेव भाष्यारूढमिति भावः । कश्चित् इत्यपपाठः । एवञ्च लब्धाङ्गसंज्ञकत्वघटितवर्णनंसूत्रार्थ कैयटरीत्येति चिन्तनीयम् । प्रकृतसूत्रस्थोद्योतग्रन्थस्तु कैयटानुरोधीति न तद्विरोधः ।

अत एव = अङ्गसंज्ञाविषयेऽस्य निषेधस्यानित्यत्वादप्रवृत्तेरेव । तृज्वत्त्वमिति ।

अन्तरङ्गत्वात् स्त्रियाश्चेति सूत्रेण जातं तिष्ठतीति भावः । पञ्चभिः क्रोष्ट्रीभिः क्रीतं कुलमित्यर्थे पञ्चन्+भिस्, क्रोष्टु + भिस् इत्यवस्थायां पदद्वयाश्रितत्वेन बहिरङ्गसमाससंज्ञां बाधित्वान्तरङ्गत्वात् अङ्गसंज्ञातृज्वद्भावयोः कृतयोः ततोऽन्तरङ्गत्वात् ङीपि तद्धितार्थेति समासे सुपो लुकि आर्हीये ठकि तस्याध्यर्धेति लुकि लुक् तद्धितेति स्त्रीप्रत्ययलुकि अन्तरङ्गत्वात् पूर्वं जातं तृज्वत्त्वं तिष्ठत्येव । अन्तरङ्गानपीति न्यायेन बहिरङ्गस्य लुकः तत्प्रयोजकसमासस्य च प्राबल्यं बोध्यते । निरुक्तरीत्या अङ्गसंज्ञाविषये न लुमतेति निषेधस्याप्रवृत्त्या पूर्वं समासे लुकि च कृतेऽपि प्रत्ययलक्षणेनाङ्गसंज्ञायास्सुलभतया तन्निमित्तकतृज्वद्भावप्रवृत्तेः निराबाधतया समासस्यान्तरङ्गतृज्वद्भावनिमित्तविनाशकत्वा-भावात् अन्तरङ्गानपीति न्यायस्याप्रवृत्तिः । अङ्गसंज्ञायामपि प्रत्ययलक्षणनिषेधप्रवृत्तौ समासस्यान्तरङ्गनिमित्तविनाशकत्वात् अन्तरङ्गानपीति न्यायेन पूर्वं समासे प्रत्ययलक्षणा-भावेनाङ्गसंज्ञाया दुर्लभतया तन्निमित्तकतृज्वत्वासिद्धिरिति भाष्यविरोध इति भावः । तदेवाह तदुक्तं भाष्ये इति । प्रत्ययलक्षणेनेति । न लुमतेति निषेधस्यानित्यत्वेनाङ्गसंज्ञायामप्रवृत्तेरेव पञ्चक्रोष्टृ इत्यत्र समासे सुपो लुकि प्रत्ययलक्षणेनाङ्गसंज्ञायास्सुलभतया अन्तरङ्गतृज्वद्भाव-निमित्तविनाशकत्वाभावात् अन्तरङ्गानपीति न्यायाप्रवृत्त्या लुकः प्रागेव स्त्रियाश्चेति तृज्वद्-भावो भवतीति भावः । न चाङ्गसंज्ञाङ्गस्य कार्यमिति प्रतिषेधाभाव इति कैयटोक्तरीत्या अङ्गत्वे निषेधाप्रवृत्त्या तत्सिद्धावपि तयैव तृज्वत्त्वं न स्यादिति तत्रानित्यत्वमेव शरणमिति तेनैव निर्वाहे तत्र तन्निवेशो व्यर्थः , अन्यथा भाष्यासङ्गतिरेवेति गूढाकूतमिति चिदस्थिमालाकाराः।

भाष्येऽपरं निमित्तमिति । विभक्तावित्यस्य विच्छिन्नत्वात् सर्वनामस्थान इत्यस्य लक्ष्यानुरोधाच्च नानुवृत्तिरिति भावः । अङ्गसंज्ञकस्य तृज्वद्भाव इत्यर्थात् तृज्वत्त्वम-नैमित्तिकमेव । तृज्वदिति सूत्रभाष्यव्याख्याने प्रदीपे अङ्गसंज्ञा चेति । लब्धाङ्गसंज्ञकस्य यत्कार्यं प्रत्ययलक्षणं तत् न लुमताङ्गस्येत्यनेन निषिध्यत इति कैयटः । न लुमतेत्यस्य चानित्यत्वादङ्गसंज्ञाविषयेऽप्राप्तिः । अत एव न लुमता तस्मिन्निति न्यासे न दोष इति भाष्याशय इत्युद्योतकारः ।

ननु उरदत्वस्येव तृज्वत्वस्यापि परनिमित्तकत्वेन न लुमतेति निषेधेन पञ्चक्रोष्टृ इत्यस्यासिद्धिरिति शङ्कते न चेति । उरदित्यस्याङ्गाधिकारस्थत्वेन तेन प्रत्ययाक्षेपात् तस्य प्रत्ययनिमित्तकत्वं तद्वत् स्त्रियाश्चेत्यत्राप्यङ्गाधिकारेण प्रत्ययनिमित्तत्वलाभे न लुमतेति निषेधेन पञ्चक्रोष्टृ इत्यस्यासिद्धिरिति शङ्कितुराशयः । समाधत्ते उरत् इत्यत्रेति । अयं भावः। लिट्यभ्यसस्योभयेषाम्, (6-1-17) इति सूत्रे भाष्ये 'ग्रहिवृश्चतिपृच्छतिभृज्जतीनाम-

विशेषः' इति वार्तिककृता ग्रह्यादीनां फले विशेषाभाव उक्तः । ततो भाष्यकृता यदुच्यते वृश्चेरविशेष इति । तन्न । यद्यत्र रेफस्य सम्प्रसारणं न स्याद्वकारस्य प्रसज्येत । रेफस्य पुनः सम्प्रसारणे सति उरदत्वस्य स्थानिवद्भावात् न सम्प्रसारणे सम्प्रसारणमिति प्रतिषेधः सिद्धो भवति । तस्माद्वक्तव्यम् । ग्रहेरविशेषः पृच्छतिभृज्जत्योरविशेष' इति स्पष्टीकृतम् । उरदत्वस्याङ्गाधिकारस्थत्वेनाङ्गसंज्ञाद्वारा नियमतः पूर्वं परबुद्धेरावश्यकत्वेन परनिमित्ततया अचः परस्मिन्निति स्थानिवत्वमिति भाव इत्युद्योते नागेशः । एवञ्चानेन भाष्येणोरदत्वस्याङ्गसंज्ञाद्वारा परनिमित्तत्वं लभ्यते न तु साक्षात् । तथा तृज्वद्भावस्याप्यङ्ग-धिकारस्थत्वेन तद्द्वारा परनिमित्तत्वलाभेऽपि शब्दतः साक्षात् तस्यालाभात् न तद्विषये न लुमतेति निषेधप्रवृत्तिः । तृज्वत्सूत्रस्थभाष्यप्रामाण्यात् यत्र साक्षात् शब्दतः परनिमित्तत्वाश्रयणं तत्रैव प्रत्ययलक्षणनिषेध इत्यर्थो लभ्यत इति बोध्यम् । शब्दतो लुप्तप्रत्ययनिमित्तकाङ्गसंज्ञावदुद्देश्यककार्य एव न लुमतेति निषेध इति भावः ।

अत एव = उरदत्वस्य शब्दतः परनिमित्तत्वानाश्रयणेन न लुमतेति निषेधाप्रवृत्तेरेव। चर्करीतीति । कृञ्धातोः यङ्लुकि द्वित्वे प्रत्ययलक्षणेन उरदत्वेऽभ्यासकार्ये ऋतश्चेति सूत्रेणाभ्यासस्य रुगागमे यङो वेति सूत्रेणेडागमे चर्करीतीति रूपम् । गृध्धातोः यङ्लुकि द्वित्वे प्रत्ययलक्षणेन अभ्यासस्योरदत्वे जगृध् इति जाते रुग्रिगौ च लुकीति रुगागमे लङि सिपि शब्लुकि सिप इडभावपक्षे लघूपधगुणे हल्ङ्याादिलोपे , भषभावे जश्त्वे दश्चेति रुत्वपक्षे जर्घर् र् इति जाते रोरीति रेफलोपे ढ्रलोप इति दीर्घे अजर्घा इति रूपम् । शब्दतः परनिमित्तत्वानाश्रयणेऽपि न लुमतेति निषेधप्रवृत्तौ यङ्लुकः प्रत्ययलक्षणाभावेन प्रत्ययपरत्वाभावादुरदत्वं न स्यादिति भावः ।

नन्वङ्गाधिकारेण परनिमित्तत्वलाभेऽपि शब्दतस्तस्योपस्थित्यभावात् अचीत्यस्य तद्विशेष्यत्वेन तदादिविधेर्दुर्लभत्वात् कथमजादिप्रत्यय इत्यर्थलाभ इत्यत आह अचि श्नित्यादाविति । अध्याहारेणेति । शब्दत इत्यर्थः । तस्य = निमित्ते इत्यस्य । अजादौ अङ्गस्य निमित्ते इत्यर्थः । यथाकथञ्चिदिति । निराकाङ्क्षत्वेऽपि कथञ्चित् शब्दाध्याहारेणोप-पादनीय इत्यर्थः । ननु संज्ञाशास्त्राणां कार्यकालपक्षे विधिदेशीयत्वेन विधिसूत्रेषु अङ्गसंज्ञासूत्रस्योपस्थित्या शब्दतः परनिमित्तत्वलाभ इति शङ्कायामाह आकडारेति । कार्यकालत्वस्याभावाच्चेति । अयादिभ्यः परैव प्रगृह्यसंज्ञेति अदसोमादिति सूत्रस्थभाष्यात् संज्ञाशास्त्राणां विधिदेशीयत्वमिति कैयटः । पक्षद्वयेऽपि तेषां स्वदेशीयत्वमेव । आकडारीयसंज्ञासु यथोद्देश एवेति नियमोऽपि नोचित इति ग्रन्थकर्तुराशयः ।

वस्तुतस्तु 'कार्यकालपक्षे क्रोष्टुशब्दः प्रत्ययेऽङ्गसञ्ज्ञो भवति, अङ्गसञ्ज्ञकस्य च तस्य तृज्वत्त्वं स्त्रिया'मित्येवार्थः इति तृज्वत्त्वमनैमित्तिकमेव । 'उर'दित्यादौ तु गतिरुक्तैव। पदैकवाक्यतयाऽन्वयस्तु सञ्ज्ञासूत्राणां दुर्लभ इत्यन्यत्र निरूपितम् । एतेन 'उरदित्यादौ त्वावृत्त्याऽत्त्वं प्रति निमित्तताऽपि। वव्रश्चेति लक्ष्यानुरोधात्। न तथा प्रकृते, लक्ष्यानुरोधादेवेति तदाशयः। 'चर्करीति' 'अजर्घा' इत्यादौ तु 'न लुमते' ति निषेधानित्यत्वादत्त्वप्रवृत्तिः, 'त्रपो' इत्यादौ गुणवत् । अङ्गाक्षिप्तप्रत्ययनिमित्तं लुकि भवत्येवेति तु भ्रुवे हितं भ्रूहितमित्यादावुवङा-पत्या चिन्त्यम्' - इत्यपास्तम् ।

भावबोधिनी : कैयटं दूषयति एतेनेति । अङ्गसंज्ञो भवतीति । अङ्गसंज्ञा–शास्त्रोपस्थित्या वाक्यैकवाक्यतयाऽन्वयः । तुरितरवैलक्षण्ये । तदाह आवृत्त्येति । उपस्थिताङ्गसूत्रस्थप्रत्यये इत्यस्येत्यर्थः । प्रकृते = स्त्रियाञ्चेत्यत्र । लक्ष्यानुरोधात् = पञ्चक्रोष्टृ इति लक्ष्यानुरोधात् ।

नन्वावृत्तिर्मास्तु । यत्राङ्गपदं तत्र यस्मादित्याद्युपस्थित्या पदैकवाक्यतया अन्वयोऽस्तु इत्यत आह पदैकेति । अन्यत्र वृद्धिसूत्रे । गुणवत् गुणे इव गुणवदित्यर्थः । तन्मध्ये अङ्गेन प्रत्ययाक्षेपवादिमतमनेनैव प्रतिवादिना दूषितमित्याह अङ्गाक्षिप्तेति । अङ्गपदश्रुत्या उपस्थित इत्यर्थः । निषेध इति भावः । एवं चर्करीतीत्यादौ अत्वे निषेधाभावेनात्वं भवत्येवेति भावः । उवङापत्त्येति । उवङोऽपि आक्षिप्तप्रत्यय-निमित्तकत्वादिति भावः । उवङापत्तिर्वार्तिकमतरीत्या । भाष्यमते तु न, अल्विधित्वात्। अपास्तमिति । कार्यकालस्याशक्यत्वेनावृत्त्याक्षेपादीन् विनैव निर्वाहेण चेदं सर्वमपास्तमिति भावः ।

बालबोधिनी : संज्ञाशास्त्राणां विधिदेशीयत्वमिति कैयटः । पक्षद्वयेऽपि तेषां स्वदेशीयत्वमेव । आकाडारीयसंज्ञासु यथोद्देश एवेति नियमोऽपि नोचितिइति ग्रन्थकर्तुराशयः । तदेतत् सूचयन् कार्यकालपक्षेऽपि पञ्चक्रोष्टृ इत्यादौ दोषवारणमाह वस्तुतस्त्विति । आकडारीयसंज्ञासु यथोद्देश एवेति नियमाभावेन कार्यकालपक्षेऽपि अङ्गाधिकारमात्रेण स्त्रियाञ्चेति तृज्वत्त्वस्य परनिमित्तकत्वं नास्तीत्याह अनैमित्तिकमेवेति । ननु तुल्ययुक्त्या उरदत्वस्यानैमित्तिकत्वमत आह गतिरुक्तैवेति । तत्र शब्दतः परस्य निमित्तत्वानाश्रयणेऽपि अङ्गसंज्ञाद्वारा परनिमित्तकत्वमिति भावः । नन्वेवमपि पदैकवाक्यतयाऽन्वये परनिमित्तत्वं सिद्धमेवेत्यत आह पदैकवाक्यतयेति । कैयटोक्तं दूषयति एतेनेति । उपस्थिताङ्गसंज्ञासूत्र-घटकप्रत्यय इत्यस्यावृत्तिं विनैव उरदित्यत्राङ्गसंज्ञाद्वारा परनिमित्तत्वलाभेनेत्यर्थः । आवृत्त्या=

अङ्गसंज्ञासूत्रघटकप्रत्यय इत्यस्यावृत्त्या । अत्वं प्रति = उरदत्वं प्रति । वव्रश्चेति लक्ष्यानुरोधादिति । अन्यथा उरत् इति योगस्य परनिमित्तत्वाभावात् स्थानिवत्त्वाभावेन न सम्प्रसारणे इति निषेधाप्रवृत्तौ पुनरपि वकारस्य लिट्यभ्यासस्येति सम्प्रसारणं स्यादिति भावः । प्रकृते = युवोरनाकौ तृज्वत्क्रोष्टुरित्यादौ । लक्ष्यानुरोधात् = पञ्चक्रोष्टृ इत्यादि-लक्ष्यानुरोधात् । तदाशयः = युवोरनाकौ इति सूत्रभाष्याशयः । न चैवं सति यङ्लुकि चर्करीतीत्यादौ प्रत्ययपरत्वाभावेन कथमत्वप्रवृत्तिरत आह निषेधानित्यत्वादिति । प्रत्ययलक्षणेन तत्सिद्ध्यतीति भावः । तत्र दृष्टान्तमाह त्रपो इति । चर्करीतीत्यादावत्वप्रवृत्तये केनचिदुक्तमुपायं दूषयितुमाह अङ्गाक्षिप्तेति । उवङापत्त्येति । उवङोऽपि अङ्गाक्षिप्त-प्रत्ययनिमित्तकत्वादिति भावः । अपास्तमिति । आवृत्तिं विनैव सिद्धेरिति भावः ।

त्रिषु सरूपा इति। 'ङे प्रथमयो'रिति सूत्रे युष्मानित्यादौ 'तस्माच्छसो न' इत्युपन्यासपरेण भाष्येण, 'स्वमोर्नपुंसका'दिति सूत्रे शिशीनुमादिभिर्युष्मादाद्यादेशानां विप्रतिषेधपरेण वार्तिकेन, तद्भाष्येण च, 'न षट्' इति निषेधेन च लिङ्गसत्ताबोधनेऽपि लिङ्गबोधकप्रत्ययानुत्पत्त्या रूपे न विशेष इत्यर्थः । 'साम आक' मिति सूत्रस्थस्य 'अलिङ्गे युष्मदस्मदी' इति भाष्यस्य 'पदान्तरसन्निधानं विना लिङ्गविशेषो युष्मदस्मच्छब्दमात्रान्न प्रतीयते' इत्यर्थ इति दिक् ।

<u>भावबोधिनी :</u> सन्निधानं विनेति । त्वं स्त्री, अहं स्त्रीत्युक्ते एव लिङ्गप्रतीतिरन्यथा नेत्यर्थः ।

<u>बालबोधिनी :</u> त्रिषु सरूपा इति । युष्मदस्मदूषट्संज्ञकाः परिनिष्ठिते वैरूप्याभावात् त्रिषु सरूपा इत्यर्थः । स्वमोर्नपुंसकादिति सूत्रे इति । इत्यनुवर्तमाने नेतराच्छन्दसीति सूत्रे इत्यर्थः । स्वमोर्नपुंसकादिति सूत्रं यस्मिंस्तस्मिन्निति बहुव्रीहिः । शिशीनुमादिभिरिति । आदिना लुक् । वार्तिकेनेति । नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेनेति वार्तिकेनेत्यर्थः । तद्भाष्येण चेति । नेतराच्छन्दसि (7-1-26) इति सूत्रस्थेन 'नपुंसका-देशेभ्यो युष्मदस्मदोः विभक्त्यादेशा भवन्ति विप्रतिषेंधेन । नपुंसकादेशानामवकाशः त्रपु त्रपुणी त्रपूणि । युष्मदस्मदोर्विभक्त्यादेशानामवकाशः त्वं ब्राह्मणः अहं ब्राह्मणः । युवां ब्राह्मणौ आवां ब्राह्मणौ । यूयं ब्राह्मणाः वयं ब्राह्मणाः । इहोभयं प्राप्नोति । त्वं ब्राह्मणकुलम् अहं ब्राह्मणकुलम् । युवां ब्राह्मणकुले, आवां ब्राह्मणकुले । यूयं ब्राह्मणकुलानि, वयं ब्राह्मणकुलानि । युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन । अथेदानीं युष्मदस्मदोर्विभक्त्यादेशेषु कृतेषु पुनःप्रसङ्गात् शिशीलुङ्नुम्विधयः कस्मान्न भवन्ति ? सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवे'ति भाष्येण चेत्यर्थः ।

युष्मदस्मदोर्लिङ्गसत्ताभ्युपगमे भाष्यविरोधमाशङ्क्य परिहरति साम आकमिति । युष्मदस्मदोः शेषे लोप इति अन्त्यलोपे कृते सन्निपातपरिभाषया न टाबुत्पत्तिः । षट्संज्ञकेषु च न षडिति निषेधादनुत्पत्तिरिति लिङ्गबोधकप्रत्ययाभावेन पदान्तरसन्निधानेनैव तद्विशेषः प्रतीयत इति भावः ।

त्रेस्त्रयः । अयं न सान्तः, 'निजां त्रयाणा'मिति निर्देशात् । त्रेरयङ् न कृतः -अयङ् यीत्यादाविवोच्चारणार्थत्वशङ्कावारणाय । केचिदिति । 'आमि सर्वनाम्न' इति साहचर्यादिति भावः । वस्तुतस्त्विति । साहचर्यस्यासार्वत्रिकत्वात्सूत्रान्तरस्थतदाश्रयणे दृढतरप्रमाणाभावाच्चेति भावः । न च गौणमुख्यन्यायेनात्र नेति वाच्यम् , अप्रसिद्धत्व - गौणलाक्षणिकत्वान्यतररूपगौणत्वाभावात् । अत एवोपसर्जनानां सर्वनामत्वनिषेध आरब्धो वार्तिककृता । इतरविशेषणतामात्रेण तत्त्वाभावात् , पदकार्य एव तत्प्रवृत्तेश्चेत्यन्यत्र विस्तरः ।

<u>भावबोधिनी :</u> अयङिति । अयङि च क्ङितीत्यादाविवेत्यर्थः । इदमयुक्तम् । सिद्धान्ते सान्तत्वभ्रमवारणाय निर्देशाश्रयणस्यावश्यकत्वेन तेनैवात्रापि भ्रमवारणसंभवात् । दोषस्तूह्यः । त्रिशब्दादाचारक्विपि ततः कर्तरि क्विपि त्रित् । तत आमि दोष इति तु न । एकाज्भ्य आचारक्विपोऽनभिधानात् । न चोक्तरीत्या परमत्रिच्छब्दे दोष इति वाच्यम् । निर्दिश्यमानस्य त्रिशब्दस्य तकारेण व्यवधानेनाम्परकत्वाभावात् ।

ननु परमत्रिशब्दात् णिचि क्विपि टिलोपणिलोपक्विलोपेषु परमतृ तत आमि विशेषः । न च सिद्धान्ते नात्र त्रयादेशः णिलोपस्य स्थानिवत्त्वात् । न च क्वौ लुप्तमिति निषेधः । असार्वत्रिकत्वादिति चेन्न । लाघवादयङित्येव वक्तव्ये गुरुन्यासकरणेनासार्वत्रिकस्यापि क्वौ लुप्तमित्यस्येह प्रवृत्तिकल्पनात् । तस्मात् यथान्यास एव बोध्यः । तदाश्रयणे = साहचर्याश्रयणे ।

<u>बालबोधिनी :</u> त्रेस्त्रयः । त्रयोदशेत्यादौ त्रेस्त्रयः (6-3-48) इति सूत्रविहितः त्रयसादेशः सान्तः तद्वदयमपि सान्त इति भ्रमनिरासायाह न सान्त इति । तत्र मानमाह निर्देशादिति । ननु त्रेरयङिति सूत्र्यताम् । ङित्वादन्तादेशेनेष्टसिद्धेरित्यत आह न कृत इति। अयङ् यि क्ङितीति सूत्रेण यादौ क्ङिति परे शीङोऽयादेशो विधीयते । शाशय्यते इति यङन्तमुदाहरणम् । अत्रादेशे यथा अकार उच्चारणार्थस्तथा त्रेरयङित्यत्राप्यकार-स्योच्चारणार्थत्वशङ्का स्यात् । तद्वारणाय तथा न कृत इति बोध्यम् ।

केचिदिति । प्रियत्रीणामित्यादौ गौणे त्रयादेशो न भवतीति केचित् । तत्र हेतुमाह आमीति । आमि सर्वनम्नस्सुडिति विहितविशेषणत्वेन मुख्ये प्रवर्तते न तु गौणे तत्साहचर्यात् त्रयादेशोऽपि मुख्ये न तु गौणे इति तेषामाशयः । सिद्धान्तमाह वस्तुतस्त्विति । तदाश्रयणे= साहचर्याश्रयणे । अत एव = परिभाषायामप्रसिद्धत्वगौणलाक्षणिकत्वरूपगौणत्वस्यैव ग्रहणात् । आरब्ध इति । एतदतिरिक्तस्यापि उपसर्जनस्य गौणत्वेन ग्रहणे गौणमुख्यपरिभाषयैवोपसर्जनस्य सर्वनामकार्यवारणसम्भवे संज्ञोपसर्जनीभूतस्त्विति वार्तिकेन उपसर्जनप्रतिषेधो व्यर्थः स्यदिति भावः । तत्त्वाभावात् = गौणत्वाभावात् । पदकार्य एवेति । एवेन प्रातिपदिककार्यव्यवच्छेदः । तत्प्रवृत्तेः = गौणमुख्यपरिभाषाप्रवृत्तेः ।

द्विशब्दो नित्यं द्विवचनान्त इति । सङ्ख्यापरत्वेऽपीत्यर्थः। अत एव कस्य द्वित्त्वे इत्यर्थे 'कयोः द्वयो' रिति भाष्ये बहुष्विति सूत्रे प्रयुक्तम् । त्यदादी । 'अष्टन' इत्यतो 'विभक्ता'वित्यनुवर्त्तते, तत्फलं -तत्कुलम् , सोर्लुक्यत्वं न । इष्टिरिति । भाष्यकारस्येति भावः। द्विपर्यन्तानां किमिति । युष्मदस्मदोरात्वयत्वलोपैर्बाधात् , किमः कादेशविधानाच्च प्रश्नः। भवान् भवन्ताविति अभ्युच्चयाय ।

<u>भावबोधिनी :</u> तत्कुलमिति । पृथक् पदम् । भवानिति । उगित्वान्नुमि कृते न दोष इति केचित् । तदसत् नलोपापत्तेः ।

<u>बालबोधिनी :</u> अत एव = संख्यापरत्वेऽपि नित्यद्विवचनान्तत्वादेव । बहुषु इति सूत्रे इति ।

त्यादीनामः । तत्कुलमिति पदद्वयम् । बाधादिति । विशेषविहितैः युष्मदस्मदोरनादेशे, द्वितीयायां च, प्रथमायाश्च द्विवचने भाषायाम् , योऽचि, शेषे लोप इत्यात्वयत्वलोपैरत्वस्य बाधादित्यर्थः । किम इति । किमः कादेशविधानाच्चात्वस्य बाध इति तेषां त्यदादिष्वन्त-र्भावेऽपि न दोष इति प्रश्नः । अभ्युच्चयायेति । दोषस्य नानारूपत्वप्रकाशनायेत्यर्थः ।

ङौ तु सवर्णदीर्घ इति । इदं सम्भावनामात्रेण । एषां ङौ 'ईदूतौ च सप्तम्यर्थे' इति सूत्रस्थभाष्यप्रमाण्येनानभिधानात् । क्विबन्तवातेति । 'ईत्वमवकारादौ' इतिवार्त्तिकस्य, 'पावान'इत्यादीनां वनिपा साधनरूपस्य तत्प्रत्याख्यानभाष्यस्य च फलैक्यायेदृशेभ्यः क्विपोऽनभिधानमावश्यकमिति । धीवरी पीवरीत्यादि तु 'ध्याप्योः सम्प्रसारणञ्च' क्विपृक्वनिप्च चेनेत्यर्थकात् 'जनसनखानां सञ्झलो' 'घुमास्थागापे'तिसूत्रभाष्यपर्यालोचनया सिद्धात् वार्त्तिकात्सिद्धम् । 'धीद्ध्र्यायतेर्दधातेर्वे'ति 'किब्वची'तिवार्तिकस्थभाष्ये

'दधातेर्वे'त्युक्तिरेकदेशिनः। 'शंस्थाः' इत्यत्र विजेवेति न दोषः ।मीङ् - माने इतीकारान्तात् क्विबित्येके ।वातप्रमीः - निःशृङ्गो मृगाकृतिर्जन्तुविशेषः। बहुश्रेयसीति । 'ईयसो बहुव्रीहेर्ने' ति निषेधान्नोपसर्जनह्रस्वः ।

भावबोधिनी : सूत्रस्थभाष्यप्रामाण्येनेति । मामकी तनू इति छान्दसोदाहरणपर्यन्तानुधावनेन लोके सप्तम्यर्थपर्यवसन्नावीदूतौ नेति तात्पर्यक-भाष्यप्रामाण्येनेत्यर्थः । अनभिधानादिति । नन्वत्र नेदं भाष्यं प्रमाणम् । ऊकारांशे सप्तम्यन्तपर्यवसन्नैकादेशेनाक्रान्तोदाहरणस्यैव संभवेन तत्साहचर्यादीकारोऽपि तादृश एव गृह्यते । लोके तादृशेकारासंभवेनैव छन्दस्यनुधावनमिति भाष्यतात्पर्यं वक्तुं शक्यम्। एवं सति वातप्रमीत्यादीनाम् ईदूत्सूत्रोदाहरणत्वपरं नेति कथनमनभिधाने प्रमाणमिति चेन्न । हरिषु उ ततो दीर्घे हरिषू इति ऊकारांशे एकादेशाक्रान्तस्यापि संभवेन साहचर्यस्य वक्तुमशक्यत्वात् । न च तत्रैकादेशस्य परादिवद्भावेन उञ्त्वेन निपात एकाजनाङित्यनेन सिद्धतया एतत्सूत्रोदाहरणत्वं नेति वाच्यम् । हरिषू इतीत्यत्र उञ इति विकल्पबाधनेन ईदूताविति सूत्रोदाहरणत्वसम्भवात् । तस्माल्लोकेऽप्युदाहरणसंभवेन तत्परित्यज्य छन्दस्यनुधावनेन तेषामनभिधाने एव भाष्यसम्मतिरिति केचित् । हरिषू इत्यत्र एकादेशस्य पदद्वयसंबन्धिवर्णद्वयापेक्षत्वेन बहिरङ्गत्वमन्तरङ्गसंज्ञायामसिद्धत्वेनोकारांशे एकादेशत्वा-नाक्रान्तोदाहरणस्यैव संभवेन तत्साहचर्यादीकारोऽपि तथैवेति छन्दस्यनुधावनम्, न तु लोके उदाहरणसाम्याभाव इति । तस्मान्नेदमुदाहरणे गमकमित्यन्ये । ईदृशेभ्य इति । घुमास्थेति ईत्वोद्देश्यतावच्छेदकाक्रान्तस्येत्यर्थः । आवश्यकमिति । बोध्यमिति शेषः। इदञ्चानभिधानं वार्तिकमते । भाष्यमते तु अल्विधित्वेनेत्वाप्राप्तेः । नन्वेवं सति धाञ्धातोः धीवरीत्यादि न सिध्येदत आह धीवरीति । ननु क्विपोऽनभिधाने शंस्था इति कथमित्यत आह विजेवेति । स्थः कचेति चेन विच एवानुवृत्तिरिति भावः । भाष्यमते तु क्विप एवेति बोध्यम् । एके इति । ईप्रत्ययान्तवातप्रमीप्रकृतिकाचारक्विबन्तात् कर्तरि क्विबित्यन्ये । ईयसो बहुव्रीहेरिति । ईयसन्तप्रकृतिकस्त्रीप्रत्ययान्तोत्तरपदकबहुव्रीहेरित्यर्थः । अन्यथा वार्तिकस्यैवासङ्गतिरिति भावः । ईयसश्चेति सूत्रेऽप्येवमेवार्थ इति । ईयसश्चेति कप् नेति बोध्यम् ।

बालबोधिनी : इदम् = सप्तमीविभक्तौ वातप्रमीति रूपम् । अनभिधानादिति । ईदूतौ च सप्तम्यर्थे इति सूत्रे भाष्ये ईकारोकाररूपसप्तम्या असम्भवात् सप्तमीपदेन तत्सहचरितस्य ग्रहणं भवतीत्युक्तम् । तथा च सप्तम्यन्तमीदूदन्तं लोके नास्ति । सोमो

गौरी, मामकी तनू इति वेद एव तदुदाहरणम् । ईकारान्तस्य सप्तम्यन्तस्य लोके प्रयोगसत्वे ईकाररूपसप्तम्यास्सम्भवेन प्रागुक्तभाष्यविरोधः स्यादिति ङौ तु सवर्णदीर्घः सम्भावनामात्रेणेति बोध्यम् ।

क्विबन्तवातेति । माङ् माने इत्यस्मात् कर्तरि क्विपि घुमास्था इतीत्वे निष्पन्नो वातीप्रमीशब्दः, वातं प्रमिमीते इत्यर्थे वातमित्युपपदे कर्तरि माङ्धातोः 'वातप्रमीः' इत्युणादिसूत्रेण ईप्रत्यये निष्पन्नवातप्रमीशब्दापेक्षयाऽन्यः । क्विबन्तवातप्रमीशब्दस्य अमि शसि ङौ च एरनेकाच इति यणि वातप्रम्यम्, वातप्रम्यः, वातप्रम्यि इति विशेष इति प्राचीनाः । तद्दूषयति । ईत्वमवकारादाविति । घुमास्थागापाजहातिसां हलि (6-4-66) इति सूत्रे भाष्ये' ईत्वे वकारप्रतिषेधो घृतं घृतपावान इति दर्शनात्' इति वार्तिकम् । तस्य फलितार्थकथनमीत्वमवकारादाविति । अस्य ग्रन्थस्य तथेत्यादिः । पूर्ववत् । क्विबन्तवातप्रमीशब्दकथनमपि सम्भावनामात्रमिति भावः । घृतं घृतपावानः पिबत । वसां वसपावानः पिबत । अत्र आतो मनिन् इति क्वनिप्। ङ्यापोः संज्ञाछन्दसोर्बहुलमिति वसाशब्दस्य ह्रस्व इति क्वनिबन्त इति प्रतिषेधोपसंख्यानवार्तिककृत आशयः। वनिपा साधनरूपस्य तत्प्रत्याख्यानभाष्यस्येति । 'स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । वनिबेव भविष्यति न क्वनिप्' इति भाष्यम् । ईदृशेभ्यः = आदन्तेभ्यः । आवश्यकमिति । इदमपि सम्भावनामात्रेणेति शेषः । इदं बोध्यम् । पावान इति क्वनिबन्त इत्यभिप्रायेण तत्र प्राप्तस्य घुमास्थेति ईत्वस्य वारणाय ईत्वे वकारप्रतिषेध इति वार्तिकमारब्धं वार्तिककृता । वनिपा तत्सिद्धिमुपपाद्य वार्तिकं प्रत्याख्यातं भाष्यकृता । यदि आदन्तेभ्यः क्विप् स्यत्तदा वार्तिकारम्भपक्षे ईत्वप्रतिषेधः । तत्प्रत्याख्यातृभाष्यनये प्रत्ययलक्षणेन ईत्वापत्तिरिति फलभेदः स्यात्। तदैक्याय आदन्तेभ्यः क्विपोऽनभिधानमवश्यं कल्पनीयमिति भावः ।

ननूक्तरीत्या धीवरी पीवरीत्यादौ वार्तिकारम्भपक्षे ईत्वप्रतिषेधस्य, तत्प्रत्याख्याने ईत्वस्य च प्राप्त्या फलभेदात् तदैक्याय तेषामनभिधानं वक्तव्यमिति कथं धीवरीत्यादीनां सिद्धिरत आह धीवरीति । जनसनखनामिति सूत्रे भाष्ये धियौ इत्यत्रेयङादेशे कर्तव्ये धाधातोः क्विपि यदीत्वं तस्यासिद्धत्वं प्राप्नोतीत्याशङ्क्य 'नैतदीत्वं किं तर्हि ध्याप्योस्सम्प्र-सारणमेतदित्युक्तम्' । एवं घुमास्थेति सूत्रे पावान इत्यादावीत्ववारणायेत्वे वकारप्रतिषेध इति वार्तिकारम्भे 'यदि तर्हि वकारप्रतिषेध इत्युच्यते कथं तर्हि धीवरी पीवरीति प्रश्ने नैतदीत्वं, किं तर्हि ध्याप्योस्सम्प्रसारणमेतदित्युक्तम् । एतत्सूत्रद्वयभाष्यपर्यालोचनया ध्याप्योः सम्प्रसारणञ्चेत्यादिवार्तिकं सिद्धमिति भावः । एवञ्च ध्याप्योः धीवरी पीवरीति

सिद्धम् । न त्वादन्तादिति न दोषः । ननूक्तरीत्या आदन्तेभ्यः क्विबभावे सति ध्यायतेः दधातेर्वाधीरिति रूपसिद्धिरिति भाष्येण विरोध अत आह धीरिति । एकदेशिन इति । प्रागुक्तरीत्या ईत्वे वकारप्रतिषेध इति वार्तिकारम्भप्रत्याख्यानयोः फलैक्याय आदन्तेभ्यः क्विपोऽनभिधानलाभेन दधातेः क्विबिति वचनम् एकदेशिन इति भावः ।

ननु शंस्थाः इत्यत्र स्थः क चेति चकारात् क्विबिति प्रतिपादनपरभाष्यविरोध इत्यत आह विजेवेति । भाष्यमते तु क्विबेवेति बोध्यम् । स्थः क चेति सूत्रभाष्ये क्विपूपदं सदृशलाक्षणिकमिति न विरोधः । वातप्रमीशब्दस्य क्विबन्तत्वमपि साधयितुमाह मीङिति। क्विबन्तवातप्रमीशब्दस्येति मूलस्य मीङ्प्रकृतिकक्विबन्तवातप्रमीशब्दस्येत्यर्थः । एके = मुख्याः ।

बहुश्रेयसीति । अयमनयोरतिशयेन प्रशस्य इत्यर्थे द्विवचनविभज्योपपदे तरबीयसुनौ इति ईयसुनि 'प्रशस्यस्य श्रः' इति श्रादेशे उगितश्चेति ङीपि श्रेयसीशब्दः । बह्व्यः श्रेयस्यः यस्येति बहुव्रीहिः । स्त्रियाः पुंवदिति पुंवत्त्वम् । गोस्त्रियोरिति ह्रस्वस्तु न । ईयसो बहुव्रीहेर्नेति निषेधात् । ईयसश्चेति निषेधात् न कप् ।

यू स्त्र्या । दीर्घयोरेव ग्रहणं व्यख्यानात् । 'वा छन्दसी'ति पूर्वसवर्णदीर्घः । यू किम? मात्रे । 'आण्नद्या'इति न । स्त्रियमाचक्षाते स्त्र्याख्यौ; मूलविभुजादित्वात्कः। 'स्त्र्याख्या'वित्युपस्थितस्त्रीवाचकशब्दस्य विशेष्यत्वात्तदन्तविधिरित्याह ईदूदन्ताविति । 'आच्छीनद्यो'रित्यादौ नदीशब्दस्य तदवयवे लक्षणा बोद्ध्या । आख्याग्रहणान्नित्य-त्वलाभस्तदाह - नित्यस्त्रीलिङ्गाविति । तत्फलन्तु ग्रामण्यादेर्व्यावृत्तिः। नित्यस्त्रीत्वञ्च प्रवृत्तिनिमित्तैक्ये लिङ्गान्तरविशिष्टार्थानभिधायकत्वम् । ङ्यन्तकुमार्यादीनां क्यचि निर्वृत्तेन समानाकारतया नित्यस्त्रीत्वाभाववारणाय 'प्रवृत्तिनिमित्तैक्ये'इति । नन्वेवं बहुश्रेयसीशब्दस्य नदीत्वं न स्यादत आह प्रथमेति । अर्थान्तरसङ्क्रमात्पूर्वं विद्यमानं नित्यस्त्रीत्वमादाय तस्यार्थान्तरसङ्क्रमेऽपि नदीत्वं वक्तव्यमित्यर्थः। यथोद्देशे पूर्वप्रवृत्तसञ्ज्ञामादायैव कार्यम्। कार्यकालपक्षेऽपि 'कुमारी'त्यादौ प्रकृतिभूतकुमारीशब्दस्य नित्यस्त्रीत्वेन वृत्तावपि विशेषणतया नित्यस्त्रीलिङ्गरूपार्थबोधकत्वेन नदीसञ्ज्ञा। समासे तु स्पष्टैव तदवयवस्य तत्प्राप्तिः। तन्मात्रबोधकत्वनिवेशे, प्राधान्येन तद्बोधकत्वनिवेशे वा न मानम् । तदुक्तं भाष्ये- 'अवयवस्त्रीविषयत्वात् सिद्धम् , अवयवोऽत्र स्त्रीविषयस्तदाश्रया नदीसञ्ज्ञा भविष्यती'ति। 'आकडारस्थसञ्ज्ञानां कार्यकालत्वाभावात् । अन्यथा तत्तद्विध्येकवाक्यत्वापन्नयोः कथं बाध्यबाधकभावः स्यादिति बोध्यम्' इत्यपि केचित् ।

भावबोधिनी : ननु यू इति न दीर्घयोर्निर्देशः । दीर्घाज्जसि चेति निषेधात् । किन्तु ह्रस्वस्यैवेत्यत आह दीर्घयोरेवेति । व्याख्यानादिति । यद्यत्र ह्रस्वयोरेव ग्रहणं तदा ङिति ह्रस्वश्चेति सूत्रे ह्रस्वग्रहणं व्यर्थम् । तत्सामर्थ्यात् दीर्घयोरेवात्र ग्रहणमिति व्याख्याने बीजमुक्तं कैश्चित् । वस्तुतस्तु ग्रहणकशास्त्रप्रवृत्त्याऽत्र दीर्घयोरपि ग्रहणे तत्र ह्रस्वमात्रस्य ग्रहणं ह्रस्वपदमिति न तद्व्याख्याने बीजम् । किन्तु भाष्यमेव प्रमाणमिति बोध्यम् । क इति । नन्वत्र कर्मण्यण् युगापत्तेः । नाप्यातोऽनुपसर्गे इति कः, आङ्पूर्वत्वादिति भावः। इत्यादाविति । आदिना शतृनुमो नद्यजाति नद्याश्शेषस्यान्यतरस्यामित्यादीनां संग्रहः । लक्षणेति । न चास्मादेव ज्ञापकात् वर्णयोरेव संज्ञाऽस्तु किं लक्षणयेति वाच्यम् । तत्पक्षे अस्याकडारसूत्रे दूषितत्वात् । आख्याग्रहणादिति । स्त्रियामित्येव वक्तव्ये तद्ग्रहणादित्यर्थः । शब्दाधिक्यादर्थाधिक्यमिति भावः । तत्फलम् = नित्यत्वफलम् । व्यावृत्तिरिति । ग्रामनयनकर्तृत्वस्य स्त्रीपुंसाधारणत्वात् प्राप्तिः । नित्यस्त्रीत्वञ्चेति । अत्रानुगमः कृतः स चान्यत्र लिख्यते । न स्यादिति । निरुक्तनित्यस्त्रीत्वाभावादिति भावः । प्रथमं = प्रथमं विद्यमानं लिङ्गं स्त्रीत्वम् । तस्य ग्रहणं नदीसंज्ञायां वक्तव्यमित्यर्थः। तत्फलितमाह अर्थान्तरेति । नित्यस्त्रीलिङ्गरूपार्थेति । अर्थे तत्त्वञ्च लिङ्गान्तरासमानाधिकरणप्रवृत्तिनिमित्तकत्वम् । प्राधान्येन तद्बोधकत्वेति । नन्वेवं कुमारीवर्षाभू इति द्वन्द्वस्य प्रकारतयोक्तार्थबोधकत्वेन नदीसंज्ञापत्तिरिति केषाञ्चित् समाधानं विभावनीयम् । प्रथमलिङ्गग्रहणञ्चेति वार्तिकं कार्यकालपक्षाभिप्रायेण प्रवृत्तमित्याह कार्यकालेऽपीति । अवयवस्त्रीविषयत्वादिति । अवयवस्य वृत्तिविशेषणार्थस्य स्त्रीविषयत्वात् स्त्रीत्वविशिष्टत्वात् = अवयवस्य वृत्तिविशेषणार्थवाचकस्य स्त्रीविषयत्वात् निरुक्तनित्यस्त्रीत्वरूपार्थवाचकत्वादिति वाऽर्थः । इदं भाष्यं यथोद्देशपक्षाभिप्रायकमेव न कार्यकालपक्षाभिप्रायमिति केचित्कारमतमाह आकडारस्थेति । कार्यकालत्वा-भावादित्यनन्तरमिदं भाष्यं यथोद्देशपक्षाभिप्रायकमेवेति पूरणीयम् । अन्यथा = आकडारस्थानां कार्यकालाङ्गीकारे ।

बालबोधिनी : यू स्त्र्याख्यौ नदी । ननु ईश्च ऊश्चेति दीर्घयोर्ग्रहणे दीर्घाज्जसि चेति पूर्वसवर्णदीर्घनिषेधः स्यादिति इश्च उश्च यू इति ह्रस्वयोरेव ग्रहणमिति शङ्कायामाह दीर्घयोरेवेति । तत्र प्रमाणमाह व्याख्यानादिति । तच्च प्रकृतसूत्रस्थं भाष्यमेवेति बोध्यम् । तत्र सूत्रे भाष्ये यू इत्यत्र दीर्घयोर्ग्रहणे पूर्वसवर्णदीर्घस्य, ङिति ह्रस्वश्चेत्यत्र सामानाधि-करण्यस्य चानुपपत्तिमुद्भाव्य ह्रस्वयोर्ग्रहणे बहुशकटिरित्यत्र नद्यृतश्चेति कपः प्राप्तिञ्चाशङ्क्य दीर्घयोरेव ग्रहणमिति सिद्धान्तितम् । छान्दसत्वात् वा च्छन्दसीति

पूर्वसवर्णदीर्घ इति समाहितम् । ङिति ह्रस्वश्चेत्यत्र य्वोः यौ ह्रस्वाविति वैयधिकरण्येनान्वय इति बोध्यम् । मूलविभुजादित्वादिति । आङ्पूर्वचक्षिङ् धातोः आतश्चोपसर्गे इति प्राप्तं कप्रत्ययं बाधित्वा कर्मण्यणि प्राप्ते तद्बाधकतया मूलविभुजादित्वात् कः । चक्षिङः ख्याञ्। आतो लोप इटि च । स्त्र्याख्यौ शब्दावित्यर्थाल्लभ्यते । यू इत्यस्य तद्विशेषणत्वात् तदन्तविधिः । अनेन तदन्तसंज्ञापक्षः सिद्धः ।

ननु तदन्तसंज्ञापक्षे आच्छीनद्योर्नुमिति सूत्रेण अवर्णान्तादङ्गात् परो यः शतुरवयवः तदन्तस्याङ्गस्य शीनद्योः परतः विकल्पेन विधीयमानो नुम् तुदन्तीत्यादौ न स्यात् । नदीपरत्वाभावादत आह आच्छीनद्योरिति । स्त्रियामित्येव वक्तव्ये आख्याग्रहणस्य फलमाह नित्यत्वलाभ इति । तत्सामार्थ्येन नित्यस्त्रीलिङ्गयोरेव नदीसंज्ञा, न तु लिङ्गान्तरस्यापि बोधकयोरिति भावः । तत्फलमाह ग्रामण्यादेरिति । ग्रामनयनस्य स्त्रीपुंसाधारणत्वेन नित्यस्त्रीत्वाभावादित्यर्थः । प्रवृत्तिनिमित्तैक्ये इति । येन प्रवृत्तिनिमित्तेन यः शब्दः स्त्रीत्वविशिष्टार्थाभिधायकः तेनैव प्रवृत्तिनिमित्तेन लिङ्गान्तरविशिष्टार्थाभिधायको न भवति चेत् स शब्दः नित्यस्त्रीलिङ्ग इत्यर्थः । प्रवृत्तिनिमित्तैक्ये इत्यस्य फलमाह ङ्यन्तेति। ङ्यन्तकुमारीशब्दस्य कुमारीवाचरतीत्यर्थे निष्पन्नक्यजन्तकुमारीशब्देन त्रिलिङ्गेन समानाकारतया नित्यस्त्रीत्वं न स्यात् । दत्ते तु तद्विशेषणे ङ्यन्तकुमारीशब्दस्य क्यजन्त-कुमारीशब्दस्य च प्रवृत्तिनिमित्तभेदात् शब्दतः समानाकारत्वेऽपि न दोष इति भावः ।

ननु अन्यपदार्थप्रधानस्य बहुश्रेयसीशब्दस्य लिङ्गान्तराभिधायकत्वेन नित्यस्त्रीत्वा-भावान्नदीसंज्ञा न स्यादत आह प्रथमेति । वस्तुतस्तु प्रथमलिङ्गग्रहणञ्चेति वार्तिकस्य प्रत्याख्याततत्वेन तदनुरोधेनाह यथोद्देशे इति । वार्तिकप्रत्याख्यानपक्षे कार्यकालपक्षेऽपि नदीसंज्ञा सुलभेत्याह कार्यकालेति । कुमारीति । ङ्यन्तकुमारीशब्दात् आचारार्थे क्यचि क्विपि वा तदन्तात् कर्तृक्विपि निष्पन्नकुमारीशब्द इत्यर्थः । प्रकृतिभूतकुमारीशब्दस्य = ङ्यन्तकुमारीशब्दस्य । वृत्तौ = सनाद्यन्तधातुवृत्तौ । तदवयवस्य = समासावयवस्य । तत्प्राप्तिः = नदीसंज्ञाप्राप्तिः । तन्मात्रेति । प्रकृत्यर्थगतस्त्रीत्वमात्रेत्यर्थः। भाष्योक्तं वार्तिकप्रत्याख्यानप्रकारं दर्शयति तदुक्तमिति । अवयवेति । अवयवशब्देनात्र वृत्तिप्रकृतिभूतशब्दग्रहणम् । अत एव क्यजाद्यन्ते न दोषः । तत्रापीच्छादिविशेषणतया कुमारीशब्दादेः नित्यस्त्रीलिङ्गार्थबोधकत्वात् । वार्तिकप्रत्याख्यानपरं भाष्यं यथोद्देशपक्षाभिप्रायकमिति कैयटाशयमाह आकडारस्थेति । कार्यकालत्वाभावादिति । दोषाप्रसङ्ग इति शेषः । अन्यथा = आकडारस्थसंज्ञानां कार्यकालत्वाङ्गीकारे ।

विध्येकवाक्यतापन्नयोरिति । संज्ञयोरिति शेषः । बाध्यबाधकभाव इति । अभीष्ट इति शेषः । अयादिभ्यः परैव प्रगृह्यसंज्ञेति प्रगृह्यसंज्ञासूत्रस्थभाष्यप्रामाण्यात् संज्ञाशास्त्राणां कार्यकालपक्षे विधिदेशीयत्वेनाकाडारस्थसंज्ञानामपि कार्यकालत्वाङ्गीकारे करणापादान-संज्ञयोः तृतीयापञ्चमीविध्येकवाक्यतापन्नत्वेनापादानसंज्ञाया एव परत्वेन करणसंज्ञाबाधकत्वं तस्याः स्यात् । न त्वभीष्टं अपादानसंज्ञाबाधकत्वं करणसंज्ञाया इति भावः । विवृतञ्चैतत् परिभाषेन्दुशेखरबालबोधिन्याम् । केचिदिति । वस्तुतस्तु कार्यकालपक्षेऽपि संज्ञाशास्त्रस्य विधिदेशीयत्वाभावस्य परिभाषेन्दुशेखरे सिद्धान्तितत्वेन अपादानमुत्तराणि कारकाणि बाधन्त इति भाष्यविरोधो नेति भावः । अधिकं परिभाषेन्दुतो ग्राह्यम् ।

हे बहुश्रेयसीति । ह्रस्वे कृते गुणस्तु न । प्रक्रियालाघवाय 'अम्बार्थानां ह्रस्वः' 'ह्रस्वनद्योर्गुण' इत्येव वाच्ये ह्रस्वविधानसामर्थ्यात् । 'जसि चे'त्यत्रैकदेशे स्वरितत्वप्रतिज्ञया ह्रस्वपदस्यैवानुवृत्तिरिति भाष्ये स्पष्टम् । अम्बार्थानामपि गुणस्तु वक्तुमशक्यः, 'अनः क्लीबं जले शोके मातृस्यन्दनयोरपी'ति रभसाद्युक्ताऽनः शब्दस्याम्बार्थत्वेन गुणापत्तेः । ह्रस्वग्रहणे तु 'अचः' इत्युपस्थित्याऽजन्ताम्बार्थग्रहणान्न दोषः। तस्य नपुंसकत्वेऽपि 'हे वारे' इतिवत्पक्षे गुणः स्यादेव । गुणश्रुत्येक्परिभाषोपस्थितौ त्वम्बेत्यादावप्यनापत्तिः। अयं ह्रस्वः अनन्तरस्येति न्यायात् 'ह्रस्वस्य गुण' इत्यस्यैव बाधकः। तेन मातरित्यत्र 'ऋतो ङी'ति गुणो भवत्येवेति दिक् ।

<u>भावबोधिनी :</u> गुणस्त्विति । ह्रस्वस्य गुण इत्यनेन । प्रक्रियालाघवायेति । ह्रस्वानन्तरं गुणापेक्षया पूर्वमेव गुणे लाघवम् । मात्रालाघवन्तु नेति भावः ।

नन्वेवं न्यासे कथं जसि चेत्यत्र ह्रस्वपदानुवृत्तिरित्यत आह जसि चेति । भाष्ये स्पष्टमिति । एवञ्च नात्र शङ्का कार्येति भावः । ननु अम्बार्थनद्योर्गुणः, ह्रस्वस्येत्येव न्यासः । एवं सति एकदेशे स्वरितत्वप्रतिज्ञा नास्ति ह्रस्वग्रहणाकरणलाघवञ्चेत्यत आह अम्बार्थानामपीति । ह्रस्वग्रहणे कृते त्विति । अम्बार्थानां ह्रस्व इति पूर्वदर्शितन्यासे त्वित्यर्थः । सम्बुद्धेर्लुका लुप्तत्वेन न लुमतेति निषेधेन न दोष इत्यत आह तस्येति । अनश्शब्दस्येत्यर्थः । स्यादेवेति । न लुमतेत्यस्यानित्यत्वादिति भावः । उपस्थिताविति। मातृशब्दे ऋतो ङीत्यनेनैव सिद्धे तदन्याम्बार्थे इकोऽसम्भवेन नद्यंशे व्यभिचारेण इक्परिभाषानुपस्थितौ अनश्शब्दे दोषो दुर्वार एव । तस्मात् पूर्वदर्शितन्यास एव युक्त इति भावः । केचित्तु नदीसाहचर्येणाजन्ताम्बार्थस्यैव ग्रहणे अनश्शब्दे दोषाभावेन अम्बार्थनद्योर्गुण इति न्यासेऽपि न दोष इति वदन्ति । अयं ह्रस्व इति । अम्बार्थनद्योर्ह्रस्वः।

ऋतो ङीति गुण इति । इदञ्चायुक्तम् । नद्यंशे लाघवात् गुणे विधातव्ये ह्रस्वस्य सामर्थ्यं न त्वम्बार्थांशे गुणविधाने लाघवाभावात् । त्वदुक्तरीत्या गुणविधानस्याशक्यत्वाच्च । तस्मात् नद्यंश एव ह्रस्वः गुणस्यानन्तरस्येति न्यायेन बाधकः । अम्बार्थोद्देश्यकह्रस्वस्तु न कस्यापि बाधकः । हे मातरित्यादौ परत्वात् ऋतो ङीति गुण इति वक्तुमुचितमिति साहचर्यमाश्रित्य अम्बार्थनद्योर्गुण इति न्यासेऽपि न दोष इत्युक्तपक्षेऽपि अयं ग्रन्थोऽसाधुरेव। अम्बार्थानां गुणविधानेऽपि रूपवैलक्षण्याभावेन इष्टापत्त्या गुण एव विधातव्ये ह्रस्वविधानात् ह्रस्वसामर्थ्यमिति वक्तुमशक्यत्वात् ।

बालबोधिनी : गुणस्तु नेति । हे बहुश्रेयसीत्यत्र अम्बार्थेति ह्रस्वे 'ह्रस्वस्य गुणः' इति गुणो नेत्यर्थः । तत्र हेतुमाह प्रक्रियेति । मात्रालाघवस्य पदलाघवस्य वाऽभावेऽपि प्रक्रियालाघवाय 'अम्बार्थानां ह्रस्वः, ह्रस्वनद्योर्गुणः' इति न्यासे कार्ये 'अम्बार्थनद्योः ह्रस्वः' इति ह्रस्वविधानसामर्थ्यात् गुणो न । अन्यथा ह्रस्वे गुणे प्रक्रियागौरवात् साक्षादेव ह्रस्वनद्योर्गुण इति गुणं विदध्यादिति भावः । ननु ह्रस्वनद्योर्गुण इति न्यासे तदुत्तरसूत्रे जसि चेत्यत्र ह्रस्वनद्योरित्यनुवृत्तौ जसि नद्या अपि गुणः प्राप्नोतीत्यत आह जसि चेत्यत्रेति । भाष्ये स्पष्टमिति । संख्याव्ययादेर्ङीबिति सूत्रात् दामहायनान्ताच्चेत्यत्र संख्यादेरिति वर्तते। अव्ययग्रहणं निवृत्तमिति दामहायनान्ताच्चेति सूत्रस्थभाष्योक्तेः समासनिर्दिष्टानामप्येक-देशानुवृत्तिर्लभ्यते । ह्रस्वविधानसामर्थ्याद्गुणवारणं ह्रस्वस्य गुण इति सूत्रे भाष्ये स्पष्टम् ।

ननु अम्बार्थनद्योर्गुण इति न्यासेनैव सिद्धे ह्रस्वविधानसामर्थ्यात् न गुण इति केचित् । तन्न युक्तमित्याह अम्बार्थानामपीति । गुणस्तु वक्तुमशक्य इति । अम्बार्थनद्योर्गुण इति न्यासेनेत्यर्थः । अन्यथा मातृवाचकस्याप्यनश्शब्दस्य गुणापत्तेरिति भावः । न दोष इति । मातृवाचकानश्शब्दस्य गुणापत्तिरूपदोषो नेत्यर्थः । ननूक्तस्यानश्शब्दस्य नपुंसकत्वात् स्वमोर्लुकि न लुमतेति निषेधेन प्रत्ययलक्षणाभावान्न गुणापत्तिरत आह तस्येति । गुणः स्यादेवेति । न लुमतेति निषेधस्यानित्यत्वादिति भावः । तथा च अम्बार्थनद्योर्गुण इति न्यासः कर्तुमशक्य इति तेनैव सिद्धे ह्रस्वविधानसामर्थ्यान्न गुण इति समाधानं न युक्तमिति भावः । गुणश्रुत्येति । तेन इक एव गुणलाभेन अनश्शब्दे दोषवारणेऽपि अम्बेत्यादावपि गुणानापत्तिरिति इक्परिभाषानुपस्थित्या अनश्शब्दे दोषस्तदवस्थ एवेति अम्बार्थनद्योर्ह्रस्व इति न्यास एव युक्त इति भावः । अयं ह्रस्वः = अम्बार्थनद्योर्ह्रस्वः । गुणो भवत्येवेति । ह्रस्वापेक्षया नित्यत्वादिति भावः । एतेन अम्बार्थनद्योरिति ह्रस्वविधानसामर्थ्यात् नद्यामिवाम्बार्थेऽपि गुणसामन्यस्याप्रवृत्तिलाभे मातरित्यत्र ऋतो ङिसर्वनामस्थानयोरिति

गुणो न स्यादिति शङ्का समाहिता । अम्बार्थेति ह्रस्वस्य ह्रस्वस्य गुण इत्यस्यैव बाधकत्वादिति बोध्यम् ।

आटश्च । 'न माङ्योगे' इतिसूत्रस्थभाष्योक्ते 'अटश्चे'ति न्यासे तु 'वृद्धिरेची'ति बोद्ध्यम् । अत्र अट् तु वक्तुमशक्यः, अस्वपोऽहसन्नित्यत्र वृद्धिवारणाय 'अटश्चे'त्यत्र धातावित्यपकर्षेण वृद्ध्यनापत्तेः । 'वृद्धिरेची'त्यस्य तु पररूपं बाधकमिति बोद्ध्यम् । ङेरिति सप्तम्येकवचनं व्याख्यानात् । इह परत्वादिति । सकृद्गतिन्यायाश्रयणादिति भावः । स्पष्टश्चेदं 'ह्रस्वनद्याप' इत्यत्र भाष्ये । यद्यपीह आडपवादो नद्याम्, सर्वथाऽनवकाशत्वात् । 'अपवादो नुग्दीर्घत्वस्ये'ति 'दीर्घोऽकित' इति सूत्रभाष्ये उक्तत्वेनाऽऽगमादेशयोरपि तत्त्वसत्वात्, तथापि अनवकाशत्वेन बाधेऽपवादप्रवृत्त्यनन्तरमुत्सर्गप्रवृत्तेर्न दोषः । अत एव 'न गणेरीत्वमपवादत्वाद्धलादिःशेषं बाधते, किं तर्हि? 'अनवकाशत्वा'दिति 'गुणो यङ्लुको'रिति सूत्रभाष्ये उक्तम् । 'पादः पदि'ति सूत्रस्थं -- 'शब्दान्तर-प्राप्त्याऽनित्ययोराडामोः परत्वादा'मिति भाष्यं त्वेकदेश्युक्तिरिति बोद्ध्यम् ।

<u>**भावबोधिनी :**</u> भाष्योक्ते इति । तत्र ह्यनन्तरस्येति न्यायेन आडजादीनामित्यस्यैव निषेधोऽस्तु न त्वट इत्याशङ्क्य आडजादीनामिति सत्वे तु एतदुपपद्यते तदेव प्रत्याख्यायते । अडेव सर्वत्र भवति आटश्चेति सूत्रम् अटश्चेति क्रियते । तेन ऐधर्तेति सिद्धमित्युक्तम् । आण्णद्या इति सूत्रम् अण्णद्या इति क्रियते । अटश्चेत्येनेनैव वृद्धिरस्त्विति शङ्कायामाह । अत्रेति । अस्वपोऽ हसन्निति । स्वपेर्लङि सिपि तस्य अड्गार्ग्यगालवयोरित्यटि रुत्वे उत्वम् । अपकर्षेणेति । तथा चाजादौ धाताविति सूत्रार्थः। अनापत्तेरिति । बहुश्रेयस्यै इत्यादौ अजादिधातुपरत्वाभावादिति भावः । नन्वट्करणेऽपि वृद्धिरेचि भवतीत्यत आह बाधकमिति । न च यदि पररूपं स्यात्तदा अड्बिधानं व्यर्थमेव तत्सामर्थ्याच्च न पररूपमिति वाच्यम् । पररूपस्येव बहुश्रेयस्यै इत्यादौ वृद्धेः बहुश्रेयस्या इत्यादौ सवर्णदीर्घस्य च बाधापत्तेः । न च यं विधीति न्यायेन पररूपमात्रस्य बाधकमिति वाच्यम् । एवमपि बहुश्रेयस्यामित्यादौ अटा नुट् बाध्यत इति वक्तुं तद्विधानस्यावश्यकत्वेन चरितार्थत्वात् । न च ह्रस्वनद्याप इत्यनन्तरं ङेर्नेति न्यासेन तत्र नुट् नेति वाच्यम् । तथा सति षट्चतुर्भ्यश्चेत्युत्तरसूत्रे नुट्सन्नियोगशिष्टतया नञोऽप्यनुवृत्यापत्तेः । न च षट्चतुर्भ्यश्चेत्यनेन नुटो निषेधे फलाभावः । कतीनां चतसृणामित्यत्र ह्रस्वनद्याप इति प्राप्तनुटो निषेधेन चरितार्थत्वात् । चतसृ इत्यस्य स्थानिवद्भावेन चतुश्शब्दत्वादिति चेत् सत्यम् । उक्तोदाहरणमात्रफलकत्वे कति चतुर्भ्यामित्येव वक्तुं युक्तमिति

षड्ग्रहणसामर्थ्यात् नामीतिदीर्घनिषेधक न तिसृचतसृ सूत्रे चतसृग्रहणज्ञापकाच्च ङेर्नेत्यनेन नञोऽनुवृत्तिरेव । यद्वा ह्रस्वनद्यापो नुडङोरिति न्यासोऽस्तु न चोद्यावकाशः । यद्वा ह्रस्वनद्यापो नुडिति यथाश्रुतमेवास्तु । त्रेस्त्रयः षट्चतुर्भ्यश्चेति पूर्वोत्तरसाहचर्येण षष्ठीबहुवचनाम एव ग्रहणेन बहुश्रेयस्यामित्यादौ येन केनापि प्रकारेण नुडभावेनाटः सामर्थ्यस्यानुपक्षीणतया पररूपबाधे वृद्ध्या दीर्घेण चेष्टसिद्धिरिति चेदत्रोच्यते । ङ्यन्तात् सखीशब्दात् ङसि अटि पररूपे यणि च कृते ख्यत्यादिति प्राप्तोत्वस्य पञ्चमीसमाससम्पादनद्वारा वारणेन अटश्चरितार्थतया पररूपमेव स्यात् । तस्मादाण्णद्या इत्येव कर्तव्यमिति भावः । भाव इति । पुनः नुट् नेति भावः । इहेति । बहुश्रेयस्यामित्यादावित्यर्थः । अनवकाशत्वादिति । बहुश्रेयसी इ इत्यवस्थायामाटि कृते आम् तु न । यदागमन्यायेनाड्विशिष्टस्य ङित्वेऽपि निर्दिश्यमानपरिभाषया ङेरेव स्थानिवत्त्वबोधनेन तस्याटा व्यवधानात् आमः पूर्वमाटश्चेति वृद्धिः । एकादेशस्य परादिवत्वेन ङित्वादामिति तु न । आमः परत्वेन वृद्धेः पूर्वं तत्प्रवृत्तेरेव वक्तव्यत्वात् । किञ्चैकादेशेऽप्याम् न । पञ्चमीसमासेन स्थानिवत्त्वेन आटा ङेर्व्यवधानात् आडप्रवृत्तियोग्येऽचारितार्थ्याच्चामोऽनवकाशत्वं बोध्यम् । येन नाप्राप्तन्यायस्य तु नायं विषयः । उक्तरीत्या उत्सर्गे आटि कृते आमोऽचारितार्थ्यादिति भावः । भाष्ये उक्तत्वेनेति। तत्र हि यंयम्यत इत्यादौ दीर्घापेक्षया निरवकाशत्वात् नुगत इति नुकि कृते अनजन्तत्वेन दीर्घाप्राप्त्याऽकिद्ग्रहणं व्यर्थं सत् अभ्यासविकारे बाध्यबाधकभावो नेति परिभाषां ज्ञापयति । ततः परत्वाद्दीर्घे प्राप्ते अकिद्ग्रहणसामर्थ्यात् पूर्वं नुकि ततो न दीर्घ इत्युक्तमिति बोध्यम् । तत्सत्वात् = अपवादत्वसत्वात् । उत्सर्गप्रवृत्तेरिति । आटः प्रवृत्तेरित्यर्थः । न चात्राटोऽप्रवृत्तिरेवास्तु को दोष इति वाच्यम् । तदप्रवृत्तौ नुट्प्रसङ्गात्। तत्प्रवृत्त्यङ्गीकारे तु नुडपेक्षया परत्वात् तत्प्रवृत्तौ सकृद्गतीतिन्यायेन तदप्रवृत्तिबोधनस्य सुलभत्वात् । न च नुटो नित्यत्वम् । आटि कृते नद्याम इव नुटोऽप्राप्तेरिति भावः । येन नाप्राप्तन्यायीयापवादत्वापेक्षया निरवकाशीयापवादत्वं न कुत्रापि भाष्ये दृष्टमित्यत आह। अत एवेति । निरवकाशीयापवादत्वस्य सत्वादेवेत्यर्थः । निरवकाशत्वादिति । ई च गण इत्यस्य गणरूपाभ्यासस्येत्यर्थेन हलादिश्शेषप्रवृत्तौ तद्रूपाभ्यासाभावेन निरवकाशत्वं बोध्यम् ।

नन्वेवं णकारस्येत्वे अजेगणदिति रूपापत्तिरिति चेन्न । अभ्यासविकारेषु बाध्यबाधकभावो नेति हलादिश्शेषप्रवृत्तौ भूतपूर्वगत्या गण्रूपत्वमादाय अस्य ईत्वप्रवृत्तेः सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात् गण्रूपाभ्यासस्येति व्याख्यातम् ।

गणेरवयवस्येति । वैयधिकरण्येनान्वये तु भूतपूर्वगतिर्नाश्रयणीया । एवं हलादिश्शेषानन्तरमीत्वस्य पुनरभ्याससंज्ञया सुसाध्यत्वात् । नन्वेवमपि अलोऽन्त्यपरिभाषया अभ्यासान्त्यणकारस्येत्यर्थेन तद्दोषतादवस्थ्यमिति चेन्न । तत्परिभाषयापि अभ्यासान्त्यस्यैवेत्यर्थः । न त्वन्यस्य णकारस्येति । अन्यथा रायो हलीत्यात्वं पराभ्यामित्यादाविकारे न स्यादिति बोध्यम् । एकदेशयुक्तिरिति । आटि कृते निर्दिश्यमानपरिभाषया पञ्चमीसमासेन चामोऽप्रवृत्त्या शब्दान्तरप्राप्त्यानित्ययोरित्युक्त्या निरवकाशस्यामोऽन्यत्राचारितार्थ्येन परत्वादामित्युक्त्या चास्यैकदेशयुक्तित्वं पञ्चमीसमासस्यानित्यत्वात् शब्दान्तरप्राप्त्येत्युक्तम् । क्वचिच्चारितार्थ्याभावेऽपि विप्रतिषेधोऽङ्गीक्रियत इति वक्तव्यम् । तदपेक्षया तस्यैकदेशयुक्तित्वकल्पनमेव युक्तमिति भावः ।

बालबोधिनी : आटश्च । योगोऽयं सूत्रकाररीत्या । भाष्यमते तु अटश्चेति न्यास इति विशेषमाह न माङ्योगे (6-4-74) इति । तत्र सूत्रे भाष्ये आडजादीनामिति सूत्रप्रत्याख्यानप्रकरणे अजादीनामटैव सिद्धं नार्थ आटा इति सूत्रं प्रत्याख्याय ततः एवं तर्हि वृद्ध्यर्थमाट् वक्तव्य इत्याक्षिप्य वृद्ध्यर्थमिति चेदटः । अटो वृद्धिं वक्ष्यामीति समाहितम् । आटश्चेति स्थाने अटश्चेति न्यासः कार्य इति तदाशयः । तथा न्यासे तु ङेप्रत्यये आडागमे बहुश्रेयस्यै इत्यत्र वृद्धिरेचीति बोध्यम् । ङसिङसोः ङेरामि च सवर्णदीर्घः। ननु आण्नद्या इत्यत्रापि अडेव कुतो न कार्य इत्यत आह अत्रेति । आण्नद्या इति सूत्रे इत्यर्थः । अयं भावः । ननु यदि आड़जादीनामिति सूत्रस्य प्रत्यख्यानाय अटश्चेति न्यासः क्रियते तर्हि अस्वपो हसतीत्यत्रापि रोरुत्वे कृते वृद्धिः प्राप्नोतीत्याशङ्क्य भाष्ये धातौ वृद्धिमटः स्मरेदिति समाहितम् । स्वपधातोर्लङि मध्यमपुरुषैकवचने सिपि अडागमे अस्वप्+स् इत्यवस्थायाम् अङ्गार्ग्यगालवयोरिति सिपोऽडागमे शपि तस्य लुकि अस्वपस् इति जाते सस्य रुत्वे हशि चेत्युत्वे अस्वप + उ हसतीत्यत्र आद्गुणं बाधित्वाऽटश्चेति वृद्धिः प्राप्नोति । न चान्तरङ्गायां वृद्धौ बहिरङ्गस्योत्वस्यासिद्धत्वम्, नाजानन्तर्य इति निषेधात् । एवं वृद्धिप्रसङ्गे तद्वारणाय अटश्चेत्यत्र उपसर्गादृतीत्यतो धातावित्यस्यापकर्षः कृतः । धात्ववयवाच्येव अटश्चेति वृद्धिर्भवतीति अस्वपो हसति, अस्वपोऽहसन्नित्यादौ न वृद्ध्यापत्तिः । प्रकृते बहुश्रेयस्यै इत्यादौ तुल्ययुक्त्या वृद्ध्यनापत्तिरिति आण्नद्या इत्यत्र अडिति वक्तुमशक्य इति भावः । पररूपं बाधकमिति । अतो गुणे इति पररूपस्य वृद्धिबाधकत्वेन बहुश्रेयस्यै इत्यत्र वृद्धिरेचीति वृद्धिरपि न भवति ।

ङेराम्नद्याम्नीभ्यः । व्याख्यानादिति । व्यवस्थायामिति निर्देशमूलकाद्-व्याख्यानादित्यर्थः । इह परत्वादिति । बहुश्रेयस्यामित्यत्र ङेरामादेशे बहुश्रेयसी+आम् इत्यत्र परत्वात् नुटं बाधित्वा आडागमे वृद्ध्युत्तरं सकृद्गतिन्यायेन बाधात् न पुनर्नुडिति भावः । इति भावः । पुनर्नुट् नेति भाव इत्यर्थः ।

ननु ङेराम्नद्यामित्यामः आडपवादत्वेनापवादप्रवृत्त्युत्तरमुत्सर्गस्याटः प्रवृत्तिःकथमिति शङ्कते यद्यपीति । नद्याम आडपवादत्वे बीजमाह सर्वथाऽनवकाशत्वादिति। उत्सर्गस्याटः प्रवृत्त्युत्तरं तेन व्यवधानात् नद्यामोऽप्राप्तिरिति निरवकाशत्वमिति भावः । न चाडागमे आटश्चेति वृद्धौ तस्य परादिवत्त्वेन ङित्वादाम् भवतीति वाच्यम् । पञ्चमीसमासेन स्थानिवद्भावात् वृद्ध्युत्तरमप्याटा व्यधानात् । तदप्राप्तियोग्येऽचारितार्थ्याभावात् येन नाप्राप्तन्यायस्य नायं विषयः । किन्तु निरवकाशत्वादपवादत्वं वक्तव्यम् । नन्वागमादेशयोर-विरोधात् कथमपवादत्वमत आह अपवादो नुग्दीर्घत्वस्येति । दीर्घोऽकितः (7-4-83) इति सूत्रेण अकितोऽभ्यासस्य यङि यङ्लुकि च दीर्घो विधीयते । अटाट्यते इत्यादिकमुदाहरणम् । नुगतोऽनुनासिकान्तस्य (7-4-85) इति सूत्रेणानुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुग्विधीयते । यंयम्यते इत्युदाहरणम् । दीर्घोऽकित इति सूत्रे भाष्ये 'अकित इति किमर्थम् ? यंयम्यते, रंरम्यते । अकित इति शक्यमकर्तुम् । नुकि कृतेऽनजन्तत्वात् । अपवादो नुग्दीर्घत्वस्य' इत्युक्तम् । यंयम्यते इत्यादौ निरवकाशत्वात् दीर्घं बाधित्वा नुगत इति नुकि कृते अनजन्तत्वेन दीर्घाप्राप्त्याऽकिद्ग्रहणं व्यर्थं सत् अभ्यासविकारे बाध्यबाधकभावो नेति परिभाषां ज्ञापयति । तथा च नुगपेक्षया परत्वाद्दीर्घे प्राप्ते अकिद्ग्रहणसामर्थ्यात् पूर्वं नुकि ततो न दीर्घ इति भावः । एवञ्चानेन भाष्येणागमादेशयोरपि अपवादत्वलाभ इति भावः । अपवादप्रवृत्त्युत्तरमुत्सर्गस्य प्रवृत्तिः कथमिति शङ्कां समाधत्ते तथापीति । तक्रकौण्डिन्यन्यायविषयको येन नाप्राप्तन्यायः । सत्यपि सम्भवे बाधनं भवतीत्यस्य न्यायस्य बाधकताबीजम् । सर्वे ब्राह्मणा भुज्यन्तां माठरकौण्डिन्यौ परिवेविषातामिति सर्वथा निरवकाशविषयोऽयं न्यायः । निरवकाशा हि विधयःसावकाशान् विधीन् बाधन्त इति निरवकाशस्य वचनसामर्थ्यादेव बाधकत्वम् । बाधकप्रवृत्त्युत्तरं सति सम्भवे उत्सर्गः प्रवर्तत एव । एवञ्च प्रकृतेऽनवकाशत्वेन बाधेऽपवादस्य = बाधकस्य प्रवृत्त्यनन्तरमुत्सर्गस्याटः प्रवृत्तेर्न दोष इति भावः ।

तक्रकौण्डिन्यन्यायविषयकयेन नाप्राप्तिन्यायस्य तदप्राप्तियोग्येऽचारितार्थ्यं हि बाधकताबीजम् । एतन्न्यायविषयोऽपवादपदार्थः । निरवकाशा हि विधयः सावकाशान्

बाधन्त इति माठरकौण्डिन्यन्यायविषयकः । बाधकशब्दो निरवकाशत्वेन बाधके योगरूढिः। एवमुभयोर्वैलक्षण्ये मानमाह अत एवेति । सर्वथा निरवकाशत्वेन बाधस्थले येन नाप्राप्तिन्यायेन बाधस्थलीयव्यवस्थाविलक्षणव्यवस्थास्वीकारादेवेत्यर्थः । भाष्ये उक्तमिति । तत्र हि भाष्ये अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्त इति परिभाषायाः फलनिरूपणावसरे गणेरीत्वं हलादिश्शेषस्य । गणेरीत्वमपवादत्वाद्धलादिश्शेषं बाधत इत्युक्त्वा तदुत्तरं न गणेरीत्वमपवादत्वाद्धलादिश्शेषं बाधते, किं तर्हि अनवकाशत्वादित्युक्तम् । अलोऽन्त्य-परिभाषैकवाक्यतया गण्रूपाभ्यासान्त्यस्येत्वमित्यर्थे हलादिश्शेषेण णकारनिवृत्तौ ईत्वमनवकाशमित्यर्थः । अनेन येन नाप्राप्तिन्यायेन बाधस्थलीयव्यवस्थापेक्षया निरवकाशत्वेन बाधस्थलीयव्यवस्थाऽन्येति फलितम् । उत्सर्गे कृतेऽचरितार्थस्यैवापवादत्वम्। गणेरीत्वं तु नाभ्यासलोपे कृते प्राप्नोति । अलोऽन्त्यस्येत्येकवाक्यतया वाक्यार्थेन णस्यैव तत्प्राप्तेः । एवञ्चानवकाशत्वं स्पष्टमेवेति भाव इति भाष्यप्रदीपोद्योतः । शब्दान्तरेति । आमि कृते शब्दान्तरप्राप्त्या आडनित्यः । आटि कृते निर्दिश्यमानस्य तेन व्यवधानादप्राप्त्या आम् स्वत एवानित्यः । एकदेश्युक्तिरिति । आमो निरवकाशत्वेन परत्वादिति कथानासङ्गतेरित्यर्थः । पादः पत् (6-4-130) इति सूत्रे भाष्ये पादः पदादेशे हि द्विपाच्छब्दस्य सर्वस्य पदादेशः प्राप्नोतीत्याशङ्क्य न वा निर्दिश्यमानस्यादेशादिति समाधाय निर्दिश्यमानपरिभाषाप्रयोजननिरूपणावसरे 'प्रयोजनं सुप्तिङादेशेषु' इत्युक्तम् । कुमार्याम्, खट्वायाम्, तस्यामित्यादौ आड्याट्स्याट्सु कृतेषु साड्याट्स्याट्कस्य आम् प्राप्नोति । निर्दिश्यमानेति दोषो न भवति । इदमिह सम्प्रधार्यम् । आड्याट्स्याटः क्रियन्तामामिति, किमत्र कर्तव्यम् । परत्वादाम् । अन्यस्य कृते आमि प्राप्नुवन्त्यन्यस्याकृते। शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति । उभयोरनित्ययोः परत्वादाम्' इत्युक्तम् । इदमिहेत्यादि-नैकदेशिना परत्वादामित्युक्ते, परेण तस्यै इत्यादौ परिभाषाप्रयोजने प्रदर्शिते उभय-साधारण्येनाह यस्तर्हीति' इत्युद्योते स्पष्टम् ।

अङ्यन्तत्वादिति । 'लक्षेमुट् चे त्यौणादिक -ई'-प्रत्ययान्तत्वादिति भावः। कुमारीति । ह्रस्वविधायके शास्त्रीयोपसर्जनग्रहणात् 'गोस्त्रियो'रिति ह्रस्वो न । अचि शनु । भ्रूशब्दोऽव्युत्पन्नं प्रातिपदिकं, भ्रमेडू प्रत्ययान्तो वा । इह य्वोरिति धातोः समानाधिकरणं विशेषणं, तदाह- इवर्णोवर्णान्तधातोरिति । इत्यस्येति । इत्यन्तस्येत्यर्थः । तेन सुभ्रुवाविति सिद्धम् । आन्तरेति । स्थानत इति भावः । य्वोरिति किं ? वव्रे । अचि किं ? युयात् । इतीयङीति । सुधीशब्दे यणिनिषेधारम्भादत्र प्रकरणे 'धातोःस्वरूपग्रहणे'इति परिभाषाया अप्रवृत्तिरिति भावः।

भावबोधिनी : शास्त्रीयोपसर्जनेति । उपसर्जनसंज्ञिकस्य ग्रहणादित्यर्थः । ननु गमः क्वाविति प्रकरणस्योङ् च गमादीनामिति वार्तिकनिष्पन्नभूशब्दस्य धातुत्वेन सिद्धावपि अवयवविशेषवाचकभूशब्दस्य उवङर्थं सूत्रे तद्ग्रहणमावश्यकमिति मत्वा आह भ्रूशब्द इति । ऊप्रत्ययान्तो वेति । नन्वेवं वार्तिकनिष्पन्नस्यास्य चार्थे विशेषाभावेन स एवास्त्विति भ्रूग्रहणं व्यर्थमिति चेन्न । औणादिकानां संज्ञाशब्दत्वेनावयवविशेषरूढत्वात् । किञ्च परमभ्रूशब्दाण्णिचि क्विपि तयोर्लोपे टिलोपे परमभ्रू इत्यस्योकारान्तधातुत्वाभावेन तत्रोवङर्थं भ्रूग्रहणस्यावश्यकत्वाच्च । सुधीशब्दे इति । ओस्सुपीत्युक्त्या सुपो धातुविहितत्वाभावेन धातोः स्वरूप इत्यस्याप्रवृत्त्या भ्रूशब्दे प्राप्तेण्णिषेधार्थं भ्रूग्रहणस्यावश्यकत्वात् सुधीशब्द इत्युक्तमिति ज्ञेयम् । अत्र प्रकरणे इति । इयङुवङ्यण्विधायकसूत्रयोरित्यर्थः । अप्रवृत्तिरिति । इदमयुक्तम् । सुधी औ इत्यत्र इको यणचीति प्राप्तयण्निषेधेन सुधीग्रहणस्य चरितार्थत्वात् । न चैवं तत्र कुर्यादिति वाच्यम् । ओस्सुपीत्यस्य निषेधायात्र करणात् । अत्र न भुवः तत्र न सुधियः इति करणे तु गौरवमिति वदन्ति ।

बालबोधिनी : कुमारीति । कुमारीमिच्छन् कुमारीवाचरन् ब्राह्मणः कुमारी । क्यजन्तादाचारक्विबन्ताद्वा कर्तरि क्विप् । यद्यपि क्विबर्थं प्रति ङ्यन्तस्योपसर्जनत्वाद् ह्रस्वत्वं प्राप्तम्, तथापि गोस्त्रियोरित्यत्र कृत्रिमोपसर्जनत्वं गृह्यते न त्वप्रधानरूपमिति नात्र ह्रस्वः प्रवर्तत इति भावः। शास्त्रीयमिति । एकविभक्ति चापूर्वनिपाते इति शास्त्रविहितमित्यर्थः ।

अचि श्नुधातुभ्रुवाम् । ननु ऊङ् च गमादीनामिति वार्तिकनिष्पन्नभ्रूशब्दस्य क्विबन्तस्य धातुत्वादेव सिद्धे तद्ग्रहणं व्यर्थमत आह भ्रूशब्द इति । व्युत्पत्तिपक्षे आह भ्रमेरिति । सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात् य्वोरिति धातोरित्यनेन सामानाधिकरण्येनान्वेतीत्याह समानाधिकरणं विशेषणमिति । वैयधिकरण्येनान्वये धातोरवयवेवर्णोवर्णयोरित्यर्थे क्षिपतीत्यादावतिव्याप्तिः । वलि लोपेन तत्रेष्टसिद्धावपि ऊयतुरित्यादौ अवलूपरे दोषः । अङ्गाधिकारे तदन्तविधेरिष्टत्वात् भ्रूशब्दान्तस्येत्यर्थ इत्याह इत्यन्तस्येति। तत्फलमाह तेनेति । स्थानत इति । स्थानत आन्तर्यात् तालुस्थानकस्येवर्णस्य तादृश एवेयङ् । ओष्ठस्थानकस्योवर्णस्य तादृश एवोवङित्यर्थः ।

इतीयङिति । कुमारी+औ इत्यादावियङि प्राप्ते इत्यर्थः । परिभाषाया अप्रवृत्तिरिति। अयमाशयः । धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति परिभाषा । धातूद्देश्यकं कार्यं धातुत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रये प्रत्यये परे भवतीति परिभाषार्थः । यथा

कंसपरिमृड्भ्यामित्यादौ क्विबन्तात् कंसपरिमृज्शब्दात् भ्याम्प्रत्यये तस्य धातुविहितप्रत्ययत्वाभावेन न मृजेर्वृद्धिरिति वृद्धिः । नन्वेवं सति अचि श्नुधातुभ्रुवामिति इयङुवङोः धातुसंशब्दनेन विहितप्रत्यय एव प्रवृत्त्या सुधियौ इत्यादौ धातूद्देश्यक-प्रत्ययपरत्वाभावेन कथमियङिति चेदुच्यते । अस्या अनित्यत्वेनेयङादिविधौ न प्रवर्तते। यदि नित्यत्वं स्यात्तर्हि सुधीशब्दे सुपि परेऽनया परिभाषया एरनेकाच इति यणोऽप्राप्त्या न भूसुधियोरिति तन्निषेधो व्यर्थः स्यादिति भावः । अस्या अनित्यत्वादेव, कुमार्यौ इत्यत्र धातूद्देश्यकप्रत्ययपरत्वाभावेन कथमियङः प्राप्तिशङ्केति प्रश्नः समाहितः। किञ्च न भूसुधियोरिति इयङ्घटितनिर्देशोऽपि अस्या अनित्यत्वे मानम् । अन्यथाऽनया परिभाषयेयङोऽप्रप्त्या तन्निर्देशासङ्गतिरिति भावः ।

एरनेकाचो। धात्ववयवसंयोगपूर्वो न भवतीति । धात्ववयवसंयोगपूर्वभिन्न इत्यर्थः। तद्भिन्नश्च धात्ववयपूर्व एवेति उदियावित्यादौ न दोषः । 'असंयोगा' दित्येव धात्ववयवसंयोगभिन्नात्परस्येत्यर्थेन सिद्धे पूर्वग्रहणं स्पष्टार्थम् । एः किम् ? असंयोग-पूर्वग्रहणमिवर्णविशेषणं यथा स्यात् , अङ्गविशेषणं मा भूदिति । तेन 'यवक्रिया' वित्यादौ नातिप्रसङ्गः। 'लुलुवतु' रित्यादौ तु नातिप्रसङ्गः, 'ओःसुपी' ति नियमात् । विपरीतनियमस्तु न, सुधीशब्दे अचि सुपि यण्निषेधारम्भात् । कुमार्याविति । अन्तर्वर्तिविभक्त्या पदत्वाच्छाकलं त्वत्र न, 'नः क्ये' इति निषेधात् । प्रधीरिति । 'प्रकृष्टं ध्यायती' ति विग्रहे नित्यस्त्रीत्वाभावान्न नदीत्वम् । 'प्रकृष्टा धीर्यस्ये' ति विग्रहे तु नदीत्वम् । ग्रामणीरिति । 'अग्रग्रामाभ्यां नयते' रिति णत्वम् ।

<u>**भावबोधिनी :**</u> प्रसज्यप्रतिषेध इति प्रतीयते न भवतीत्युक्तेरित्यतः पर्युदासपरतया व्याचष्टे धात्ववयवेत्यादिना । पर्युदासाश्रयणे फलमाह तद्भिन्नश्चेति । धात्ववयवपूर्वकत्वेन सादृश्यमिति भावः । उदियाविति । उत्पूर्वादीञ्धातोः प्रश्लिष्टादीधातोर्वा क्विप् । न दोष इति । धात्ववयवसंयोगपूर्वकभिन्नत्वेऽपि धात्ववयवपूर्वकत्वाभावादादिवर्णस्य न दोष इत्यर्थः । नन्वेवमपि लिट् ए लिडियावित्यादौ दोष इति चेन्न । धात्ववयवपूर्वेत्यस्य स्वघटितधात्ववयवपूर्वक इत्यर्थात् स्वम् इवर्णः । मूलस्य धात्ववयवसंयोग-पूर्वकत्वाभाववदिवर्ण इत्यर्थाश्रयणे तु उक्तस्थले दोषो दुर्वार एवेति भावः। इत्येवेत्यस्य अस्त्विति शेषः । धात्ववयवसंयोगभिन्नादिति । भिन्नश्च स्वघटितधात्ववयव एव गृह्यते। तेन उदियावित्यादौ न दोष इति भावः । वस्तुतस्तु इदमयुक्तम् । यवक्रियावित्यादौ रेफस्य धात्ववयवसंयोगभिन्नत्वेन स्वशब्दार्थेकारघटितधात्ववयवत्वेन च तत्परत्वमादाय

दोषस्य दुर्वारत्वात् । केचित्तु असंयोगादित्येवास्तु । संयोगपदं तदवयवपरम् । नञर्थाभावस्य पञ्चम्यर्थपरत्वेऽन्वयः । ततश्च धात्ववयवसंयोगावयवनिरूपित-परत्वाभाववान् स्वघटितधात्ववयवपूर्वश्च य इवर्ण इत्यर्थेन न कुत्रापि दोष इति तं ग्रन्थाशयं वदन्ति । तच्च नाक्षरस्वरसानुगुणमिति विभावयन्तु सुधियः । एः किमिति । अचि श्नु इत्यत इकारस्यानुवृत्तिसम्भवे एरिति व्यर्थमिति मत्वा प्रश्नः । इवर्णविशेषणमिति । तत्सामर्थ्याच्छ्रुते इवर्ण एवान्वय इति भावः । तेनाङ्गविशेषणत्वाभावेन । ननु पूर्वसूत्रादिवर्णानुवृत्तौ उवर्णोऽप्यनुवर्तेत । ततश्च लुलुवतुरित्यादावपि यणापत्तिरित्यत आह लुलुवतुरिति । नियमादिति । काममनुवर्तताम् । पुनः रोः सुपीत्यारम्भेण ओः सुपीत्येव नियमादित्यर्थः । विपरीतेति । सुपि ओरेवेति विपरीतनियमो नेत्यर्थः । तत्र ज्ञापकमाह सुधीशब्द इति । एवञ्चोवर्णाननुवृत्तौ ओः सुपीति तात्पर्यग्राहकमिति भावः । शाकलन्त्विति । इकोऽसवर्ण इति प्रकृतिभावं त्वित्यर्थः । प्रकृष्टं ध्यायतीति । ध्यानं स्मृत्यनुकूलव्यापारः । तत्र प्रपदार्थस्य कर्मत्वेनान्वये इव तत्फलभूतस्मृतावभेदेनान्वयेऽपि यण् भवत्येव कारकत्वाविशेषात् । उक्तं हि क्रियाविशेषणानां कर्मत्वं नपुंसकतेति । तत्र ह्ययं विवेकः । स्तोकं पचतीत्यादौ पचधात्वर्थफलभूतविक्लित्तौ स्तोकपदार्थस्या-भेदेनान्वयेन तादात्म्येन फलावच्छिन्नत्वात् स्तोकस्य फलतावच्छेदकसम्बन्धेन क्रियाजन्यफलाश्रयत्वं कर्मत्वमिति विवक्षणात् । एवञ्च सूत्रसिद्धकर्मानुवादकं वार्तिकमिति । यदा तु स्तोकस्य विक्लित्त्यनुकूलव्यापारेऽन्वयः तदा स्तोकः पाक इत्येव । स्तोकस्य कर्तृत्वात् पाकवत् तादात्म्याश्रयत्वान्यतरसम्बन्धेन प्रकृतधातूपात्तव्यापारविशिष्टत्वं कर्तृत्वमिति विवक्षणात् । अत एवोत्तरत्र सकृल्लूशब्दे ग्रन्थकृता सकृदित्यस्य कारकत्वमङ्गीकृतम् । कटोऽपि कर्म भीष्मादयोऽपि कर्मेत्यनेन भाष्यकृता विशेषणविभक्तेः कर्मत्वादिबोधकस्य स्वीकृतत्वात् । अत एव हि भीष्मं कटं कुरु, सुन्दरेण देवदत्तेन भुज्यत इत्यादौ भीष्मसुन्दरपदाभ्यां द्वितीयातृतीये सिध्यतः । यत्र हि कर्तुरभिधानं तिङादिना तत्र प्रथमैव । यथा स्तोकः पाकोऽस्तीत्यादौ । एवञ्च स्तोक इत्यस्य कर्तृत्वं सूपपादमेवेति बोध्यम् । न नदीत्वमिति । ध्यानकर्तृत्वरूपप्रवृत्तिनिमित्तस्य लिङ्गत्रयसाधारण्येन निरुक्तनित्यस्त्रीत्वाभावादिति भावः । नदीत्वमिति । वृत्तेः पूर्वं धीशब्दस्य नित्यस्त्रीत्वेन प्रथमलिङ्गग्रहणञ्चेत्यनेन नदीत्वमिति भावः । न चात्र नेयङुवङाविति निषेधः शङ्क्यः । केवलधीशब्दे इयङः स्थितिसत्वेऽपि अन्यत्र धीशब्दे तदभावात् यणा बाधात् ।

बालबोधिनी : एरनेकाच । धात्ववयवसंयोगपूर्वो न भवतीति व्याख्यानेन नञः क्रियान्वयात् प्रसज्यप्रतिषेध इति भ्रमः स्यादित्यतः पर्युदासपरतया व्याचष्टे धात्ववयवेति। धात्ववयवसंयोगः पूर्वो यस्मात् सः । न धात्ववयवसंयोगपूर्व इत्यर्थः । धात्ववयवपूर्व एवेति । पर्युदासन्यायेन धात्ववयवसंयोगपूर्वभिन्नः तत्सदृशश्च धात्ववयवपूर्व एव । तत्त्वेन सादृश्यादिति भावः । तथा व्याख्याने फलमाह उदियाविति । उत्पूर्वादीङ् गतौ इत्यस्मात् क्विपि औप्रत्यये उदी + औ इत्यत्र धात्ववयवसंयोगपूर्वभिन्नत्वेऽपि धात्ववयवपूर्वत्वा-भावादुवर्णस्य न दोष इत्यर्थः ।

एः किमिति । अचि श्नुधात्विति सूत्रादनुवृत्त्यैव सिद्धे तद्ग्रहणं किमर्थमिति प्रश्नः। इवर्णविशेषणमिति । इवर्णोपादाने श्रुतानुमितयोः श्रुतस्य प्राबल्येन असंयोगपूर्वग्रहणमिवर्णविशेषणं स्यात् । न त्वनुमितस्याङ्गस्य विशेषणम् । तत्फलमाह तेनेति । असंयोगपूर्वग्रहणस्येवर्णविशेषणत्वेनेत्यर्थः । नातिप्रसङ्ग इति । यणापत्तिर्नास्तीत्यर्थः। अङ्गविशेषणत्वे तस्य धात्ववयवयवसंयोगपूर्वभिन्नत्वेन यवक्रियावित्यादौ यण् प्रसज्येत । नन्वत्र एरित्यस्याग्रहणे पूर्वसूत्रात् य्वोरिति इवर्णोवर्णयोरुभयोरप्यनुवृत्तिः प्रसज्येत । तथा सति लुलुवतुरित्यादौ यणापत्तिरिति तन्निवृत्त्यर्थमेरिति गृहीतमित्यत आह लुलुवतु-रित्यादाविति । अत्र सूत्रे य्वोरित्यनुवृत्तावनेनैव यण्सिद्धौ ओस्सुपीति सूत्रं व्यर्थं सत् उवर्णान्तस्य चेत् सुप्येवेति नियमाय भवतीति लुलुवतुरित्यादौ नातिप्रसङ्गः । विपरीतनियम इति । सुपि चेदुवर्णान्तस्यैवेति विपरीतनियमो नेत्यर्थः । तत्र हेतुमाह सुधीशब्दे इति । अचि सुपीति । यदि विपरीतनियमस्तर्हि सुधीशब्दस्य नियमेनैव यण्व्यवृत्तिसम्भवे न भूसुधियोरिति तन्निषेधो व्यर्थः स्यादिति भावः । कुमार्याविति । क्यजन्तादाचारक्विबन्ताद्वा कर्तरि क्विपि औप्रत्यये यणि रूपम् । शाकलमिति । इकोऽसवर्णे इति प्रकृतिभाव इत्यर्थः। न नदीत्वमिति । अवयवस्य धीशब्दस्येत्यर्थः । नदीत्वमिति । धीशब्दस्य नित्यस्त्री-त्वादित्यर्थः । प्रकृष्टा धीरिति कर्मधारयेऽप्येवमेव ।

'गतिकारकपूर्वस्यैवे'ति भाष्ये पठ्यते, स च नियमः । तेन गतिकारकपूर्वभिन्नस्य नेति फलति। तद्भिन्नश्च - तत्सदृशं, सपूर्वपदमेव । तेन 'निन्यतु'रित्यादौ यण् , तदाह - गतिकारकेतरेति । यत्तु -अत्र गतिसमासो नित्याधिकारस्थ एव प्रतिपदोक्तत्वाद्गृह्यते इति, तन्न ; भाष्ये पूर्वपदग्रहणाभावेन समासोपस्थितेरभावेन विशिष्टरूपोपादानविषय-प्रतिपदोक्तपरिभाषाया अप्रवृत्तेः । अत एव नदीसञ्ज्ञासूत्रस्थः 'प्रकृष्टा धीर्यस्या'इति विग्रहाभिप्रायेण प्रवृत्तः - 'प्रद्ध्यै ब्राह्मण्यै'इति भाष्यप्रयोगः सङ्गच्छते । शुद्धधियाविति ।

'शुद्धा धीर्यस्ये'ति विग्रहः । 'शुद्धं ध्यायती'ति विग्रहे यणेव । आद्ये सत्त्वभूतार्थ-कधीशब्दार्थविशेषणत्वाच्छुद्धत्वस्य कथमपि न कारकत्वमिति भावः।

भावबोधिनी : स च नियम इति । स च एवकारः नियमार्थ इत्यर्थः । तद्भिन्नश्च = गतिकारकपूर्वभिन्नश्च । नित्याधिकारस्थः नित्यं क्रीडेत्यतः नित्यमित्यनुवर्त्य कुगतीत्यनेन विहितसमासः । एवकारेण वस्तुतो गतिपूर्वकविशेषणसमासव्यावृत्तिः । भाष्ये गतिकारकेति भाष्ये । विशिष्टरूपेत्यादि । तच्छब्दमुच्चार्य विहितत्वरूपप्रतिपदोक्तत्वावच्छिन्नविषयक-बोधजनकपदोपादानं विशिष्टरूपोपादानम् । अत एव वस्तुतो गतिपूर्वकविशेषण-समासस्यापि ग्रहणादेव । यणेवेति । शुद्धस्य कर्मत्वे क्रियाविशेषणत्वे वा कारकत्वाद्यणेवेति भावः । सत्वभूतार्थक इति । ज्ञानार्थक इत्यर्थः । न कारकत्वमिति। नन्वेवं रीत्या पूर्वोक्तभाष्ये प्रध्यै इत्यनुपपन्नमिति वाच्यम् । तत्र धीशब्दार्थो न ज्ञानं किन्तु ध्यानम् । तच्च स्मृत्यनुकूलव्यापारः । प्रशब्दार्थस्य स्मृतिविशेषणत्वेनोक्तरीत्या कर्मत्वम् । व्यापारविशेषणत्वे उक्तरीत्या कर्तृत्वम् । ततश्च कारकपूर्वत्वादेव यणस्सिद्धत्वात् । अत एवोत्तरत्र ग्रन्थे धीशब्दोपात्तधात्वर्थ इति वक्ष्यति । ननूक्तरीत्या शुद्धा धीर्ध्यानमित्यर्थे स्मृतौ वा व्यापारे वा शुद्धत्वस्य विशेषणे शुद्धधीशब्दे यणः प्रकृष्टा धीः ज्ञानमित्यर्थे प्रधीशब्दे इयङश्चापत्तिः, सुधीशब्द इवेति चेन्न । इष्टापत्तेः । दुध्र्यायतीति दुष्टं यथा तथा दुष्टं पुरुषं वा ध्यायतीत्यर्थः । दुष्टा धीः ध्यानमिति । दुश्शब्दार्थस्य स्मृतौ व्यापारे वाऽन्वयः ।

बालबोधिनी : यद्यपि एरनेकाच (6-4-82) इति सूत्रे भाष्ये 'गतिकारकपूर्वस्यैवेष्यते' इति पठितम् । तथापि तत्फलितार्थवचनमेव गतिकारकेतरपूर्वपदस्य यण् नेष्यत इति, मूलस्य नासङ्गतिरित्याह गतिकारकेति । गतिकारक-पूर्वस्यैवेत्यत्रैवकारो नियमार्थः । सपूर्वस्य चेत् गतिकारकपूर्वस्यैवेति । तेन नियमेन गतिकारकपूर्वभिन्नस्य यण् नेत्यर्थः फलति । गतिकारकपूर्वभिन्नः तत्सदृशश्च सपूर्व एवेति भावः । पर्युदासन्यायेन सपूर्वत्वलाभस्य फलमाह तेनेति । गतिकारकपूर्वभिन्नस्य सपूर्वस्यैव ग्रहणेन नियमकोट्यप्रविष्टतया निन्यतुरित्यादौ गतिकारकपूर्वत्वाभावेऽपि यण् सिध्यतीति भावः । नियमफलितमर्थमाह तदाहेति । गतिकारकपूवस्यैव यणिष्यते इति तु नोक्तम् । कुमारीमिच्छन् ब्राह्मणः कुमारी, कुमार्यौ, कुमार्य इत्यत्र यणभावप्रसङ्गादिति तत्त्वबोधिनीकारः । वस्तुतस्तु एवकारस्य नियमार्थत्वाश्रयणेन सपूर्वत्वाभावेन नियमानन्त-र्गततया दोषो नास्तीति बोध्यम् ।

गतिकारकेतरपूर्वपदस्येति वार्तिके गतिपदेन नित्यं क्रीडाजीविकयोरिति नित्याधिकारस्थः कुगतिप्रादय इति सूत्रेण विहितो गतिसमास एव प्रतिपदोक्तत्वाद् गृह्यत इति केचित् । तन्मतमनूद्य खण्डयति यत्त्विति । तन्नेति । भाष्ये = गतिकारकपूर्वस्यैवेष्यत इत्यत्र । पूर्वपदग्रहणाभावेनेति । पूर्वस्येत्युक्तं न तु पूर्वपदस्येत्यर्थः । अप्रवृत्तेरिति । लाक्षणिकत्वेनाभिमतं प्रतिपदोक्तत्वेन चाभिमतं यच्छास्त्रद्वयं तादृशशास्त्रद्वयीयविधेयताव-च्छेदकरूपावच्छिन्नोद्देश्यताकत्वमेवैतत्परिभाषाप्रवृत्तौ लिङ्गम् । यथा तत्पुरुषसमासे तृतीयाद्यन्तस्य पूर्वपदस्य स्वरविधायके 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्यय-द्वितीयाकृत्याः' इति सूत्रे लाक्षणिकत्वेन प्रतिपदोक्तत्वेन चाभिमतं यच्छास्त्रद्वयं विशेषणं विशेष्येण बहुलम्, तृतीयातत्कृतार्थेनेति । तदीयविधेयतावच्छेदकं तत्पुरुषत्वम् । तद्रूपावच्छिन्नोद्देश्यताकत्वं तत्पुरुषे तुल्यार्थे इत्यत्र वर्तत इति तत्रेयं परिभाषोपतिष्ठते । गतिकारकेत्यत्र पूर्वपदग्रहणे समासोपस्थितेः सत्वेन तत्र लाक्षणिकत्वेन प्रतिपदोक्तत्वेन चाभिमतम् अनेकमन्यपदार्थे इति कुगतीति शास्त्रद्वयम् । तदीयविधेयतावच्छेदक-समासत्वावच्छिन्नोद्देश्यताकत्वस्य गतिकारकेत्यत्र सत्वेनास्याः परिभाषाया उपस्थितौ प्रकृष्टा धीः प्रधीरिति प्रतिपदोक्तगतिसमासे एव यण् स्यात् । न तु प्रकृष्टा धीर्यस्येति लाक्षणिकबहुव्रीहिसमासे इति, तदर्थे प्रध्यै इति न स्यात् । तथा सति बहुव्रीहिसमासाभिप्रायेण प्रयुक्तं प्रध्यै इति भाष्योदाहरणमसङ्गतं स्यात् । एवञ्च गतिकारकेत्यत्रे पूर्वपदग्रहणाभावात् समासोपस्थितेरभावेन समासत्वरूपविधेयताव-च्छेदकावच्छिन्नोद्देश्यताकत्वस्याभावात् प्रतिपदोक्तत्वेनाभिमतशास्त्रीयविधेयताव-च्छेदकं लाक्षणिकत्वेनाभिमतशास्त्रीयविधेयतावच्छेदकं च यद्रूपं, तद्रूपावच्छिन्नो-पादानविषयप्रतिपदोक्तपरिभाषाया अप्रवृत्त्या प्रकृष्टा धीर्यस्या इति विग्रहाभिप्रायेण प्रवृत्तः प्रध्यै ब्राह्मण्यै इति भाष्यप्रयोगः संगच्छत इति भावः । अत एव = गतिकारकेत्यत्र प्रतिपदोक्तपरिभाषाया अप्रवृत्त्या । आद्ये = शुद्धा धीर्यस्येति विग्रहे शुद्धधियावित्यत्र । न कारकत्वमिति । असत्त्वभूतक्रियान्वयिनामेव कारकत्वादिति भावः । शुद्धं ध्यायतीतिविग्रहे शुद्धत्वस्यासत्वभूतक्रियान्वयित्वेन कारकत्वात् यण् भवत्येवेति बोध्यम् । शुद्धत्वस्य = तदवच्छिन्नस्य ।

कथन्तर्हीति । 'दुर्ध्यायती'ति 'दुष्टा धीर्ध्यानं येषा'मिति, वृश्चिकाद्धीरिति विग्रहाभिप्रायेण प्रश्नः। दुःस्थितेति । दुः शब्दोपात्तदुष्टत्वस्य स्थितिक्रियाविशेषणत्वमिति भावः। प्रकृष्टा धीरित्यादौ प्रकर्षः प्रशब्दार्थो धीशब्दोपात्तधात्वर्थे विशेषणमिति यण् भवत्येव। यत्क्रियेति । या चासौ क्रियेत्यर्थः । तं प्रति = तद्वाचकं प्रति । यद्वा - यस्य

धातोर्वाच्यया क्रियया युक्ता इत्यर्थः। नेहेति । ततश्च सम्बन्धसामान्यषष्ठ्यैव समासः। भीत्रार्थानामिति तु हेतुत्वप्रकारकबोधे तृतीयाबाधनार्थम् । विभक्तिप्रकरणे तु न कृतं, कारकत्वप्रयुक्तकार्यानापत्तेरिति भावः । किञ्च हेतुत्वाविवक्षायां सम्बन्धत्वेन विवक्षया षष्ठी सूत्रारम्भेऽपीत्यपि बोद्ध्यम् । अभ्युच्चयेनाह - वृश्चिकसम्बन्धिनीति । अत्र पूर्वपदान्तर्गतोत्तरपदलोपः शाकपार्थिवादित्वात् ।

भावबोधिनी : विग्रहाभिप्रायेणेति । एवञ्च तादृशाभिप्राये यणिष्ट एवेति भावः । नन्वेवं प्रशब्दार्थस्य कृषधात्वर्थेन योग इति यण् स्यादत आह प्रकृष्टेति । तद्वाचकमिति। लक्षणेति भावः । ननु प्रगतः ऋच्छकः प्र ऋच्छक इत्यादौ ऋच्छतेरपि गत्यर्थकतया तं प्रत्युपसर्गत्वापत्त्या उपसर्गादृतीति वृद्ध्यापत्तिरत आह यद्वेति । अत्र पक्षे तमित्यस्य लक्षणा नेत्यपि लाघवम् । षष्ठ्यैव समास इति । सर्वत्र बुद्धिकृतविश्लेषावधित्वमादाय ध्रुवमपायेऽपादानमित्येव सिद्धे भीत्रार्थानामिति सूत्रं भाष्यकृता प्रत्याख्यातम् । बुद्धिकृतविश्लेषावधित्वविवक्षणे सम्बन्धसामान्यविवक्षणे षष्ठ्यास्सुलभत्वादिति भावः। ननु सूत्रमतेनात्र षष्ठ्या भवितव्यमिति नारम्भप्रत्याख्यानयोः प्रत्याख्यानमयुक्तमिति पञ्चम्यैवात्र भवितव्यमित्यत आह भीत्रार्थेति । तृतीयाबाधनार्थमिति । भीत्रार्थानां प्रयोगे भयहेतुत्वेन विवक्षितोऽर्थः अपादानमिति सूत्रार्थः । न तु वस्तुगत्या भयहेतुरितीति बोध्यम् । ननु तृतीयाबाधकत्वे कर्तृकरणयोरित्यनन्तरं कुतो न कृतमित्यत आह विभक्तीति। अनापत्तेरितीति । संज्ञामविधायैव पञ्चमीविधाने कारकसंज्ञाभावेन वृश्चिकभ्यावित्यादौ यण् न स्यादिति भावः । ततश्च प्रकृते किमित्यत आह किञ्चेति । एवञ्चेत्यर्थः । एवञ्चेति पाठः साधुः । षष्ठीति । एवञ्चारम्भप्रत्याख्यानयोः फलभेदो नेति बोध्यम् । वस्तुगत्या भयहेतुरित्यर्थे तु सम्बन्धत्वेन विवक्षायामपि भाष्यमते तृतीयापत्त्या आरम्भप्रत्याख्यानयोः फलभेदो दुर्वार एवेति वाच्यम् । प्रत्याख्यानपरभाष्य-प्रामाण्येनानभिधानस्य वक्तव्यत्वात् ।

ननु सूत्रमते भाष्यमते च षष्ठ्या उपपन्नत्वेनैकेनैवालमित्यत आह अभ्युच्चयेति। एवञ्च मनोरमोक्तं हेयमिति भावः ।

बालबोधिनी : ननु 'गतिकारकपूर्वस्यैव यणिष्यते' इति वचनेन दुर्धियौ, दुर्धियः, वृश्चिकभियौ, वृश्चिकभियः इत्यादावपि यण् कुतो न स्यादिति शङ्कते कथमिति । दुर्ध्यायन्तीति, दुष्टा धीः येषामिति, वृश्चिकाद्भीरिति विग्रह इति शङ्कितुराशय इत्याह विग्रहाभिप्रायेणेति । दुष्टा धीर्येषामिति विग्रहे धीशब्दो न सत्त्वभूतार्थक इत्याह ध्यानमिति।

समाधत्ते दुःस्थितेति । दुःस्थिता धीर्येषामिति विग्रहः । प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोप इति बहुव्रीहिः । स्थितिक्रियाविशेषणत्वमिति । यत्क्रियानिरूपितगतित्वमेव न तु ध्याननिरूपितमिति भावः । ननु प्रकृष्टा धीरिति विग्रहे प्रध्यै इत्यत्र प्रशब्दस्य कृषिं प्रति गतित्वात् कथं यणिति शङ्कयामाह प्रकृष्टेति । धीशब्दोपात्तधात्वर्थे = ध्याने । यत्क्रियेत्यत्र विग्रहमाह या चासाविति । तं प्रतीत्यत्र तच्छब्दस्य तद्वाचके लक्षणेत्याह तं प्रतीति । या चासौ क्रियेति विग्रहे तं प्रतीति पुँल्लिङ्गनिर्देशोऽनुपपन्न इत्याह यद्वेति । यस्य = धातोः क्रियेति षष्ठीतत्पुरुषः । सम्बन्धसामान्येति । वृश्चिकस्य भीरिति षष्ठीतत्पुरुषः । बुद्धिकृतापादनत्वाविवक्षायां सम्बन्धसामान्ये षष्ठी । ननु वृश्चिकाद्भीरित्यादौ बुद्धिकृतमेवापादानत्वमादाय पञ्चम्युपपत्तेः भीत्रार्थानामिति सूत्रस्य भाष्यकृता प्रत्याख्यानेऽपि तदारम्भपक्षे विशेषमाह तृतीयाबाधनार्थमिति । यत्तु विभक्तिप्रकरणे एव अकर्तर्यृणे पञ्चमीति सूत्रानन्तरं भीत्रार्थानां भयस्येति सूत्रं कार्यम् । हेतावित्यस्य पञ्चमीत्यस्य चानुवृत्त्या इष्टसिद्धिर्भविष्यतीति । तन्न । वृश्चिकभीत इत्यादौ 'थाऽथघञ्क्ताऽजबित्रकाणाम्' इत्यादिकारकत्वप्रयुक्तस्वरादिकार्यानापत्तेरित्याह विभक्तिप्रकरणे इति ।

ननु बुद्धिकृतापादानत्वमाश्रित्य भीत्रार्थानामिति सूत्रप्रत्याख्यानपक्षे शेषत्वविवक्षायां षष्ठी सुलभा । तदारम्भपक्षे षष्ठ्याः दुर्घटत्वेनारम्भप्रत्याख्यानयोः फलभेद इत्यत आह सूत्रारम्भेऽपीति । हेतुत्वाविवक्षायां षष्ठी निर्बाधैवेति पक्षद्वयेऽपि फलभेदस्याभावेन न षष्ठीसमासानुपपत्तिरिति भावः । भीत्रार्थानामिति सूत्रं षष्ठीबाधनार्थमिति वैतण्डिकतया ये वदन्ति तत्सिद्धसूत्रमतेऽप्याह वृश्चिकसम्बन्धिनीति, मनोरमाकारः । तद्ग्रन्थं कटाक्षयन्नाह अभ्युच्चयेनेति । सम्बन्धसामान्यषष्ठ्यैव समास इत्याद्यसमाधानस्य सूत्रकारभाष्यकृन्मतद्वयसाधारण्त्वेन न ततोऽस्य वैलक्षण्यमिति भावः । अयमाशयः । वृश्चिकभीरित्यत्र वृश्चिकाद् भीरिति न विग्रहः । तथा सति कारकपूर्वत्वात् वृश्चिकभिय इत्यत्र इयङपवादो यण् दुर्वारः स्यात् । किन्तु अपादानत्वाविवक्षायां सम्बन्धसामान्ये षष्ठीति वृश्चिकस्य भीः वृश्चिकभीरिति षष्ठीसमास इत्याद्यं समाधानम् । भीत्रार्थानमिति सूत्रप्रत्याख्यानपक्षे शेषत्वविवक्षायां षष्ठी । सूत्रारम्भपक्षेऽपि भीत्रार्थानामित्यस्य हेतुत्वप्रकारकबोधे तृतीयाबाधकतया सार्थक्यात् षष्ठीबाधकत्वकथनमयुक्तम् । तथा च पक्षद्वयेऽपि शेषत्वविवक्षया षष्ठ्येव भवतीति नास्ति फलभेद इति ग्रन्थकारः । एव स्थिते भीत्रार्थानामित्यारम्भपक्षे तस्य शेषषष्ठीबाधनार्थत्वस्य कैयटेनोक्तत्वेन फलाभेदाय प्रत्याख्यानपक्षेऽपि वृश्चिकभीरित्यादौ षष्ठ्या अप्रवृत्तेरवश्यं वक्तव्यत्वेन तस्या अनभिधानमेवेति कैयटानुयायिनः । अत एवाद्यं समाधानं परित्यज्य वृश्चिकसम्बन्धिनीति

परिहारान्तरमाहेति तेषामभिप्रायः । वस्तुतस्तु प्रागुक्तरीत्या आरम्भप्रत्याख्यानयोः शेषषष्ठ्याः सिद्धतया आद्यसमाधानापेक्षया न द्वितीयसमाधानस्य वैलक्षण्यं किन्तु परिहारान्तरमिति ग्रन्थकृदाशयः ।

न भू । अनन्तरस्येति न्यायेन 'एरनेकाचः' 'ओः सुपी'त्यनयोरेव निषेधः । 'सुपी'ति चानुवर्त्तते, तदाह - सुपीति । लोपाविति । 'अतो लोपः' 'लोपो व्योर्वली' त्याभ्यामिति भावः । यलोपे निषेधादल्लोपो न स्थानिवत् । वेरपृक्तलोपात्पूर्वं वलि लोप इष्यते । स्थानिवत्त्वादिति । एवञ्च यणादेशे यलोपे 'सख् ' इति स्यादिति भावः । अन्तर्वर्त्तिविभक्त्या पदत्वात् न पदान्तेति निषेधस्तु न स्थानिवत्त्वस्य । 'नः क्ये' इति सामान्यापेक्षनियमेनास्यापदत्वात् । परपदस्थाजादेशस्यैव तेन स्थानिवत्वनिषेधाच्च । क्विबपेक्षक्यच्सम्बन्धियलोपस्य यणि बहिरङ्गासिद्धत्वन्तु न , अनित्यत्वात् । क्वौ लुप्तमिति-भावे क्तः, लोप इत्यर्थः । गोमत्यतेरप्रत्यये गोमानिति भाष्योक्तेरस्याऽप्यर्थस्य क्वचिदङ्गीकारः। क्वौ विधिं प्रति नेत्येव तु सार्वत्रिकमित्यन्यत्र विस्तरः। अनङिति । अभिव्यक्तपदार्था ये इति न्यायस्तु गौणमुख्यन्यायवत्पदकार्यविषय एवेति भावः । दीर्घस्यापीति । प्रयोगस्थयकारान्तानुकरणं, सूत्रेऽकारश्चोच्चारणार्थ इति भावः। लूनीरित्यादि । 'ल्वादिभ्यः' 'क्षायो मः' 'प्रस्त्योऽन्यतरस्या'मिति नत्व-मत्वे । 'शुषः कः' 'पचो वः' इति कत्व-वत्वे ।

<u>**भावबोधिनी :**</u> अनयोरेव निषेध इति । सुध्युपास्य इत्यादौ इको यणचीति भवत्येवेति भावः । इदञ्च सुपीत्यनुवृत्तितात्पर्येण तदनुवृत्तौ न दोष इति मत्वाह सुपीति चेति । चशब्दो वार्थे । न च सुपीत्यनुवृत्तौ वर्षाभ्वश्चेति सूत्रे तदनुवर्तते न वा ? आद्ये गौरादित्वात् ङीषि वर्षाभ्वी कमठी डुलिरित्यत्र यणनापत्तिः । द्वितीये मण्डूकप्लुत्यापत्तिरिति वाच्यम् । अनित्यत्वादिति । स्वमते नाजानन्तर्यपरिभाषा-भावादिति भावः । गौरादिपाठोऽप्रामाणिक एव । कोशे वर्षाभूरित्येव पाठः साधुरिति वक्ष्यमाणत्वात् । स्वमते मण्डूकानुवृत्तिरेव । गौरादित्वात् ङीषि वर्षाभ्वित्यङ्गीकारात् । न सुधिय इत्येव सूत्रयितुमुचितम् । न च स्वयंभूशब्दादौ यणापत्तिः। वर्षाभ्वश्चेत्यारम्भेण भूशब्दस्य यदि यण् वर्षापूर्वस्यैवेति नियमात् । न च वर्षापूर्वस्य यदि भूशब्दस्यैवेति विपरीतनियमापत्त्या वर्षासु लुनातीत्यर्थकवर्षालूशब्दे यण् न स्यादिति वाच्यम् । दृन् करोति भूशब्दे यणारम्भेण विपरीतनियमाभावात् । सामान्यापेक्षनियमेनेति । विशेषापेक्षत्वे तु नान्तभिन्नं तत्सजातीयं हलन्त्यमेव व्यावर्त्यं स्यादिति बोध्यम् । स्वमतरीत्याह

परपदस्थेति । युक्तश्चायमर्थः । मूलोक्तार्थे तु पञ्चमीसमासोदाहरणत्वेन भाष्यकृता दर्शिते अपीपचन्नित्यत्र उसः पदचरमावयवत्वेन स्थानिवत्त्वनिषेधापत्तेः । न च पदे पर इत्येवालम्, न तु परपदस्थ इति वक्तव्यमिति वाच्यम् । अपीपचन् पाचका इत्यत्र निषेधापत्तेः ।

बालबोधिनी : न भूसुधियोः । अनयोरेव निषेध इति । तथा च सुध्युपास्य इत्यत्र यण्णिषेधो नेति भावः । प्रकारान्तरमाह सुपीति वेति । अनन्तरस्येति न्यायेन एरनेकाचः, ओस्सुपीति विहितयण एव प्रतिषेधात् इको यणचीति भवत्येव । अथवा सुपीत्यनुवर्त्य अजादौ सुप्येव निषेधात् सुध्युपास्य इत्यत्र न निषेधप्रसङ्ग इति भावः । लोपाविति । सखायमिच्छति सखीयति । सुप आत्मन इति क्यचि अकृत्सार्वधातुकयोरिति दीर्घः । ततः सखीयशब्दात् धातुसंज्ञकात् क्विपि अतो लोप इत्यल्लोपे लोपोव्योरिति यलोपः । यलोपे कर्तव्ये अल्लोपस्य न स्थानिवत्त्वम् । न पदान्तेति तन्निषेधात् । ततश्च सखीशब्दस्य निष्पत्तिरिति भावः ।

वेरपृक्तलोपादिति । क्यजन्तस्य सखीयशब्दस्य सनाद्यन्ता इति धातुसंज्ञायां ततः क्विपि अतो लोपे, वलि लोपे तदुत्तरमेव वेरपृक्तस्येति वलोप इष्यत इत्यर्थः । अन्यथा पूर्वं वेरपृक्तस्येति लोपे ततोऽल्लोपे वल्परत्वाभावेन यलोपो न स्यादिति भावः

स्पष्टञ्च मनोरमायाम् - 'न च परत्वात् वेरपृक्तस्येति स्यादिति वाच्यम् । वेरपृक्तलोपाद्वलि लोपः पूर्वविप्रतिषेधेन' इति वार्तिककारोक्तेः इति । लोपो व्योरिति सूत्रे क्वावुपसंख्यानमिति वार्तिकम् । तस्यापूर्वत्वापेक्षया क्वौ यथा लोपसिद्धिर्भवति तथा वक्तव्यमित्यर्थः । सा च पूर्वविप्रतिषेधेनेत्याशयेनैवमुक्तमिति बोध्यमिति शब्दरत्नकारः । परत्वादिति । लोपो व्योरिति लोपापेक्षया परत्वादित्यर्थः । एवञ्चायं भाष्यरूढ इति सिद्धम्। स्थानिवत्त्वादिति । अल्लोपयलोपयोः कृतयोः सखीत्यत्र अचः परस्मिन्नित्यनेनाल्लोपस्य स्थानिवत्त्वात् यणि प्राप्ते क्वौ लुप्तं न स्थानिवदिति तन्निषेधः । अन्यथा यणि तल्लोपे सख् इति स्यादिति भावः । लुप्तमिति नपुंसके भावे क्तः । क्वौ लोप इत्यर्थः । ननु क्यजन्तात् क्विपि निष्पन्नसखीशब्दस्यान्तर्वर्तिविभक्त्या पदत्वात् यणादेशे पदान्तविधौ कर्तव्ये न पदान्तेति स्थानिवत्त्वनिषेध इत्याह अन्तर्वर्तीति । तदेव नेत्याह नः क्ये इति । क्यचि क्यङि वा सुबन्तं यदि पदं स्यात्तर्हि नान्तमेवेति सामान्यनियमेन सखीशब्दस्य नान्तत्वाभावेन पदत्वाभावात् न पदान्तेति न स्थानिवत्त्वनिषेध इति भावः । पदान्तविधावित्यस्य पदचरमावयवे विधावित्यर्थे भाविपदत्वमादायापि न स्थानिवत्त्वनिषेध इत्याह परपदस्थेति।

पदचरमावयवे कर्तव्ये परपदस्थाजादेशस्यैव स्थानिवत्त्वनिषेधेन प्रकृते तदभावेन न तन्निषेध इति भावः ।

ननु अल्लोपस्य स्थानिवत्त्वेन यणि प्राप्ते क्यच्सम्बन्धियलोपस्य बहिरङ्गासिद्धत्वेन न यणादेशस्य प्राप्तिरित्यत आह अनित्यत्वादिति । लुप्तमिति कर्मण्यर्थासङ्गतेराह भावे क्त इति । अन्यथा लोपस्य लोपकर्मत्वाभावादसङ्गतं स्यात् । अनेन भाष्यप्रयोगेण क्वचित् सकर्मकेभ्योऽपि भावे क्तो भवति यत्र प्रयोगस्य न गत्यन्तरमिति लभ्यते । न पदान्तसूत्रे 'क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्' इति वार्तिके क्विलुगित्यंशस्यायमनुवादः। क्विप्प्रत्ययपरको लोपो न स्थानिवदित्यर्थः ।

यद्यपि न पदान्तसूत्रे क्वौ लुप्तं न स्थानिवदिति निराकृत्य क्वौ विधिं प्रति न स्थानिवदित्युक्तम् । तथापि गोमत्यतेः क्यजन्तात् क्विपि गोमानिति भाष्योक्तेः क्वौ लुप्तं न स्थानिवदित्यर्थस्याप्यङ्गीकार आवश्यक इति लभ्यत इत्याह गोमत्यतेरिति । अप्रत्ययः = क्विप् । अन्यथा गोमानित्यत्राल्लोपस्य स्थानिवद्भावान्नुम् न स्यादिति भावः । क्वौ विधिं प्रति न स्थानिवदित्येव सार्वत्रिकम् । क्वौ लुप्तमिति तु क्वाचित्कमिति न पदान्तसूत्रे उद्योते स्पष्टमित्याह अन्यत्र विस्तर इति ।

अनङिति । ननु गौणमुख्यन्यायमूलकात् ।

> अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
> शास्त्रार्थस्तेषु कर्तव्यश्शब्देषु न तदुक्तिषु ॥

इति न्यायात् मुख्ये एव कार्यप्रवृत्तेर्वक्तव्यतया सखीयतेः निष्पन्नसखीशब्दस्यानङ्णित्वे कथं भवेताम् । तत्र सखिशब्दार्थस्याप्राधान्यादित्यत आह पदकार्यविषय एवेति । अनङ्णिद्वद्भावयोः पदकार्यत्वाभावेन न तत्र गौणमुख्यन्यायः, तन्मूलकाभिव्यक्तपदार्था ये इति न्यायो वा न प्रवर्तत इति भाव ः ।

दीर्घस्यापीति । ख्यात्यादिति सूत्रे खितिशब्दयोः, खीतीशब्दयोरुभयोरपि ग्रहणम्। प्रयोगस्थयकारान्तेति। ख्यत्यशब्दयोरित्यर्थः । सूत्रे = ख्यत्यादिति सूत्रे। लूनीरिति । लूञ्धातोः क्तप्रत्यये ल्वादिभ्य इति निष्ठाया नत्वे लूनशब्दात् क्यचि ईत्वे रूपम् । क्षाममिच्छतीति क्षामीः । क्षैधातोः क्तप्रत्यये आदेच इत्यात्वे क्षायो मः इति मत्वे क्यच् । प्रस्तीममिच्छतीति प्रस्तीमीः । स्त्यै धातोः क्तप्रत्यये आत्वे प्रस्त्योऽन्यतरस्यामिति निष्ठातकारस्य मत्वे क्यचि रूपम् । शुषः कः । क्यच् । शुष्कीः । पचो वः । क्यच् । पक्वीः।

व्याख्यानात् , प्राधान्याच्च रूपातिदेशोऽयमित्याह - क्रोष्टृशब्द इति । तच्चोदात्त ऋकारविशिष्टमतिदिश्यते, तृज्वदिति चकारोच्चारणात् । तेन 'क्रोष्टा' इत्यादौ 'उदात्तयणः' इति स्वरसिद्धिर्बोद्ध्या । पक्त्रादेस्तु नातिदेशः, अर्थत आन्तर्याभावात् । इदं सूत्रं 'स्त्रियाञ्चे'ति च प्रयोगनियमफलकमिति बोद्ध्यम् ।

भावबोधिनी : प्राधान्यादिति । सर्वकार्याणां रूपार्थत्वात् रूपस्य कार्यापेक्षया प्राधान्यादित्यर्थः । ननु रूपातिदेशेऽपि स्वरातिदेशो न स्यात् । वर्णसंस्थानविशेषस्यैव रूपत्वेन स्वरस्य रूपत्वाभावात् । अत एव भिन्नस्वरयोः हरितहरिणप्रकृतिकङ्यन्तयोः हरिणीशब्दयोरेकशेष इत्यत आह तच्चेति । उच्चारणादिति । तृज्वत्क्रोष्टुरिति । वक्तव्य इत्यस्य शेषः । तेन उदात्त ऋकार विशिष्टस्यातिदेशेन । स्वरसिद्धिरिति । उदात्तस्थानिकयण्सत्वे हि प्रवृत्तिरित्यर्थः । ननु तृज्वदित्युक्ते रूपातिदेशेन तृजन्तत्वेन रूपेण तुल्यं वर्तत इत्यर्थो लभ्यते । तृजन्तं कर्तृतुल्यं पक्तृ इत्यादिः । तस्यातिदेशः स्यादित्यत आह पक्त्रादेस्त्विति । अर्थत इति । क्रोष्टुशब्दार्थत इत्यर्थः । तादृशश्च क्रुशधातुप्रकृतिकतृजन्त एवेति तस्यैवातिदेश इति भावः । अत्रेदं बोध्यम् । यद्यपि स्थानषष्ठ्यभावेन स्थानेऽन्तरतम इति नोपतिष्ठते । तथापि रूपातिदेशस्य फलतः स्थान्यादेशभावपर्यवसायित्वेनोक्तपरिभाषाप्रवृत्तिमभ्युपेत्यैवमुक्तमिति । प्रयोगनियमफल–कमिति । अजन्तक्रोष्टृशब्दः तृन्नन्तक्रोष्टृशब्दश्च वर्तते । उभयोरपि प्रयोगे प्राप्ते तयोर्मध्ये तृजन्तस्यैव सर्वनामस्थाने स्त्रियाञ्च प्रयोग इति नियमः, तत्फलकमित्यर्थः । ननु ऋच् क्रोष्टुरित्येवास्तु अलोऽन्त्यस्येति सिद्धेः चकारोच्चारणाच्च स्वरसिद्धेश्चेति चेन्न । तृजन्तत्वाभावेन क्रोष्टाराविव्यादौ दीर्घानापत्तेः । न च तृजन्तस्य दीर्घ इत्युक्ते इत्संज्ञकचकारविशिष्टतृजन्तस्य दीर्घ इत्यर्थः । अत्र च सर्वे सर्वपदादेशा इति न्यायेन चित्वमर्थवत्त्वञ्च नास्ति । एवञ्चोक्तस्थले दीर्घे कर्तव्ये षत्वस्यासिद्धत्वेनेत्संज्ञक–चकारविशिष्टतृप्रत्ययान्तत्वस्याक्षतत्वेन दीर्घसिद्धिरिति वाच्यम् । अस्य विलम्बोपस्थितिकत्वेन लक्षणप्रतिपदोक्तपरिभाषयाऽपि तृन् तृजित्यत्र ग्रहणानापत्तेः । किञ्च त्वदुक्त सर्वे सर्वपदादेशा इति न्यायेन क्रोष्टु इत्यस्य क्रोष्टृ इत्यादेश इत्यपि सम्भवेन क्रोष्टृ इत्यादौ स्थानिवत्त्वेन घित्वान्नाभावापत्तेश्च । एतेन तृच् क्रोष्टुरित्येवास्तु प्रत्ययग्रहणपरिभाषया अर्थत आन्तर्याच्च तृजन्तक्रोष्टृशब्दः आदेशो भवतीत्यपास्तम् । किञ्चैवमस्य तृचः अपूर्वत्वेन प्रत्ययग्रहणपरिभाषाप्रवृत्त्या अनेकाल्त्वेन तृच एव सर्वादेशत्वापत्तेश्चेति बोध्यम् ।

बालबोधिनी : व्याख्यानादिति । निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरूप-विषयकत्वेनातिदेशः षड्विधः । निमित्तातिदेशो यथ चिकीर्षति, चिकीर्षते । 'पूर्ववत्सनः' इत्यनेन येन निमित्तेन सनः प्रकृतिभूताद्धातोरात्मनेपदं भवति तन्निमित्तं सन्नन्तेऽतिदिश्यते । तेन सन्नन्तस्य ञित्वातिदेशे कर्त्रभिप्राये तङ् सिध्यति । व्यपदेशातिदेशोदाहरणम् आद्यन्तवदिति । अनेनादित्वान्तत्वव्यवहारस्यातिदेशः । तेन यथा कर्तव्यमित्यादौ तव्यप्रत्यये आदित्वव्यवहारस्य मुख्यस्य सत्वादाद्युदात्तत्वं भवति एवमौपगव इत्यादावण् प्रत्ययेऽपि तद् भवति । तथा आभ्यामित्यत्रान्तत्वातिदेशेन सुपि चेति दीर्घः सिध्यति । तादात्म्यातिदेशो यथा - सुबामन्त्रिते पराङ्गवत्स्वरे इत्यनेन परशुना वृश्चन्नित्यत्र परशुनेत्यस्य वृश्चन्शब्दाङ्गत्वातिदेशेन पकाराकारस्य आमन्त्रितस्येत्यनेन आद्युदात्तत्वं सिध्यति । शास्त्रातिदेशस्योदाहरणं कालेभ्यो भववदिति । अनेन भवार्थे यच्छास्त्रं तत्र भव इत्यधिकारविहितं कालाट्ठञ् इति, प्रावृष एण्य इति च । तस्य 'साऽस्यदेवता' इत्यर्थेऽति-देशः । तेन मासो देवताऽस्य मासिकम् प्रावृड् देवताऽस्य प्रावृषेण्यमिति सिध्यति। कार्यातिदेशः स्थानिवद्भावस्थले प्रसिद्धः । रूपातिदेशो यथा - वतण्डी चासौ वृन्दारिका च वातण्ड्यवृन्दारिका । अत्र वतण्डीशब्दे पुंवत्कर्मधारय इत्यनेन पुंवाचकवातण्ड्य-शब्दरूपमतिदिश्यते । अन्ये तु -

> कार्यरूपनिमित्तर्थशास्त्रतादात्म्यशब्दिताः ।
> व्यपदेशश्च सप्तैतानतिदेशान् प्रचक्षते ॥

इति सप्तविधत्वमाहुः । अतिदेशभेदेष्वयं रूपातिदेश इत्याह व्याख्यानादिति । युक्त्यन्तरमाह प्राधान्यादिति । प्राधान्यञ्चास्य सर्वेष्टसम्पादकत्वेन बोध्यम् । रूपातिदेशेऽपि प्रयोगसमवायिनः कस्य रूपस्यातिदेश इत्याशङ्कायामाह तच्चेति । रूपञ्चेत्यर्थः । तच्च तृजिति चकारोच्चारणसामर्थ्यात् अन्तोदात्तस्वरविशिष्टमिति ऋकारस्योदात्तत्वात् क्रोष्ट्रेत्यदौ उदात्तयण इति स्वरसिद्धिरिति भावः ।

ननु रूपातिदेशे क्रोष्टुशब्दस्य तृजन्तसामान्यातिदेशः कुतो नेत्यत आह अर्थत इति। क्रोष्टुशब्दार्थत इत्यर्थः। क्रुश आह्वाने रोदने च इति धातोः 'सितनिगमिमसिसच्य-विधाञ्क्रुशिभ्यस्तुन्' इति तुन्प्रत्यये क्रोष्टुशब्दः । क्रश्धातोः कर्तरि तृचि च क्रोष्टृशब्दः । द्वावपि शृगालवाचिनौ । तयोरविशेषेण सर्वत्र प्रयोगे प्राप्ते असम्बुद्धौ सर्वनामस्थाने स्त्रियाञ्च तुन्नन्तस्य नित्यं तृजन्तरूपातिदेशेन तत्र तृजन्तस्यैव प्रयोगः, न तु तुन्नन्तस्येति प्रयोगनियमः फलतीति भावः ।

अप्तृन् । ननु व्युत्पत्तिपक्षे तृन्नन्तत्वात्तृजन्तत्वाद्वा दीर्घे सिद्धे नप्त्रादिग्रहणं व्यर्थम् , अत आह - नियमार्थमिति - 'अन्येषामुणादिव्युत्पन्नानां सञ्ज्ञाशब्दानां ने'ति । नेष्ट्रादयोऽप्युणादय एवेति भावः। - ''तेषां 'तृन्नि'ति सूत्रस्थवार्तिकेन व्युत्पादनान्नप्त्रादीत्यादिग्रहणेन प्रशास्तृशब्दस्यैव ग्रहणम् -'' इत्यन्ये । अव्युत्पत्तिपक्षे तु विद्ध्यर्थमेवेति बोद्ध्यम् । भाष्यप्रयोगादिति । एवञ्चोणादिष्वस्य व्युत्पादनमप्रामाणिकमिति भावः । पङ्कजादिवद्योगरूढोऽयम् । ये त्वौणादिकत्वमेवास्य स्वीकृत्य भाष्यप्रयोगादेव दीर्घत्वमिच्छन्ति, ते मान्याः, भाष्यकृताऽन्यप्रयोगस्योदाहरणत्वेन दानेऽप्यस्य भाष्यप्रयोगत्वाभावात् । ण्वुल्तृचाविति भाष्ये तु - ''तृचश्चकारो व्यर्थः, न च 'अप्तृन्तृच्' इत्यादौ विशेषणार्थः', तृ' इत्येव सिद्धेः । न च 'तृ' इत्युच्यमाने मातरौ पितरावित्यादौ प्राप्नोति, तत्र हि तृप्रत्ययो निरनुबन्धक इति वाच्यं, नप्तृग्रहणस्य 'योनिसम्बन्धवाचिनाञ्चेदस्यैव नान्येषां योनिसम्बन्धवाचिना'मिति नियमात्'' - इत्युक्तम् । नेष्टृत्वष्टृहोतृपोतृणान्तृन्नन्तत्वस्य, प्रशास्तुस्तृजन्तत्वस्य 'तृन्नि'ति सूत्रे भाष्यवार्तिकयोरुक्तत्वेन तेषां ग्रहणं प्रपञ्चार्थमेव । एवञ्च यथान्यासे नियमफलं चिन्त्यम् । क्रोष्टेति । अनङि 'सर्वनामस्थाने चे'ति दीर्घः, प्रथमोपस्थितत्वात् । क्रोष्टारावित्याद्यर्थन्तु तल्लेखः। यद्वा विशेषविहितत्वाच्छीघ्रोपस्थितिकत्वेन स एव न्याय्यः।

<u>**भावबोधिनी :**</u> अन्येषामिति । क्वचिन्मूलपुस्तकेषु नियमो न दृश्यत इत्यनेन सूचितमिति ज्ञेयम् । संज्ञाशब्दानामिति । उणादिषु सर्वेषां संज्ञाशब्दत्वेन संज्ञाशब्दानामित्यर्थः, तथापि संज्ञाशब्दानां यदि स्यादिति लघुभूतनियमार्थम् । उणादयः संज्ञाशब्दा एवेति बोधनार्थं वा तथोक्तमिति ध्येयम् । उणादय एवेति । एतेन केचित्तेषामुणादित्वं नाङ्गीकुर्वन्तीति सूचितम् । तदाह तेषामिति । एतन्मते तृन्नन्तत्वादिनैव सिद्धे नेष्ट्रादिपञ्चकग्रहणं व्यर्थमेवेति भावः । उक्तमतद्वयापेक्षया विलक्षणं स्वमतमाह ण्वुलिति । एवञ्चेति । मात्रादिशब्दानां नप्तुश्च भाष्यतस्तृप्रत्ययान्तत्वलाभे चेत्यर्थः । यथान्यास इति । ण्वुल्तृचौ, अप्तृन्तृजिति न्यास इत्यर्थः । नियमफलं चिन्त्यमिति । नप्तुः तृप्रत्ययान्तत्वेन विध्यर्थत्वादितरेषां प्रपञ्चार्थत्वात् नियमव्यावर्त्यस्य मात्रादेः तृप्रत्ययान्तत्वाच्च मूलोक्तनियमस्यैवावकाशाभावेन क्व तत्फलमिति भावः । अत्र केचित्। तृचश्चकाराभावे आद्युदात्तश्चेति आद्युदात्तत्वसिद्धावपि तुरिष्ठेमेयस्सु तुश्छन्दसीत्यादौ तृच एव ग्रहणं स्यात् । निरनुबन्धत्वात् । इष्यते च तृन्तृचोः सामान्येन ग्रहणम् । अतो भाष्यमेकदेशिन इति मूलखण्डनमयुक्तमिति वदन्ति । तदपरे न क्षमन्ते । शेखरकृतो न विशिष्टभाष्ये तात्पर्यम् । किन्तु तदुक्ततृप्रत्ययांश एव । तृचश्चकारो मास्त्विति

भाष्यस्यैकदेश्युक्तित्वमस्तु । तस्माच्छेखरोक्तमेव युक्तमिति चकारं वर्जयित्वा अप्तृन्तृ इत्येव सूत्रयितुमुचितम् । अर्थवद्ग्रहणपरिभाषया तृच एव सम्भवात् प्रयोगे तृन्नन्तत्वाभावाच्च । न चोक्तभाष्यरीत्या मात्रादेः तृन्नन्तत्वेन निरनुबन्धत्वेनार्थवत्वाच्च तस्यैव ग्रहणापत्त्या दोष इति वाच्यम् । सूत्रे नप्तृग्रहणेन तदन्तग्रहणस्य वक्तुं शक्यत्वात्। न चैवं तृत्वस्य प्रत्ययाप्रत्ययसाधारणतया प्रत्ययग्रहणपरिभाषा नोपतिष्ठत इति वाच्यम्। प्रत्ययमात्रग्रहणे इत्यस्य प्रत्ययमात्रप्रतीतीच्छया उच्चरिते इत्यर्थात् । अत एव वनो रचेत्यत्र वनंशे तदन्तविधिरित्याहुः ।

बालबोधिनी : अप्तृन्तृच् । व्युत्पत्तिपक्षे इति । उणादयो व्युत्पन्नानि प्रातिपदिकानीति पक्षे इत्यर्थः । उणादिषु 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' इति सूत्रेण तृन्तृचौ विधाय 'नप्तृनेष्टृहोतृपोतृभ्रातृपोतृभ्रातृजामातृमातृपितृदुहितृ' इति सूत्रेण नप्त्रदयो निपातिताः। तथा च संज्ञाशब्दास्ते तृन्नन्ता वा औणादिका इति स्थितिः । तदेवाह तृन्नन्तेति । उणादिव्युत्पन्नानां संज्ञाशब्दानां चेत् नप्त्रादीनामेवेति नियमसिद्धिं मनसि निधाय तद्व्यावर्त्यमाह अन्येषामिति । औणादिकेषु संज्ञाशब्देषु नप्त्रादिसप्तानामेव तृन्तृजन्तानां दीर्घ इति नियमेन तदितरेषां पितृभ्रात्रादीनां न दीर्घः । धातृशब्दस्य तु भवत्येवेति भावः । नेष्ट्रादय इति । नप्तृनेष्टृ इत्यौणादिकसूत्रेण तथा निपातनादित्यर्थः । तृन्निति सूत्रस्थवार्तिकेनेति। तेषां = नेष्ट्रादीनाम् । तृन् (3-2-135) इति सूत्रभाष्ये तृन्विधौ 'ऋत्विक्षु चानुपसर्गस्य' इति वक्तव्यम् । होता, पोता । अनुपसर्गस्य किम् ? प्रशास्ता, प्रतिहर्ता । औणादिकतृजन्त एवायम् । नयतेस्तृन् वक्तव्यः षुक्च । नेष्टा । त्विषेर्देवतायां तृन् वक्तव्यः, अकारश्चोपधाया अनिट्त्वं च । त्वष्टा । क्षदेश्च युक्ते तृन् वक्तव्यः । क्षत्ता । एवं होतृपोतृनेष्टृत्वष्टृक्षतृशब्दाः तृन्नन्ता व्युत्पादिताःतदनुसारेण तदतिरिक्तस्यैवौणादिकत्वेन नप्तृप्रशास्तृग्रहणमेवोक्त-नियमार्थम् । अन्येषां पञ्चानामिह ग्रहणं प्रपञ्चार्थमिति भावः । तदेवोक्तम्आदिशब्देन प्रशास्तृशब्दस्य ग्रहणमिति । सिद्धान्तमाह अव्युत्पत्तीति । भाष्यप्रयोगादिति । समर्थसूत्रे उद्गातार इति भाष्यप्रयोगादित्यर्थः । अस्य = उद्गातृशब्दस्य । अप्रामाणिकमिति । अन्यथा प्रकृतनियमेन दीर्घो न स्यादिति भावः ।

ननु कृद्व्युत्पन्नस्य यौगिकत्वं दृष्टम् । रूढस्यास्य कथं तत्वमत आह पङ्कजादीति । एवञ्चास्योणादिभिन्नत्वेन नियमशरीराप्रविष्टतया दीर्घः सिध्यतीति भावः । केचित्तु उद्गातृशब्दस्यौणादिकत्वमेव स्वीकृत्य भाष्यप्रयोगात् दीर्घं साधयन्ति । तत्रारुचिमाह ये त्विति । मान्यत्वे हेतुमाह भाष्यकृतेति । अन्यप्रयोगस्येति । अन्यत्र दृष्टस्य होतृपोतृनेष्टोद्-

गातार इत्यस्येत्यर्थः । भाष्यप्रयोगत्वाभावादिति । स्वातन्त्र्येण तथा प्रयोगस्याकरणादित्यर्थः । अन्यदीयप्रयोग एवायं न तु भाष्यकृत इति तेन दीर्घसाधनं न युक्तमिति भावः । भाष्यारूढं नियमस्वरूपमाह ण्वुल्तृचाविति । अस्यैव = नप्तृशब्दस्यैव । इत्युक्तमिति । उद्गातृशब्दस्य नियमानन्तर्गततया स्वत एव दीर्घ इति तदर्थं मूलकृदुक्तयत्नो निष्फल इति भावः । यथान्यासे = ण्वुल्तृचौ, अप्तृन्तृच् इति यथान्यासे । नियमफलं चिन्त्यमिति । ण्वुल्तृचाविति भाष्योक्तेन योनिसम्बन्धवाचिविषयकनियमेन मातृपित्रादिशब्दानां केवलतृप्रत्ययान्तत्वलाभेन तृजन्तत्वाभावाद्दीर्घाप्राप्त्या पित्रादिषु दीर्घव्यावृत्तेः नियमफलत्वेन प्रदर्शनमसङ्गतमिति भावः । ण्वुल्तृ, अप्तृन्तृ इति भाष्योक्तन्यासे पित्रादिषु दीर्घवारकतया नियमार्थं नृप्तृग्रहणं सफलम् । ण्वुल्तृजिति यथान्यासे पित्रादीनां तृप्रत्ययान्तत्वेन तत्र दीर्घव्यावृत्तेरभावेन न नप्तृग्रहणं नियमार्थम्, किन्तु प्रपञ्चार्थमिति भावः।

प्रथमोपस्थितत्वादिति । अष्टाध्याय्यामिति शेषः । तल्लेखः । अप्तृन् इत्यस्य लेखः। विशेषविहितत्वादिति । तृन्तृचोः साक्षादुपादानेन दीर्घस्य विधानादित्यर्थः । स एव = अप्तृन् इत्येव ।

विभाषा तृ । अयमपि नियम एव - 'तृतीयादावच्येवोभय'मिति । तेन भ्यामादौ, शसि, क्रोष्टुपुत्र इत्यादौ च न दोषः, सर्वत्र विशिष्टाभावस्य सुलभत्वात् । 'तृज्वत्क्रोष्टुः' 'स्त्रियाञ्चे'त्याभ्यां सर्वनामस्थाने स्त्रियाञ्च तृजन्तरूपविधानेन तयोः प्रयोगनियमार्थत्वं फलति । एतेन 'तृज्वत्सर्वनामस्थान' एवेति नियमादिदं विद्ध्यर्थमिति परास्तम् । न चैवमपि क्रोष्टूनित्याद्यसङ्गतम् ,अन्यत्र तृजन्तस्यैव प्रयोगेणाप्युक्तनियमस्य चारितार्थ्यादिति वाच्यं, 'तृज्वत्क्रोष्टु'रिति योगविभागस्यैवं सति वैयर्थ्यापत्तेः । न च तद्धितेष्वचामादेः, इको गुणवृद्धी इति सूत्रयोः क्रौष्टुः, क्रौष्ट्रीया इति भाष्यप्रयोगासङ्गतिरिति वाच्यम् । ऋकारान्तस्यैव ऋषिवाचकत्वेनादोषात् । इदं सूत्रत्रयन्तु शृगालवाचिक्रोष्टुक्रोष्टृशब्दयोर्व्यवस्थार्थमित्यवधेयम् । तदुक्तं भाष्ये - 'तृज्वद्भावविषये एतत्तृजन्तं मृगवाचीति, तृतीयाद्यजादिविभक्तिषु तृजन्तं तुन्नन्तञ्च मृगवाची'ति च । अनेन हि अन्यत्र तुन्नन्तमेवेत्यपि सूचितमिति दिक् ।

<u>**भावबोधिनी :**</u> नियम एव = प्रयोगनियमफलक एव । सर्वत्र विशिष्टाभावस्येति । भ्यामादौ विशेषणाभावप्रयुक्तस्य विशिष्टाभावस्याजादितृतीयाद्यभावस्य सुलभत्वादित्यर्थः । तृज्वद्रूपविधानेन तृजन्तरूपातिदेशेन । एतेन = अस्मदुक्तनियमस्य निर्दुष्टत्वेन । इदम्= स्त्रियाञ्चेति प्रकृतञ्चेति द्वयम् । विध्यर्थमिति । सर्वत्रोभयप्रयोगे प्राप्ते सर्वनामस्थान एव

तृजन्तप्रयोगनियमेऽन्यत्र तदसिद्ध्या तयोर्विध्यर्थत्वमिति भावः । परास्तमिति । सर्वनामस्थान एव तृजन्त इति नियमेऽपि तत्र तुन्नन्तप्रयोगानिवृत्त्या चाजादितृतीयादौ अप्राप्ततृजन्तप्रयोगविधानेऽपि तुन्नन्तस्यापि प्रयोगसिद्ध्या विभाषापदवैयर्थ्येन च परास्तमिति भावः । अस्मदुक्तसर्वनामस्थाने तृजन्त एव स्त्रियां तृजन्त एव तृतीयादावच्येवोभयम् । अजादितृतीयादन्यत्रान्यतर इति नियमे तु न कोऽपि दोष इति भावः । नन्वजादितृतीयादेरन्यत्र शसादावन्यतरप्रयोग इति सिद्धमन्यतरस्य तृजन्तस्यैव प्रयोग इति त्वन्मतेऽपि दोष इति शङ्कते न चेति । वैयर्थ्यापत्तेरिति । अजादितृतीयादन्यत्र अन्यतरस्य तृजन्तस्यैव प्रयोगाभ्युपगमेऽविशेषात् सर्वनामस्थानेष्वपि तृजन्तस्यैव प्रयोगसिद्ध्या तृज्वत्क्रोष्टुः विभाषा तृतीयादिष्वचीत्येक एव योगे कर्तव्ये तृज्वत्क्रोष्टुरिति पृथक्करणस्य वैयर्थ्यापत्त्या अन्यत्र तृजन्तस्यैव प्रयोगकल्पनमनुचितमिति भावः ।

बालबोधिनी : विभाषा तृतीयादिष्वचि । अयमपि = विभाषा तृतीयादिष्विति योगोऽपि । तृतीयेति । अजादितृतीयादिविभक्तावेव उभयम् = तृजन्ततुन्नन्तोभयम् । तेन= तथा नियमस्वीकारेण । भ्यामादाविति । अजादित्वरूपविशेषणाभावादित्यर्थः । विशेष्याभावादाह शसीति । उभयाभावादाह, क्रोष्टुपुत्र इति । भ्यामि विशेषणाभावात् शसि विशेष्याभावाच्च विशिष्टाभाव इत्याह सर्वत्रेति । तृज्वत्क्रोष्टुः, स्त्रियाञ्च इत्यनयोरपि सर्वनामस्थाने स्त्रियाञ्च तृज्वदेव न तृन्नन्त इत्येवंविधनियमार्थत्वमित्याह तृज्वदिति । एतेन= तृज्वत्क्रोष्टुः, स्त्रियाञ्च इत्यनयोः तृज्वदेवेति नियमार्थत्वाश्रयणेन । इदम् । विभाषा तृतीयेति सूत्रम् । विध्यर्थम् = सर्वनामस्थान एव तृजन्तप्रयोगनियमेऽन्यत्र तदसिद्ध्या तृज्वद्भावविधानार्थम् । परास्तमिति । उपक्रमस्थतृज्वत्पदबोधितप्रधानार्थस्य तृज्वद्भावस्य सर्वनामस्थान एवेति सङ्कोचकल्पनापेक्षया सर्वनामस्थानपदबोध्य-निमित्तत्वस्याप्रधानस्य तृज्वदेव सर्वनामस्थाने इति तुन्नन्तनिरूपितपरत्वाभावकल्पने लाघवात् तृज्वत् सर्वनामस्थाने एवेति नियमकल्पनं न युक्तम् । एवञ्च सूत्रद्वयस्य तृज्वदेव सर्वनामस्थाने इति नियमार्थत्वेन विभाषेति सूत्रमपि नियमार्थमेव । निरुक्तरीत्या सूत्रद्वयस्य तृज्वत् सर्वनामस्थान एवेति नियमं स्वीकृत्य विभाषेति सूत्रस्य विध्यर्थत्वाश्रयणमयुक्तमिति भावः ।

शङ्कते न चेति । एवमपि = अजादितृतीयादावेवेति विभाषेति सूत्रस्य नियामकत्वेऽपि । असङ्गतमिति । सर्वनामस्थाने, स्त्रियाञ्च तृज्वदेवेत्याद्यं सूत्रद्वयं नियामकम् । एवं विभाषेति सूत्रमपि अजादितृतीयादिविभक्तावेव तृजन्ततुन्नन्तोभयं नान्यत्रेति नियमार्थम् ।

अनेन नियमेन शसि हलादौ च उभयोः प्रयोगवारणेऽपि अजादितृतीयादेरन्यत्र तृजन्तस्यैव प्रयोगेणापि तृतीयादावच्येवोभयमिति नियमस्य चारितार्थ्यात् शसादावभीष्टतुन्नन्तस्यैव प्रयोगः कथं लभ्यते ? कथं क्रोष्टूनित्यादिप्रयोगसङ्गतिरिति शङ्कितुराशयः । एवमपि = विभाषेति सूत्रस्य नियमार्थत्वेऽपिअन्यत्र = अजादिदृतीयादेरन्यत्र । उक्तनियमस्येति । तृतीयादावच्येवोभयमित्येवं रूपमित्यर्थः । समाधत्ते तृज्वत्क्रोष्टुरिति । वैयर्थ्यापत्तेरिति । तृतीयादावच्येवोभयमिति नियमेन तदन्यत्र तृजन्तस्यैव प्रयोग इति कल्पने सर्वनामस्थाने, स्त्रियां च (सर्वनामस्थानेऽसर्वनामस्थाने च) तृजन्तमात्रप्रयोगसिद्ध्य तृज्वत्क्रोष्टुर्विभाषा तृतीयादिष्वचीत्येकयोगे कर्तव्ये तृज्वत्क्रोष्टुरिति पृथग्योगकरणं व्यर्थं स्यात् । तथा स्त्रियाञ्चेत्यस्य च वैयर्थ्यं स्यात् । तथा च योगविभागसामर्थ्यात् अन्यत्र तुन्नन्तस्यैव प्रयोग इति कल्पनीयम् । न तु तृजन्तस्यैवेति । ततश्च सर्वनामस्थाने स्त्रियाञ्च तृजन्तप्रयोगसिद्ध्यर्थं योगविभाग आवश्यकः । शसि हलादौ च तुन्नन्तत्वसिद्ध्या नातिप्रसङ्गश्चेति बोध्यम् ।

उक्तनियमेनान्यत्र तुन्नन्तमेवेति कल्पने दोषमाशङ्केते न चेति । भाष्य-प्रयोगासङ्गतिरिति । अन्यत्र तुन्नन्तस्यैव प्रयोगलाभेन तृजन्तप्रयोगासङ्गतिरिति भावः । समाधत्ते ऋकारान्तेति । स्वतः ऋकारान्तत्वेन नात्र तृज्वद्भाव इति भावः । ननु तृज्वत्क्रोष्टुः, स्त्रियाञ्च, विभाषेति सूत्रत्रयस्य कुत्र व्यवस्थेत्याह इदमिति । व्यवस्थार्थमिति । तत्र मानमाह तदुक्तमिति । अन्यत्र = तृज्वद्भावाविषये ।

ऋत उत् । 'तपरत्वं भाव्यमानस्यापि क्वचित्सवर्णग्राहकताज्ञापनद्वाराऽऽन्तर्यतो द्विमात्रनिवृत्त्यर्थम् । तेनामू इत्यादिसिद्धिरिति च्छ्वोरिति सूत्रे कैयटः । यत्तु तपरत्वं 'ढ्रलोप' इति दीर्घबाधनार्थमिति, तन्न, -

'सुपत्रवाजिता बाणा ज्वलिता इव पन्नगाः ।
नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा ॥' -

इति रामायणप्रयोगविरोधात् । 'उरण्रपर' इति सूत्रेऽण्ग्रहणाभावे 'ऊ रपर' इति भाष्यप्रयोगविरोधाच्च । सस्यैवेति । संयोगान्तलोपेन सिद्धे नियमार्थं, तेन ऊर्गित्यादौ नेति भावः । विपरीतनियमस्तु न, 'पुमान्स्त्रिया' इति निर्देशात् ।

<u>**भावबोधिनी :**</u> क्वचिदिति । उकारांशे इत्यर्थः । अत एव भाव्यमानोऽप्युकार इति पठ्यते । किञ्चात्रादेशरूपः उकार एव ग्रहीतुमुचितः । अत एव सनाशंसभिक्ष उरित्यत्र न सवर्णग्रहणम् । भाव्यमानस्यादेशस्येति लेखोऽत्र उचित इति बोध्यम् । अमू

इत्यादिसिद्धिरिति । नन्वदसोरित्यत्र ह्रस्वदीर्घयोस्समाहारद्वन्द्वादेवेष्टसिद्ध्या न तस्यैतत्फलमिति वाच्यम् । ह्रस्वदीर्घयोस्समाहारद्वन्द्वे अन्तरङ्गत्वात् पूर्वं दीर्घस्थाने ह्रस्वे कृते ततस्सवर्णदीर्घे दादुदोमनिर्देशासङ्गतेः । पुमान् स्त्रियेतीति । अत्र च नकारात्परस्य सस्य लोपाभावेऽनुस्वारापत्तिः । सिद्धान्ते तु नस्य पदान्तत्वेन तन्नेति भावः । नन्वत्र झरो झरीति लोपान्नानुस्वार इति चेन्न । अनुस्वारं प्रत्यसिद्धेः । न चानुस्वारस्यासिद्धत्वात् रुत्वे विसर्गे तस्य खर्परे शरीति लोपेन दोष इति वाच्यम् । अनुस्वारदृष्ट्या खर्परे शरीत्यस्यासिद्धत्वेन विसर्गस्य शर्षु पाठेन झल्त्वादनुस्वारापत्तेर्दुर्वारत्वात् । न च शर्षु पाठात् शर्त्वप्रयुक्तकार्यमेव । अत एव हरिं जयतीत्यादिभाष्यप्रयोगे अनुस्वारस्य जश्त्वं नेति वाच्यम् । तुल्ययुक्त्या जिह्वामूलीयस्य खर्त्वाभावेन कुप्वोः ≍क≍पौवित्यत्र विसर्गानापत्त्या निर्देशासङ्गतेः । पाठस्यानित्यत्वेन हरिं जयतीत्यत्र न दोषः । तत्र च तद्भाष्यमेव प्रमाणमिति बोध्यम् ।

बालबोधिनी : ऋत उत् । क्वचिदिति । उकारांशे इत्यर्थः । ज्ञापनद्वारेति । अनेन सूत्रेण ऋदन्तात् ङसिङसोरति परे उकार एकादेशतया विधीयते । क्रोष्टुरित्यादिकमुदाहरणम्। दीर्घव्यावृत्त्यर्थमत्र सूत्रे उदिति तपरकरणं कृतम् । वस्तुतस्तु तस्य विधीयमानत्वेन भाव्यमानपरिभाषयैव तद्व्यावृत्तिसम्भवे तदर्थं कृतं तपरकरणं व्यर्थं सत् भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति परिभाषां ज्ञापयतीति भावः । अमू इत्यादिसिद्धिरिति । अन्यथा अदसोसोरिति सूत्रेण दात्परस्योकारस्य विधीयमानत्वेन भाव्यमानपरिभाषया सवर्ण-ग्रहणनिषेधे, अदश्शब्दात् औप्रत्यये त्यदाद्यत्वे पररूपे वृद्धौ अदौ इत्यवस्थायां दात्परस्यौकारस्य विधीयमान उकारो ह्रस्व एव स्यात् न तु दीर्घ इति अमू इत्याद्यसिद्धिरिति भावः । धर्मिग्राहकसाजात्यात् आदेशविषये एवास्याः प्रवृत्तिरिति 'सनाशंसभिक्ष उः तनादिकृञ्भ्य उः' इत्यत्र न सवर्णग्रहणमिति बोध्यम् ।

प्राचोक्तिं खण्डयति यत्त्विति । दीर्घबाधनार्थमिति । यथापूर्वमवस्थितिः । न तस्य दीर्घप्रवृत्तिरित्यर्थः । तन्नेति । सवितू रश्मय इति ढ्रलोप इति दीर्घघटितप्रयोगः । भाष्यप्रयोगविरोधमपीत्याह ऊ रपर इति ।

रात्सस्य । संयोगान्तस्य लोप इत्येव सिद्धे नियमार्थमिदम् । रेफात् संयोगान्तस्य चेत् सस्यैव लोपो नान्यस्येति । तत्फलमाह ऊर्गिति । विपरीतेति । संयोगन्तस्य सस्य चेत् रेफात् परस्यैवेति विपरीतनियमस्तु नेत्यर्थः । तत्र बीजमाह पुमान् स्त्रियेति । निर्देशादिति । अत्र नकारात् परस्य सस्य संयोगान्तलोपाभावे नस्यापदान्तत्वात् अनुस्वरापत्तिः । खर्परे

शरीत्यनेन विसर्गस्य, झरो झरीत्यनेन सस्य वा लोपेऽपि तस्यासिद्धत्वात् नस्यापदान्तत्वम्। संयोगान्तलोपे तु तस्य सिद्धत्वात् नानुस्वरापत्तिरिति निर्देशसङ्गतिरिति भावः ।

'एरनेकाच ' इति सूत्रमेरितिपदरहितं सानुवृत्ताऽऽवृत्तविशेषणं सवार्त्तिकञ्चानुवर्त्तते इत्याह - धात्ववयवेत्यादि । गतीत्यादि च । सकृल्ल्वावित्यत्र क्रियाविशेषणत्वेन कर्मत्वाद्यण् । 'न भूसुधियो'रिति निषेधे प्राप्ते आह - वर्षाभ्वश्चेति । 'वर्षाभूर्द्दुरे पुमान्' । स्वार्थिक इति। स्वस्याः प्रकृतेरर्थः स्वार्थस्तत्र भव इत्यर्थेऽध्यात्मादित्वाट्ठञ् । द्वारादिषु स्वग्रामस्वाध्यायशब्दयोः पाठेन 'स्वशब्दादेश्चेदेतयोरेवे'ति नियमार्थकेनैजागमो न । पुनर्भू शब्दस्य रूढस्य नित्यस्त्रीत्वादाह - यौगिक इति । - इत्यूदन्ताः ।

<u>**भावबोधिनी :**</u> कर्मत्वाद्यणिति । कारकत्वाद्यणिति क्वचित् पाठः । पाठद्वयेऽपि न दोषः । द्विधाभवनानुकूलव्यापारविशेषणत्वे कर्तृकारकत्वं, द्विधाभवनरूपफलविशेषणत्वे कर्मकारकत्वस्य च वक्तुं शक्यत्वात् । नियमार्थकेनेति । श्वादेरिञीत्यनेन द्वारादित्वात् प्राप्तैजागमो निषिध्यते । द्वारादिषु च श्वन्नित्येव पठ्यत इति स्वभस्त्रप्रकृतिकेऽन्ते ऐजागमप्राप्त्या तन्निषेधो व्यार्थः । अतो ज्ञायते द्वारादिषु तदादिविधिरिति । एवञ्च तत्र स्वशब्दपाठादेव सिद्ध्या स्वग्रामादिशब्दपाठस्य नियामकत्वमिति भावः ।

<u>**बालबोधिनी :**</u> ओः सुपि । एरनेकाच इति । एरिति पदवर्जम् एरनेकाच इति सम्पूर्णं सूत्रमनुवर्तत इत्यर्थः । सानुवृत्तेति । धातोरित्यनुवृत्तं चावर्तते । एकमवयवषष्ठ्यन्तम् । अन्यत् स्थानषष्ठ्यन्तमित्यर्थः । गतिकारकेतरपूर्वपदस्य यण् नेष्यत इति वार्तिकञ्चानुवर्तते। तदेवाह सवार्तिकमिति । खलं पुनातीति खलपूः । तस्य कर्मकारकपूर्वत्वेन गतिकारकेतरेति निषेधाप्राप्तौ यणि खलप्वाविति भवति । सकृल्लुनातीति । तस्य कारकपूर्वत्वं निरूपयन्नाह सकृदिति । क्रियाविशेषणत्वेनेति । द्विधाभवनरूपक्रियायाः = फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वम् । तद्विशेषणत्वेन सकृदित्यस्यापि कर्मकारकत्वमिति भावः। क्रियाविशेषणानां कर्मत्वमिति तत्फलितार्थकथनमेव ।

वर्षाभ्वश्च दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्य इति वार्तिके दीर्घमध्यकारशब्दस्य पाठ इति मते कर एव कार इति प्रज्ञादित्वात् स्वार्थिकोऽण् इत्याह स्वार्थिक इति । ननु स्वार्थे भव इत्यर्थे अध्यात्मादित्वाट्ठञि द्वारादित्वात् द्वारादीनञ्चेति सूत्रेणैजागमापत्तौ स्वार्थिक इति प्रयोगानुपपत्ति । तथाहि - द्वार, स्वर, स्वग्राम, स्वाध्याय, व्यल्कश, स्वस्ति, स्वर, स्फ्यकृत्, स्वादु, मृदु, श्वस्, श्वन्, स्व एते द्वारादयः । न च स्वशब्दस्य तत्र पाठेऽपि विशिष्टस्य स्वार्थशब्दस्य पाठाभावात् न ऐजागमापत्तिरिति वाच्यम् । श्वादेरिञि

(7-3-8) इति सूत्रेण इञि परे श्वादेरैजागमो निषिद्ध्यते । प्राप्तिपूर्वको हि निषेधः द्वारादिगणे श्वन्शब्दः पठ्यते, न तु श्वभस्त्रश्वदंष्ट्रेत्यादिः । तथा च द्वारादीनाञ्चेत्यनेन श्वशब्दादेः प्राप्तेरेवाभावेन श्वादेरिञीति निषेधसूत्रं व्यर्थं सद् द्वारादिषु तदादिविधिं ज्ञापयति । फलं तु द्वारपालस्यायं दौवारपाल इत्यादावैजागमस्य प्रवृत्तिः । तथा च द्वारादीनाञ्चेत्यनेन स्वार्थिक इत्यत्र ऐजागमापत्तिः । द्वारादीनाञ्च (7-3-4) इति सूत्रभाष्ये स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावन्तो यणः सर्वेभ्यः पूर्वम् ऐजागमः प्रप्नोतीत्याशङ्क्य अचामादेरिति वर्तते इति समाहितम् । 'अचामादेरनन्तरौ यौ य्वौ ताभ्यां पूर्वावैचौ भवत इति । तेन स्वाध्यायशब्दे वकारात् पूर्वमैज् भवति न तु यकाराभ्यामित्यर्थः । यद्यपि स्वोऽध्यायः स्वाध्याय इत्यस्यामपि व्युत्पत्तौ स्वाध्यायशब्दो न पठितव्यः । स्वशब्दस्येह पाठात् तदादिविधेश्चेष्टत्वात् तथापि पाठेऽपि दोषो नास्तीति प्रदर्शनाय भाष्यकारेण पाठमभ्युपगम्य परिहारोऽभिहित' इति प्रदीपे कैयटः । अनुपपत्तिं परिहरति द्वारादिष्विति । द्वारादिषु तदादिविधेरङ्गीकारेण तत्र स्वशब्द-पाठादेव सिद्ध्या स्वग्रामस्वाध्यायपाठः स्वशब्दादेश्चेत् तर्हि एतयोरेवेति नियमाय भवतीति स्वार्थिक इत्यत्र न ऐजापत्तिरिति भावः । द्वारादीनाञ्चेति सूत्रभाष्योद्योते पाठमभ्युपगम्येति प्रदीपवचनमादाय 'वस्तुतस्तु स्वग्रामस्वाध्याययोः पाठः स्वशब्दादेश्चेदेतयोरेवेति नियमार्थः। तेन स्वार्थिकाः स्वाभाविकं, स्वाराज्यमित्यादिसिद्धिरिति भाष्याशय' इति व्याख्यातं नागेशभट्टेन ।

ननु 'पुनर्भूर्दिधिषूरूढा द्विः' इति कोशात् पुनर्भूशब्दस्य नित्यस्त्रीलिङ्गत्वात् स्त्रीलिङ्गप्रकरणे एव पाठ उचित इति शङ्कायामाह यौगिक इति । रूढस्य = द्विरूढाबोधकस्य। पुनर्भवतीति क्रियानिमित्तस्य पुनर्भूशब्दस्य पुंलिङ्गत्वमप्यस्तीत्यर्थः ।

वर्णैकदेशानां वर्णग्रहणेनाग्रहणे रेफाभावादाह - ऋवर्णादिति । व्युत्पत्तिपक्षे इति। अव्युत्पत्तिपक्षेऽबादिष्वपाठाद्दीर्घशङ्कैव नेति भावः । व्युत्पत्तिपक्षे निरनुबन्धक तृप्रत्ययान्ता एवेति 'ण्वुल्तृचा' विति भाष्यस्वरसः ।

भावबोधिनी : अग्रहणे इति। ग्रहणे तु व्यवाये इति विभक्तसूत्रेण णत्वमिति बोध्यम्।

बालबोधिनी : वर्णैकदेशानामिति । वर्णैकदेशा वर्णग्रहणेन न गृह्यन्त इति पक्षे धातृणामित्यादौ रेफात् परत्वाभावेन णत्वाप्राप्ते ऋवर्णान्नस्य णत्वं वाच्यमिति वार्तिकमारब्धम् । ग्रहणपक्षे रषाभ्यमित्यनेनैव निर्वह इति भावः । व्युत्पत्तिपक्षे इति । व्युत्पत्तिपक्षे अप्त्रादिग्रहणस्य नियमार्थत्वात् तद्व्यावृत्त्या पितृशब्दस्य न दीर्घः । अव्युत्पत्तिपक्षे अप्तृन्निति दीर्घप्राप्तिरेव नास्ति । तत्र पितृशब्दस्य पाठाभावादिति भावः ।

वस्तुतस्तु व्युत्पत्तिपक्षेऽपि दीर्घशङ्कैव नेत्याह व्युत्पत्तिपक्षे इति । तृप्रत्ययान्ता इति । पित्रादय इति शेषः ।

वैकल्पिकेति । 'यत्तदेतेभ्य' इत्यत्र त्यदाद्यत्वकरणादतिदेशस्य, 'क्षिय' इत्यादौ धात्वनुकरणे विभक्तिकरणेन वैकल्पिकत्वस्य च ज्ञापनादिति भावः । अनुकरणस्यानुकार्यशब्दस्वरूपमात्रमर्थ इति प्रातिपदिकत्वम् । अनुकार्य्यश्चानुकरणाद्भिन्नमेवेति 'मतौ छ' इति सूत्रे भाष्ये स्पष्टम् । ईषदानुपूर्वीव्यत्ययेऽपि वाचकसादृश्यादर्थोपस्थापकत्वमिति अत्र कैयटे, प्राग्दीव्यतोऽणित्यत्र भाष्ये च स्पष्टम् । अत एव 'किर' इत्यादितःकृधातुरिति बोधः । 'भू सत्ताया' मित्यादौ त्वित एव निर्देशात्कदाचिदनुकरणाद्विभक्त्यभावोऽपि, स च सूत्रेष्वेवेति प्रामाणिकाः । 'गवित्ययमाहे' ति वान्तस्यैवानुकरणम् , अनुकार्यस्वरूपभङ्गभिया च न वलोपः 'झलां ज' शित्यादौ जश्त्वाभाववदित्याहुः । इत्वे इति । 'किरश्च पञ्चभ्य' इति निर्देशादधातुप्रत्ययेऽपि तत्प्रवृत्तिरिति भावः । कीरिति । कृधातुरित्यर्थः। गुणो नेति । 'ऋत उ' दित्युत्वमप्यत एव न । अत एव 'ग्रो यङी' ति सूत्रनिर्देशः सङ्गच्छते ।

<u>**भावबोधिनी :**</u> त्यदाद्यत्वकरणादिति । प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीय-सर्वार्थवाचकत्वाभावात् । अनुकरणे त्वप्राप्तिर्बोध्या । अत्र चैतच्छब्दे त्यदादित्वस्यानुकार्यनिष्ठोपसर्जनत्वाभावस्य चातिदेशो बोध्यः । नव्यमते इतरेतरयोगस्यापि समाहारविशेष्यकत्वेन तं प्रति एतच्छब्दार्थस्योपसर्जनत्वात् । अत्रैवैकशेषाकरणेनातिदेशोऽनित्य इति तु न । असन्देहार्थत्वेन तदकरणोपपत्तेः । अत एवाह क्षिय इत्यादाविति । विभक्त्यकरणे हेतूक्तिः धात्वकरण इति । अतिदेशस्य नित्यत्वे अधातुरिति पर्युदासेन प्रातिपदिकत्वं न स्यादिति भावः । अत्रापि क्षिय इत्यत्रेयङर्थं धातुत्वस्य घित्वाभावस्य चातिदेशो बोध्यः । नव्यमतरीत्याऽनुकार्ये घित्वं दुर्वारमिति तु न । सख्यवयवभिन्नप्रातिपदिकावयवस्येवर्णस्य ग्रहणात् । नन्वयं ग्रन्थः परिभाषेन्दुशेखरविरुद्धः । तत्र परिभाषाज्ञापकत्वेन क्षिय इति निर्देशस्यैवोक्तत्वादिति चेन्न । ज्ञापकस्य ज्ञापकान्तरादूषकत्वात् । अत एव समासान्तविधेरनित्यत्वे बहुज्ञापकोपन्यासः सङ्गच्छते । केचित्तु क्षिय इति निर्देशस्य धर्मिज्ञापकत्वमेव न, क्व तस्यानित्यत्वज्ञापकत्वं, स्वं रूपमित्यनेन अग्रेर्ढगित्यादाविवात्रापि क्षि इत्यनुकरणस्य क्षयविशिष्टक्षिधातुरेवार्थ इति विशेषणतया क्रियावाचकत्वात् धातुत्वमक्षतमेव । अत एव धुगित्यादौ भष्भावः । एवञ्चेयङः सुलभत्वेन विभक्तेस्सौत्रत्वकल्पनमेव युक्तमित्याहुः । तदपरे न क्षमन्ते । धुगित्यादौ यथोद्देशपक्षे क्विपः पूर्वं विद्यमानधातुसंज्ञामादाय भष्भावः।

कार्यकालेऽपि न दोषः । विशेषणतया क्रियावाचकत्वञ्च स्वसमवायिनिष्ठविशेष्यता-निरूपितप्रकारताशालिक्रियावाचकत्वम् । धुगित्यादौ तदस्तीति प्रकृते क्षि इत्यत्र तु तत्त्वाभावेन धातुत्वं नेति इयङ्निर्देशोऽनुपपन्न एवेति ज्ञापकत्वं सुस्थमेव । विभक्तिकरणाच्च तदनित्यमपि सुस्थमेवेति । अथापि केचिद्विवदन्ते । उक्तरीत्या धर्मिज्ञापकत्वेऽपि नानित्यत्वज्ञापकत्वम् । विभक्त्यनन्तरमेवेयङः कर्तव्यत्वेन ततः पूर्वं धातुत्वज्ञानाभावेन विभक्तिस्सुलभा । ततो धातुत्वमादाय इयङिति इयङ्निर्देशस्य धर्मिग्राहकत्वमेवेति । इदञ्च न युक्तिसहम् । पूर्वं परिभाषार्थज्ञानस्यावश्यं वक्तव्यत्वादिति सुधियो विभावयन्तु।

ननु धर्मिणोऽनित्यत्वेन क्षि इत्यस्य धातुत्वेऽपि अनुकार्यानुकरणयोरभिन्नत्वेन शक्ति-लक्षणान्यतरसम्बन्धेनार्थवत्त्वाभावात् प्रातिपदिकत्वमेव नेत्यत आह अनुकरणस्येति । अनुकार्यस्वरूपेति । तत्तदर्थविशिष्टानुकार्यशब्दस्वरूपमर्थ इत्यर्थः । मात्रपदेनानुकरण-स्वरूपव्यवच्छेदः । भेदे प्रमाणमाह अनुकार्यञ्चेति । एवञ्च भेदपक्षे क्षयरूपार्थ-विशिष्टक्षिधात्वादौ क्षि इत्यादीनां शक्तिरिति सिद्धमिति बोध्यम् । अभेदपक्षे अनुकरणेन स्वस्वरूपतत्तदर्थैतदुभयविशिष्टानुकार्यस्य सादृश्यसम्बन्धेन बोध इति बोध्यम् । भाष्ये स्पष्टमिति । तत्र हि दीव्यच्छब्देन दीव्यतीत्यस्योपस्थितिः । दीव्यत्यनुकरणभूते दीव्यतिसादृश्यादित्युक्तम् । प्रकृते कृधात्वनुकरणं कृ इति । तस्य लक्षणवशेन विकारेऽपि वाचकेन तृ इत्यनुकरणेन सादृश्यात् किर इत्यस्य उपस्थापकत्वमिति बोध्यम् । नन्वेवं लोके घट इत्यस्मात् घट इत्यनुकार्यस्य बोधापत्तिरिति चेन्न । भाष्यादिप्रामाण्येन शास्त्रीयप्रक्रियोपयोगिष्वेव तथाङ्गीकारात् । भू इति । यद्यप्यत्र प्रकृतिवदित्यतिदेशेन धातुत्वात् विभक्त्यभावः सूपपादः तथापि गर्गादिगणपठितेषु निर्देशस्यैव शरणत्वं तदेतदाह इत्यादाविति । सूत्रेष्वेवेति । इदमुपलक्षणम् । तेन भाष्यवार्तिककृद्भ्यां निर्विभक्तिकानुकरणप्रयोगेऽपि न क्षतिः । नन्वस्माकं भेदपक्षे गौरित्ययमाह अभेदपक्षे गवित्ययमाह, त्वन्मते भेदस्यैवाङ्गीकारेण गविति न सिध्येदित्यत आह गवित्ययमिति । अनुकार्यत्वमपि वान्तस्यैव । गो इत्यस्यानुकार्यत्वे तु गौरित्येवानुकरणे रूपमिति भावः। आहुरिति । भेदपक्ष एव युक्तः । किञ्चिन्निष्ठविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति पदनिरूपितवृत्तिज्ञानजन्योपस्थितित्वेनैकरूपेण कार्यकारणभावसम्भवात् । अभेदस्यापि स्वीकारे उपस्थितौ वृत्तिसादृश्यान्यतरज्ञानजन्यत्वं निवेशनीयमिति गौरवम् । सादृश्यस्य वृत्तिप्रवेशे तु भेदे इवाभेदेऽपि प्रातिपदिकत्वेन भाव्यम् । शक्तिलक्षणान्यतरेणार्थवत्त्वनिवेशेतु गौरवं स्फुटमेवेति भावः । अधातुप्रत्ययेऽपीति । धातुविहितप्रत्ययाभावेऽपीत्यर्थः।

धातोरुच्यमानमित्येतद्विधायकं नियामकञ्चेति पक्षद्वयं प्रत्ययनिमित्तकं धातूद्देश्यकं कार्यं तद्विहितप्रत्यय एवेति । नियमपक्षे तु प्रकृते न दोषः । इत्वस्य प्रत्ययानिमित्तकत्वात् ।

बालबोधिनी : वैकल्पिकेति । धातुपाठपठितयोः कृ तृ इत्यनयोः अनुकरणे प्रकृतिवदनुकरणमिति धातुत्वातिदेशे ऋत इद्धातोरितीत्वे रपरत्वे अतिदेशस्य वैकल्पिकत्वेन तदभावमादाय धातुत्वभावात् प्रातिपदिकत्वेन सुबुत्पत्तिरिति मूलग्रन्थस्यार्थः । अतिदेश-स्येति । यत्तदेतेभ्यः परिमाणे वतुप् इत्यत्र एतेभ्य इति त्यदाद्यत्वकरणात् एतच्छब्दे त्यदादित्वस्य, अनुकार्यनिष्ठोपसर्जनत्वाभावस्य चातिदेश इति प्रकृतिवदनुकरणमिति सिध्यति । वैकल्पिकत्वस्येति । क्षियो दीर्घात् इत्यादौ धात्वनुकरणे विभक्तिनिर्देशात् प्रकृतिवदनुकरणमित्यस्य पाक्षिकत्वं सिध्यति । अन्यथा अनेन धातुत्वातिदेशे प्रातिपदिकत्वाभावात् विभक्त्युत्पत्तिर्न स्यादिति भावः । ज्ञापनादिति । क्षियो दीर्घादित्यत्र क्षिय इति क्षिधातोरनुकरणत्वेन शब्दस्वरूपबाधकतया क्रियावाचकत्वभावेन धातुत्वा-भावादियङ्नुपपन्न इति तन्निर्देशः प्रकृतिवदनुकरणमिति परिभाषां ज्ञापयति । क्षिय इति प्रातिपदकत्वनिबन्धनविभक्तिकरणादस्याः परिभाषाया वैकल्पिकत्वमप्यनेन निर्देशेन ज्ञाप्यत इति भावः ।

ननु अनुकार्यानुरणयोरभेदपक्षे अनुकार्यस्य वृत्त्या पृथगर्थबोधकत्वाभावेन प्रातिपदिकत्वाभावात् कथं विभक्त्युत्पत्तिरत आह अनुकरणस्येति । भिन्नमेवेति एवेनाभेदपक्षनिरासः । नन्वनुकरणस्य विकारे आनुपूर्वीभेदात् कथमर्थप्रतीतिरत आह ईषदिति । वाचकेति । अनुकरणेत्यर्थः । अर्थेति । अनुकार्येत्यर्थः । अत्र = मतौ छ इत्यत्र । अत एव = ईषद्विकारेऽपि अनुकरणसादृश्यात् अनुकार्योपस्थापकत्वादेव । ननु भू सत्ताया-मित्यादावनुकरणात् किरश्चेत्यत्रेव कुतो न विभक्तिरत आह भू इति । कदाचिदिति। भुव इत्यत्र विभक्तिकरणेऽपि न क्षतिः । स च = अनुकरणाद्विभक्त्यभावः । ननूक्तरीत्या सूत्रेष्वेवानुकरणाद्विभक्त्यभावस्वीकारे गवितीति लौकिकप्रयोगे गो इत्यनुकरणाद्विभक्तिः कुतो नेति शङ्कायामाह वान्तस्यैवेति । ततः सुप्रत्यये हल्ङ्यादिना लोप इत्यर्थः । अनुकार्य-स्वरूपेति । अत एवान्तर्वर्तिविभक्त्या वान्तस्य पदत्वेऽपि लोपः शाकल्यस्येति न वलोप इति भावः । ननु धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति परिभाषया धातुप्रत्यये एवेत्व-प्रवृत्त्या किरश्चेति कथं निर्देश इत्यत आह किरश्चेति । गुणो नेति । ऋत इति तपरकरणात् ऋतो ङीति गुणो नेत्यर्थः । अत एव = ऋत इति तपरकरणादेव । अत एवेति। ऋत इति तपरकरणेन गृ इति दीर्घान्ते उत्वाप्रवृत्त्या ग्र इति निर्देशः संगच्छत इति भावः ।

अनङिति । ऋऌवर्णयोः सावर्ण्यादिति भावः । गमॄनिति । ऌवर्णस्य दीर्घाभावादृवर्ण एवेति भावः । ननु तुल्यास्यसूत्रे भाष्यकृता 'ऋति ऋवा' इत्यादि विधेययोः रेफद्वयगर्भयोः अच्त्वदीर्घत्वाङ्गीकारेणात्र द्विलकार ईषत्स्पृष्टो दुर्वारः । आमि च तथा धातॄणामित्यत्र रेफद्वयगर्भोऽपीति चेन्न; 'अकः सवर्णे' इति सूत्रे उक्तोत्तरत्वात् । गम्लेति । **यत्तु - लण्सूत्रे 'उरण्रपर' इत्यत्र 'अ'जिति वक्तव्येऽण्ग्रहणसामर्थ्येनाण्पूर्वेणैवेत्युक्तं भाष्ये, ऌकारस्य यणि हि तत्र लपरत्वार्थं परेणाऽण्ग्रहणं स्यादिति सामर्थ्योक्तिरसङ्गता । ऋकारस्य यणि तु 'रो री'ति लोपेन न विशेष इति, तन्न ; ऋकारांशे हल्रूपाऽणि 'रोरी'ति प्रवृत्त्या फलाभावेनाप्रवृत्त्या तत्साहचर्यात् ऌकारांशेऽपि हल्रूपाऽण्यप्रवृत्तिरित्याशयात् । वस्तुत ईदृशानामभिधाने दृढं मानं चिन्त्यम् ।**

<u>**भावबोधिनी :**</u> दीर्घत्वाङ्गीकारेणेति । ऋति ऋवेत्यादिवचनद्वयप्रत्याख्यानाय अइउण् सूत्रानन्तरं तयोः पाठेनाच्त्वं दीर्घत्वं रेफद्वयगर्भत्वञ्चाङ्गीकृत्य अकस्सवर्णे इत्यनेनैव पर्यायतस्सिद्ध्या वचनद्वयं प्रत्याख्यातमिति बोध्यम् । उक्तोत्तरत्वादिति । ह्रस्वऋकारद्वयस्थाने एव पूर्वस्य ह्रस्वऋऌकार स्थाने एवोत्तरस्य साधुत्वमित्युक्तत्वादिति भावः । इदमत्र चिन्त्यम् । गम्ऌशब्दादाम्येव विवृतप्रयत्नसाम्यात् विवृतऋकारस्य ऌकारवत्तासाम्येन चेषत्स्पृष्टस्य च पर्यायेण नामीत्यत आपादनं युक्तम् । गमॄनित्यत्र तु प्रथमयोरित्यनेन पूर्वसवर्णदीर्घस्य वक्तव्यतया ईषत्स्पृष्टस्य पूर्वसावर्ण्याभावात् तदापादनमयुक्तम् । अत एव धातॄनित्यत्र त्वयैवेषत्स्पृष्टो नापादितः । एवं धातॄणामित्यत्रापि तदापादनमयुक्तम् । तदपेक्षया विवृतत्वसाम्येन रेफवत्त्वसाम्येन च विवृतऋकारेणैव भाव्यत्वादिति । हल्रूपाणीति । धात्रंश इत्यादाविति भावः । अप्रवृत्त्या = उरण् रपर इत्यस्याप्रवृत्त्या । ननु देवदत्त ऋ इतीत्यादौ ऋत्यक इति प्रकृतिभावे ऋस्थाने परे यणि रो रीति लोपे ढ्रलोप इति दीर्घे विशेषः । न च यणः अचः परस्मिन्निति स्थानिवत्त्वेन ऋत्यक इति प्रकृत्या न दीर्घ इति वाच्यम् । नवीनैः पदचरमावयवप्रतिबन्धकस्यापि पदचरमावयवत्वाङ्गीकारेण पदचरमावयवदीर्घप्रतिबन्धके ऋत्यक इति कर्तव्ये न पदान्तेति निषेधात् । तस्माद् ऋकारस्थानिकहल्रूपाण्साहचर्याश्रयणमशक्यमित्यत आह वस्तुतस्त्विति । ईदृशानामिति । अजिति वक्तव्ये अण्ग्रहणादिति भाष्यप्रामाण्येन यत्र हल्रूपाणि हल्रूपत्वप्रवृत्त्या विशेषः । गम्ला देवदत्ता ऋतीत्यादौ तादृशानामनभि-धानमित्यर्थः ।

<u>**बालबोधिनी :**</u> सावर्ण्यादिति । गम्ऌ , शक्ऌ इत्यनयोरनुकरणे ऋदुशनेति अनङि

गमा, शकेति भावः । इत्यादीति । आदिना ऌति ऌवेति । अच्त्वदीर्घत्वाङ्गीकारेणेति । वार्तिकविधेययोः अइउण् सूत्राव्यवहितोत्तरस्य ऋऌक् सूत्रस्यानन्तरं पाठेनाच्त्वं सिद्धमिति बोध्यम् । अत एवाण्प्रत्याहारानन्तर्गततया रपरत्वं न भवति । दीर्घत्वेति । अकः सवर्णे दीर्घ इत्यनेनैव होतृ + ऋकार इत्यादौ ऋकारद्वयस्य स्थाने प्रत्येकं रेफवत्वेन रेफद्वयवत्ता-रूपगुणकृतान्तर्येण रेफद्वयगर्भितः ईषत्स्पृष्टः द्विमात्रिक आदेशो भवति । रेफवत्तासहकृतेन विवृतत्वान्तर्येण कदाचित् विवृतो दीर्घ आदेशो भवति । एवं ऌकारस्य स्थानेऽपि लकारवत्तान्तर्येण ईषत्स्पृष्टो द्विलकारः, कदाचिद्विवृतत्वसाम्येन रेफवत्तासाम्येन तादृशो विवृत ऋकारः सिध्यतीति सूत्रेणैव वार्तिकोक्तफलसिध्या वार्तिकद्वयं भाष्ये प्रत्याख्यातम्। ईषत्स्पृष्टो दुर्वार इति । गमृन् इत्यत्र प्रथमयोरिति पूर्वसवर्णदीर्घे निरुक्तरीत्या वार्तिकविधेययोरच्त्वेन दीर्घत्वेन च ईत्षस्पृष्टो द्विलकार आदेशः स्यादिति भावः। आमि चेति । गमृणामित्यत्र नामीति दीर्घेण रेफद्वयगर्भितः ईषत्स्पृष्टो दुर्वार इति शङ्कितुराशयः । समधत्ते उक्तोत्तरत्वादिति । यदेतद् ऋतीति । ऋत इति वक्ष्यामीति तुल्यास्यसूत्रस्थभाष्येण प्रथमवार्तिकस्य ह्रस्वऋकारद्वयस्थानिकैकादेश एव, द्वितीयस्य ह्रस्वऋकारऌकार-द्वयस्थानिकैकादेश एव साधुत्वमिति प्रतिपादितत्वान्न दोष इति भावः ।

प्राचोक्तिं खण्डयति यत्त्विति । अयं भावः । लण्सूत्रे भाष्ये उरण् रपर इत्यत्राण्प्रत्याहारः पूर्वेण परेण वेत्याक्षिप्य यदि परणकारेण स्यात्तर्हि हल्रूपाण्सु रपरसूत्रस्य प्रयोजनाभावेन तस्य स्थाने अजिति वक्तव्यं स्यात् । तथाऽनुक्त्वा अण्ग्रहणसामर्थ्येनात्राण् पूर्वणकारेण न तु परेणेत्युक्तम् । गम्ऌ + आ गम्लेत्यत्र ऌकारस्य यणि तत्र लपरत्वार्थं परेणाण्ग्रहणस्य सार्थक्येन अजिति वक्तव्येऽण्ग्रहणसामर्थ्येणाण् पूर्वेणैवेति सामर्थ्योक्तिरसङ्गता स्यात् । क्रा इत्यादौ ऋकारस्य यणि तस्य रपरत्वेऽपि रोरीति लोपेन न विशेष इति शङ्कितुराशयः । समाधत्ते तन्नेति । अप्रवृत्तिरिति । उरण् रपर इत्यस्येति शेषः। ईदृशानाम् = ऌकारस्थानिकलादेशघटितानाम् । पुराणादौ क्वचित् तादृशप्रयोगदर्शने आर्षत्वादेव तत्र रपरत्वाप्रवृत्तिरिति बोध्यम् ।

सेरिति । इना सहेत्यर्थः । 'वोपसर्जनस्ये'ति सत्वम् । एकादेशस्य पूर्वान्तवत्त्वेऽपि लिङ्गाद्यन्वय्यर्थप्रतिपादकत्वात् अव्ययमिति महासञ्ज्ञयाऽस्यानव्ययत्वान्न विभक्तिलुक्। सादेशात्पूर्वमाद्गुणस्तु न; 'नेन्द्रस्ये'ति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमेकादेशाप्रवृत्तेः। न च 'नान्तः पाद' मितिसूत्रस्थेन - 'न चैङः पदान्तात्परो रुरस्ती'ति भाष्येण विरोधात्सावी-दृशानां प्रयोगोऽनुचितः, सावपि पदत्वसत्त्वादिति वाच्यम्, योगविभागसिद्धस्य सौ पदत्वस्य

क्वाचित्कत्वेनादोषात् । सावप्रयोग एवेत्यन्ये । सय इति । न चास्यान्तर्वर्त्तिविभक्त्या पदत्वात्- 'एङः पदान्ता'दिति दुर्वारमिति वाच्यम् । भाष्ये 'स्वादिष्वि'ति योगं विभज्य स्वादिषु पूर्वं पदमित्यर्थः। ततो 'अ सर्वनामस्थाने यचि' । सुबन्तमित्यनुवर्तते । 'अ यची'ति प्रसज्यप्रतिषेधः। तेन 'यजादौ सर्वनामस्थाने पूर्वं पदं न , मद्ध्ये चेत्सुबन्तं तदपि पदं ने'ति व्याख्यानेनादोषात् । आतिदेशिकस्याप्ययं निषेध इति स्पष्टमेव । 'उत्तरपदत्वे चापदादिविधा'विति प्रतिषेधाच्च । 'उत्तरपदस्य तद्धटितस्य वा पदत्वे कर्त्तव्येऽन्तर्वर्त्तिविभक्तेः प्रत्ययलक्षणं ने 'ति तदर्थः । अतो न योगविभागमूलकप्रत्याख्यानेन फलभेद इति केचित्।

भावबोधिनी : महासंज्ञाकरणेनेति । तेनातिदेशप्राप्तमपि नेति भावः । ज्ञापकेनेति। तत्प्रकारश्च परिभाषेन्दुशेखरतोऽवसेयः । इत्यादीत्यादिना । सयावित्यादौ लोपश्शाकल्यस्य परिग्रहः । आतिदेशिकस्यापीति । अन्तादिवद्भावप्रापितस्यापि ।

ननूत्तरपदत्व इति प्रत्याख्यानकारणीभूतयोगविभागरीत्या सय इत्यादौ से इति समुदायस्य ए इत्यस्य च न पदत्वम् । पूर्वान्तवत्वेन पूर्वपदस्य से इत्यस्य सहेत्यव्ययोत्तरं लुप्तविभक्तिमाश्रित्य पदत्वेन पूर्वरूपं दुर्वारमित्यारम्भप्रत्याख्यानयोः फलभेद इत्यत आह तद्घटितस्य वेति । तद्घटितत्वेन से इत्यस्यारम्भपक्षेऽपि न पदत्वमिति भावः ।

बालबोधिनी : सेरिति । अः = विष्णुः । अस्यापत्यम् इः = कामः । तेन वर्तत इति विग्रहे तेन सहेति तुल्ययोगे इति बहुव्रीहौ वोपसर्जनस्येति सहस्य सभावे आद्गुणे से इति रूपम् । ततो विभक्तिप्रत्ययाः । ननु गुणे एकादेशे से इत्यस्य पूर्वान्तवद्भावेनाव्ययत्वात् अव्ययादाप्सुप इति सुपो लुक् कुतो नेति शङ्कायामाह एकादेशस्येति । महासंज्ञयेति । लिङ्गाद्यनन्वितार्थकस्यैवाव्ययत्वादित्यर्थः । ननु इना सहेति बहुव्रीहौ अन्तरङ्गत्वात् सादेशं बाधित्वा आद्गुणे ततः सादेशेऽदन्तरूपापत्तिरित्यत आह सादेशादिति । सादेशात्पूर्वमाद्गुणस्याभावे हेतुमाह नेन्द्रस्येति । ज्ञापकेनेति । 'नेन्द्रस्य परस्य' इति सूत्रेण परस्येन्द्रस्य वृद्धिः निषिध्यते । अनेन निषेधेन पूर्वोत्तरपदयोः प्रथमं कार्यं भवति, तत एकादेश इति ज्ञाप्यते । अन्यथाऽन्तरङ्गत्वादेकादेशे पूर्वान्तवत्वेन एकादेशविशिष्टे पूर्वपदत्वे न्द्रशब्दस्य एकदेशविकृतन्यायेनोत्तरपदत्वेऽपि तस्यानचूकत्वाद् वृद्धेरप्राप्तौ सौमेन्द्र इत्यत्र नेन्द्रस्येति तन्निषेधो व्यर्थः स्यात् । एवञ्चोक्तरीत्या से इत्यत्र पूर्वोत्तरपदनिमित्तककार्यात् पूर्वमेकादेशो न भवतीति भावः ।

ननु पदान्तादेङः परो रुरस्तीति भाष्येण विरोधात् 'सेः, स्मृतेः' इत्यादि-प्रयोगोऽनुचितः । से इत्यादीनां स्वादिष्विति पदत्वं सुलभम् । तथाहि - उत्तरपदत्वे

चापदादिविधौ प्रत्ययलक्षणप्रतिषेध इति वार्तिकं भाष्ये प्रत्याख्यातम् । स्वादिष्वसर्वनामस्थाने इति सूत्रे स्वादिष्विति योगो विभज्यते । यस्मात् स्वादिविधिः तदादिशब्दस्वरूपं तस्मिन् स्वादौ परतः पूर्वं पदसंज्ञं भवतीति योगस्यास्यार्थः । 'असर्वनामस्थाने यचि' इति द्वितीयं वाक्यम् । यजादौ सर्वनामस्थाने परतः पूर्वं पदसंज्ञं न भवतीत्यस्यार्थः । पूर्वसूत्रेण सामान्यतः स्वादिषु पदत्वे प्राप्ते द्वितीयसूत्रेण योगविभागसामर्थ्यात् बाध्यसामान्यचिन्तया स्वादिषु, सुप्तिङन्तमिति प्राप्तपदसंज्ञयोः निषेधः । तेन परमवाचौ इत्यादौ यजादिसर्वनामस्थानपरत्वात् पूर्वस्य पदत्वनिषेधेन कुत्वाभावादि-सिद्धिः । भमिति तृतीयं वाक्यम् । स्वादिष्वसर्वनामस्थाने यचि इत्यनुवर्तते । यस्मात् यजाद्यसर्वनामस्थानस्वादिविधिः तस्मिन् परे पूर्वं भसंज्ञं भवतीति तदर्थः । अनेन पदसंज्ञाबाधकतया भसंज्ञाविधानात् पारिशेष्यात् भ्यमादाविव सुप्रत्ययेऽपि स्वादिष्विति विभक्तसूत्रेण पदत्वसिद्धिः । एवञ्चोक्तरीत्या से इत्यस्य एङन्तपदत्वेन तत्पररोरभावेन से इत्यदीनां प्रयोगोऽनुचित इति शङ्कितुराशयः । समाधत्ते योगविभागेति । योगविभागसिद्धस्य क्वाचित्कत्वेऽस्वारस्यादाह सावप्रयोग इति । अन्ये इति ।

ननु जसि सय इति कथं सिध्यति ? अन्तर्वर्तिविभक्त्या से इत्यस्य ए इत्यस्य वा पदत्वेनायादेशं बाधित्वा एङः पदान्तादतीति पूर्वरूपापत्तिरिति शङ्कते न चेति । अस्य = सय इत्यादौ परादिवद्भावेन एकारस्य, पूर्वान्तवद्भावेन से इति समुदायस्य । समाधत्ते भाष्ये इति । विभज्येत्यस्य व्याख्यानेनेत्यनेनान्वयः । अयं भावः । उत्तरपदत्वे चापदादिविधौ प्रतिषेध इति प्रत्ययलक्षणनिषेधकं वार्तिकम् । उत्तरपदत्वे इति षष्ठीतत्पुरुषः। उत्तरशब्देनोत्तरपदं लक्ष्यते । उत्तरपदशब्दश्च वृत्तिचरमावयवे रूढः । एवञ्च उत्तरपदस्य पदत्वे = पदत्वप्रयुक्ते कार्ये कर्तव्ये लुमता लुप्ते प्रत्ययलक्षणं नेति वार्तिकार्थः । अपदादिविधाविति प्रसज्यप्रतिषेधः । विधिरिति कर्मणि किः । पदादेः कार्ये कर्तव्ये प्रत्ययलक्षणप्रतिषेधो नेत्यर्थः । वार्तिकप्रत्याख्यानपक्षः स्वादिष्विति सूत्रभाष्ये दृश्यते। तथा हि - स्वादिष्वसर्वनामस्थाने इत्यत्र स्वादिष्विति योगो विभज्यते । यस्मात् प्रत्ययविधिरित्यतः तदादीत्यनुवर्तते । यस्मात् स्वादिविधिः तदादिशब्दस्वरूपं तस्मिन् स्वादौ परतः पदसंज्ञं भवतीति प्रथमयोगस्यार्थः । असर्वनामस्थाने यचीति द्वितीयं वाक्यम्। अ इति पृथक्पदं निषेधार्थकम् । भाष्ये तु सर्वनामस्थानेऽयचीति पाठो वर्तते । अयचीति प्रसज्यप्रतिषेधः । पाठद्वयेऽप्यर्थभेदो नास्ति । यजादौ सर्वनामस्थाने पूर्वं पदं नेत्यर्थः । सुबन्तमिति सम्बध्यते । मध्ये चेत् सुबन्तं तदपि पदं नेत्यर्थोऽपि लभ्यते । एवञ्च

असर्वनामस्थाने यचीति योगेन सय इत्यत्र से इत्यस्य तदवयवस्य ए इत्यस्य वा पदत्वापत्तिर्नास्ति । ननूक्तरीत्या अवयवस्य पदत्वाभावेऽपि पूर्वान्तवद्भावेन से इति समुदायस्य पदत्वं दुर्वारमित्यत आह आतिदेशिकस्येति । पूर्वान्तवद्भावेन से इति समुदायस्य पदत्वमपि न भवति । आतिदेशिकस्याप्यनेन विभक्तसूत्रेण निषेधादिति भावः । मध्ये सुबन्तस्य अन्तवद्भावातिदेशेनैव पदत्वप्राप्त्या तन्निषेधः आतिदेशिकस्यापीति तात्पर्यम् । एवं प्रत्याख्यानपक्षे वारणमुक्त्वा वार्तिकारम्भेऽपि तदाह उत्तरपदत्वे इति । तदर्थमाह उत्तरपदस्येति । ननु वार्तिकारम्भपक्षे सय इत्यादौ उक्तरीत्या ए इत्यस्य पदत्वाभावेऽपि से इति समुदायस्य सहेत्यव्ययोत्तरं लुप्तविभक्तिमाश्रित्य पदत्वापत्तिः दुर्वारेत्यत आह तद्घटितस्येति । उत्तरपदघटितस्येत्यर्थः । एवञ्च प्रत्ययलक्षणाभावेन से इति समुदायस्य तदवयवस्योत्तरपदस्य च न पदत्वमिति भावः । अत एव वार्तिकारम्भपक्षे, योगविभागेन तत्प्रत्याख्यानपक्षे च न फलभेदः । अन्यथा सय इत्यादौ प्रत्याख्यानपक्षे निरुक्तरीत्या योगविभागेन से इत्यस्य पदत्वाभावात् पूर्वरूपाप्रसक्तिः । आरम्भपक्षे तत्प्रसक्तिरिति फलभेदः स्यादिति बोध्यम् । तदाह अत इति । वस्तुतस्तु उक्तरीत्या उत्तरपदस्य तद्घटितस्यवेति वार्तिकार्थकल्पने दृढतरमानाभावात् आरम्भप्रत्याख्यानयोः फलैक्याय दर्शितप्रयोगाणामनभिधानमेवेत्याशयेनाह केचिदिति । वार्तिकप्रत्याख्यानप्रकारस्तु गुरुतर इति न युक्त इति भाष्ये ध्वनिमिति हलन्तनपुंसकलिङ्गशेखरे स्पष्टम् ।

'इतोऽदित्यतोऽनुवृत्तं 'सर्वनामस्थाने' इति प्रथमया विपरिणम्यते, णिदित्यनेन सामानाधिकरण्यादित्याह - सर्वनामस्थानमिति । तत्र णितः कार्यस्यासम्भवात् , णिति यत्कार्यं तदतिदिश्यते । शसेति । अचीत्यधिकारात्तद्धितशसो न ग्रहणमिति भावः । गामिति । परत्वादत्र वृद्धिस्तु न, अनवकाशत्वेन आत्वस्यापवादत्वात् , तदाह - ओतो णिदिति । सूत्रे तपरकरणेन गस्याविवक्षिततत्वमिति भावः । तेन चित्रगुरित्यादौ न दोषः , अन्यथाऽङ्गाधिकारे तदन्तविधेः सत्त्वेन स्थानिवत्त्वेन गोऽन्तत्वाद्दोषः स्यादेव । मम त्वोकारान्तत्वाभावादल्विधौ स्थानिवत्त्वाभावाच्च न दोषः । परे तु - 'गोतो णि'दिति सूत्रे भाष्ये तपरत्वं प्रत्याख्यातम् । चित्रगुरित्यादौ तु न दोषः, गोः पूर्वत्वणित्त्वात्वस्वरेषु स्थानिवत्त्वप्रतिषेधात् । 'हे चित्रगो'इत्यादौ तु लाक्षणिकत्वान्न दोष इति अत्रैव सूत्रे भाष्ये स्पष्टम् । 'द्योः सर्वनामस्थाने णित्त्वं वक्तव्य' मिति 'औतोऽ'मित्यत्र भाष्ये उक्तमित्याहुः । सुद्यौरिति । केवलद्योशब्दस्य स्त्रीत्वाद्बहुव्रीहिरुदाहृतः । विहितमिति । यदि तु वर्णग्रहणेऽपि प्रतिपदोक्तपरिभाषा प्रवर्तते तदा व्यर्थोऽयं यत्नः।

भावबोधिनी : वृद्धिस्तु नेति । वृद्धिप्रयोज्यणिद्वद्भावस्तु नेत्यर्थः । अपवादत्वादिति । ननु णित्वं गोशब्दविषयकम्, अत्वन्तु ओकारमात्रविषयकमिति द्योशब्दादौ चारितार्थ्यात् कथमनवकाशत्वेनापवादत्वमिति शङ्कामवतारिकामुखेन परिहरति तदाहेति । तपरकरणेनेति । सर्वत्र वर्णात्परत्रैव तपरकरणस्यानुभवसिद्धत्वादित्यर्थः । अविवक्षितत्वमिति । एवञ्चोभयोरपि ओकारान्तमात्रविषयकत्वेनामंशे आत्वं निरवकाशमेवेति भावः । तेन = ओकारान्तादित्यर्थेन । न दोष इति । गुशब्दे ओकारान्तत्वातिदेशे अनल्विधाविति निषेधेन न दोष इति भावः । अन्यथा गस्य विवक्षितत्वे । तदन्तविधेस्सत्वेनेति । गोशब्दाद्विहित इत्यर्थेन तु नेष्टसिद्धिः । न पूजनादिति । निषेधविषये सुगोशब्दे णिद्वद्भावार्थं तदन्तविधेः सिद्धान्तेऽपि सत्वेनेत्यर्थः। प्रतिषेधात् प्रतिषेधवार्तिकात् । स्थानिवत्वानापन्ने दोष इत्यत आह हे चित्रेति । आहुरिति। अनेन चान्यौकारान्तो नेति सूचितम् । तच्चाग्रे स्फुटीभविष्यति ।

बालबोधिनी : गोतो णित् । इतोऽत् सर्वनामस्थाने इति सूत्रात् सर्वनामस्थाने इत्यनुवर्तते । णिदित्यनेन सामानाधिकरण्यानुरोधात् तच्च प्रथमान्ततया विपरिणम्यत इत्याह इतोऽदिति । वस्तुतस्तु सर्वनामस्थाने इति सप्तम्यन्तं, गोत इति षष्ठ्यन्तं, णित्पदं णित्वप्रयुक्तकार्यपरम् । एवञ्च गोशब्दस्य सर्वनामस्थाने परतो णित्वप्रयुक्तकार्यं भवतीत्येवार्थो युक्त इति विषमपदविवृतिकाराः । गुरुप्रसादशेषंकृतः शास्त्रिपादा विपरिणाम एव भाष्यारूढ इति वदन्ति । यथा 'प्रकृतसूत्रे भाष्ये 'किमिदं गोतः परस्य सर्वनामस्थानस्य णित्वमुच्यते, आहोस्वित् सर्वनामस्थाने परे णित्कार्यमतिदिश्यत' इति पक्षद्वयमुक्तम् । तत्राद्यस्याणितः सर्वनामस्थानस्य स्थाने णित्सर्वनामस्थानं भवतीत्याशयः । द्वितीयस्य तु अनुवृत्तसर्वनामस्थान इत्यस्य प्रथमान्ततया विपरिणामेन गोतः परं सर्वनामस्थानं णिद्भवतीति वाच्यार्थे निष्पन्ने सति अणितो णित्वासम्भवात् लोकन्यायेन णिद्वद्भवतीत्यर्थलाभात् तस्मिन् परे पूर्वस्य णित्कार्यं फलतीत्याशयः । तदुत्तरमुक्तपक्षद्वये विशेषमाशङ्क्य आद्यपक्षे षष्ठ्यभावादसम्प्रत्ययं, द्वितीये कार्यातिदेशस्य वक्तव्यतां चोक्त्वा तत एवं तर्हीत्यादिनाऽतिदेशत्वं व्यवस्थाप्य तदुत्तरम् अनुवृत्तसर्वनामस्थानपदस्य सप्तम्यन्तत्वे वतिनिर्देशं विनाऽतिदेशत्वलाभो न भवतीत्याशयेन 'स तर्हि वतिनिर्देशः कर्तव्यः, न कर्तव्यः, न ह्यन्तरेण वतिमतिदेशो गम्यत' इत्युक्तम् । तदुत्तरं सर्वनामस्थानपदस्य प्रथमान्तत्वेन विपरिणाममभिप्रेत्यान्तरेणापि वतिमतिदेशो गम्यते । अब्रह्मदत्तं ब्रह्मदत्त इत्याह । ब्रह्मदत्तवदिति गम्यते । एवमिहाप्यणितं णिदित्याह णिद्वदिति गम्यत इत्युक्तम् । अनेन च भाष्यग्रन्थसन्दर्भेण विपरिणामस्य भाष्याभिप्रेतत्वं स्पष्टमेव गम्यत' इति । फलितार्थमाह तत्रेति । सर्वनामस्थाने इत्यर्थः ।

औतोऽम्शसोः । शस् इह सुबेव गृह्यते । न तु 'बह्वल्पार्थात्' इति तद्धितः शस् । अचीत्यनुवृत्त्या तद्धितस्य शसोऽजादित्वाभावात् । लशक्वतद्धिते इति पर्युदासात् इत्संज्ञा तु नेत्यभिप्रायेणाह अचीति । एवञ्च शसोऽत्र सुप एव ग्रहणस्य लाभेन तत्साहचर्यात् सुबेवाम् गृह्यत इति चिनवम्, असुनवम् इत्यादितिङन्तस्थले न दोष इति भावः । ननु गामित्यत्र णिद्वद्भावेन तस्मिन् परे परत्वात् अचो ञ्णितीति वृद्धिः कुतो नेत्यत आह परत्वादिति । आत्वस्य निरवकाशतया तदपवादत्वादित्यर्थः । अपवादत्वं दर्शयति तदाहेति। ओतो णिदिति नापूर्वं किन्तु सूत्राक्षरमर्यादालब्धमित्याह सूत्रे इति । गस्याविवक्षितत्वमिति। तपरकरणेन निर्देशस्थले सर्वत्र अजूरूपवर्णनिर्देशस्यैव दृष्टत्वादित्यर्थः । तत्फलमाह तेनेति। ओकारान्तादित्यर्थेनेत्यर्थः । न दोष इति । गुशब्दे ओकारान्तत्वातिदेशे अनल्विधाविति निषेधेन न दोष इत्यर्थः । अन्यथा = गस्याविवक्षितत्वाभावे । गोऽन्तत्वादीति । अल्विधि-त्वाभावेन अनल्विधाविति निषेधो नेति भावः

गकारस्याविवक्षितत्वात् ओतो णिदिति वचनं सिद्धमिति मूलकाराशयमुपवर्ण्य वस्तुतस्तु तन्न युक्तमित्यभिप्रायेण सिद्धान्तमाह परे त्विति । भाष्ये तपरत्वं प्रत्याख्यातमिति। गोतो णित् (7-1-90) इति सूत्रे भाष्ये गोत इति तपरकरणं किमर्थमित्याशङ्क्य तदभावे चित्रगुः, शबलगुरित्यादावपि स्थानिवद्भावेन गोशब्दत्वात् अङ्गाधिकारे तदन्तविधेस्सत्वेन णिद्वद्भावापत्तिरिति तद्वारणाय तपरकरणं कृतम् । कृते तु तस्मिन् तत्सामर्थ्यात् तपरस्तत्कालस्येति सूत्रे अणिति नानुवर्तत इति अनण्त्वेऽपि तत्कालग्रहणं भवतीति भिन्नकालिकस्य चित्रगुशब्दावयवगोशब्दस्य ग्रहणं न भवतीति न दोष इति समाहितम् । तदुक्तं 'तपरकरणमनर्थकं स्थानिवत्त्वप्रतिषेधात्' । तपरकरणमनर्थकम् । किं कारणम् ? स्थानिवत्त्वप्रतिषेधात् । प्रतिषिध्यतेऽत्र स्थानिवद्भावो गोः पूर्वत्वणित्वात्वस्वरेषु स्थानिवद्भावो न भवतीति । स चावश्यं प्रतिषेध आश्रयितव्यः । इतरथा हि सम्बुद्धिजसोः प्रतिषेधः। यो हि मन्यते तपरकरणसामर्थ्यादत्र न भविष्यतीति सम्बुद्धिजसोस्तेन प्रतिषेधो वक्तव्यः स्यात् । हे चित्रगव इति । अथेदानीं सत्यपि स्थानिवद्भावप्रतिषेधे गुणे कृते कस्मादेवात्र न भवति ? लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । ननु चेदानीमसत्यपि स्थानिवद्भावप्रतिषेधे एतया परिभाषया शक्यमुपस्थातुम् ? नेत्याह, न हीदानीं क्वचिदपि स्थानिवत् स्यात्' इत्युक्तम् । अयं भावः । हे चित्रगो, चित्रगव इत्यत्र सम्बुद्धिजसोः स्वाश्रयप्राप्तेः लक्षणप्रतिपदोक्तपरिभाषया वारयितुं शक्यत्वेऽपि स्थानिवत्त्वस्य निर्विषयत्व-प्रसङ्गात् अतिदेशविषये लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्त्या स्थानिवद्भावेन

गोशब्दत्वमाश्रित्य प्रसक्तस्यातिप्रसङ्गस्य तपरकरणेऽपि वारयितुमशक्यतया तद्वारणाय गोः पूर्वत्वणित्वात्वस्वरेषु स्थानिवद्भावप्रतिषेधोऽवश्यं वक्तव्यः । तेनैव चित्रगुरित्यादौ दोषवारणसम्भवात् तपरकरणं न कार्यमिति भाष्यकाराशयः । यदि तपरकरणेन गकारस्याविवक्षेति ओतो णिदित्युच्यते तर्हि हे चित्रगो, चित्रगव इत्यत्र सम्बुद्धिजसोरोकारस्य स्वाश्रयप्राप्तेः लाक्षणिकत्वेन लक्षणप्रतिपदोक्तपरिभाषया, स्थानिवद्भावप्राप्तातिप्रसङ्गस्य अनल्विधाविति निषेधेन वारयितुं शक्यतया तदर्थं स्थानिवद्भावप्रतिषेधवचनं तेन तपरकरणप्रत्याख्यानं चासङ्गतं स्यादिति भावः । स्थानिवत्त्वप्रतिषेधादिति । स्थानिवत्सूत्रे भाष्ये 'गोः पूर्वत्वणित्वात्वस्वरेषु' इति स्थानिवद्भावप्रतिषेधकं वार्तिकम् । पूर्वशब्देन पूर्वरूपापवादः सर्वत्र विभाषा गोरिति प्रकृतिभावो गृह्यते ।

तपरकरणेन गकारस्याविवक्षायां वार्तिककारासम्मतिं प्रदर्श्य भाष्यासम्मतिमप्याह द्योः इति । अन्यथा ओतो णिदित्यनेनैव सिद्धौ द्योरिति वार्तिकारम्भो व्यर्थः स्यादिति भावः । सुद्यौरिति । द्योशब्द ओकारान्तः स्त्रीलिङ्गः । 'सुरलोको द्योदिवौ द्वे स्त्रियाम्' इत्यमरः । सु शोभना द्यौः यस्येति बहुव्रीहौ पुंलिङ्गः । तदाह केवलेति ।

विहितमिति । ओकारान्ताद्विहितं सर्वनामस्थानं णिदिति विहितविशेषणं कार्यम् । तेन हे भानो इत्यत्र भानुशब्दाद्विहितत्वेन ओकारान्ताद्विहितत्वाभावेन न णिद्वद्भावप्रसक्तिः । अन्यथा ओकारान्तात् परत्वेन णिद्वद्भावे वृद्धौ हे भानौः इत्यनिष्टं स्यात् । वस्तुतस्तु लक्षणप्रतिपदोक्तपरिभाषयैव निर्वाहात् विहितविशेषणत्वं व्यर्थमित्याह यदीति ।

120 स्मृतौरिति । स्मृत उर्येनेत्यर्थः । यत्तु एषामभिधाने - 'अयवायावादिष्वेकादेश उदात्तेनोदात्त इत्यस्य सिद्धत्वं वक्तव्यं, तत्स्थानिकायादीनामस्वरितत्वाये'ति- वार्त्तिकव्याख्यावसरे - 'अवादेशे नास्त्युदाहरण'मिति 'स्वरितो वे' तिसूत्रस्थभाष्यविरोधः । प्रकृते पूर्वपदप्रकृतिस्वरेण स्मृतस्यान्तोदात्तत्वे शेषनिघातेन उशब्दस्यानुदात्तत्वात्तदेकादेशस्य 'एकादेशम् उदात्तेने'त्युदात्तत्वे 'स्मृतवा'इत्यादौ तदुदाहरणसम्भवादिति, तन्न;तृतीयादिष्वनभिधानेऽपि अन्यत्र तत्सत्त्वे बाधकाभावात् । न च 'गोतः' इति सूत्रे 'द्योश्च वृद्धिर्वक्तव्ये'ति वार्त्तिके द्योशब्दस्यैवोपादानादन्यौकारान्ताभाव इति वाच्यम्; उपलक्षणतया व्याख्यानेनादोषात् । परे तु-ईदृशानामनभिधानेऽपि न क्षतिरित्याहुः । रायो हलि । 'अष्टन आ'इत्यत 'आ' 'विभक्ता'वित्यनुवर्त्तते ।

इत्यजन्तपुंलिङ्गप्रकरणम्

भावबोधिनी : अस्वरितत्वायेति । अन्यथा स्वरिते कर्तव्ये एकदेशोदात्तस्यासिद्धत्वेनोदात्तानुदात्तयोः स्थाने आन्तरतम्यात् स्वरितः स्यादिति भावः । आहुरिति । अत्र मते औतोऽम्शसोरित्यस्यामंशे द्यामित्यत्र चरितार्थत्वात् कथं गामित्यत्र णिद्वद्भावबाधकत्वमिति सुधीभिराकलनीयम् । बाध्यसामान्यचिन्तया णित्वमात्रबाधकत्वमात्वस्य, न ह्येकमुदाहरणमिति न्यायोऽत्रानुसन्धेय इति बोध्यम् ।

इति शब्देन्दुशेखरव्याख्यायां भावबोधिन्याख्यायाम् अजन्तपुँलिङ्गप्रकरणम् ।

बालबोधिनी : उः = शम्भुः । तृतीयादिष्विति । अजादिष्विति शेषः । ईदृशानाम्= गोद्योशब्दातिरिक्तानामोकारान्तानाम् ।

इति बालबोधिनीव्याख्यायामजन्तपुंलिङ्गप्रकरणम्।

अथाजन्तस्त्रीलिङ्गप्रकरणम् ।

रमेति । रमयतेः पचाद्यच्, टाप् । एकादेशस्य पूर्वान्तवत्त्वेन प्रातिप्रदिकत्वात्स्वादयः। 'वाचा' इत्यादौ तु लिङ्गविशिष्टपरिभाषया तत्त्वात्ते । 'आप' इति पञ्चम्यन्तेन सामानाधिकरण्यादङ्गस्येति पञ्चम्या विपरिणम्यते, विशेषणेन तदन्तविधिरित्याह - आबन्तादिति । 'जसः शी' त्यतः शीति वर्त्तते । रमे इति । 'यस्ये' ति लोपो न, अभत्वात् । सम्बुद्धौ च । 'बहुवचने झली' त्यतः 'ए' दिति 'आङि चापः' इत्यत 'आप' इति चानुवर्त्तते। एङ्ह्रस्वादिति । सम्बुद्धौ प्रतिपदोक्तत्वेन शीघ्रोपस्थितिकतया हल्ङ्यादिलोपात्प्रथममेत्वेऽनेन सम्बुद्धिलोप इति भावः । सन्निपातपरिभाषा त्वनित्यत्वान्नात्र प्रवर्त्तते। आङि चा । चेन प्रकृतम् - 'ओसी' ति परामृश्यते । 'घेर्ङिती' त्यतोऽनुवृत्तं 'ङिती' ति, आप- इति पञ्चम्या- षष्ठ्या विपरिणम्यते ,, - इत्याशयेनाह - ङिद्वचनस्येति ।

भावबोधिनी : रमयतेरिति । अमन्तत्वान्मित्वेनोपधाह्रस्वः । यद्यप्यत्र केवलादप्यज् वक्तुं शक्यः तथापि प्रौढानां मनो रमयतीत्यर्थकप्रौढमनोरमाशब्दे अजर्थं ण्यन्तपाठस्य पचादिष्वावश्यकत्वेन तस्मादेवाजुक्तः । उभयपाठकल्पने तु गौरवमिति भावः । वाचेत्यादौ त्विति । भागुर्युक्तवाचानिशादिशाशब्देष्वित्यर्थः । तत्त्वात् स्वादय इत्यन्वयः । यद्यप्युभयत्र लिङ्गविशिष्टपरिभाषया स्वादय इति प्राचोक्तं तथापि रमेत्यादौ प्रातिपदिकप्रकृतिकलिङ्गबोधकप्रत्ययान्तत्वज्ञानायैकदेशविकृतन्यायस्य परादिवद्भावस्य चाश्रयणे वचनत्रयाश्रयणगौरवस्य स्फुटत्वेन तथा नोक्तमिति बोध्यम् । एतेन तद्विपरीतकथन-

स्वभावादेवमुक्तमित्यपास्तम् । सम्बुद्धाविति । विषयसप्तमीयम् । प्रतिपदोक्तत्वेनेति । इदञ्चोपलक्षणम् । परत्वं नित्यत्वञ्च बोध्यम् । एत्वे कृते स्थानिवत्त्वेन हल्ङ्यादिलोप इति तु न । सम्बुद्धिलोपस्य परत्वात् । आ आबिति प्रश्लेषेण दीर्घग्रहणस्य प्रत्याख्यानाच्चेति भावः । केचित्तु अपरनिमित्तकत्वेन हल्ङ्यादिलोपोऽन्तरङ्गः । अत एवैत्वस्य परत्वं नित्यत्वञ्चानुक्त्वा प्रतिपदोक्तमेवोक्तम् । तादृशस्य चान्तरङ्गापेक्षया पूर्वप्रवृत्तिकत्वस्वीकारादिति भावं वर्णयन्ति । वस्तुतस्तु विषयभेदेऽपि बाध्यबाधकभाव-स्वीकारेण येन नाप्राप्तन्यायेन हलङ्यादिलोपस्य एत्वेन बाध एवोचित इति इदं चिन्त्यमिति बोध्यम् । अनित्यत्वादिति । एवञ्च सम्बुद्धिलोपस्येति अनित्यत्वस्थलपरिगणनादिति भावः ।

बालबोधिनी : रमयतेरिति । रमयतीति रमा । ण्यन्तात् क्रीडार्थकरमधातोः पचादित्वात् नन्दिग्रहिपचादिभ्य इत्यचि 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इति गणसूत्रेण मित्वात् मितां ह्रस्व इति ह्रस्वः । स्त्रीत्वं लोकात् । घञजपाः पुंसीति तु न भवति । भावार्थकप्रत्ययविषये एव तत्प्रवृत्तेः ।

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया सामान्यप्राति-पदिकत्वधर्मस्य, तद्व्याप्यकुमारत्वादिविशेषधर्माणाञ्च लिङ्गबोधकप्रत्ययविशिष्टेऽतिदेशेन प्रातिपदिकत्वात् स्वादय इति मनोरमाकारादयः । वस्तुतस्तु रमेत्यादौ लिङ्गबोधक-प्रत्ययज्ञानाय परादिवद्भावस्य चाश्रयणीयतया अतिदेशद्वयाङ्गीकारप्रयुक्तगौरवं स्यादिति प्राचीनमतं परित्यज्य पूर्वान्तवत्त्वेनैव निर्वाह इति लाघवमाह एकादेशस्येति । रमेत्यादाविति शेषः । ङ्याब्ग्रहणस्य अन्यार्थतायाः प्रागुक्तत्वात् प्रातिपदिकत्वात् स्वादय इत्युक्तम् । भागुरिमते हलन्तेभ्यः टापः प्रवृत्त्या आह वाचेति । तत्त्वात् = प्रातिपदिकत्वात् ते = स्वादयः । आदाविति । आदिना दामेति डाबन्तस्य, अनडुहीति ङ्यन्तस्य च संग्रहः ।

औङ आपः । विशेषणेनेति । आप इति अङ्गविशेषणत्वादित्यर्थः । प्रतिपदोक्तत्वेन = अपवादत्वेन । हे रमा + स् इति स्थिते नाप्राप्ते हल्ङ्यादिलोपे आरभ्यमाणस्य सम्बुद्धौ च इत्येत्वस्य बाधकत्वादित्यर्थः । अनेन = एङ्ह्रस्वादित्यनेन । ननु सन्निपातपरिभाषाविरोधात् सम्बुद्धिसन्निपातं निमित्तीकृत्य जायमानः सम्बुद्धौ च इत्येकारः सम्बुद्धिलोपस्य निमित्तं न भवतीत्यत आह सन्निपातपरिभाषेति। अत्र = सम्बुद्धिलोपे ।

आङि चापः । चग्रहणस्य प्रयोजनमाह चेनेति । याडापः । आप इति पञ्चमी । ङितीत्यनुवृत्तं षष्ठ्या विपरिणम्यत इत्याह घेर्ङितीति ।

सर्वनाम्नः स्या । आबन्तात्परस्य सर्वनाम्नो विहितस्येत्यर्थः। तेन 'मासपूर्वायै' इति सिद्धम् । अत्र ह्रस्वो न स्याटः, तस्य विधयत्वेनोद्देश्यत्वासम्भवात् । नापि ङिद्वचनस्य, व्याख्यानात् । अत आपो ह्रस्व इत्याह - आपश्चेति । आबन्तस्य गणे पाठाभावेन सर्वनामत्वाभावादाह एकादेशस्येति । ग्रहणादिति । सर्वनामशब्देनेत्यर्थः। न चैवमप्याबन्तत्वाभावः, एकादेशनिष्पन्नस्याप्त्वाभावात् , अत एव 'खट्वा'इत्यादौ परादिवद्भावेनाऽऽप्त्वमाश्रित्याऽऽबन्तादिति सोर्लोप उक्तः, परादिवद्भावेन तत्त्वं तु न लभ्यम्, उभयत आश्रयणेऽन्तादिवत्त्वाभावादिति वाच्यम् ; उभयत आश्रयणे तदभावस्य भाष्ये एकदेश्युक्तत्वेऽपि सिद्धान्तिसम्मतत्वाभावात् । एतच्च तिङन्ते इण्धातौ वक्ष्यामः। परे तु - लिङ्गविशिष्टपरिभाषयाऽऽबन्तस्य सर्वनामत्वम् , आबन्तत्वन्तु परादिवद्भावेनेत्याहुः । सर्वस्यामिति । इह परत्वात्स्याटि कृते सकृद्गतिन्यायात्सुण्न ।

<u>भावबोधिनी :</u> व्याख्यानादिति । ङितः स्याडागमः, ङितो ह्रस्व इति वक्तुमावृत्तौ गौरवरूपव्याख्यानादित्यर्थः । नन्वेवमाप इत्यस्यापि आवृत्तिर्न स्यादिति चेन्न । अङ्गात्परस्य सर्वनाम्नो विहितस्य ङितः स्याट् आपश्च ह्रस्व इति व्याख्यानेन त्वडापत्तेरिष्टापत्तिग्रस्तत्वात् । आबन्तत्वाभाव इति । ननु सर्वासामित्यत्र सुडर्थं सर्वनामत्वमात्रमपेक्षितं न त्वाबन्तत्वमिति नेयं शङ्का युज्यत इति चेन्न । एकादेशस्य पूर्वान्तत्वेन ग्रहणादिति मूलस्य सर्वस्यै सर्वासामित्युभयत्र सर्वनामत्वप्रतिपादने हेतुसमर्पकत्वमिति तात्पर्यात् । तत्र च सर्वनामत्ववदाबन्तत्वस्याप्यशक्यत्वात् । अन्यथा आमि सर्वनाम्न इति सुडर्थमवर्णादङ्गात्परत्वमेवापेक्षितम् । तस्य च श्रूयमाणाकार-मादायापि वक्तुं शक्यत्वेन न चैवमित्यादि वक्ष्याम इत्यन्तग्रन्थस्यासङ्गत्यापत्तेः । एवञ्चैकादेशस्येति ग्रन्थस्य पूर्वत्रोत्तरत्र च सम्बन्ध इति बोध्यम् । एतेनैकादेशस्येत्यादि पूर्वत्रैव वक्तव्ये उत्तरत्र कथनमयुक्तमित्यपास्तम् । इण्धाताविति । तत्र हि अभीयादित्यत्र एतेर्लिङीति ह्रस्वमाशङ्क्य उभयत आश्रयणे नान्तादिवदिति समाधाय पौर्वापर्यव्यवहारविषय एवायं निषेध इति वक्ष्यतीति भावः । लिङ्गविशिष्टपरिभाषयेति । सर्वादिसूत्र एवास्या उपस्थित्या सर्वादीनां तत्प्रकृतिकस्त्रीप्रत्ययानाञ्च सर्वनामत्व-विधानादाबन्ते सर्वनामत्वमिति भावः । न च संज्ञाया विधिनिमित्तकनिमित्तकत्वेन विभक्तौ लिङ्गविशिष्टाग्रहणमिति निषेधापत्तिरिति वाच्यम् । संज्ञाया विधिनिमित्तनिमित्तकत्वे फलाभावेन तदनङ्गीकारात् । सुट् नेति। सति हि तस्मिन् अनचि चेति द्विर्वचनेन सकारत्रयश्रवणं स्यादिति भावः ।

बालबोधिनी : सर्वनाम्नः स्याट् । सर्वनाम्न इति विहितविशेषणम् । आप इति तद्विशेषणत्वेन तदन्तविधिः । आबन्तसर्वनाम्नो विहितस्येत्यर्थस्वीकारे तस्यै इत्याद्यसिद्धिः। आबन्तात् सर्वनम्नो विहितत्वाभावादत आह आबन्तात् परस्येति । तत्फलमाह तेनेति । आबन्तात् परस्य सर्वनाम्नो विहितस्येत्यर्थस्वीकारेणेत्यर्थः । मासपूर्वायै इति । मासेन पूर्वा मासपूर्वा । तस्यै मासपूर्वायै । पूर्वसदृशेति समासे तृतीयासमासे इति समुदायस्य सर्वनामसंज्ञानिषेधे समुदायादुत्पन्नाया ङेविभक्तेः सर्वनाम्नो विहितत्वाभावेन याडपवादस्य स्याटोऽप्रवृत्त्या उत्सर्गस्यैव याटः प्रवृत्त्या मासपूर्वायै इत्यस्य सिद्धिरित्यर्थः । उद्देश्यत्वासम्भवादिति । अत्र स्याटोऽपि अपूर्वतया विधीयमानत्वेन सिद्धत्वाभावात् न तस्योद्देश्यत्वं संभवतीति भावः । व्याख्यानादिति । ङित इत्यस्य आगमापेक्षयाऽवयव-षष्ठ्यन्तत्वेन स्थानषष्ठ्यन्तत्वासम्भवात् ङिद्वचनस्य ह्रस्वो न , किन्तु आप एवेति भावः। आपश्चेति । ह्रस्वपदश्रुत्या अच इत्युपस्थित्या अचश्च ह्रस्व इति स च अलोऽन्त्य-परिभाषायाऽन्त्यस्य भवतीति आप इत्यर्थाल्लभ्यते । तथा चाबन्तात् सर्वनाम्नः परस्य ङिद्वचनस्य स्याट्, आपश्च ह्रस्व इति सूत्रार्थः फलतीति भावः ।

ननु आबन्तस्य सर्वाशब्दस्य सर्वादिगणे पाठाभावात् कथं सर्वनामत्वमिति शङ्कते आबन्तस्येति । एकादेशस्येति । एकादेशस्य सवर्णदीर्घस्य पूर्वान्तवत्त्वातिदेशेन सर्वनाम-शब्देन ग्रहणमित्यर्थः ।

ननु सर्वेत्यदेः पूर्वान्तवत्त्वेन सर्वनामत्वेऽपि एकादेशनिष्पन्नस्य स्वत आप्त्वाभावात् कथमाबन्तत्वम् ? एकादेशनिष्पन्नस्याप्त्वाभावादेव खट्वेत्यादौ परादिवद्भावेन आप्त्वमाश्रित्य हल्ङ्याबिति सोर्लोप उच्यते । प्रकृते पूर्वान्तवत्त्वातिदेशेन परादिवद्भाव आश्रयितुं न शक्यते । उभयत आश्रयणे नान्तादिवदिति निषेधादिति शङ्कते न चेति । उभयत इति । पूर्वपरशब्दाभ्यामन्तादिशब्दाभ्याञ्च विरोधस्य पुरःस्फूर्तिकत्वाद् विरुद्धातिदेशद्वयस्य युगपदसम्भवः । यथा द्वयोरेकः प्रेष्यस्ताभ्यां युगपद् भिन्नदेशे कार्याय प्रेरितोऽविरोधार्थी कस्यापि कार्यं न करोति तद्वदिति भाव इति तिङन्तशेखरे स्पष्टम् । समाधत्ते उभयत इति । वक्ष्याम इति। परे तु वतिघटितशास्त्रस्याहार्यारोपबोधकत्वेन तस्य च विरुद्धविषयस्यापि युगपत् सम्भवेन लौकिकन्यायेनोक्तेन उभयत आश्रयण इत्यादिना नास्य = अभीयादित्यस्य सिद्धिरिति तिङन्तशेखरे स्पष्टम् ।

उभयत आश्रयण इत्यादिस्वीकारेऽपि निर्वाहमाह परे त्विति । सर्वनामत्वमिति । सर्वादीनां तथा लिङ्गबोधकप्रत्ययविशिष्टानाञ्च सर्वादीनीति सूत्रेण सर्वनामत्वमित्यर्थः । स्याटि कृते इति । सुटं बाधित्वेति शेषः।

प्रतिपदोक्तस्येति । दिक्शब्दमुच्चार्य विहितत्वादस्य तत्त्वम् । योत्तरेति । 'अनेकमन्यपदार्थे' इति बहुव्रीहिः । 'सर्वनाम्नो वृत्तिमात्रे'इति मात्रग्रहणात्सम्प्रत्यसर्व-नामत्वेऽपि पुंवत्त्वम् । 'योत्तरेति' -यत्तच्छब्दाभ्यामुद्देश्यविधेयत्वप्रतीत्या योत्तरात्वप्रकारकज्ञानविशेष्या सा प्रसिद्धपूर्वा यस्या इत्यर्थेनोत्तरापदस्य गुणवाचकत्वात्पूर्वनिपात इत्यन्यत्र विस्तरः। स्पष्टार्थमिति । 'दिङ्नामानी'त्यस्य बहुव्रीह्यधिकारे सत्त्वादिति भावः । अन्तरायै नगर्यै इति । 'अपुरी'त्यस्य -- पूःशब्दार्थस्याऽविशेष्यत्वे इति भावः । अत्र मानमन्वेष्टव्यम् । हे अम्बेति । ह्रस्वे कृते 'सम्बुद्धौ चे'त्येत्वं न, 'आ-आ'बिति प्रश्लेषात् । 'द्व्यक्षरं यदी'ति पठित्वा - द्व्यच्काम्बार्थस्यैव ह्रस्व इति नियममाश्रित्य - 'डलकवतां ह्रस्वो ने'त्यस्य भाष्ये प्रत्याख्यानात्फलाभेदाय सामान्यतोऽपि वार्तिकमसंयुक्तविषयमित्याशयेनाह - असंयुक्ता इति । द्व्यक्षरं यदीत्यस्याऽऽङ्गत्वात् द्व्यक्षराम्बार्थकान्ताङ्गस्य ह्रस्व इति नियमशरीराज्जगदम्बेत्यादौ ह्रस्वो भवत्येव ।

<u>भावबोधिनी :</u> न च योत्तरा सा पूर्वेति मूले प्रसिद्धोत्तराया उद्देश्यत्वं, पूर्वत्वप्रकारकज्ञानविशेष्यत्वस्य विधेयत्वञ्च प्रतीयते । तत्र पूर्वाशब्दस्य गुणोपसर्जनद्रव्यवाचित्वेन तदर्थस्य विधेयत्वेन तस्य विशेषणबोधकत्वाच्च सप्तमी विशेषणे इत्यनेन तस्यैव पूर्वनिपातेन भाव्यम् । अतः या पूर्वा सोत्तरेत्येव विग्रहः प्रदर्शनीय इत्यत आह यत्तच्छब्दाभ्यामिति । गुणवाचकत्वादिति । उत्तरापदस्योद्देश्य-बोधकस्योत्तरात्वप्रकारकज्ञानविशेष्टे लक्षणयेति भावः । लोके योत्तरा सा पूर्वेत्युक्ते पूर्वत्वस्यैवारोप इत्यनुभवः । त्वदुक्तरीत्या तु पूर्वायामुत्तरत्वस्यारोप इति पर्यवसितमिति लोकानुभवविरोधः । किञ्च विधेयस्य विशेषणत्वं सर्वसम्मतसिद्धम् । त्वदुक्तपक्षे तत्परित्यागश्चेति दोषः । अतः उत्तरपूर्वेति समासोऽभिमतस्तर्हि या प्रसिद्धपूर्वा सोत्तरेत्येव विधेयबोधकपदे लक्षणाभिप्रायेण विग्रहः प्रदर्शनीयः । एवं सति लोकानुभवविरोधः । विधेयस्य विशेषणत्वपरित्यागश्च नेति अस्मद्रीतिरेव युक्तेति केचित् । अत्र पक्षे उक्तदोषद्वयाभावेऽपि न विधौ परश्शब्दार्थ इति न्यायविरोधः शेखरकृन्मते स्थितो बोध्यः। तदनुयायिनः केचित्तु उक्तरीत्या या पूर्वा सोत्तरेत्येव विग्रहः । परन्तु न विधेयवाचके लक्षणा । किन्तूद्देश्यबोधकपूर्वपदस्य पूर्वत्वप्रकारकज्ञानविशेष्यभूतायां लक्षणेत्याहुः। अत्र मते न विधाविति न्यायबाधाभावेऽपि लोकानुभवविरोधः पूर्वमतापेक्षया विशेषो बोध्यः ।

हरिदीक्षितास्तु शुक्तिरजतमिति भाष्यप्रयोगेण आरोपाधिष्ठानार्थकस्यैव पूर्वनिपातः । यद्युत्तरपूर्वेति समासोऽभिमतस्तर्हि योत्तरा सा पूर्वेत्येव विग्रहः । परन्तु प्रसिद्धोत्तरायां पूर्वत्वस्यारोपः । यदि पूर्वोत्तरेत्यभिमतः तदा पूर्वायामुत्तरत्वस्यारोप इत्याहुः। अत्र मते न विधाविति न्यायबाधः । केचित्तु न विधाविति न्यायः लिङ्लोट्तव्य-प्रत्ययान्तानामेव लक्षणाभावबोधक इत्याहुः । विधेयवाचकस्य पूर्वनिपाताभावश्च बोध्यः। परन्त्वयं पक्षो यथाश्रुतमूलानुकूलः । एवञ्चात्र पक्षचतुष्टयं, तेषु मध्ये कः श्लाध्य इति विविच्य बोध्यम् । स्पष्टार्थमिति । नात्र लक्षणपरिभाषाप्रवृत्तिरिति वाच्यम् । तथा सति दिग्बहुव्रीहावित्येव सिध्या समासग्रहणवैयर्थ्यापत्तेः । अत्रेदं बोध्यम् । दिग्बहुव्रीहावित्युक्ते तत्रापि लक्षणपरिभाषाप्रवृत्त्या दिक्शब्दमुच्चार्य विहितबहुव्रीहिसमासग्रहणापत्त्या बहुव्रीहिसमासग्रहणोभयसामर्थ्यात् बहुव्रीहिसामान्यग्रहणं युक्तमिति । मानमन्वेष्टव्यमिति। अन्तरायां पुरीत्येव भाष्ये उदाहरणेन पूश्शब्दस्य विशेष्यवाचकत्वेऽन्तरस्य सर्वनामत्वं नेत्येवार्थो युक्तः । अन्तरे ग्रामा इति भाष्यप्रयोगोऽपि अत एव सङ्गच्छत इति भावः ।

ननु येन नाप्राप्तन्यायेन अम्बार्थह्रस्वस्य सम्बुद्धौ चेत्येव बाधकत्वं यद्यपि वक्तुं शक्यं तथापि तन्नोक्तम्, स्वमते सम्बुद्धौ चेत्यस्य आबन्तं यदङ्गमित्यर्थेन हे अतिखट्व इत्यत्र प्राप्त एत्ववारणाय आकारप्रश्लेषस्यावश्यकत्वेन एकयैवोक्त्या समाधत्ते आकारप्रश्लेषादिति । एतेनापवादत्वमेवात्र वक्तुं युक्तमित्यपास्तम् । द्व्यक्षर-मित्यक्षरशब्देन अजेव बोध्यत इति बोध्यम् । ननु प्रत्ययग्रहणपरिभाषया सम्बुद्धिर्य-स्माद्विहितः तदादिरूपद्व्यच्काम्बार्थस्य ह्रस्व इत्यर्थे जगदम्बाशब्दे ह्रस्वो न स्यादित्यत आह द्व्यक्षरं यदीत्यस्येति । न च जगदम्बाशब्दे ह्रस्वे कृते टाबापत्तिरिति वाच्यम् । उक्तार्थानामप्रयोगात् । अम्बागतस्त्रीत्वादस्याभेदात् । स्त्रीप्रत्यये विषये तन्न्यायो न प्रवर्तत इति । सामान्यार्थस्तु न लिङ्गविशिष्टपरिभाषया युवतिशब्दात् पुनस्ति-प्रत्ययोत्पत्यापत्तेः । अन्तरङ्गेन टापा तस्यासिद्धत्वाच्च । अम्बेत्यादावपि तदापत्या ह्रस्वविधानवैयर्थ्यापत्तेश्च ।

बालबोधिनी : विभाषा दिक्समासे बहुव्रीहौ । प्रतिपदोक्तस्येति । विभाषा दिक्समासे इति सूत्रे दिग्वाचकपदघटितबहुव्रीहिणा लक्षणप्रतिपदोक्तपरिभाषया प्रतिपदोक्तस्यैव बहुव्रीहेः ग्रहणम् । न तु लाक्षणिकस्य । तथा हि - दिक्शब्दमुच्चार्य विहितत्वात् दिङ्नामान्यन्तराले इति बहुव्रीहिः प्रतिपदोक्त इति तद्विहितः उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तराल-मुत्तरपूर्वेत्यस्यैव बहुव्रीहेः ग्रहणम् । या उत्तरा सा पूर्वा यस्यास्सेति अनेकमन्यपदार्थे इति

बहुव्रीहिरिति तस्याग्रहणात् न तत्र स्याडापत्तिरिति भावः । अस्य = दिङ्नामान्यन्तराले इति बहुव्रीहेः । तत्त्वम् = प्रतिपदोक्तत्वम् ।

ननु उत्तरपूर्वेति बहुव्रीहौ अन्यपदार्थप्राधान्येन समासघटकानामुपसर्जनत्वात् संज्ञोपसर्जनीभूतास्तु न सर्वादय इति निषेधेन सर्वनामत्वाभावात् कथं सर्वनाम्नो वृत्तिमात्रे पुँवद्भाव इत्यत आह मात्रग्रहणादिति । सम्प्रत्यसर्वनामत्वेऽपीति । वृत्तिमात्रे पुंवत्वविधानेन तत्सामर्थ्यात् भूतपूर्वसर्वनामत्वमादायेत्यर्थः । यत्तच्छब्दाभ्यामिति । योत्तरा सा पूर्वा यस्या इति वाक्यस्य योत्तरात्वप्रकारकज्ञानविशेष्या सा प्रसिद्धपूर्वा यस्या इत्यर्थः । तदर्थकत्वे यत्तच्छब्दाभ्यां विधेयत्वप्रतीत्येति हेतुरिति बोध्यम् । उत्तरापदस्य गुणवाचकत्वादिति । गुणोपसर्जनद्रव्यवाचकत्वादित्यर्थः । यच्छब्दसमभिव्याहृतस्य उत्तराशब्दस्योद्देश्यवाचकस्य उत्तरात्वप्रकारकज्ञानविशेष्ये लक्षणा । न तु तच्छब्दसमभिव्याहृतपूर्वाशब्दस्य विधेय-वाचकस्य । न विधौ परः शब्दार्थ इति न्यायेन विधेयस्य लक्षणाया वक्तुमशक्यत्वात् । एवञ्च उत्तराशब्दस्य उत्तरात्वप्रकारकज्ञानविशेष्यलक्षणकतया तस्य गुणवाचकत्वाद् गुणप्रवृत्तिनिमित्तकस्य विशेषणताया भाष्यकृत्सम्मतत्वात् गुणवाचकस्योत्तराशब्दस्यैव पूर्वनिपातः । न तु संज्ञावाचकस्य पूर्वाशब्दस्य ।

विशेषणं विशेष्येण बहुलम् (2-1-56) इति सूत्रे भाष्ये कृष्णतिला इत्यादौ कृष्णतिलशब्दावुभौ प्रथमान्ताविति तिलानां कृष्णा इति षष्ठीसमासो नोपपद्यते । गुणेन सह षष्ठीसमासश्च निषिद्धः । किञ्च एकस्मिन्नर्थे तयोश्शब्दयोः प्रयुज्यमानत्वेन तिलाश्च कृष्णाश्च तिलकृष्णा इति द्वन्द्वोऽपि वक्तुं न शक्यते । द्वन्द्वे हि सर्वपदार्थानां प्राधान्यात् नास्ति सर्वपदानामेकस्मिन्नर्थेऽवस्थानम् । एवञ्च द्वाविमौ कृष्णतिलशब्दौ प्रधानौ एकस्मिन्नर्थे प्रयुज्येते । द्वयोः प्रधानशब्दयोः एकस्मिन्नर्थे युगपत् प्रयुज्यमानयोः न किञ्चिदपि प्रयोजनमस्ति । नूनमत्रान्यतरत् प्रधानं तद्विशेषकं चापरमिति वक्तव्यम् । यत्रोभौ गुणशब्दौ तत्र सन्देहः । यथा खञ्जकुब्जः, कुब्जखञ्ज इति । यत्र हि अन्यतरद् द्रव्यमन्यतरो गुणः तत्र यद् द्रव्यं तत्प्रधानमित्युक्तम् । अनेन गुणप्रवृत्तिनिमित्तकस्य विशेषणत्वं सिद्धम् । अन्यत्रेति । वाक्ये यत्तच्छब्दाभ्यामुद्देश्यविधेयत्वं प्रतीयते । योत्तरात्वप्रकारकज्ञानविशेष्या सा प्रसिद्धपूर्वा यस्या इत्यर्थात् । तत्रोत्तरापदस्य ज्ञानविशेष्यपर्यन्तलक्षकतया गुणवाचकत्वेन पूर्वनिपातः । उत्तरस्यां पूर्वात्वप्रकारकज्ञानविशेष्यत्वं तु न विधेयम्, पूर्वापदस्य पूर्वनिपातापत्तेः । न विधौ परः शब्दार्थ इति विधेयबोधके लक्षणानौचित्याच्च । त्वदुक्तविग्रहे तु पूर्वापदस्य यच्छब्दसमभिव्याहारेणोद्देश्यसमर्पकतया तस्यैव लाक्षणिकत्वेन

गुणवचनतया पूर्वनिपातापत्तिरिति शब्दरत्ने स्पष्टम् । एवञ्च या पूर्वा सोत्तरा यस्या उत्तरपूर्वेति कैश्चिदुक्तं निरस्तम् । निरुक्तरीत्या पूर्वनिपातवैपरीत्यापत्तेः । पूर्वनिपात इति । सप्तमीविशेषणे बहुव्रीहौ इत्यनेनेत्यर्थः । स्पष्टार्थमिति । प्रतिपदोक्तस्य दिङ्नामान्यन्तराले इति बहुव्रीहेरेव ग्रहणसंभवात् तद्ग्रहणं स्पष्टार्थमिति भावः । अपुरीति । अन्तरं बहिर्योग इति गणसूत्रेऽपुरीति वक्तव्यमित्युक्तम् । नन्वन्तरायां पुरि वसतीति भाष्योदाहरणात् पूःशब्दसामानाधिकरण्य एव निषेध इति प्रतीयते । एवञ्च अन्तरायै नगर्यै इत्यत्र कथं निषेध इत्यत आह पूःशब्दार्थस्य विशेष्यत्वे नेति । वस्तुतस्तु तन्न युक्तमित्याह अत्र मानमिति । स्वं रूपमिति शास्त्रात् पूःपदस्य स्वरूपपरत्वे प्रत्यासत्त्याऽन्तरशब्दार्थनिरूपितविशेष्यसमर्पके पूःशब्दे सति नेत्यर्थः फलति । एवञ्च नगरीविशेष्यत्वे सर्वनामत्वमिष्टमेवेति बोध्यम् । तथा च अन्तरस्यै नगर्यै इत्येवोचितमिति अन्तरायै नगर्यै इति दीक्षितोक्तमयुक्तमिति ग्रन्थकृदाशयः ।

हे अम्बेति । नन्वत्र अम्बार्थनद्योरिति ह्रस्वे कृते 'सम्बुद्धौ च' इत्येत्वं कुतो नेत्यत आह आ आबिति । ह्रस्वे सति आ आबिति प्रश्लेषादाबन्तत्वाभावेन न एत्वमिति। स्थानिवत्सूत्रयाडापसूत्रस्थभाष्याभ्यां हल्ङ्याप्सूत्रयाडापसूत्रयोरेव प्रश्लेषो लभ्यत इति मते तु येन नाप्राप्तन्यायेन ह्रस्वस्य एत्वबाधकतया कृते ह्रस्वे तदुत्तरं न एत्वमिति बोध्यम् ।

द्व्यक्षरं यदीति । अयं भावः । अम्बार्थनद्योर्ह्रस्वः (7-3-107) इति सूत्रे भाष्ये 'डलकवतीनां प्रतिषेधः' । डलकवतीनां प्रतिषेधो वक्तव्यः । अम्बाडे । अम्बाले । अम्बिके इति वार्तिककृतोक्तम् । तदुत्तरं भाष्यकृता 'अम्बार्थं द्व्यक्षरं यदि' यद्यम्बार्थं द्व्यक्षरं गृह्यते तदानीमेव ह्रस्व इति डलकवतीनां प्रतिषेध इति वार्तिकं प्रत्याख्यातम् । द्व्यक्षरं यदीति प्रत्याख्यानपक्षे हे अक्केत्यादौ ह्रस्वः प्राप्नोति । ढलकवतां ह्रस्वो नेति वार्तिकमते ह्रस्वो न प्राप्नोतीति फलभेद इति तद्वारणाय असंयुक्ता इति वक्तव्यम् । तथा चासंयुक्ता ये डलकास्तद्वतां ह्रस्वो नेति सिद्धमिति भावः । द्व्यचूकानामम्बार्थानां ह्रस्व इत्यस्याङ्गत्वात् तदन्तविधिः । अतो जगदम्बेत्यादौ द्व्यचूकाम्बान्तत्वात् ह्रस्वो भवत्येवेत्याह द्व्यक्षरं यदीत्यस्येति । अत एवारम्भप्रत्याख्यानयोर्न फलभेदः । अन्यथा द्व्यक्षरं यदीति प्रत्यख्यानपक्षे जगदम्बेत्यस्य द्व्यक्षरत्वाभावेन ह्रस्वो न भवति । आरम्भपक्षे ह्रस्व इति फलभेदः स्यादिति भावः ।

यद्यपि जरसादेशस्येति । एवञ्चौत्वशीनुडच्याडामां नित्यत्वात्पूर्वमेषु क्वचिदजादित्वाभावात्क्वचित्सन्निपातपरिभाषया जरसोऽनापत्तिरिति भावः । यद्यपि याडामोर्जरसपेक्षया परत्वात्तयोः कृतयोराद्येऽजादित्वविघातादन्त्ये सन्निपातपरिभाषया न

जरसः प्राप्तिः ; एवमेत्त्वेऽपि ; **तथापि तत्र प्रश्लेषफलं दर्शयितुमाह - एवमिति । अत्र यद्वक्तव्यं तन्निर्जरशब्दे उक्तम् ।**

भावबोधिनी : ननु जराशब्दे शीभावादिविषये जरसादेशो नेत्येव स्वमतं तदेव युक्तं मन्वानः तत्परतया मूलं योजयितुं तस्य भावमाह एवञ्चेति । यद्यपीत्यादि प्राप्ता इत्यन्तेन मूलग्रन्थेन जरसादेशानन्तरमपि एत्वादीनां प्राप्तिप्रतिपादने चेत्यर्थः।। एषु एत्वादिषु क्वचिदित्यादि नुड्याटोरजादित्वाभावः भ्यामोर्विषये सन्निपातपरिभाषा एत्वविषये तु परत्वाच्च तत्प्रवृत्या सकृद्गतिन्याये जरसादेशानापत्तिर्बोध्या । स्यादेतत् । यद्येत्वादीनां नित्यत्वं न चैतदस्ति आआबिति प्रश्लेषेण जरसादेश एव भवतीत्यत आह यद्यपीति । प्रश्लेषेण नित्यत्वभङ्गेपि परत्वमक्षुण्णमित्याह परत्वादिति। आद्ये याटि अन्त्ये आमि । एवम् एत्वेपीति । जरसादेशापेक्षया परत्वादेत्वमित्यर्थः । जरसादेशाभावस्तु सकृद्गतिन्यायेन। एतदर्थं सूचयितुमेव पृथगुक्तिः। एवञ्च जरसादेशविषये प्रश्लेषो विफलः। एत्वाद्यपेक्षया पूर्वं जरसादेशे तस्य स्थानिवत्वेन तेषां प्राप्तौ हि सफलः स्यादिति प्रश्लेषपरस्य मूलस्य अवतारिकामुखेन भावमाह प्रश्लेषफलं दर्शयितुमिति । न च नसादिविषयेपि परत्वादेत्वादिषु कृतेषु उक्तरीत्या नसादयो न भवन्तीति तत्रापि प्रश्लेषस्य फलं नेति वाच्यम् । तत्र सन्निपातपरिभाषादिविरोधस्य वक्तुमशक्यत्वेन न नसाद्यादेशाानामेत्वादिषु कृतेष्वकृतेषु च प्रवृत्या नित्यत्वेन पूर्वं प्रवृत्तौ ततः स्थानिवत्वेन एत्वादीनां प्रवृत्या तद्वारणाय प्रश्लेषस्य सार्थक्यात् । अत्र यद्यपि सूत्रचतुष्टये कृतस्य प्रश्लेषस्य फलमस्ति तथापि प्रभृतिग्रहणस्य प्रकारार्थत्वे औप्रत्ययेपि नसाद्यादेशसंभवेन औङ आप इत्यत्र कृतस्य प्रश्लेषस्यापि फलं बोध्यम् । ननु औङ आपः ह्रस्व नद्याप इत्याभ्यां जसः परत्वेन पूर्वं प्रवृत्तौ ततः स्थानिवत्वेन तयोः प्राप्त्या उक्तसूत्रद्वये कृतस्य प्रश्लेषस्य जरस्विषये फलमस्तीत्यत आह अत्रेति। उक्तमिति। विभक्तिसम्बन्धिकार्याणां जरसपेक्षया पूर्वप्रवृत्तिकत्वमितिं बोध्यम्। एवञ्च सूत्रद्वयस्य न तत्रोपयोग इति भावः। पद्वन्नित्यादीनां प्रयोगनियामकत्वे तु अतिखट्वशब्दे प्रश्लेषफलं बोध्यम् । तच्चाग्रे स्फुटीभविष्यति ।

बालबोधिनी : यद्यपीति । अयमाशयः । जराशब्दात् औप्रत्यये जरसादेशः प्राप्नोति तथा औङ आप इति शी आदेशः । आमि नुट्जरसौ प्राप्नुतः । ङेङसिङस्सु याट्जरसौ । ङौ आम्जरसौ प्राप्नुतः । तत्र जरसि कृतेऽपि स्थानिवद्भावेनाबन्तत्वात् शीनुड्याडामां प्रवत्तिरिति कृताकृतप्रसङ्गित्वेन नित्यत्वात् तेषु कृतेषु सन्निपातपारिभाषया जरसोऽनापत्तिः।

टायां तु आङि चाप इत्येत्वस्य जरसश्चोभयोरपि कृताकृतप्रसङ्गित्वेन नित्यत्वात् तयोः परत्वादेत्वे सकृद्गतिन्यायेन जरसोऽनापत्तिरिति यद्यपि जरसादेशस्येति पूर्वपक्षग्रन्थस्य भावः। तदाह एवञ्चेति । जरसादेशस्य स्थानिवद्भावेनाबन्तत्वात् एत्वादीनां कृताकृत-प्रसङ्गित्वमित्यर्थः । अत एव तेषां नित्यत्वम् । आ आबिति आकारप्रश्लेषे सति जरसादेशोत्तरमनल्विधाविति निषेधेन स्थानिवत्त्वाप्रवृत्त्या कृताकृतप्रसङ्गित्वाभवेन न तेषां नित्यत्वमित्याशयः । तथा च शीनुड्विषये परत्वात् जरसः प्रवृत्तिः । याडामेत्वानामाकार-रूपाधिकसापेक्षत्वेन बहिरङ्गत्वात् ततः पूर्वं जरसः प्रवृत्तिरिति भावः ।

एवं प्रश्लेषस्य फलं मूलग्रन्थरीत्या प्रदर्श्य वस्तुतस्तु स्थलत्रये नैतदर्थं प्रश्लेष आवश्यक इत्याशयेन'एवं नस्निश्पृत्सु' इति मूलग्रन्थमवतारयति यद्यपीत्यादिना । ङेङसिङस्सु जरसपेक्षया परत्वात् याटि अजादित्वाभावात्, ङौ परत्वादामि कृते सन्निपातपरिभाषाविरोधात् न जरसः प्राप्तिरिति न तत्राकारप्रश्लेषस्य फलम् । अल्पापेक्षमन्तरङ्गमित्यस्य भाष्यकृता निराकृतत्वेन न तादृशमन्तरङ्गत्वमादाय जरसः पूर्वं प्रवृत्तिरिति वक्तुं न शक्यते । अत एव परत्वात् जरस् इत्युक्तमिति बोध्यम् । एवमेत्वेऽपि आकारप्रश्लेषस्य न फलम् । तद्विषये नित्यत्वाज्जरसि तदुत्तरं स्थानिवद्भावेनाबन्तत्वेऽपि निर्दिश्यमानस्यापोऽभावात् नैत्वप्रवृत्तिरिति । वर्णग्रहणे निर्दिश्यमानपपरिभाषाया अप्रवृत्तिरिति प्राचीनाः । हयवरट्सूत्रस्थभाष्यविरोधात् वर्णग्रहणे तदप्रवृत्तौ न मानमिति बोध्यम् । अधिकं तावत् परिभाषेन्दुशेखरतो बोध्यम् । तथापीति । तत्र = स्थलत्रये । याडामेत्वेषु । प्रश्लेषफलमाह एवमिति । नासिकाशब्दस्य निशाशब्दस्य पृतनाशब्दस्य च एत्व-शीभाव-याड्-नुडागमान् बाधित्वा पद्दन्नोमासित्यादिना नस् निश् पृत् इत्यादेशेषु क्रमेण कृतेषु तेषां स्थानिवद्भावेन आबन्तत्वमाश्रित्य एत्वादयः प्राप्नुवन्तीति तद्वारणाय प्रश्लेष आवश्यकः । एत्वादीन् बाधित्वा अन्तरङ्गत्वान्नसादिषु कृतेषु स्थानिवद्भावेन प्राप्ता एत्वादयः आकारप्रश्लेषान्न भवन्तीति भावः ।

वस्तुतस्तु जरसादेशाद् विभक्तिसंबन्धिकार्यमात्रं पूर्वविप्रतिषेधेन इति सिद्धान्ति-तत्वेन याडादिषु कृतेषु क्वचिदजादित्वाभावात् क्वचित् सन्निपातपरिभाषाविरोधाच्च जरसः प्राप्तिरेव नेति बोध्यम् । अतिखट्वशब्दे तेषां वारणाय आकारप्रश्लेष आवश्यकः ह्रस्वनद्याप इत्यत्र आकारप्रश्लेषे न फलं नापि मानमिति निर्जरशब्दे उक्तमिति तत एवावगन्तव्यम् ।

स्वाश्रयमिति । स्वं -श्रूयमाण आकारः । स्थानिवद्भावेनाप्त्वमिति । न च 'ङ्याब्ग्रहणेऽदीर्घ आदेशो न स्थानिव'दिति ह्रस्वे आप्त्वस्य विच्छेदात्कथं दीर्घे स्थानिवत्त्वेन

तल्लाभः?, ङ्याप्स्थानिको दीर्घभिन्न आदेशो न स्थानिवदिति तदर्थ इति वाच्यं, 'याडापः' 'औङ आपः' 'आङि चापः' 'ङेराम्नद्याम् ' 'हल्ङ्याप् '-इत्येतेष्वाकारप्रश्लेषमाश्रित्य स्थानिवत्त्वनिषेधप्रत्याख्यातृभाष्यनये शङ्कासत्त्वेनादोषात् । अत्र यत्रोदाहरणे सूत्रभाष्यवार्तिकानां फलभेद आपतति तेषामनभिधानं, यथा अतिखट्वस्य -अः- 'अतिखट्वाः' इत्यादेः । वक्ष्यमाणरीत्या दीर्घात्पूर्वं फलाभावेन स्थानिवत्त्वाऽप्रवृत्तौ फलभेदस्यैवाभावाच्च । यत्तु - आकारान्तरं प्रश्लिष्य - 'आकाररूप एव यो न कदाचिद्रूपान्तरं प्राप्त इत्यर्थ' इति, तन्न; मानाभावात्, भाष्ये तस्यानुक्तेश्च । आबन्तं यदङ्गमिति । 'प्रत्ययग्रहणे'इति परिभाषयाऽतिखट्वस्य नाबन्तत्वं यच्चाबन्तं - खट्वेति, न तदङ्गमिति भावः। न चानयाऽऽबन्तग्रहणे तेनाङ्गविशेषणादाबन्तान्तं यदङ्गमित्यर्थादतिखट्वायेत्यादौ दोषस्तदवस्थ इति वाच्यम् ; अङ्गस्य विशेषणत्वात् । एतेन - 'श्रुतमाकारमादाय स्मृतमनुबन्धमादाय आप्त्वानुसन्धानात्स्यादेव या'डित्यपास्तम् । तस्य लाक्षणिकत्त्वाच्च । ननु स्त्रीप्रत्यये वाचनिकस्तदादिविधिनिषेधो भाष्ये पठितस्तत्कथमस्य तत्र प्राप्तिरत आह - उपसर्जनेति । 'स्त्रीप्रत्यये चानुपसर्जने ने'ति वचनस्यैव भाष्ये पाठादिति भावः। अत्रोपसर्जनत्वं - लौकिकमेव , स्त्रीप्रत्यये शास्त्रीयोपसर्जनत्वासम्भवात् । यद्यपि स्त्रीप्रत्ययान्ते शास्त्रीयोपसर्जनत्वमस्ति, तथापि न तेन 'प्रत्ययग्रहणे'इति तदादिनियमप्रसक्तिः । एतत्सर्वं व्याख्यादर्शाद्यनुरोधेन ।

<u>भावबोधिनी :</u> अतिखट्वा इत्यादेरिति । अत्र च सूत्रकारभाष्यकाराभ्यां वार्तिककारस्य विरोधः मतद्वयेपि सुलोपप्राप्तेः । आदिपदग्राह्ये क्यजन्त प्रकृतिककर्तृक्विबन्ते मालीशब्दे । वार्तिकमते ङ्याब्ग्रहणेऽदीर्घइत्युक्तेः ईकारे आप्त्वं सूत्रमतेपि आप्त्वस्य सुलभत्वेन दीर्घरूपाप्त्वेन सुलोपः आ आबिति प्रश्लेषं वदतो भाष्यकारस्य मते आकाररूपाप्त्वाभावेन न सुलोप इति सूत्रवार्तिकाभ्यां भाष्यस्य विरोधः । दीर्घात्पूर्वमिति । खट्व इत्यत्र सवर्णदीर्घात्पूर्वम् । फलाभावेनेति । इदं चिन्त्यम्। सुनयिकेत्यादावित्वसिद्धये नीइत्यस्य स्थाने गुणेन ने इत्यादेशः । तस्य च नय् इति। अत्र गुणनिष्पन्ने ने इत्यस्मिन् अतिदेशेन धातुत्वे हि तदादेशे यान्ते धातुत्वेन धात्वन्तयकोरित्यस्य प्रवृत्तिरिति । यःआप् । रूपान्तरमिति । अनतिदिष्टाप्त्वावच्छिन्नाकाररूपाबिति तदर्थपर्यवसानेन अतिखट्वेत्यादौ तथाभावादिति भावः । एकमाकारं प्रश्लिष्य आकारूपाबित्युक्तौ तु स्यादेवाकाररूपाप्त्वम् । मानाभावादिति । भाष्ये आकारद्वयप्रश्लेषादर्शनादिति भावः । तदाह भाष्यानुक्तेश्चेति । एतेन = अङ्गरूपं यदाबन्तमित्यर्थेन । श्रुतमाकारमादायेत्यस्य ङ्याब्ग्रहणेऽदीर्घ इति स्थानिवत्व-

निषेधेपीत्यादिः । ईदृशेपि प्रत्ययग्रहणपरिभाषाप्रवृत्या समुदायस्याबन्ततत्वमस्त्येवेत्यत आह लाक्षणिकत्वाच्चेति । अनुबन्धीयमानाप्त्वस्य विलम्बोपस्थितिकत्वेन तद्विशिष्टस्याकारस्य सुपि चेति लक्षणनिष्पन्नत्वेन चेति भावः । लौकिकमेव= इतरविशेषणत्वेनार्थोपस्थापकत्वमेव। शास्त्रीयोपसर्जनेति । उपसर्जनसंज्ञेत्यर्थः। ननु परिभाषायां प्रत्ययग्रहणपरिभाषया स्त्रीप्रत्ययान्तइत्यर्थेन तत्रानुपसर्जनत्वस्य विशेषणेन शास्त्रीयमेव गृह्यतामित्यत आह यद्यपीति । न प्रत्ययग्रहण इति ।

बालबोधिनी : ननु याडाप इत्यत्र आ आबिति आकारप्रश्लेषे सत्यपि अतिखट्वायेत्यत्र याट् दुर्वारः । खट्वामतिकान्तः अतिखट्वः । अत्यादय इति समासे गोस्त्रियोरिति ह्रस्वः । चतुर्थ्येकवचने ङेर्यादेशे सुपि चेति दीर्घे अतिखट्वायेत्यत्र दीर्घे स्वतः आकारत्वस्य, स्थानिवद्भावेनाप्त्वस्य च सत्वात् याट् दुर्वार इति शङ्कितुराशयः । स्वाश्रयमिति । स्वं श्रूयमाण आकार आश्रयो यस्याकारत्वस्य तत् स्वाश्रयमित्यर्थः । स्वतस्सिद्धमिति यावत् ।

ननु ङ्यब्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति वार्तिकेन स्थानिवत्त्वनिषेधात् अतिखट्वेत्यत्र खट्वाशब्दस्य गोस्त्रियोरिति ह्रस्वे, तत्र आप्त्वस्य विच्छेदात् अतिखट्वायेत्यत्र सुपि चेति दीर्घे कृते कथं तत्र स्थानिवत्त्वेन आप्त्वलाभ इति शङ्कते न चेति । तदर्थः = वार्तिकार्थः । दीर्घभिन्न इति । क्यजन्तकुमारीशब्दे क्यजन्तखट्वाशब्दे च अकृत्सार्वधातुकेति दीर्घात्, खट्वाशब्दे सवर्णदीर्घाच्च भिन्न इत्यर्थः ।

समाधत्ते याडाप इति । याडाप इत्यादौ आकारप्रश्लेषं कृत्वा भाष्यकारः स्थानिवत्त्वनिषेधकं ङ्यब्ग्रहणे इति वार्तिकं प्रत्यख्यातवान् । तन्मते ङ्याब्ग्रहणे इति वार्तिकाभावेन ह्रस्वे आप्त्वस्यातिदेशे सति दीर्घे स्थानिवत्त्वेनाप्त्वस्यातिदेष्टुं शक्यत्वेन अतिखट्वायेत्यत्र याट् दुर्वार इति शङ्कासत्वेनादोषादिति भावः । भाष्यनये इति । न तु वार्तिकमते इत्यर्थः ।

ननु अतिखट्वाः, गङ्गीः इत्यादौ सूत्रभाष्यवार्तिकानां फलभेद आपततीति ङ्याब्ग्रहणेऽदीर्घ इति वार्तिकेन हल्ङ्यापूसूत्रस्थदीर्घग्रहणप्रत्याख्यानम्, आकारप्रश्लेषेण वार्तिकप्रत्याख्यानञ्च कथं युज्यत इति शङ्कायामाह अत्रेति । अयं भावः । हल्ङ्याबिति सूत्रे दीर्घग्रहणेन दीर्घौ यौ ङ्यापौ तदन्तात् परस्यैव सोर्लोपविधानेन निष्कौशाम्बिः, अतिखट्व इत्यादौ सोर्लोपो नेति सूत्रकारमतम् । स्थानिवत्सूत्रे ङ्यब्ग्रहणेऽदीर्घः इति वार्तिकमारब्धं वार्तिककृता । ङ्यब्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति तदर्थः ।

निष्कौशाम्बिः, अतिखट्वः इत्यत्र सुलोपाप्राप्तिः तत्प्रयोजनम् । एतेनैव निर्वाहात् हलूङ्याबिति सूत्रे दीर्घग्रहणं प्रत्याख्यातं वार्तिककृता । यथा 'किं पुनरत्र ज्यायः? स्थानिवत्वप्रतिषेध एव ज्यायान् । इदमपि सिद्धं भवति अतिखट्वाय, अतिमालाय । याडापः, इति याण्न भवति' इति । तदुत्तरं 'प्रश्लिष्टनिर्देशात् सिद्धम्' इत्युक्त्वा भाष्यकारः ङ्याब्ग्रहणेऽदीर्घ इति वार्तिकं प्रत्याख्यातवान् । अयं च प्रश्लेषो याडापः, आङि चापः, औङ आपः, ङेराम्नद्याम्, हलूङ्याब् इत्येतेषु । ह्रस्वनद्याप इत्यत्र प्रश्लेषे न मानम् । एवं मतत्रयं सम्पन्नम् । तत्र अतिखट्वस्य अः अतिखट्वा इत्यादौ सूत्रमते भाष्यमते च सुलोपो भवति । वार्तिकमते तु न, अतिखट्वे गोस्त्रियोरिति ह्रस्वेन आबन्तत्वस्य विच्छेदात् अग्रे प्ररोहासंभवात् । एवं गङ्गीयतेः क्विपि गङ्गीरित्यादौ प्रश्लेषवादिनो भाष्यकारस्य मते आकाररूपस्य आपोऽभावेन न सुलोपः । सूत्रकारमतेऽपि ङ्यापूपदोपस्थितयोः ईकाराकारयोरेव दीर्घयोर्ग्रहणेन न सुलोपप्रसङ्गः । वार्तिकमते अदीर्घस्यैवादेशस्य स्थानिवत्त्वनिषेधेन प्रकृते क्यचि चेति आप ईत्वस्य दीर्घरूपत्वेन स्थानिवत्त्वनिषेधाप्रवृत्तौ आप्त्वातिदेशे सुलोपापत्तिरिति सूत्रभाष्यवार्तिकानां फलभेद इति ङ्याब्ग्रहणेऽदीर्घ इति वार्तिकेन हलूङ्याबिति सूत्रस्थदीर्घग्रहणप्रत्याख्यानम् , आकारप्रश्लेषेण वार्तिकप्रत्याख्यानं च कथं संगच्छत इत्याशङ्क्य ग्रन्थकृत् तेषां प्रयोगाणामनभिधानमुक्तवान् ।

वस्तुतस्तु अतिखट्वाः इत्यादेरनभिधानं न युक्तमित्याह वक्ष्यमाणरीत्येति । परे तु मतप्रस्तावे 'किञ्चाकारप्रश्लेषपक्षेऽपि दीर्घोत्तरं स्वाश्रयाकारत्वं स्थानिवद्भावेनाप्त्वमिति शङ्काऽयुक्तैव । दीर्घात्पूर्वं स्थानिवत्त्वस्य फलाभावादप्रवृत्तौ स्थानिन्याप्त्वबुद्धेर-भावात्तदादेशे दीर्घे तदारोपस्य दुर्लभत्वात्' इत्युक्तरीत्येत्यर्थः । एवञ्चोक्तरीत्या दीर्घे आप्त्वातिदेशाभावे सूत्रभाष्यमतयोरपि दीर्घोत्तरमाप्त्वस्य प्ररोहाभावेन सुलोपाप्राप्तिरिति मुनित्रयमतेऽपि फलभेदो नास्तीति भावः । स्पष्टश्चोद्योते प्रश्लेषनिर्देशात् सिद्धमिति भाष्यव्याख्याने यथा यद्वा स्थानिवद्भावस्य कार्यार्थत्वेनातिखट्वाशब्दे आकारप्रश्लेषे फलाभावात् तदप्रवृत्तौ स्थानिन्याप्त्वबुद्धेरभावात् तदादेशे तदारोपः सूत्रमते भाष्यमते च दुर्लभः, परम्परया कार्यमादाय स्थानिवत्त्वप्रवृत्तौ मानाभावात् इति ।

केचित्तु अतिखट्वादौ वार्तिकमते लोपाप्राप्त्या भाष्यादिमतेऽपि तत्सम्पादनाय ङी ई ई, आ आ आबिति ईकारादिप्रश्लेषान्तरेण लोपाभावो वक्तव्यः । ईकाराकारयोः प्रश्लेषेणैव निष्कौशाम्बिः अतिखट्व इत्यादौ सुलोपव्यावृत्तौ सिद्धायां सूत्रमते दीर्घग्रहणस्य, एकप्रश्लेषेणैव निर्वाहे भाष्यमते तत्प्रत्याख्यानाय कृतस्य प्रश्लेषान्तरस्य च नियमार्थत्वेन

न कदाचिदपि रूपान्तरं प्राप्तौ यौ ङ्यापावित्यर्थो लभ्यत इति न दोष इति वदन्तीत्याह यत्त्विति । निराकरोति तन्नेति । मानाभावादिति । तदेवाह भाष्ये इति । तस्य = आकारान्तरप्रश्लेषस्य । अनुक्तेश्चेति । ङ्यब्ग्रहणेऽदीर्घ इति वार्तिकस्य अतिखट्वायेत्येव प्रयोजनं प्रदर्श्य आकारप्रश्लेषेण हि तत्प्रत्याख्यातं भाष्ये । तद्भाष्यं हल्ङ्याबित्यत्र आकारद्वयप्रश्लेषे मानं भवितुं नार्हतीति भावः ।

अतिखट्वायेत्यत्र याट्शङ्कां वारयति आबन्तं यदङ्गमिति । याडाप इत्यत्र आब्ग्रहणेन प्रत्ययग्रहणपरिभाषया आबन्तं गृह्यते । अङ्गस्येति तद्विशेषणम् । अङ्गं यदाबन्तमिति तदर्थः । यच्चाङ्गमतिखट्वेति न तदाबन्तम् । यच्चाबन्तं खट्वेति न तदङ्गमिति स्थानिवत्त्वेनाप्त्वे सत्यपि न याडिति भावः । अङ्गस्य विशेष्यत्वमित्यभिप्रायेण शङ्कते न चेति । समाधत्ते विशेषणत्वादिति । एतेनेति । अङ्गस्य विशेषणत्वेन अङ्गं यदाबन्तमित्यर्थाश्रयणेनेत्यर्थः । अपास्तमिति । आबन्तेऽङ्गत्वाभावादित्यर्थः ।

वस्तुतस्तु अङ्गस्य विशेष्यत्वमिति सिद्धान्ते आबन्तान्तं यदङ्गमित्यर्थस्वीकारेऽपि अतिखट्वायेत्यत्र याडापत्तिर्नास्तीत्याह तस्येति । आकारस्येत्यर्थः । लाक्षणिकत्वाच्चेति। ग्रन्थकृन्मते वर्णग्रहणेऽपि लक्षणप्रतिपदोक्तपरिभाषायाः प्रवृत्तेः दीर्घनिष्पन्नाकारे आप्त्वस्य लक्षणनिष्पन्नतया दोषवारणं भवतीति भावः।

ननु ष्यङः सम्प्रसारणमिति सूत्रे भाष्ये स्त्रीप्रत्यये तदादिनियमप्रतिषेधस्य पाठात् प्रकृते याडाप इत्यत्र तदादिनियमाभावेन अतिखट्वायेत्यादौ याडापत्तिः तदवस्थैवेति शङ्कते नन्विति । समाधत्ते उपसर्जनेति । अत्र = उक्तपरिभाषायाम् । प्रकृते उपसर्जनस्त्रीप्रत्यये तदादिनियमो निर्बाध इति भावः । न तेनेति । तेन = स्त्रीप्रत्ययान्तेन । स्त्रीप्रत्यय एव तदादिनियमः प्राप्त इति तत्रैव निषेध उचित इति भावः ।

मूलं दूषयति एतदति ।

परे त्वस्याकारस्य लाक्षणिकत्वान्नात्र याट् , वर्णग्रहणेऽपि तत्प्रवृत्तेः 'ओ'दित्यादौ भाष्ये स्पष्टमुक्तत्वात् । न च 'खट्वायै' इत्यत्र याडनापत्तिः; सूत्रन्तु 'निशायै' इत्यादौ चरितार्थमिति वाच्यं, यस्य रूपस्य लक्षणप्रवृत्तिं विना न सम्भवस्तस्यैव लाक्षणिकस्य तत्परिभाषाविषयत्त्वात् , न चेह तथा, एकादेशतः प्रागपि तद्रूपसत्त्वात् । 'पदाङ्गाधिकारे' इति वार्त्तिकेनाङ्गस्य विशेष्यताया एवौचित्यबोधनाच्च । अत एव 'आबन्तान्तं यदङ्ग'मित्यर्थाभिप्रायेण - 'अतिखट्वाये'त्येतत्सिद्धये -अतिखट्व - ए इति स्थिते प्रवृत्तं

'ङ्याब्ग्रहणेऽदीर्घ 'इति वार्तिकं व्याख्याय, श्रुताऽऽकारस्मृतानुबन्धभ्यामाप्त्वेनाऽऽशङ्कां कृत्वा लाक्षणिकत्वेन समाधाय, आकारप्रश्लेषेण तत्प्रत्याख्याने एतत्परिहारायोपायान्तराकथनं भाष्ये । किञ्च - अङ्गस्य विशेषणत्वे वार्तिकस्य , तत्प्रत्याख्यानाय - आकारप्रश्लेषस्य च वैयर्थ्यं स्पष्टमेव । किञ्च -खट्वाया अर्द्धेऽर्द्धखट्वायामित्यादौ याडनापत्तिः। किञ्चाऽऽकारप्रश्लेषपक्षे ऽपि दीर्घोत्तरं- 'स्वाश्रयाकारत्वं, स्थानिवद्भावेनाप्त्व'मिति शङ्काऽयुक्तैव, दीर्घात्पूर्वं स्थानिवत्वस्य फलाभावादप्रवृत्तौ स्थानिन्याप्त्वबुद्धेरभावात्तदादेशे दीर्घे तदारोपस्य दुर्लभत्त्वात् , परम्परया कार्यमादाय स्थानिवत्त्वप्रवृत्तौ मानाभावात् । 'याडापः' इति सूत्रे भाष्येऽपि - 'अतिखट्वाये' त्यत्र स्थानिवत्त्वात्प्राप्तस्य याटः प्रतिषेधो वक्तव्यः, न वक्तव्यः, - 'ङ्याब्ग्रहणेऽदीर्घ'इति स्थानिवत्त्वनिषेधात् । न च दीर्घत्वे - आबसौ भूतपूर्व इति याट् प्राप्नोति, लाक्षणिकत्वात्। स्थानिवत्त्वे तु तत्सामर्थ्यान्नैतत्परिभाषाप्रवृत्तिः' इत्युक्तम् । यद्यपि स्थानिवत्सूत्र- याडापसूत्रस्थभाष्याभ्यां हल्ङ्याप्सूत्रयाडापसूत्रयोरेव प्रश्लेषो लभ्यते , तथापि भाष्यमुपलक्षणम् , इतरसूत्रविषयोदाहरणानभिधानं वेत्यनयोर्युक्तं सुधीभिर्विचार्यमित्याहुः।

भावबोधिनी : ओदित्यादौ । भाष्ये इति । तत्र हि अनदः अदः समभवददोऽभवदित्यादौ प्रकृतप्रगृह्यसंज्ञामापाद्य अस्य ओकारस्य लाक्षणिकत्वान्नेत्युक्तम् । निशायै इत्यादावित्यादिना बहुयज्वायै इत्यादिसङ्ग्रहः । तेन स्वमते निशादिशब्दानां आकारन्तप्रकृति-कटाबन्तत्वाङ्गीकारेण खट्वासमकक्षत्वेपि न क्षतिः । इह= खट्वायै इत्यत्र । तद्रूपसत्वादिति । आकारत्वसमानाधिकरणाप्त्वरूपधर्मावच्छिन्नत्वसत्वादित्यर्थः । अतिखट्वायै इत्यादौ तु सुपि चेति लक्षणप्रवृत्तिं विना याडागमप्रयोजकोक्त-धर्मावच्छिन्नासंभव इति भावः । अत एव= अङ्गे विशेष्यत्वस्य अतिखट्वायै इत्यादावकारे लाक्षणिकत्वस्य चाङ्गीकारादेव । वार्तिकं व्याख्यायेति । वार्तिकाङ्गीकारोत्तरमपीत्यर्थः । स्मृतावनुबन्धेति । टाबित्यत्र विद्यमानो योऽनुबन्धः तं स्मृत्वेत्यर्थः । स्वघटितसमुदाय-बोध्यादेशत्वसम्बन्धेन प्रकृताकारे अनुबन्धविशिष्टत्वमित्यौपचारिकमाप्त्वमिति भावः। आशङ्कां= याडागमाशङ्काम् । तत्प्रत्याख्याने । अतिखट्व ए इति स्थिते याड्वारणाय वार्तिकप्रवृत्तम् आकारं प्रश्लिष्य आकाररूपापः याडित्युक्ते अल्विधौ स्थानिवत्वाभावेन तत्वाप्राप्तौ वार्तिकं प्रत्याख्यातमिति बोध्यम् । एतत्परिहाराय याडागमपरिहाराय । उपायान्तराकथनम्= भाष्ये लाक्षणिकत्वापेक्षया उपायान्तराकथनम् । स्थानि-वत्सूत्रभाष्ये । एतेन अङ्गरूपम् आबन्तमित्यर्थेन याडागमवारणं भाष्यविरुद्धमिति भावः।

विरोधान्तरमाह किञ्चेति । वैयर्थ्यमिति । अङ्गरूपं यदाबन्तमित्युक्ते अतिखट्व ए इत्यवस्थायां तस्याङ्गरूपाबन्तत्वाभावेन तत्र स्थानिवत्वनिषेधक वार्तिकस्यैवोत्थित्य-भावेन तत्प्रत्याख्यानाय आकारप्रश्लेषपर्यन्तानुधावनपरं भाष्यं सुतरामसङ्गतमेव स्यादिति भावः । लक्ष्यदोषश्चाह किञ्चेति अनापत्तिरिति । अयं भावः । अर्धं खट्वाया इति विग्रहे खट्वाशब्दस्य लौकिकोपसर्जनत्वेपि एकविभक्तावषष्ठ्यन्तवचनमिति एकविभक्तिचेति प्राप्तोपसर्जनत्वाभावात् ह्रस्वाभावे स्त्रीप्रत्यये चानुपसर्जने नेति अतिखट्वा इत्यस्या-बन्तत्वाभावेन आबन्तस्याङ्गत्वाभावेन त्वन्मते याडनापत्तिरिति । यदि तु अर्धा च सा खट्वा चेत्यादिकर्मधारयाश्रयणेन एकदेशिसमासस्य भाष्ये प्रत्याख्याततत्वेन कर्मधारये चोपसर्जनत्वाभावेन विशिष्टस्याबन्तत्वान्न दोष इत्युच्यते तदा गोवशायै इत्यत्र दोषो बोध्यः । पोटायुवतीत्यनेन समासे गोशब्दस्य पूर्वनिपातः वशायै इत्यस्योपसर्जनत्वम्, अनियतविभक्तित्वेनोपसर्जनसंज्ञाभावात् गोस्त्रियोरिति ह्रस्वाभावः। एवम् इभपोटेत्यत्रापि । अत एवादावित्युक्तम् । मानाभावादिति। इदं चिन्त्यम् । भाष्यस्यैव मानत्वात् । तथाहि स्थानिवत्सूत्रे अलि विधाविति सप्तमीसमासोदाहरणं क इष्ट इत्युक्तम् । तत्र हि यजेः क्तः सम्प्रसारणे पूर्वरूपे चेष्टः । यकारनिष्ठहश्स्वस्य परम्परया संप्रसारणस्थानिके पूर्वरूपनिष्पन्नेकारे अतिदेशे हि अनल्विधाविति निषेधस्सङ्गच्छत इति फलन्तु सुनयिकेति पूर्वमेव निरूपितम् । लाक्षणिकत्वान्न याडित्यत्र स्थानिवत्सूत्रभाष्य-सम्मतिमुक्त्वा सूत्रान्तरभाष्यसम्मतिश्चाह याडाप इति । सूत्रभाष्येपीति । न केवलं स्थानिवत्सूत्रे किन्तु याडाप इति। सूत्रभाष्येपीत्यर्थः। एतेन परम्परया स्थानिवत्वाभावे इदं भाष्यप्रमाणमित्यपास्तम् । तथा सति अत एव याडाप इति सूत्रे भाष्ये इति वदेदित्यू-ह्यम् । अतिदेशविषये लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इति मनोरमोक्तन्त्वयुक्तम् । आप्त्वंशे लक्षणपरिभाषाया असञ्चारितत्वात् किन्तु आकारांश एव तत्सञ्चारः । अत एवास्य आकारस्येत्युक्तं शेखरकृतेति बोध्यम् । न चेति । अथेति भाष्यपाठः । स्थनिवत्वेत्वित्यादि । स्थानिवत्वे आप्त्वस्य मुख्यत्वेन लक्षणपरिभाषया वारणमशक्यम् । अतो ङ्याब्ग्रहण इति । वार्तिकमावश्यकमिति भाष्यकृत आशयः । अत्रेदं बोध्यम् । यद्यपि स्थानिवत्सूत्रे याडाप इति सूत्रे च भाष्ये आबसौ भूतपूर्व इत्यनेन मार्गेणानीय-मानमाप्त्वमादाय याट्प्राप्तौ शेखरकृता तु स्थानिवत्वेन प्राप्ताप्त्वमादायापि प्राप्तयाटः लक्षणप्रतिपदोक्तपरिभाषया अप्रवृत्तिर्मन्यते तथापि शेखरकृन्मननमेव युक्तम् । प्रश्लेषेण वार्तिकप्रत्याख्यानं कुर्वतो भाष्यकृतः याडभावे समाधानान्तराकथनेन यथा-कथञ्चिदाप्त्वेपि लक्षणपरिभाषयैव याड्वारणमभिमतम् परन्त्वयं विशेषः यत्राबसौ भूतपूर्व

इत्याप्त्वं तत्र तस्य मुख्यत्वेपि आकारमात्रं लाक्षणिकमिति । अत एवोभयसङ्ग्राहकं यस्य रूपस्य लक्षणप्रवृत्तिं विनाऽसंभवः तत्वं लाक्षणिकत्वमिति लाक्षणिकत्वं शेखरकृतोक्तमिति यावद्बाध्यं साधु विचार्यमिति उपलक्षणत्वमेव युक्तम् । उक्तरीत्या जराशब्दे पद्दन्नित्यस्य प्रयोगनियमपक्षे नसादिविषये च फलाभावेपि भाष्यमते अतिखट्वशब्दे सुलोपसम्बुध्येत्वाङिचाप इत्येत्वयाडामां वारणाय तद्विधायकसूत्रेषु आकारप्रश्लेष आवश्यकः सर्वत्राबन्तान्तमित्यर्थात्। ह्रस्वनद्याप इत्यत्र तु न प्रश्लेषः तत्र नुट इष्टत्वात्। एवञ्चानभिधाने प्रमाणाभाव इति केचिदाहुः।

बालबोधिनी : परे त्विति । अस्य = अतिखट्वायेत्यत्र दीर्घनिष्पन्नाकारस्य । लाक्षणिकत्वात् = लक्षणवशसंपन्नत्वात् । अत्र = अतिखट्वायेत्यत्र । तत्प्रवृत्तेः = लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तेः । वर्णग्रहणे तत्प्रवृत्तौ मानमाह भाष्ये इति । अत्रत्यं तत्त्वं परिभाषेन्दुशेखरबालवोधिनीतोऽवगन्तव्यम् । ननु वर्णग्रहणेऽपि तस्याः प्रवृत्त्यङ्गीकारे अतिखट्वायेत्यत्र याड्वारणेऽपि तुल्ययुक्त्या खट्वायै इत्यत्राकारस्य सवर्णदीर्घनिष्पन्नत्वेन लाक्षणिकत्वात् तत्र याडनापत्तिः । याडाप इति सूत्रारम्भसामर्थ्यादित्यपि न । निशा इत्यादौ तस्य चारितार्थ्यादिति शङ्कते न चेति । एवमिति शेषः । वर्णग्रहणे तत्प्रवृत्त्यङ्गीकारे इत्यर्थः। इत्यादाविति । आदिना डाबन्तसंग्रहः । बहुदामायै, बहुयज्वायै इत्यादिः । तत्परिभाषेति। लाक्षणिकपरिभाषेत्यर्थः । इह = खट्वायै इत्यादौ । तथा = तादृशरूपम् । सवर्णदीर्घात् पूर्वमपि आकाररूपस्य सत्वात् । तद्रूपेति । आकाररूपेत्यर्थः ।

ननूपायस्योपायान्तरादूषकत्वात् मूलमपि युज्यत एवेत्यत आह पदाङ्गाधिकारे इति। पदमङ्गं च विशेष्यं विशेषणेन च तदन्तविधिरिति स्पष्टं परिभाषेन्दुशेखरे । अत एव = अङ्गस्य विशेष्यतया तदन्तविधिद्वयलाभादेव । सिद्धये इति । अतिखट्वायेत्यत्र स्थानिवत्त्वेनाबन्तत्वमाश्रित्य प्राप्तस्य याटो वारणायेत्यर्थः । व्याख्यायेति । तेन वार्तिकेन अतिखट्व + ए इत्यत्र स्थानिवत्वनिषेधेनाप्त्वस्य विच्छेदात् सुपि चेति दीर्घेऽपि तस्य प्ररोहासंभवात् याटो वारणं कृत्वेत्यर्थः । आप्त्वेनेति । आप्त्वस्य आकारपकार-समुदायरूपत्वादिति भावः । तत्प्रत्याख्याने = ङ्याब्ग्रहण इति वार्तिकप्रत्याख्याने । एतत्परिहाराय = श्रुताकारस्मृतानुबन्धाभ्यामतिखट्वायेत्यत्र प्राप्तस्य याटो वारणाय । उपायान्तरेति । अनेन च पूर्वोक्त एवोपायो न त्वन्य इति सूच्यते ।

अङ्गस्य विशेषणत्वे दोषान्तरमाह किञ्चेति । अङ्गस्य विशेषणत्वे इति । अङ्गं यदाबन्तमित्यर्थलाभेन अतिखट्वायेत्यादौ अङ्गस्याबन्तत्वाभावेन, आबन्तस्याङ्गत्वाभावेन

च याड्वारणसम्भवे तदर्थं कृतस्य स्थानिवत्त्वप्रतिषेधवार्तिकस्य, तत्प्रत्याख्यानाय कृतस्याकारप्रश्लेषस्य च वैयर्थ्यं स्यादिति भावः ।

अङ्गस्य विशेषणत्वे लक्ष्यासिद्धिमप्याह किञ्चेति । याडनापत्तिरिति। उपसर्जन-स्त्रीप्रत्यये तदादिनियमेन अर्द्धखट्वेत्यस्याबन्ताङ्गत्वाभावात् याडनापत्तिरिति भावः। वस्तुतस्तु 'न चैवमपि अतिखट्वायेत्यत्र स्वाश्रये'त्यादिमूलोक्ता शङ्काऽयुक्तेत्याह किञ्चेति। मानाभावादिति । फलाभावादित्यर्थः । उपपादितश्चैतत् प्राक् ।

अतिखट्वायेत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वं चाश्रित्य याट् कुतो नेत्याशङ्क्य आबन्तं यदङ्गमिति समाहितम् । याडाप इत्यत्र आब्ग्रहणेन प्रत्ययग्रहण-परिभाषया आबन्तं गृह्यते । अङ्गस्येति तद्विशेषणम् आबन्तस्य खट्वेत्यस्याङ्गत्वाभावात् न याडापत्तिरिति तदर्थः । अङ्गस्य विशेषणत्वे न चेति शङ्काया अयुक्ततां प्रदर्श्य इदानीं समाधानस्यापि अयुक्ततां भाष्यान्तरसंवादेन सूचयति याडाप इति । स्थानिवत्त्वनिषेधादिति। अङ्गस्य विशेषणत्वे तेनैव याड्वारणसम्भवे याडाप इति सूत्रभाष्यं व्यर्थं स्यात् ।

यद्यपीति । स्थानिवत्सूत्रेति । तत्सूत्रे भाष्ये ङ्याब्ग्रहणेऽदीर्घ इति वार्तिकस्य निष्कौशाम्बिः, अतिखट्व इत्यादौ सुलोपवारणं फलत्वेन प्रदर्श्य ततः दीर्घग्रहणेनैव तस्य वारणसम्भवात् वार्तिकारम्भो व्यर्थ इत्यशङ्क्य तदुत्तरमनयोर्मध्ये वार्तिकेन स्थानिवत्त्व-प्रतिषेध एव ज्यायान् । तेन अतिखट्वाय, अतिमालाय इत्यत्र याडापत्तिर्नास्तीत्युक्तम् । अत्र भाष्ये हल्ङ्यांप् , याडाप इति सूत्रद्वयोदाहणविषये शङ्कासमाधाने कृते । याडाप इति सूत्रभाष्ये अतिखट्वायेत्यत्र शङ्कासमाधाने दृश्येते । तेन हल्ङ्याप्, याडाप इति सूत्रयोरेव प्रश्लेषो लभ्यते । तथापि तद्भाष्यं सूत्रान्तरेष्वपि प्रश्लेषस्य उपलक्षणम् अथवा इतरसूत्रविषयोदाहरणानाम् अनभिधानं वेत्यत्र किमुचितमिति विचार्यमिति प्रघट्टकस्यार्थः। उपलक्षणत्वे एकोक्त्यैव निर्वाहे द्वितीयकथनानुपयोगो युक्तेः तुल्यत्वादिति द्वितीयः पक्षो युक्त इति मम प्रतिभतीति चिदस्थिमालाकृतः । स्थानिवत्सूत्रे भाष्ये याडापसूत्रविषये शङ्कासमाधाने कृत्वा, याडाप इति सूत्रे पुनः तद्विषये शङ्कासमाधानयोः करणेन अन्य-सूत्रोदाहरणविषये तदकरणेन च ङ्याब्ग्रहणे इति वार्तिकारम्भस्य याडाप्सूत्रविषय एवासाधारणफलत्वध्वननात् वार्तिकप्रत्याख्यानायश्रितस्य प्रश्लेषनिर्देशस्यापि तद्विषय-कत्वमेवोचितमिति इतरसूत्रविषयोदाहरणानामनभिधानमेव भाष्याल्लभ्यत इति ग्रन्थकृदाशय इति बोध्यम् ।

व्रश्च । अत्र राजिसाहचर्याद्भ्राजिः फणादिरेव, तेनान्यस्य विभ्रागित्येवेत्याहुः ।

छशौ वर्णौ, ताभ्यां शब्दरूपं विशेष्यमादाय तदन्तग्रहणमित्याह - छशान्तयोरिति । 'छशयो'रित्युक्तेऽपि न क्षतिरिति चिन्त्यम् । 'पदस्ये'ति तु 'पृष्ट'मित्यादिसिद्धये व्यधिकरणमेव । अन्तादेश इति । 'अलोन्त्यस्ये'ति वचनात् । अत्र 'झलो झली'त्यतो 'झली'ति, 'पदस्ये'ति, 'स्को'रित्यतोऽन्ते इति चानुवर्त्तते । 'छ्वोः शूड्'इत्यत्र 'क्ङिती'-त्यनुवृत्तेः - 'प्रष्टे'त्यादौ शादेशाभावादशान्तत्वेन षत्वाप्राप्तौ छग्रहणम् । अत्रापि सतुङ्निर्देशो बोद्ध्यः। तस्यासिद्धत्वादिति । 'चयो द्वितीये'त्यस्य 'नादिन्ये'ति सूत्रे भाष्ये पाठादिति भावः । टतयोरिति । धुडभावे टस्य , धुटि तस्येत्यर्थः । न भवतीति । जश्त्वात् प्राक् षस्य नेत्यर्थः। जश्त्वे तु प्राप्तिरेव नेति बोद्ध्यम् । केचित्त्विति । 'एकाचः' इत्युत्तरसूत्रेऽनुवृत्त्या मध्येऽपि सम्बन्ध एवोचित इति भावः । जश्त्वेनेति । यत्तु 'जश् झशी'ति निर्देशात् शस्य न जश्त्वमिति , तन्न; अविकृतस्वरूपप्रतिपादने तात्पर्यादयस्मयादित्वेन भत्वाच्च तत्र तदप्राप्तौ न्यायसिद्धायां ज्ञापकत्वायोगात् , उपदेशेऽजित्यादिनिर्देशैः कुत्वाद्यनापत्तेश्च । अत्र मते भाष्यानुग्रहो विचार्यः । 'मांसपृतने'त्यस्य 'पद्दन्न' इति सूत्रे उपसङ्ख्यातत्वादाह - शसादौ वेति । स्त्रीत्वादिति । पुंस्त्वाभावादित्यर्थः । नात्वं नेति । 'स्त्रीत्वा'दित्युनुकृष्यते । अत एव पुँस्त्वाभावान्नात्वाभाव इति नोक्तं,? न हि पुंस्त्वाभावो नाभावे प्रतिबन्धकः, नपुंसकेऽपि तदङ्गीकारात् ।

<u>**भावबोधिनी :**</u> बिभ्रागित्येवाहुरिति । ननु सूत्रे भ्राजिग्रहणं मास्तु फणादिकार्यानुरोधात् तत्रैव भ्राजिपाठोऽस्तु तद्बहिर्भूते टुभ्राजृ इत्यत्र भ्राजिनः ग्रहणं न क्रियते । इत्थञ्च फणादिस्थस्य बिभ्रागिति तद्बहिर्भूतस्य भ्राशृइत्यस्य शान्तत्वात् षत्वेन बिभ्राडिति रूपद्वयसिद्धिरिति चेन्न। बिभ्राट् शब्दाण्णिचि क्विपि ट्यादिलोपेषु बिभ्र् तस्य षत्वसिद्धये सूत्रे भ्राज्ग्रहणस्यावश्यकत्वात् । शान्तनिष्पन्नबिभ् इत्यस्य स्थानिवत्वेन षत्वसिद्धिस्तु न । शान्तत्वे आनीयमाने अनल्विधाविति निषेधात्। एवञ्च बिभ्रागिति सिद्धये धातुपाठेपि टुभ्राजृ इत्यस्य ग्रहणमावश्यकम् । भ्राजभासेति सूत्रे तु भ्राजिग्रहणं शक्यमकर्तुम् । फणादिस्थस्य तद्बहिर्भूतस्य वा अन्यतरस्य ऋकारानुबन्धत्वम् अन्यस्याकारानुबन्धत्वम्। एवञ्च ऋकारानुबन्धस्य नाग्लोपिशासिति निषेधेन उपधाह्र–स्वाभावे अबभ्राजत् अन्यस्योपधाह्रस्वे अबिभ्राजिति रूपसिद्धेः, चिन्त्यम् आलोचनीयम्। ननु तर्हि पदस्येत्यधिकारात् तद्विशेषणत्वेन छशान्तयोःपदयोः षत्वं झलि परे इत्यर्थः कुतो नेत्यतआह पदस्येति । पृष्ठमिति । प्रच्छेः क्तः संप्रसारणम् छ्वोः शूडिति शः । व्यधिकरणमेवेति । झलि परतः पूर्वयोः पदान्ते विद्यमानयोः चषयोश्चेत्यर्थः ।

कथमेतदर्थस्य लाभ इत्यतआह अत्रेति । सतुङ्निर्देश इति। अन्यथा प्रच्छ् ता इत्यत्र षत्वस्यासिद्धत्वात् तुकि ततश्चुत्वस्यासिद्धत्वात् छमात्रस्य षत्वे तोःषीति ष्टुत्वनिषेधे अनिष्टरूपापत्तिर्बोध्या ॥

ननु जज् इत्युक्तेपि उपदेशेऽजित्यत्राच्प्रत्याहाराभावात् अच् प्रत्याहार एव गृह्यत इति वात्रापि जच् प्रत्याहाराभावात् जज्प्रत्याहाराभावाच्चेत्यादिव्याख्यानेनासन्देह इत्यतआह अयस्मयादित्वेनेति । अयं भावः। यत्र सौत्रप्रयोगे पदत्वप्रयुक्तं कार्यं दृश्यते उपदेशेजित्यादौ न तत्र भत्वं कल्पनीयम्। यत्र च न दृश्यते तत्र भत्वमेव कल्पनीयमिति भावः । तदप्राप्तौ = जश्त्वाप्राप्तौ ।

बालबोधिनी : व्रश्चभ्रस्ज । अत्र = व्रश्चेति सूत्रे । भ्वादिप्रकरणे भ्राजृ दीप्तौ, टुभ्राजृ दीप्तौ इति धातुद्वयं पठितम् । फणां च सप्तानाम् (6-4-125) इति सूत्रेण किति लिटि सेटि थलि च फणादीनां सप्तानाम् एत्वाभ्यासलोपौ विधीयेते । फणादिषु सप्तसु धातुषु राजृधातुः तथा टु भ्राजृ धातुरपि पठितः । व्रश्चेति सूत्रे अर्थवता राजिना साहचर्यात् फणाद्यन्तर्गन्तः टुभ्राजृ धातुरेव गृह्यते न तु तदनन्तर्गतः भ्राजृधातुरित्याह राजिसाहचर्यादिति। तत्फलमाह तेनेति । अन्यस्य = फणाद्यनन्तर्गतस्य । एवञ्च विभ्राट् , विभ्रागिति रूपद्वय-सिद्धिरिति फणां च सप्तानामिति सूत्रे दीक्षितेनोक्तः । आहुरिति । भाष्यानुक्तत्वमत्रारुचिः ।

मूलं खण्डयति छशयोरिति । अधिकृतस्य पदस्येत्यस्य विशेष्यत्वात् तद्विशेषणत्वेन छशान्तयोरिति तदन्तविधिरित्यपि नेत्याह पदस्येति । व्यधिकरणमिति । पदावयवयोः छशयोरित्यर्थः । अन्यथा प्रच्छधातोः क्तप्रत्यये पदान्तत्वाभावेन षत्वं न स्यात् । एवञ्च शब्दस्वरूपाध्याहारे फलाभावात्, पदस्येत्यस्य तु वैयधिकरण्येन पदावयवयोः छशोरित्येव-मन्वयात् तदन्तविधेरसम्भवात् मूलोक्तं न युक्तमित्याशयः ।

भ्राशो बिभ्राडिति, भ्राजो बिभ्रागिति रूपद्वयसिद्धौ भ्राजिग्रहणं व्यर्थम्, किञ्चैकानुबन्धकराजिसाहचर्यादेकानुबन्धकभ्राजेरेव कुतो न ग्रहणम् । तथा च फणादेः षत्वं न स्यादिति साहचर्यं चिन्त्यमिति सदाशिवभट्टाः । इत्संज्ञाविधायकशास्त्रानु-सन्धानसापेक्षतया विलम्बोपस्थितिकेनैकानुबन्धकत्वरूपधर्मेण साहचर्याश्रयणापेक्षया शीघ्रोपस्थितिकेन फणादित्वरूपधर्मेण साहचर्याश्रयणस्योचितत्वादिति गुरुप्रसाद-व्याख्यातारः वेङ्कटेश्वरशास्त्रिपादाः ।

छग्रहणप्रयोजनमाह छ्वोरिति । छग्रहणमिति । व्रश्चेति सूत्रे इत्यर्थः । **अत्रापि =**

व्रश्चेति सूत्रेऽपि । अत एव प्रष्टेत्यत्र छकारस्य षत्वे तुकः श्रवणापत्तिर्नास्ति । तस्यासिद्धत्वादिति । निशाशब्दस्य सप्तमीबहुवचने निश् आदेशे निश् + सु इत्यत्र व्रश्चेति षत्वे तस्य जश्त्वेन डकारे, पक्षे धुडागमे डधयोः चर्त्वे निट्त्सु इति रूपम् । धुडभावपक्षे निट्सु । चयो द्वितीया इत्यस्य नादिन्याक्रोशे पुत्रस्य (8-4-48) इति सूत्रस्थत्वेन तस्मिन् कार्ये खरि च (8-4-55) इति चर्त्वस्यासिद्धत्वात् धुडभावपक्षे टस्य ठो न, धुट्पक्षे तस्य थो नेत्याह चयो द्वितीयेति ।

षढोः कः सि । निश् + सु इत्यत्र षत्वे तस्य षढोः कः सीति कत्वं न । त्रिपाद्यां परत्वेन जश्त्वं प्रति तस्यासिद्धत्वात् । जश्त्वे तु कत्वस्य प्राप्तिरेव नेत्याह न भवतीति । जश्त्वादीति । व्रश्चेति सूत्रे परिशिष्टकारादिमतमाह केचित्त्विति । दादेर्धातोरिति सूत्रात् एकाचो बश इति सूत्रे धातोरित्यनुवृत्त्या मध्ये व्रश्चादिसूत्रेऽपि तदनुवृत्तिरुचितेति तदाशयः। प्राचोक्तं खण्डयितुमाह यत्त्विति । निश् भ्यामित्यत्र धातुत्वाभावात् व्रश्चेति षत्वाभावे झलां जशोऽन्ते इति जश्त्वेन शकारस्य जकारे निज्भ्यामिति । अत्र जश् झशीति निर्देशात् शस्य जश्त्वं नेति केचित् । तत्खण्डयति तन्नेति । विकृतेति । झलां जश् झशि इत्यत्र शकारस्य जश्त्वेन विकृतनिर्देशे सति प्रत्याहारज्ञानं दुर्लभं स्यात् । स्वरूपस्यैव विधेयत्वापत्तिश्च । तथा चाविकृतनिर्देशार्थं सन्धिकार्यं न कृतमिति भावः । तात्पर्यादिति। आचार्यस्येति शेषः । न केवलमविकृतनिर्देशे तात्पर्यम् । किन्तु तत्र हेत्वन्तरमप्यस्तीत्याह भत्वाच्चेति । चो हेतौ । तत्र = जश्पदे । तदप्राप्तौ = जश्त्वाप्राप्तौ । न्यायसिद्धायामिति । स्वत एव जश्त्वस्याप्रवृत्त्या निर्देशस्योपपत्त्येत्यर्थः । ज्ञापकत्वेति । जशिति निर्देशस्य शस्य जश्त्वाप्रवृत्तौ ज्ञापकत्वाश्रयणं न युक्तमिति भावः । निर्देशस्य सामान्यतो ज्ञापकत्वाभ्युपगमे दोषमाह उपदेशेऽजिति । तन्निर्देशेन तत्र कुत्वशास्त्राप्रवृत्तिकल्पने अचोऽक्षु इत्यादि-निर्देशासङ्गतिरिति भावः । अत्र मते = केचिन्मते । भाष्यानुग्रहः = भाष्यसंमतिः । विचार्य इति । अनेन केचिन्मते अरुचिस्सूचिता ।

शसादौ वेति । मांसपृतनासानूनां मांसपृत्स्नवो वाच्याः शसादौ वेति वार्तिकम् । पुंस्त्वाभावादिति । तस्माच्छसो नः पुंसीति नत्वस्य पुंस्त्वे विधानादिति भावः । नात्वं नेति । स्त्रीत्वात् आङो नेति नात्वं नेति भावः । अत एव = स्त्रीत्वस्यानुकर्षार्थमेव । नोक्तमिति । तथोक्तौ उत्तरवाक्येऽपि पुंस्त्वाभावादित्यस्यानुकर्षः स्यात् । तदङ्गीकारात् = नाभावाङ्गीकारात् ।

ङिति ह्र । अत्र वाक्यद्वयम् । आद्ये - 'यू' इति, 'स्त्र्याख्या'विति, 'अस्त्री'ति,

'इयङुवङ्स्थाना' विति, 'वे' ति चानुवर्तते। अन्त्ये यू इति, वेति स्त्रीवाचकावित्येतन्मात्रार्थकं 'स्त्र्याख्या' विति च । तत्र - ह्रस्वयोरप्राप्ते, दीर्घयोस्तु 'नेय' ङिति निषेधादप्राप्ते विभाषा । इष्वादिष्वप्राप्तिमाशङ्क्य - 'ङिति ह्रस्वश्चे' त्यत्र नित्यस्त्रीलिङ्गावित्येवंविधो नियमो नाश्रीयते - इति कैयटस्तु ह्रस्वांशमात्रविषय इत्याशयेनाह - नित्यस्त्रीलिङ्गाविति । अत एवास्य दीर्घांशे निषेधविकल्पत्वं भाष्ये उक्तं - 'यू स्त्र्याख्या' -विति सूत्रे । तत्फलं - 'कटप्रुवे ब्राह्मण्यै' इति । लिङ्गान्तरविशिष्टार्थाभिधायकत्वेन तत्त्वाभावात् ।

भावबोधिनी : इष्वादिष्विति । आदिना शनिसङ्ग्रहः। एषां द्विलिङ्गत्वेन नित्यस्त्रीत्वाभावादिति भावः । अत एव पूर्ववाक्ये नित्यस्त्रीत्वनिवेशादेव । निषेध–विकल्पत्वमिति । यूस्त्र्याख्यावित्यनेन तस्य च नेयङुवङा विति निषेधे प्राप्ते तस्य चानेन विकल्प इत्यर्थः। कटप्रुवे इति । अस्य च नित्यस्त्रीत्वाभावेन निषेधाप्राप्तेः तद्विकल्पो नेति भावः।

बालबोधिनी : ङिति ह्रस्वश्च । ह्रस्वश्चेति चकाराद्वाक्यद्वयमिदमित्याह अत्रेति। आद्ये = ङितीति प्रथमयोगे। आद्ये इत्यस्य तत्रेत्यादिः । यूस्त्र्याख्यौ नदीत्यनुवर्तते । नेयङुवङ्स्थानावस्त्रीति सूत्रं नञ्वर्जमनुवर्तते । वामीत्यतो वेत्यनुवर्तते । ततश्च इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गौ ईदूतौ नदीसंज्ञौ वा स्तः ङिति परे इति प्रथमवाक्यार्थः सम्पद्यते । अन्त्ये = ह्रस्व इति द्वितीययोगे । स्त्रीलिङ्गौ ह्रस्वौ चेवर्णोवर्णौ नदीसंज्ञौ वा स्तः ङिति परे इति द्वितीयवाक्यार्थः । तत्र = तयोर्मध्ये । ह्रस्वयोरप्राप्ते इति । यू इति दीर्घयोरेव ग्रहणादिति भावः । न च यूस्त्र्याख्यावित्यत्र ह्रस्वग्रहणपक्षस्यापि भाष्ये उक्तत्वेनाप्राप्तिः कथमिति वाच्यम् । तत्रैव पक्षे शेषपदमकृत्वा परत्वात् घिसंज्ञया बाध इत्यर्थस्याप्युक्तत्वेनादोषात् । अत एव ह्रस्वघटितवाक्ये नेयङिति सूत्रं निवृत्तमित्युक्तं यूस्त्र्याख्यावित्यत्र भाष्ये इति चिदस्थिमालाकृतः ।

ननु ङिति ह्रस्वश्चेति सूत्रे आद्ये दीर्घवाक्ये नित्यस्त्रीलिङ्गावित्यर्थकस्य स्त्र्याख्यावित्यस्यानुवृत्तौ कैयटविरोधमाशङ्क्य परिहरति इष्वादिष्विति । ङिति ह्रस्वश्चेत्यत्र स्त्र्याख्यावित्यस्यानुवृत्तौ इष्वशनिप्रभृतीनामुभयलिङ्गनां पटुमृदुप्रभृतीनां सर्वलिङ्गानां च स्त्रीत्वेऽपि नदीत्वं न स्यात् । तेषां नित्यस्त्रीत्वाभावात् नदीत्वं न स्यादित्याशङ्क्य कैयटः ङिति ह्रस्वश्चेत्यत्र नित्यस्त्रीलिङ्गाविति नियमो नाश्रीयत इति समाहितवान् । तेन सह स्वग्रन्थस्य विरोध इत्यत आह ह्रस्वांशमात्रेति । कैयटोक्तो नियमो ह्रस्वांशमात्रविषयक इति भावः। अत एव = नित्यस्त्रीलिङ्गावित्येवंविधो नियमो नाश्रीयत इति कैयटग्रन्थो

ह्रस्वमात्रविषयक इति स्वीकारादेव । अस्य = ङितीति सूत्रस्य । आद्यवाक्ये एव नित्यस्त्रीालिङ्गवित्यर्थकत्वं, न तु द्वितीयवाक्ये इति भावः । तत्फलम् = दीर्घवाक्ये नित्यस्त्रीलिङ्गावित्यनुवृत्तेः फलम् । कटप्रुवे इति । कटं प्रवते कटप्रूः । प्रुङ्धातोः क्विब् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च इति वार्तिकेन क्विपि दीर्घे रूपम् । तत्त्वाभावात् = नित्यस्त्रीत्वाभावात् । एवञ्च दीर्घघटितवाक्येऽनुवृत्तं स्त्र्याख्यपदं नित्य-स्त्रीलिङ्गबोधकावित्यर्थकमिति कटप्रुवे ब्राह्मण्यै इत्यत्र नदीसंज्ञा नेति भावः ।

पर त्वत्र विकल्पो भवत्येव, आख्याग्रहणरहितस्यैवात्र सम्बन्धात् । यद्वा 'स्त्र्याख्या'-वित्येतदेव स्त्रीवाचकावित्येतन्मात्रार्थकमत्र, शब्दाधिकारात् । तच्च ङिदाक्षिप्ताङ्गस्य विशेषणम् । अत एव 'प्रथमलिङ्गग्रहणञ्चे'त्यस्यात्राऽप्रवृत्त्यान्वाख्यायके - 'ह्रस्वौ चेयङुवङ्स्थानौ च प्रवृत्तौ च प्राक्च प्रवृत्तेः स्त्रीवचनावेव नदीसञ्ज्ञौ भवतो, न तु पुंवाचकाविति वक्तव्य'मिति वार्तिके - 'अतिशकट्यै ब्राह्मण्यै',क्व मा भूत् ? - 'अतिशकटये ब्राह्मणाय'; 'अतिश्रियै ब्राह्मण्यै ' 'श्रियै ब्राह्मण्यै' । क्व माभूत् ? 'अतिश्रिये ब्राह्मणाय' 'श्रिये ब्राह्मणाये' ति 'यू स्त्र्याख्या'विति सूत्रशेषे भाष्ये उक्तम् । एवञ्चास्य निषेधविकल्पत्वमसम्भवि , समुदायस्य केनापि प्राप्त्यभावात् । अवयवस्य प्राप्तावपि तस्यानेन विकल्पाभावात् ; ङिदाक्षिप्ताङ्गस्यैवानेन विकल्पात् । एतच्च 'प्रवृत्तौ स्त्रीवचनौ ' इत्यनेन सूचितम् । अत एवात्र वाक्यद्वयेऽपि विधिविकल्प एव दर्शितः। एवञ्च - 'अत्र नियमो नाश्रीयते' इति कैयटो वाक्यद्वयपर एवोचितः। उपक्रमे निषेधपरतया व्याख्यानन्तु 'यूस्त्र्याख्या'वित्यस्य नित्यस्त्रीलिङ्गत्वार्थकत्वमजानत एकदेशिनो 'यू इति ह्रस्वयोर्ग्रहण'मिति पक्षोपपादने युक्तिभूतमिति तन्नादरणीयम् ।

भावबोधिनी : रहितस्येति । स्त्रियावित्यस्येति शेषः। वृत्तिघटकाख्या-ग्रहणनिवृत्तिरशक्येत्यत आह यद्वेति ङिदाक्षिप्ताङ्गस्येति। ननु स्वमते प्रत्ययाक्षेप एव न आक्षिप्तस्य शाब्दबोधेप्यन्वयोपि न । किञ्चात्र ङितीति प्रत्ययस्यैव ग्रहणमिति न । चित्रङ इत्यतोऽप्रत्यये चित्रः । मतिश्च चित्रश्चेति द्वन्द्वे चित्रङो ङित्वेन तस्मिन् परे नदीत्वभावाभावाभ्यां घिसंज्ञाभावाभावेन मतिशब्दस्य पाक्षिक पूर्वनिपातरूपफल-सत्वादिति चेन्न। इयङुवङ्स्थानावित्युक्त्या ङितीति प्रत्यय एव ग्रहीतुमुचितः । ततश्च प्रत्ययमात्रबोधेच्छया उच्चरितत्वेन प्रत्ययग्रहणपरिभाषया तदाद्यंशोपस्थितौ तदाद्यंशादेव ङितो विहितत्वेन वस्तुतस्तस्याङ्गसंज्ञायास्सत्वेन अङ्गस्याक्षेप इत्युक्तमित्याशयात् । एवञ्चाक्षिप्तस्येत्यस्य उपस्थितस्येत्यर्थः । सूत्रार्थस्तु स्त्र्यवयवभिन्नौ इयङुवङ्स्थानौ

ईदूतौ तदन्तं स्त्रियां वर्तमानं यदङ्गं तद्वा नदीसंज्ञकम् । ङितीति ह्रस्वेकारान्तमुकारान्तं यदङ्गं स्त्रियां वर्तमानं तद्वा नदीसंज्ञकं ङितीत्युत्तरवाक्यार्थः । अत एव नित्यत्वांशं विहाय स्त्रीत्वमात्रस्याङ्गविशेषणत्वादेव । अत्र ङिति ह्रस्वश्चेति सूत्रविषये । अप्रवृत्यन्वाख्यानायिके इति । समुदायस्य नित्यस्त्रीत्वाभावेपि प्रथमलिङ्गग्रहणञ्चेत्यनेन अवयवनित्यस्त्रीत्वमादाय यूस्त्र्याख्यावित्यनेन यथा संज्ञा तथा इहापि प्राप्तप्रथमलिङ्गग्रहणञ्चेत्यस्याप्रवृत्तिबोधनायेत्यर्थः । प्रवृत्ताविति । वृत्तावित्यर्थः । अङ्गमिति यावत् । इदमेवाङ्गे स्त्रीत्वमात्रं विशेषणमित्यत्र प्रमाणम् । अतिशकट्यै इति । इदञ्च ह्रस्वौ चेत्यस्योदाहरणम् । ब्राह्मण्यै इत्युक्तिः अङ्गस्य स्त्रियां वृत्तित्वद्योतनाय अतिश्रियै इति । इदञ्च इयङुवङ्स्थानावित्यस्य स्त्रीप्रत्ययान्तत्वाभावेन उपसर्जनह्रस्वाभावात् अङ्गे स्त्रीत्वमात्रविशेषणादेव नित्यस्त्रीत्वाभावेपि अतिश्रियै अतिश्रिये इति विकल्पसिद्धिः। अङ्गे स्त्रीत्वविशेषणादेव अतिश्रिये ब्राह्मणायेत्यादौ प्रथमलिङ्गमित्यनेन अवयव–स्त्रीत्वग्रहणेपि नानेन विकल्प इति तस्याप्रवृत्यन्वाख्यानं सिद्धमिति वार्तिकाशयः । एवञ्चेति । उक्तभाष्ये नित्यस्त्रीत्वाभावेपि स्त्रियामिति श्रीशब्दे विकल्पाङ्गीकारस्य सिद्धौ चेत्यर्थः । असम्भवीति । अतिश्रीशब्दस्य नित्यस्त्रीत्वे हि यू स्त्रीति नदीत्वं तस्य निषेधे प्राप्ते तस्यानेन विकल्पः संभवेदित्यर्थः तदाह समुदायस्येति। ननु नित्यस्त्रीलिङ्गौ ईदूतावित्येवार्थः प्रकृतसूत्रस्य । ततश्चावयवस्य नित्यस्त्रीत्वात् निषेधे प्राप्तेऽनेन विकल्पोऽस्त्वित्यत आह अवयवस्येति। अभावादिति । कुत इत्यत आह अङ्गस्यैवेति त्वदुक्तार्थमादाय अतिश्रियै ब्राह्मण्यै इत्यत्र रूपद्वये सिद्धेऽपि अतिश्रिये ब्राह्मणायेत्यादावपि तुल्यन्यायेन विकल्पापत्या ङिदाक्षिप्ताङ्ग एव स्त्रीत्वमात्रविशेषणस्यावश्यकत्वादित्यर्थः। तत्र किं मानमित्यत आह एतच्चेति । ननु स्त्र्याख्यावित्यस्यावृत्तिः एकं नित्यस्त्रीत्वार्थकम् एकं स्त्रीत्वमात्रार्थकम् । आद्यस्य ईदूदन्तांशे विशेषणत्वम् । द्वितीयस्याङ्गांशे नित्यस्त्री–लिङ्गौ यौ ईदूतौ तदन्तं स्त्रियां वर्तमानं यदङ्गं तस्य नेयङिति वा निषेध इति प्रथमवाक्यार्थः। उत्तरवाक्ये स्त्रीत्वमात्रार्थकस्यानुवृत्तिः। आवृत्यां स्त्रीलिङ्गौ ह्रस्वौ यौ इकारोकारौ तदन्तं यदङ्गं तद्वा नदीसंज्ञमित्यर्थः । एवञ्च अतिश्रियै ब्राह्मण्यै इत्यत्र निषेधविकल्पेन रूपद्वयसिद्धिः । अतिश्रिये ब्राह्मणायेत्येकमेव सिद्धम् । इत्थञ्चोपक्रमे आद्यवाक्यस्य निषेधपरतया व्याख्यापकभाष्यञ्च सङ्गच्छते। त्वदुक्ते कटप्रुवे इत्यत्र तु अवयवस्य नित्यस्त्रीत्वाभावादेकमेव रूपमित्येव कुतस्सूचनं न स्यादित्यत आह अत एवात्र वाक्यद्वयेपीति । उचित इति । यद्यपि त्वदुक्तार्थे भाष्योदा–हरणसङ्गतिः तथापि स न

युक्तः विचित्रावृत्तेः वाक्यद्वयेपि विधिविकल्पपरभाष्यासङ्गतेः कैयटकृतो विरुद्धतात्पर्य-वर्णनस्य चापातात् मन्मते तत्सर्वं नेति मदुक्तार्थसूचनमेव तद्भाष्याद्युक्तमिति भावः।

ननु तर्हि उपक्रमभाष्यविरोध इत्यतआह उपक्रमे इति यूस्त्र्याख्याविति व्याख्यावसरे इत्यर्थः । नित्यस्त्रीत्वार्थकत्वमजानत इति । तत्वज्ञाने तु अतिश्रीत्यादि-शब्दानां नित्यस्त्रीत्वाभावेन यूस्त्र्याख्यावित्यस्याप्राप्त्यास्य नेयङुवङिति निषेधाप्राप्त्या तस्यानेन विकल्पोऽसंभावित एव स्यादिति भावः। यू इतीत्यस्य यूस्त्र्याख्याविति सूत्रे इत्यादिः । तन्नादरणीयमिति । ईदृशभाष्यविरोधोऽस्माकं न कार्यकारीति भावः ।

बालबोधिनी : सिद्धान्तमाह परे त्विति । अत्र = कटप्रुवे ब्राह्मण्यै इत्यत्र । विकल्प इति । नदीसंज्ञाविकल्प इत्यर्थः । अत्र = ङिति ह्रस्वश्चेति सूत्रे । एकदेशानुवृत्तेरयुक्तत्वात् भाष्ये ह्रस्वघटितवाक्ये स्त्र्याख्यावित्यस्य कण्ठत उक्तत्वाच्चाह यद्वेति । अत्र = ङिति ह्रस्वश्चेति सूत्रे वाक्यद्वये । सम्बध्यत इति शेषः । स्त्र्याख्याविति पदस्यानुवृत्तावपि तस्य नित्यस्त्रीत्वार्थकत्वाभावे बीजमाह शब्दधिकारेति । तच्च = स्त्र्याख्याविति । अङ्गस्य विशेषणमिति । तत्र मानमाह अत एवेति । अत्र सूत्रे स्त्रीवाचकावित्येतन्मात्रार्थकस्य स्त्र्याख्यावित्यस्यानुवृत्तिः । तच्च ङिदाक्षिप्ताङ्गविशेषणमिति स्वीकारादेवेत्यर्थः । प्रथम-लिङ्गग्रहणञ्चेति । समासादिवृत्तेः पूर्वं प्रवृत्तस्य स्त्रीलिङ्गस्य ग्रहणं कर्तव्यमिति तदर्थः । अत्र = ङिति ह्रस्वश्चेति सूत्रविषये । अप्रवृत्त्यन्वाख्यायके = अप्रवृत्तिबोधके । प्रवृत्ताविति। प्रवृत्तिः अर्थान्तरसंक्रान्तिरिति कैयटः । तस्यां सत्यामित्यर्थः । वार्तिक इति । इत्यर्थकवार्तिकव्याख्यानावसरे इत्यर्थः । 'ह्रस्वेयुवूस्थानप्रवृत्तौ च स्त्रीवचने' इति भाष्यवार्तिकम् ।

अयमत्र प्रघट्टकस्यार्थः । यू स्त्र्याख्याविति सूत्रे भाष्ये उपसर्जने नदीसंज्ञासाधनाय प्रथमलिङ्गग्रहणञ्च कर्तव्यमिति वार्तिककृतोक्तम् । वृत्तेः पूर्वं लिङ्गबोधके वृत्तिघटकशब्दे विद्यमानौ स्त्र्याख्यौ यू तयोर्वृत्तौ स्त्र्याख्यत्वाभावेऽपि नदीत्वं वक्तव्यमिति तदर्थः । कुमारीमिच्छत्यात्मनः कुमारीयति । ततः कर्तरि क्विप् । अथवा कुमारीवाचरतीत्याचारे क्विपि ततः कर्तरि क्विप् । कुमार्यै ब्राह्मणाय । खरकुटीवेति इवार्थे संज्ञायामिति कनः लुम्मनुष्य इति लुप् । खरकुट्यै ब्राह्मणाय । एवम् अतितन्त्र्यै ब्राह्मणाय, अतिलक्ष्म्यै ब्राह्मणाय इत्यत्र नदीत्वं सिध्यति । तदुत्तरं भाष्ये अवयवस्त्रीविषयत्वात् सिद्धमिति प्रथमलिङ्गग्रहणञ्चेति वार्तिकं न वक्तव्यमित्युक्तम् । अन्तरङ्गत्वात् पूर्वमेव स्त्र्याख्यत्वात् प्रवृत्ता नदीसंज्ञा पश्चादुपजायमाने लिङ्गान्तरयोगे बहिरङ्गे न निवर्तत इति तदाशयः ।

तदुपरि अवयवस्त्रीविषयत्वात् सिद्धमिति चेत् आध्यै ब्राह्मण्यै इत्यादौ अवयवस्य इयङ्स्थानत्वात् नेयङुवङ्स्थानावस्त्रीति नदीसंज्ञानिषेधः स्यात् । समुदायस्य त्वेरनेकाच इति यणा बाधितत्वात् इयङ्स्थानत्वाभावेऽपि नित्यस्त्रीत्वाभावात् नदीत्वाप्राप्तिरिति आक्षेपः कृतः । अचि श्नुधात्वित्यनेनाङ्गस्य इयङुवङ्विधानात् सामर्थ्यादत्राङ्गमाक्षिप्यते । तेन यस्याङ्गस्येयङुवङौ निर्वर्त्येते तस्य नदीसंज्ञानिषेधः । आध्यै इत्यत्रावयवस्याङ्गत्वं नास्ति। अङ्गस्य तु एरनेकाच इति यण्विधानात् इयङुवङ्स्थानता नास्तीति नेयङिति निषेधाभाव इति समाहितम् । तदुत्तरं भाष्ये अवयवस्त्रीविषयत्वात् सिद्धमित्यस्यापवादतया 'ह्रस्वेयुवृस्थानप्रवृत्तौ च स्त्रीवचने' इति नियमवार्तिकं पठितम् । प्रवृत्तौ = अर्थान्तरसंक्रान्तौ सत्याम् । वार्तिके ह्रस्वावित्यादेः ह्रस्वेवर्णाद्यन्ते, इयङादिस्थानेवर्णाद्यन्ते च शब्दरूपे इत्यर्थः । चशब्दात् अप्रवृत्तौ चेति ज्ञेयम् । एतदेव प्राक् प्रवृत्तेरिति भाष्ये स्पष्टीकृतम् । एवञ्च ह्रस्वेवर्णाद्यन्तौ इयङादिस्थानेवर्णाद्यन्तौ च शब्दौ अर्थान्तरसंक्रान्तौ सत्यां तत्पूर्वं च, स्त्रीवचनावेव नदीसंज्ञौ भवत इति वार्तिकार्थः । अर्थान्तरसंक्रान्तौ सत्यां तत्पूर्वञ्च यौ स्त्रीवचनौ तयोरेव ङिति ह्रस्वश्चेति नदीसंज्ञेति नियमेन अतिशकट्यै, अतिश्रियै ब्राह्मण्यै इत्यादौ नदीसंज्ञासिद्धिः, अतिशकटये ब्राह्मणाय, अतिश्रिये ब्राह्मणाय इत्यादौ तद्व्यावृत्तिश्च सिध्यति । एवञ्च अतिलक्ष्म्यै ब्राह्मणाय इत्यादेः नियमानन्तर्गततया अवयव-स्त्रीविषयत्वात् नदीसंज्ञा सिध्यतीति तदाशयः । प्रागुक्तवार्तिकेन ङिति ह्रस्वश्चेत्यत्रानुवृत्तस्य स्त्र्याख्यावित्यस्य ङितीति ङिदाक्षिप्ताङ्गविशेषणतायां अन्वाख्यानात् तस्य च नित्यस्त्रीलिङ्गावित्यर्थकत्वे अतिश्रियै ब्राह्मण्यै इत्याद्युदाहरणासङ्गतिः । अङ्गस्य लिङ्गान्तरा-नभिधायकत्वरूपनित्यस्त्रीत्वस्याभावेन ङिति ह्रस्वश्चेति सूत्राप्रवृत्तेरिति भावः ।

उक्तभाष्याशयमेव विशदयति एवञ्चेति । अत्र सूत्रे स्त्रीवाचकावित्येतावन्मात्रार्थ-कस्त्र्याख्यावित्यस्यानुवृत्तेः तस्य ङिदाक्षिप्ताङ्गविशेषणतायाश्च लाभे चेत्यर्थः । अस्य = ङिति ह्रस्वश्चेति सूत्रे ङितीति आद्यवाक्यस्थदीर्घांशस्य । निषेधविकल्पत्वमिति । आद्यवाक्ये स्त्र्याख्यावित्यस्य नित्यस्त्रीलिङ्गावित्यर्थकत्वादेव दीर्घांशे निषेधांशे निषेधविकल्पत्वं भाष्ये उक्तमिति यत् तदित्यर्थः । असम्भवीति । निषेधस्य प्राप्तिपूर्वकत्वात् प्राप्तेरेवाभावादित्यर्थः । समुदायस्य प्राप्त्यभावेऽपि प्रथमंलिङ्गग्रहणञ्चेति अवयवस्य प्राप्तिरस्तीत्यत आह अवयवस्येति । तस्य = अवयवस्य । अनेन = ङिति ह्रस्वश्चेत्यनेन। विकल्पाभावादिति । तत्र हेतुमाह ङिदाक्षिप्तेति । अनेन = ङितीत्यनेन । एतच्च = स्त्रीवाचकस्य ङिदाक्षिप्ताङ्गस्यैवानेन विकल्प इत्येतत् । प्रवृत्तौ स्त्रीवचनाविति । ह्रस्वेयुवृप्रवृत्तौ च स्त्रीवचने इति वार्तिकेन तद्भाष्येण चेत्यर्थः । सूचितमिति ।

प्रवृत्तिरर्थान्तरसंक्रान्तिरिति कैयटः । तस्यां सत्यामित्यर्थः । एवञ्च ह्रस्वेवर्णाद्यन्तौ इयङादिस्थानेवर्णाद्यन्तौ च शब्दावर्थान्तरसंक्रान्तौ सत्यां तत्पूर्वं च स्त्रीवचनावेव नदीसंज्ञौ भवत इति तदर्थेन अर्थान्तरसंक्रान्तेरङ्गस्यैव सत्वेनाङ्गस्य स्त्रीवाचकत्वे एव प्रकृतसूत्र-प्रवृत्तिरिति सूचितमिति भावः ।

अत एव = अस्य निषेधविकल्पत्वासंभवादेव । अत्र = ङिति ह्रस्वश्चेति सूत्रे । दर्शित इति । यू स्त्र्याख्याविति सूत्रे भाष्ये ह्रस्वेयुवुप्रवृत्तौ चेति वार्तिकव्याख्यानावसरे इत्यर्थः । ङिति ह्रस्वश्चेत्यत्र नित्यस्त्रीलिङ्गावित्येवंविधो नियमो नाश्रीयत इति कैयटस्य संकोचेन ह्रस्वांशमात्रविषयत्वेन व्याख्यानं प्राचोक्तं न युक्तमित्याह एवञ्चेति । निरुक्तभाष्य-प्रामाण्यात् वाक्यद्वयेऽपि आख्याग्रहणरहितस्त्रियामित्येतन्मात्रस्य सम्बन्ध इत्यर्थलाभे चेत्यर्थः । उचित इति । तेन ङितीत्याद्यवाक्यस्य नित्यस्त्रीलिङ्गावीदूताविति कौमुद्युक्तम-सङ्गतमिति सिद्धम् । कौमुदीग्रन्थस्य स्वोक्तस्यापि स्वानभिमतत्वमेवेति सूचयति कौस्तुभे भट्टोजीदीक्षितः । अत एव शब्दकौस्तुभे प्रकृतसूत्रव्याख्यावसरे 'इयङुवङ्स्थानौ ह्रस्वौ च यू वा नदीसंज्ञौ स्तः स्त्रियां ङिति परे' इत्यविशेषेणैवोक्तमिति बोध्यम् ।

नन्वेवं यू स्त्र्याख्याविति सूत्रे भाष्ये उपक्रमे 'नित्यस्तर्हि भविष्यति । तत्कथम्? योगविभागः करिष्यते इदमस्ति यू स्त्र्याख्यौ नदी, नेयङुवङ्स्थानावस्त्री, वामि । ततो ङिति । ङिति चेयङुवङ्स्थानौ यू वा अस्त्री नदीसंज्ञौ न भवत इति दीर्घांशे निषेधविकल्प-परतया व्याख्यातं, तेन सह विरोध इत्यत आह उपक्रम इति । पक्षोपपादने युक्तिभूतमिति। यू स्त्र्याख्याविति सूत्रे भाष्ये किं पुनरिदं दीर्घयोः ग्रहणमाहोस्विद् ह्रस्वयोरिति आशङ्क्य यदि दीर्घयोर्ग्रहणं यू इति निर्देशो नोपपद्यते । तथा उत्तरत्रानुवृत्तौ यू ह्रस्वौ चेति विप्रतिषिद्धमित्यनुपपत्तिरुद्भाविता । ह्रस्वयोर्ग्रहणमिति पक्षे दीर्घयोरपि अण् सवर्णान् गृह्णातीति सिद्धावपि शकटिबन्धुरित्यत्र नदीबन्धुनीति स्वरः, बहुशकटिरित्यत्र नद्यृतश्चेति कप् च स्यादित्यापादितम् । तदुत्तरं नैष दोषः । ङिति ह्रस्वश्च इत्ययं नियमार्थो भविष्यति। ङित्येव यू ह्रस्वौ नदीसंज्ञौ भवतः, नान्यत्रेति नियमार्थत्वमाश्रित्य प्रागुक्तदोषः परिहृतः । ततः पूर्वेण नित्यं प्राप्तायाः संज्ञाया विकल्पेन विधानर्थमस्यावश्यकतया अपूर्व एव विधिर्भविष्यति न नियम इत्याशङ्क्य 'नित्यस्तर्हि भविष्यति । तत्कथम् ? योगविभागः करिष्यते । इदमस्ति यू स्त्र्याख्यौ नदी, नेयङुवङ्स्थानावस्त्री, वामि । ततो ङिति । ङिति चेयङुवङ्स्थानौ यू वा अस्त्री नदीसंज्ञौ न भवतः । ततो ह्रस्वौ । ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवतः । इयङुवङ्स्थानौ वा नेति निवृत्तम्' इति ङितीति सूत्रस्य

निषेधविकल्पपरतया, ह्रस्वश्चेति सूत्रस्य नित्यनदीसंज्ञाविधायकतया चोपपाद्य नियामकत्वसमर्थनेन हेतुना यू इत्यत्र ह्रस्वयोर्ग्रहणमिति पक्ष उपपादितः । एवञ्च ङित्येव यू ह्रस्वौ नदीसंज्ञौ भवतः, नान्यत्रेति नियामकत्वं विना ह्रस्वग्रहणपक्षो नोपपद्यते । ङितीति वाक्यस्य नियामकता च यू स्त्र्याख्याावित्यत्र स्त्र्याख्यावित्यस्य नित्यस्त्रीत्वार्थकत्वाभावे एव घटते नान्यथा । अन्यथा इष्वादीनामुभयलिङ्गानां, पट्वादीनां च गुणवचनत्वात् सर्वलिङ्गानां नित्यस्त्रीत्वाभावात् पूर्वेणाप्राप्तनदीसंज्ञाविधानायावश्यकतया ङितीत्यस्य नियामकत्वं नोपपद्येत । एवञ्च निषेधविकल्पपरतया व्याख्यानं निरुक्तरीत्या एकदेशिनो वचनमिति तन्नादर्तव्यमिति भावः। स्पष्टश्चैतत् 'विधेयं नास्तीति कृत्वे' ति भाष्यव्याख्याने उद्योते । यथा 'अस्त्री वा नदीसंज्ञो नेति केवलस्त्रीशब्दादौ प्राप्त्या तदन्ते चाद्यापि नित्यस्त्रीलिङ्गावित्यर्थाज्ञानात् प्राप्तिं मत्वैवं व्याख्यातम्' इति । तथा च ह्रस्वग्रहणपक्ष-समर्थकनियामकत्वसमर्थकं निषेधविकल्पपरतया नित्यनदीसंज्ञाविधायकतया च व्याख्यातं भाष्यमेकदेशिनोक्तमिति नादर्तव्यमिति ग्रन्थकृदाशयः ।

यत्तु ''दीर्घवाक्ये 'स्त्र्याख्या'विति ईदूतोस्तदन्तस्य वा विशेषणं, पुनरङ्गेन तदन्तविधिः, अङ्गस्य च केवलस्त्रीत्वं विशेषणम् । एवं ह्रस्वघटितवाक्येऽपि 'स्त्रिया'मित्येतन्मात्रमुभयोर्विशेषणम्'' इति । तत्तु चिन्त्यं, भाष्यात्तदलाभात् । 'नेयूङुवङ्'इत्यत्र तु न इयङाद्याक्षिप्ताङ्गस्य विशेषणं स्त्रीत्वं, तदाक्षिप्तस्येयङादिविशेषणताया एवौचित्यात् । 'यस्याङ्गस्येयुवौ'इति भाष्योक्तेः। 'स्त्र्याख्या'वित्यस्य - नित्यस्त्री-लिङ्गावित्यर्थकस्य 'यू' इत्यनेनैव क्लृप्तसम्बन्धत्वाच्च । अत एव 'अतिश्रिये ब्राह्मणाये'त्यत्रानेन निषेधादवयवनदीत्वप्रयुक्तमपि नदीकार्यं न ।

<u>**भावबोधिनी :**</u> अनुपदमेवात्रोपपादितं मतं स्वमतसिध्यनन्तरं दूषयति यत्त्विति भाष्यात् । प्रवृत्तौ स्त्रीवचनावेवेत्यादि भाष्यात् । अलाभप्रकारश्चोपपादितः । एतत्खण्डनेनैव कट्प्रुवै कटप्रुवे इति रूपद्वयं स्वाभिमतं सिध्यतीति बोध्यम् ॥ ननु ङिति ह्रस्वश्चेत्युत्तरवदत्रापि स्त्रीत्वमङ्गविशेषणं स्यादित्यत आह नेयङुवङित्यत्रेति । तुरितरवैलक्षण्ये इयङुवङादिविशेषणताया इति । इयङुवङादिसम्बन्धस्येत्यर्थः। तदाक्षिप्तस्य तैस्सह सम्बन्धेपि तत्र स्त्रीत्वं कुतो न विशेषणमित्यत आह स्त्र्याख्येति। नित्यस्त्रीलिङ्गावित्यर्थकस्येति अनेन च नित्यस्त्रीत्वमत्रसूत्रे विवक्षितमिति सूचितम्। महावाक्यार्थस्तु तत्सूत्रव्याख्यानावसरे लिख्यते । अत एव ईदूदंशे =

नित्यस्त्रीत्वविशेषणादेव अङ्गे अविशेषणादेव वा अनेन ङितीति सूत्रे स्त्रीत्वमात्रार्थस्य अङ्गविशेषणत्वेपि न क्षतिरिति सूचितम्। अपिना समुदायविकल्पसमुच्चयः।

बालबोधिनी : प्राचोक्तं खण्डयति यत्त्विति । दीर्घवाक्ये = ङितीत्याद्यवाक्ये । स्त्र्याख्याविति = नित्यस्त्रीलिङ्गाविति । दीर्घघटितवाक्ये नित्यस्त्रीत्वमीदूदन्तस्य विशेषणम्। केवलस्त्रीत्वमङ्गस्य । ह्रस्वश्चेति वाक्ये उभयत्रापि स्त्रीत्वमेव विशेषणमिति केचित् । तद्दूषयति चिन्त्यमिति । तत्र बीजमाह भाष्यादिति । भाष्ये हि 'प्रवृत्ता च प्राक् च प्रवृत्तेः स्त्रीवचनावेव' इत्येतावदुक्तेः नित्यस्त्रीलिङ्गावित्यनुक्तेश्च ततस्तदलाभः ।

ननु ङिति ह्रस्वश्चेति सूत्रे स्त्रीवाचकावित्येतन्मात्रार्थकस्त्र्याख्यावित्यस्यानुवृत्तस्य ङिदाक्षिप्ताङ्गविशेषणत्वमिव नेयङिति सूत्रेऽपि स्त्र्याख्यावित्यस्य इयङाद्याक्षिप्ताङ्गविशेषणत्वे अतिश्रिये ब्राह्मणाय इत्यत्राङ्गस्य स्त्रीत्वाभावात् नेयङुवङिति निषेधाप्रवृत्तौ अतितन्त्र्यै ब्राह्मणाय इत्यत्रेव प्रथमलिङ्गग्रहणञ्चेति नित्यं नदीत्वापत्तिरत आह नेयङुवङ् इत्यत्रेति । तदाक्षिप्तस्य = इयङाद्याक्षिप्तस्य । औचित्यादिति । आक्षिप्तस्याक्षेपकेऽन्वयस्यौचि-त्यादित्यर्थः । तत्र मानमाह यस्येति । आक्षिप्तस्याङ्गस्येयङादिविशेषणत्वमिति भावः । क्लृप्तसम्बन्धत्वाच्चेति । यू स्त्र्याख्याविति सूत्रे इति शेषः । प्रागुक्तव्याख्यानफलमाह अत एवेति । निषेधसूत्रे स्त्रियामित्यस्याङ्गविशेषणत्वाभावादेवेत्यर्थः । अनेन = नेयङिति सूत्रेण। नदीत्वप्रयुक्तम् = नित्यनदीत्वप्रयुक्तम् ।

ननु यथा 'खरकुट्यै ब्राह्मणाये'त्यादौ लुबन्तस्य त्रिलिङ्गत्वेऽपि प्रथमलिङ्गग्रहणान्नित्यनदीत्वं भवतीति भाष्ये उक्तम् । 'चञ्चा ब्राह्मणान्पश्ये'त्यादौ युक्तवद्भावेन स्वलिङ्गप्रयुक्तकार्याभावस्याप्यतिदेशान्न नत्वम् । स्पष्टञ्चेदं 'तस्माच्छस'इति सूत्रे भाष्यकैयटयोः । यद्वाऽतिदेशेन प्रकृतिलिङ्गप्रयुक्तेन कार्यातिदेशेन तद्विरुद्ध-स्वाश्रयकार्याऽप्रवृत्तिः । स्पष्टञ्चेदं 'स्त्रिया'मिति सूत्रे भाष्ये । युक्तवद्भावादिप्रत्याख्यानेऽपि यथा दारादिशब्दैः पुंस्त्वेन स्त्रीरूपार्थस्य भानं, तथा प्रकृते स्त्रीत्वेन पुंसो भानमिति न नत्वम् , 'पुंस्त्वे वाच्ये नत्व'मित्यर्थात् । न चैवं 'खरकुट्यै'इत्यत्रापि युक्तवद्भावेन नित्यस्त्रीत्वात्सूत्रेणैव सिद्धमिति वाच्यम् , 'स्त्र्याख्या'वित्यस्य "स्त्रीत्वविशिष्टमेव य आहे'त्यर्थात् । न चायं तथा, स्त्रीत्वेन रूपेण वस्तुतः पुंस्त्वविशिष्टस्याभिधानात् । यद्यपि पदार्थमात्रे शास्त्रीयलिङ्गत्रयमस्ति, तथापि व्यक्तिवस्तुपदार्थादिपदबोध्यत्वकाले तत्तल्लिङ्गोपजननेऽपि स्त्रीपदादिबोद्ध्यत्वदशायां तत्सत्त्वे मानाभावात् । प्रकृते तु - 'ब्राह्मणाये'त्यादिविशेष्यदर्शनेन तत्सत्तानुमानात् । स्पष्टञ्चेदं भाष्यकैयटयोः । एवं

श्रीशब्दात्कनि लुपि 'श्रिये ब्राह्मणाये'त्यादौ विकल्पापत्तिः, युक्तवद्भावेन स्त्रियामङ्गस्य वर्त्तनात् , अत्र सूत्रे नित्यस्त्रीत्वानिवेशाच्चेति चेन्न । सत्यभिधाने इष्टापत्तेः । भाष्ये दृश्यमानं- 'श्रिये ब्राह्मणाये'त्यादि तु क्यजन्तात् क्विपि बोद्ध्यम् । विपरीतं - नित्यस्त्रीत्वनिवेशवादिनो लुबन्ते श्रियै ब्राह्मणायेत्यादौ तदनापत्तिर्दोष इत्याहुः ।

भावबोधिनी : लुबन्तश्रीशब्दे ङिति ह्रस्वश्चेति सूत्रे नित्यस्त्रीत्ववादिनां मते दोषमुद्भावयितुं भूमिकामारचयति, नन्वित्यादिना बोध्यमित्यन्तेन । लुबन्तस्येति । इवे प्रतिकृताविति। कनि तस्य लुम्मनुष्य इति लुप् । लुबन्तस्य स्त्रीलिङ्गत्वे अनुपपत्तिं परिहरति चञ्चा इति । युक्तवद्भावेन = लुपि युक्तवदित्यनेन प्रयुक्तत्वस्याभावेऽन्वयः। अभावातिदेश अशक्य इत्यत आह यद्वेति प्रत्याख्यानेपीति । सदृशे लक्षणयैव उपपत्तिमभ्युपगम्य कनो लुब्विधायकादिसूत्राणि प्रत्याख्यातानीति बोध्यम् । पुंस्त्वेन पुंस्त्वारोपेण स्त्रीत्वेन स्त्रीत्वारोपेण । वस्तुतस्तु पुंस्त्वविशिष्टबोधकत्वेन नत्वं दुर्वारमित्यतआह पुंस्त्वे वाच्ये इति । पुंस्त्वप्रकारकबोधजनकात्परस्य शसो नत्वमिति सूत्रार्थ इत्यर्थः। प्रकृते तु आरोपितस्त्रीत्वप्रकारक एव बोधः। नित्यस्त्रीत्वादिति । खरकुटीसदृशत्वस्य प्रवृत्तिनिमित्तस्यैक्येन सर्वत्र स्त्रीत्वारोपेण स्त्रीत्वविशिष्ठार्थवाचकत्वात् तत्त्वं बोध्यम्।उपजननेपि उत्पत्तावपि । अनुमानादिति। एवञ्च वस्तुतः स्त्रीत्वविशिष्ठवाचकत्वं नेतिभावः । विकल्पापत्तिरिति । इयङुवङ्स्थानत्वात् खरकुटीत्यस्य तु न अतथात्वात्। तदनापत्तिः = ङिति ह्रस्वश्चेति विकल्पानापत्तिः ।

बालबोधिनी : आख्याग्रहणरहितस्यैव ङिति ह्रस्वश्चेत्यत्र वाक्यद्वयेऽपि सम्बध्यत इति सिद्धान्ते शङ्कते नन्विति खरकुट्यै ब्राह्मणायेति। खरकुटशब्दात् पिप्पल्यादेराकृतिगणत्वात् ङीष् । कुटीशब्देन समासो वा । खरकुटीवेतीवार्थे संज्ञायामिति कनो लुम्मनुष्य इति लुप्। यथेति । अस्य दूरस्थितेन एवं श्रीशब्दादिति वाक्यगतेन एवंशब्देनान्वयः। लुबन्तस्य त्रिलिङ्गत्वेऽपि प्रथमलिङ्गग्रहणञ्चेति वार्तिकेन नदीत्वमेवं श्रिये ब्राह्मणायेत्यत्रापीत्यन्वयः। लुबन्तस्य त्रिलिङ्गत्वे चञ्चा ब्राह्मणान् पश्येत्यत्र पुंस्त्वप्रयुक्तनत्वापत्तिरिति शङ्कायामाह चञ्चेति। चञ्चा तृणमयः पुमान् । चञ्चेव मनुष्यः चञ्चा । संज्ञायाञ्चेति कनो मनुष्ये वाच्ये लुम्मनुष्ये इति लुप् । युक्तवद्भावेनेति । लुपि युक्तवद्वचने इत्यनेनेत्यर्थः । स्वलिङ्गप्रयुक्तेति । पुंस्त्व-प्रयुक्तेत्यर्थः । वस्तुतस्तु अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावोऽति-देशस्वभावसिद्ध इत्याह यद्वेति । युक्तवद्भावप्रत्याख्यानपक्षे नत्ववारणोपायमाह युक्तवद्-भावादिप्रत्याख्यानेऽपीति । आदिना लुप्संग्रहः । प्रत्याख्यानञ्च तदशिष्यं संज्ञाप्रमाणत्वा-दिति लोकव्यवहारेणैव सिद्धेरिति भावः।

लुपि युक्तवद्व्यक्तिवचने । प्रकृतिवल्लिङ्गमेकवचनादिप्रत्ययाश्च लुपि सति भवन्तीति तदर्थः। युक्तशब्देन प्रकृत्यर्थ उच्यते स हि प्रत्ययार्थेन युक्तो भवति । प्रकृतौ यादृशं लिङ्गसंख्याप्रयुक्तं कार्यं तत् प्रत्ययार्थप्रतिपादिकायां तत्रातिदिश्यत इति तात्पर्यम् । ननु युक्तवद्भावेन प्रकृतिलिङ्गातिदेशे खरकुट्यै इत्यत्रापि नित्यस्त्रीत्वात् सूत्रेणैव सिद्धेऽस्य वार्तिकफलत्वेन कथनं भाष्यकृतामसङ्गतमिति शङ्के न चेति । स्त्रीत्वविशिष्टमेवेति । एवेन लिङ्गान्तरविशिष्टस्य व्यवच्छेदः । अयं = खरकुटीशब्दः । न तथा = स्त्रीत्वेन रूपेण स्त्रीत्वविशिष्टमेव न बोधयति । ननु शास्त्रीयलिङ्गत्रयस्य केवलान्वयित्वेन स्त्रीत्वविशिष्ट-मेवेत्यर्थो न सम्भवतीत्यत आह यद्यपीति । उपजननेऽपि = प्रादुर्भावेऽपि । तत्सत्त्वे = लिङ्गान्तरसत्त्वे । प्रकृते = खरकुट्यै ब्राह्मणायेत्यत्र । तत्सत्तेति । लिङ्गान्तरसत्तेत्यर्थः । एवं दृष्टान्तमुक्त्वा सिद्धान्तेऽतिप्रसङ्गमाह एवमिति । तद्वदित्यर्थः । अत्र सूत्रे= ङिति ह्रस्वश्चेत्यत्र वाक्यद्वये । इष्टापत्तेरिति । वैकल्पिकनदीसंज्ञाया इत्यर्थः ।

ननु प्रथमलिङ्गग्रहणञ्च इत्यस्याप्रवृत्त्यन्वाख्यायके ह्रस्वौ चेयङुवङ्स्थानौ च प्रवृत्तौ च प्राक्च प्रवृत्तेः स्त्रीवचनावेव नदीसंज्ञौ भवतो न तु पुंवाचकाविति वक्तव्यमित्यर्थक-वार्तिकव्याख्यावसरे अतिशकट्यै ब्राह्मण्यै क्व मा भूत् ? अतिशकटये ब्राह्मणाय, श्रिये ब्राह्मणाय' इति यूस्त्र्याख्याविति भाष्ये उक्तम् । तत्र श्रिये ब्राह्मणायेति ङिति ह्रस्वश्चेत्य-स्याप्रवृत्तिप्रतिपादनेन तेन भाष्येण विरोधोऽत आह भाष्ये दृश्यमानमिति । क्यजन्तात् क्विबिति । तेन लुबन्तत्वाभावस्सूचितः । कैयटादिमतेऽयमपि दोष इत्याह विपरीतमिति । तदनापत्तिः = विकल्पानापत्तिः ।

'यू' किं ? मात्रे । यद्यपि 'यू' इति दीर्घपरं , तथापि विभक्तिविपरिणामेन 'य्वोर्ह्रस्वा' वित्यन्वयो बोद्ध्यः । एतत्सर्वं 'वामी'त्यत्रापि बोद्ध्यम् । 'इदुद्भ्यामौदच्च घेः'इति सूत्रं योगविभागेन व्याचष्टे - इदुद्भ्यामिति । अनदीसंज्ञकेषु 'अच्च घेः' 'औत्' इत्याभ्यां बाधात्, 'ङेरा'मिति सूत्रान्नदीग्रहणानुवृत्तेश्चाह - नदीसञ्ज्ञकाभ्यामिति । मत्यामिति । सन्निपातपरिभाषाया अनित्यत्वाद्यण् ।

भावबोधिनी : य्वोर्ह्रस्वाविति । तत्सम्बन्धिह्रस्वावित्यर्थः। सम्बन्धित्वं च एक जातिमत्वेनेतिभावः। वस्तुतस्तु शब्दानुवृत्तिरेव युक्ता । वामीत्यत्रापीति कटप्रुवां कटप्रुणामिति रूपद्वयमिति भावः। योगविभागेनेति। योगविभागश्चेति दृश्यते भाष्ये। अनेन एकसूत्रतया पूर्वपाठोऽनुमीयते अनुवृत्तेश्चेति।

इयञ्चानावश्यकी औदिति सूत्रं नदीसंज्ञकविषयम्। प्रकृतसूत्रं अनदीसंज्ञकविषयमिति

तु न। इकारांशे सखिपतिशब्दसम्भवेऽपि उकारांशे नदीसंज्ञकासंभवेन उद्ग्रहणानर्थक्य-प्रसङ्गात् । न च औदित्यस्यानदीविषयकत्वे तद्वैयर्थ्यं तवापीति वाच्यम्। इह किञ्चिदितिन्यायेन तत्रैव प्रयोजनस्य वक्तव्यत्वात्। अत्र च उत्तरार्थं तदनुवृत्तिरिति वक्तुं शक्यत्वात्। इत्थञ्च नदीविषयकत्वमव्याहतमेव । किञ्च अच्च घेरित्युत्तरसाहचर्येण औदित्यस्यैवानदीविषयकत्वस्य वक्तुं शक्यत्वाच्च । एतेन अस्वारस्यादनुवृत्ति-रित्युक्तमित्यपास्तम् ।

बालबोधिनी : यू इति । यू स्त्र्याख्याविति सूत्रात् यू इत्यनुवर्तते । तच्च दीर्घपरमित्यर्थः । विभक्तिविपरिणामेन = षष्ठ्यन्तेन । य्वोरिति । सावर्ण्यं षष्ठ्यर्थः । एतत्सर्वमिति । ङिति ह्रस्वश्चेत्यत्र यदुक्तं तत्सर्वमित्यर्थः । योगविभागेनेति । यदि एकसूत्रं स्यात्तर्हि नदीत्वपक्षेऽपि औत्वेन परत्वादामो बाधात् मत्यामित्यस्यासिद्धिरिति भावः । ननु सन्निपातपरिभाषया यण् न स्यादत आह अनित्यत्वादिति । सोऽचि लोपे चेदित्यादिनिर्देशेन सन्धिकार्ये सन्निपातपरिभाषा न प्रवर्तत इति भावः ।

त्रिचतुरोः । 'अष्टन आ'इत्यतो 'विभक्तौ'विति वर्त्तते । तत्फलं त्रिभार्यः । तृतीयान्तेन समासः . भार्यो-भरणीयः । अचि र । अलोऽन्त्यपरिभाषयैव सिद्धे 'ऋत'इति,-अनुवर्त्तमान-'तिसृचतसृ'इत्यस्य षष्ठ्यन्तत्वकल्पनाय । अन्यथा 'त्रिचतुरो'रित्यस्यैवानुवृत्त्यापत्तौ रादेशेन तिसृचतस्रोर्बाधापत्तिरिति दिक् । नुमचिरेति । अत्राचिरांशे 'न तिसृ'इति निषेधो मूलम् । एतेन स्त्रीत्वरूपार्थविशेषविभक्तिसञ्ज्ञानिमित्ततिस्राद्यपेक्षया नुडन्तरङ्ग इत्यपास्तम् । अतो निषेधादेवार्थसंज्ञाकृतबहिरङ्गत्वानाश्रयणम् । अन्यथा आमिति प्रत्ययविशेषापेक्षत्वेऽपि सञ्ज्ञाऽर्थविशेषानपेक्षत्वेनान्तरङ्गत्वात्त्रयादेशे तदसङ्गतिः स्पष्टैव । वस्तुतः- स्वरूपेणोपादाने न बहिरङ्गत्वं, किन्तु केन चिद्विशेषधर्मेणोपादाने एवेति, विशेषापेक्षस्य बहिरङ्गत्वमेव नेति च रुदधातौ निरूपयिष्यामः । तृज्वत्सूत्रे भाष्ये तु " 'न तिस्रि'तिज्ञापकाद्रादेशो नुड्विषये न। पूर्वविप्रतिषेधेन तु न सिद्ध्यति, अपवादविषये विप्रतिषेधाप्रवृत्तेः, रादेशस्य सर्वापवादत्वात्" - इत्युक्तम् । त्रिचतुरोर्विशेषणादिति । स्त्रीनिष्ठसङ्ख्यायां वर्त्तमानयोरित्यर्थ इति भावः । नेहेति। त्रिशब्दस्य पुन्नपुंसकवृत्तित्वेऽपि समुदायस्य स्त्रियां वृत्तेरङ्गविशेषणत्वे आदेशःस्यादिति भावः । आमि त्विति । तत्र- 'आम्'-षष्ठीबहुवचनमेव, अर्थाधिकारात्, अतो न ङेरामि त्रयादेश इति बोद्ध्यम् । प्रियतिसेति । अङ्गविशेषणत्वेऽत्राव्याप्तिः स्यादिति भावः । 'प्रिया जस् त्रि जस्' इति स्थिते 'अन्तरङ्गानपी'ति न्यायेन विभक्तिलुकि पुनःसुपि तदन्तविधिना निर्दिश्यमानपरिभाषया त्रिशब्दस्यादेशः । ततो 'नद्यृतश्चे'ति कप् न,

समासार्थालौकिकवाक्ये ऋकारान्तोत्तरपदत्वाभावात् । 'ऋदुशने'त्यनङ् । प्रियतिसृणी इत्यादि । अत्र नुमः परत्वात्तिस्रादेशे पुनः प्रसङ्गविज्ञानेन नुम् । 'न तिसृ'ति ज्ञापकेन सामान्यत आगमविषये रादेशो नेति ज्ञाप्यते । 'प्रत्ययोत्तरे'ति सूत्रे चेमौ भाष्ये प्रयोगौ ।

<u>भावबोधिनी :</u> ननु तिस्रःभार्या यस्येति बहुव्रीहौ पुंवद्भावेन नेष्टसिद्धिरित्यत आह तृतीयान्तेनेति । भृञोऽसंज्ञायामिति सूत्रे भार्याशब्दस्य संज्ञात्वाङ्गीकारेण कर्तृकरणे कृता बहुलमिति समासो न स्यादत आह भार्य इति । तत्र एकानुबन्धग्रहणे न द्व्यनुबन्धकस्येति भृञ् भरण इत्यस्यैव ग्रहणमिति डुभृञ् इत्यस्मात् ऋहलोरिति ण्यता भार्यस्य क्रियाशब्दत्वमिति भावः। वस्तुतस्तु त्रिप्रियइत्युदाहरणे न कोपि क्लेशः प्रियादौ पुंवद्भावनिषेधात्। मूलमिति । नुटः परत्वाद्रादेशे ततोऽह्रस्वान्तत्वेन नुडभावे नामीति दीर्घनिषेधकं न तिसृ इति व्यर्थमेव स्यादिति भावः

ननु न तिसृेति न ज्ञापकं त्रि आमित्यवस्थायामन्तरङ्गत्वान्नुटि ततस्तिस्रादेशेऽजभावेऽजभावेन रादेशाप्राप्त्या नामिदीर्घे प्राप्ते तन्निषेधकत्वेन चरितार्थत्वादिति केचित्कारोक्तिं खण्डयति एतेनेति । ज्ञापकत्वमङ्गीकृत्य त्वदुक्तबहिरङ्गत्वखण्डनेनेत्यर्थः । अन्यथा अर्थसंज्ञाकृतबहिरङ्गत्वाश्रयणे उक्तरीत्या त्रयादेशापेक्षयापि तिस्रादेशस्य बहिरङ्गत्वेन तत्पूर्वमन्तरङ्गत्वात् त्रयादेश आपाद्यते ग्रन्थकृता । सामान्यापेक्षाद्विशेषापेक्षं बहिरङ्गमिति विभक्तिसामान्यापेक्षतिस्रपेक्षया त्रयादेशोपि बहिरङ्ग इत्युभयोस्साम्ये परत्वात्तिस्रादेश एवेति तद्हृदिस्थं निराकरोति आमितीति । तदसङ्गतिरिति । उक्तरीत्या त्रयादेशे अन्तरङ्गत्वान्नामिदीर्घे ततस्तिस्रादेशे लक्ष्ये लक्षणमिति न्यायेन पुनर्दीर्घाप्राप्त्या न तिसृेत्यस्यासङ्गतिरित्यर्थ इति इन्द्राः । पुनर्नामि दीर्घे कर्तव्ये त्रिस्रादेशस्य बहिरङ्गासिद्धत्वं शास्त्रिणोक्तन्तु न युक्तम् । नाजानन्तर्य इति निषेधात् । पूर्वोक्तन्तु युक्तमेव एतन्निषेधस्य जातबहिरङ्गविषयकत्वात् । यत्तूक्तं त्रयादेशे कर्तव्ये अनन्तरङ्गत्वाट्टाप् एकादेशः तस्याचः परस्मिन्निति स्थानिवत्वेन टापा व्यवधानान्न तिस्रादेशः। ततश्च न तिसृ इत्यस्यासङ्गतिरिति तन्न । विभक्तिसन्निपातेन जातस्य त्रयादेशस्य टापं प्रत्यनिमित्तत्वात् तस्मात् स्थानिबुध्या आदेशेपि लक्ष्ये लक्षण न्यायेन पुनर्दीर्घो नेत्युक्तमेव युक्तमिति बोध्यम् । सामान्यापेक्षन्यायेनापि न बहिरङ्गत्वं त्रयादेशस्येत्याह वस्तुतस्त्विति । स्वरूपेणोपादाने इति । सामान्यधर्मपुरस्कारेणोपादाने इत्यर्थः। विशेषधर्मोपादान एवेति वक्तव्यमिति शेषः सामान्यापेक्षविधौ एकमेव सामान्यधर्म-ज्ञानं विशेषापेक्षविधौ तु सामान्यधर्मविशेषधर्मोभयज्ञानमावश्यकं विशेषधर्मेणोपदाने

सामान्यज्ञानं विना विशेषज्ञानानुदयादिति तस्य बहिरङ्गत्वमिति भावः । रुदधाताविति । तत्र हि विधिलिङि रुद् ति इत्यत्र यासुट् परस्मैपदेष्वित्यस्य तिपि परस्मैपदत्वज्ञानार्थं तत्प्रकृतौ धातुत्वज्ञानमात्रमपेक्षितम् । रुदादिभ्यः सार्वधातुके इत्यस्य तिपि सार्वधातुकत्वज्ञानाय प्रकृतौ धातुत्वज्ञानं रुदादित्वज्ञानञ्च आवश्यकमिति बहिरङ्गत्वेन यासुडेवेति न वक्तव्यम् । नित्यत्वेनैव यासुट्सिद्ध्या तद्वचनं नावश्यकमिति निरूपयिष्यत इति बोध्यम् सर्वापवादत्वादिति । तिसृ इत्यत्र जसि गुणस्य शसि पूर्वसवर्णदीर्घस्य प्रियतिसृ इत्यत्र उत्वस्य च बाधनाय बाध्यसामान्यचिन्ताश्रयणे अविशेषान्नुड्-विधायकत्वमपि रादेशस्येति सर्वापवादत्वं बोध्यम् । उक्तार्थकल्पने प्रमाणमाह भाष्यप्रयोगाविति । प्रियतिसृणी प्रियतिसृणि प्रयोगावित्यर्थः ।

बालबोधिनी : तृतीयान्तेनेति । तिसृभिः भार्यो भरणीय इति विग्रहः । तिस्रः भार्या यस्येति न समासः । समानाधिकरणलक्षणपुंवद्भावेऽतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्या-भावात् तत एव तिसृभावानापत्त्या तत्सिद्धेरिति भावः । ननु भार्याशब्दस्य संज्ञाशब्दत्वेन क्रियावाचित्वाभावात् कर्तृकरणे कृता बहुलमिति समासः कथमित्यत आह भार्यो भरणीय इति । ऋहलोरिति ण्यदिति भावः । भृञोऽसंज्ञायामिति क्यपा भाव्यमिति केचित् । तन्न । तत्र सूत्रे तदनुबन्धकपरिभाषया एकानुबन्धकस्य भौवादिकस्य भृञो ग्रहणेन जौहोत्यादिकात् द्व्यनुबन्धकात् ण्यता रूपसिद्धेः ।

अचि र ऋतः । ननु ऋत इति मास्तु । त्रिचतुरोः स्त्रियां तिसृचतसृ इति सूत्रात् तिसृचतसृ इत्यनुवर्तते । अचीति सप्तमीनिर्देशेन तस्य षष्ठ्यन्तत्वं कल्प्यते । अलोऽन्त्यपरिभाषया तयोरन्त्यस्य ऋकारस्यैव सिद्धेः तद्ग्रहणं व्यर्थमत आह अलोऽन्त्येति। अन्यथा = ऋत इत्यस्याभावे । बाधापत्तेरिति । यदि ऋत इति नोच्यते तर्हि कस्य रेफ इत्याकाङ्क्षायां पूर्वसूत्रे त्रिचतुरोरित्यस्योद्देश्यतया क्लृप्तत्वात् तस्यैवानुवृत्तौ रादेशः तिसृचतस्रोः बाधकः स्यादिति भावः ।

नुमचिरेति । तिसृ आम् इति स्थिते नुटं बाधित्वा अचि र ऋत इति रत्वे प्राप्ते नुमचिरतृज्वद्भावगुणेभ्यो नुट् पूर्वविप्रतिषेधेन इति रत्वं बाधित्वा नुडिति भावः । अत्रेति। नुमचिरेति वार्तिके इत्यर्थः । नुटो रत्वबाधकत्वे न तिसृचतसृ इति दीर्घनिषेधो ज्ञापकम् । यदि रादेशेन नुट् बाध्येत तर्हि कृते रत्वे ह्रस्वान्तत्वाभावेन नुटोऽप्राप्त्या नामीति दीर्घस्य प्राप्तेरेवाभावेन न तिसृचतसृ इति दीर्घनिषेधो व्यर्थः स्यात् । तद्व्यर्थं सत् नुटो रादेशबाधकत्वं ज्ञापयतीति इति भावः । एतेन = पूर्वविप्रतिषेधेन नुटो रत्वबाधकत्वेन । अपास्तमिति ।

स्त्रीत्वरूपार्थविशेषस्य, विभक्तिसंज्ञायाश्चोभयोरपेक्षित्वेन तिस्राद्यादेशस्य बहिरङ्गत्वात् तद्बाधित्वाऽन्तरङ्गत्वान्नुटि रादेशनुटोः यौगपद्याभावेन परत्वात् रत्वमिति शङ्काकरणं पूर्वविप्रतिषेधेन नुडिति समाधानञ्चासङ्गतं स्यादिति भावः ।

संज्ञार्थकृतबहिरङ्गत्वानाश्रयणे गमकमाह अत इति । अस्मादित्यर्थः । निषेधादेव= न तिसृचतसृ इति निषेधादेव । अनाश्रयणमिति । अन्यथा तन्निषेधो व्यर्थः स्यादिति भावः। तदेवाह अन्यथेति । अर्थसंज्ञाकृतबहिरङ्गत्वाश्रयणे इत्यर्थः । अर्थकृतस्य संज्ञाकृतस्य च बहिरङ्गत्वस्याश्रयणे त्रि + आम् इत्यवस्थायां तिस्रादेशं बाधित्वाऽन्तरङ्गत्वात् त्रयादेशे नुटि दीर्घे स्थानिवत्त्वेन त्रयादेशे त्रिशब्दत्वबुद्धौ तिस्रादेशेऽपि लक्ष्ये लक्षणं सकृदेव प्रवर्तत इति न्यायेन पुनः दीर्घाप्राप्त्या न तिसृचतसृ इति तन्निषेधो व्यर्थः स्यादिति भावः । तदसङ्गतिः = निषेधासङ्गतिः ।

ननु यथा तिस्रादेशस्य संज्ञासापेक्षत्वाद्बहिरङ्गत्वं तथा त्रेस्त्रय इति त्रयादेशस्यापि आमितिप्रत्ययविशेषापेक्षत्वेन बहिरङ्गत्वादुभयोः तुल्यत्वेन परत्वात् तिस्रादेशे प्रसक्तस्य दीर्घस्य वारणाय न तिसृचतसृ इति निषेधस्य सार्थकतया कथं तस्य प्रागुक्तज्ञापकत्वमत आह वस्तुत इति । स्वरूपेणेति । यथा रुदादिभ्यः सार्वधातुके इत्यत्र सार्वधातुकत्वेन रूपेण गृहीतस्य सार्वधातुकस्य ज्ञानाय प्रकृतेर्धातुत्वज्ञानं प्रत्ययस्य प्रत्यत्वज्ञानं चावश्यकम् । यतः तिङ्शित् सार्वधातुकमिति धातोः विहितस्य तिङः शितश्च तत्संज्ञाविधानात् । तथा त्रेस्त्रय इत्यत्र आम्त्वज्ञानाय न कोऽपि सामान्यधर्मः अपेक्ष्यत इति न तस्य विशेषापेक्षत्वरूपबहिरङ्गत्वमिति भावः । रुदादिभ्यः सार्वधातुके इत्यादौ निरुक्तरीत्या सामान्यधर्मस्याप्यधिकस्य निमित्तत्वेनाश्रयणमस्ति । त्रेस्त्रय इत्यादौ आम्त्वज्ञानाय न तथा सामान्यधर्मस्य निमित्तत्वेनाश्रयणमित्यनयोः वैलक्षण्यमिति बोध्यम् । वस्तुतो विशेषापेक्षस्य बहिरङ्गत्वाभावेनान्तरङ्गत्वात् त्रयादेश इति प्रागुक्तरीत्या न तिसृचतसृ इति निषेधस्य ज्ञापकत्वं सुस्थमिति भावः । रुदधातौ निरूपयिष्याम इति । तत्र शेखरे 'सामान्यधर्मापेक्षशास्त्रापेक्षया कश्चिद्विशेषधर्मोऽधिकः निमित्तकोटौ यत्र विशेषापेक्षशास्त्रेऽस्ति तत्ततो बहिरङ्गमिति तदर्थः। रुदादित्वं सार्वधातुकत्वञ्च तथा, सार्वधातुकत्वज्ञानाय प्रकृतेर्धातुत्वज्ञानं प्रत्ययस्य प्रत्ययत्वज्ञानं चावश्यकमिति सामान्यधर्मनिमित्तकत्वमप्यत्रास्तीति बोध्यम् । वस्तुत इदं बहिरङ्गत्वं भाष्ये क्वापि नाश्रितमिति परिभाषावृत्तौ निरूपितम्' इति ।

अचिरादेशात् पूर्वविप्रतिषेधेन नुडिति वार्तिकमतं मूलकृदुक्तं व्याख्याय तद्दूषयितुं भाष्यसिद्धान्तं दर्शयति तृज्वदिति । इत्युक्तमिति । न तिस्रिति निषेधेन नुड्विषये

रादेशाप्रवृत्तिज्ञापनेनैव निर्वाहे पूर्वविप्रतिषेधकल्पनापर्यन्तानुधावनमनावश्यकमिति भावः। त्रिचतुरोर्विशेषणादिति । ननु प्रियाः त्रयः त्रीणि वा यस्याः सा प्रियत्रिः इति बहुव्रीहौ त्रिशब्दस्य तिस्रादेशः कुतो नेति चेदुच्यते । स्त्रियामिति त्रिचतुरोः विशेषणम् । प्रियत्रिशब्दस्य स्त्रीलिङ्गत्वेऽपि त्रिशब्दस्य तत्त्वाभावान्न तिस्रादेश इति भावः । ननु अजहत्स्वार्थावृत्तिपक्षे प्रियत्रिरित्यादौ त्रिशब्दस्य विशिष्टार्थबोधकत्वेन स्त्रियां वर्तमानतया तिस्राद्यापत्तिरत आह स्त्रीनिष्ठेति । प्रियत्रिरित्यादौ बहुव्रीहौ त्रिशब्दस्य स्वप्रवृत्तिनिमित्तभूतत्रित्ववत्संख्या-वाचकत्वेऽपि अन्यपदार्थस्त्रीनिष्ठसंख्यावाचकत्वाभावात् न तिस्राद्यापत्तिरिति भावः ।

नेहेति । पुँनपुंसकवृत्तित्वेऽपीति । प्रियाः त्रयः त्रीणि वा यस्या इति विग्रहे इत्यर्थः। अङ्गविशेषणत्वे इति । स्त्रियामित्यस्येत्यर्थः । आदेशः = तिस्राद्यादेशः । आमि त्विति । प्रियाः त्रयः त्रीणि वा यस्याःसा प्रियत्रिः । मतिशब्दवद्रूपाणि । आमि तु त्रेस्त्रयः इति त्रयादेशस्य आङ्गत्वेन तदन्तेऽपि प्रवृत्त्या प्रियत्रयाणामिति विशेषः। षष्ठीबहुवचनमेवेति । आमि सर्वनाम्नस्सुडिति सूत्रे आमः षष्ठीबहुवचनत्वेन त्रेस्त्रय इत्यत्रानुवृत्तस्य अर्थाधिकारानुरोधात् षष्ठीबहुवचनत्वमेवेति ङेरामित्यामो न ग्रहणमिति भावः । तत्र = त्रेस्त्रय इति सूत्रे ।

प्रियतिसेति । प्रियाः तिस्रः यस्य स इति विग्रहे स्त्रियामित्यस्य त्रिचतुरोर्विशेषणत्वेन प्रियत्रिशब्दस्य पुँलिङ्गत्वेऽपि त्रिशब्दस्य स्त्रीत्वात् तिस्रादेशः । अङ्गविशेषणत्वे तु अव्याप्तिः स्यादिति भावः । ननु प्रियाः तिस्रः यस्य स इति लौकिकविग्रहे प्रिया + जस्, त्रि + जस् इत्यलौकिकप्रक्रियावाक्ये पदद्वयापेक्षत्वेन बहिरङ्ग समासं बाधित्वा अन्तरङ्गत्वात् तिस्रादेशे समासे ऋदन्तप्रकृतिकसुबन्तोत्तरपदत्वात् नद्यृतश्चेति कबापत्तिरत आह अन्तरङ्गानपीति। अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते इति न्यायेन लुकः तत्प्रयोजकसमासस्य च प्राबल्यबोधनेन तिस्रादेशात् पूर्वं समासे विभक्तिलुकि, समासस्य प्रातिपदिकत्वात् ततस्सुपि त्रिचतुरोरित्यस्य आङ्गत्वात् तदन्तविधौ त्रिशब्दान्तात् प्रप्तावपि निर्दिश्यमानपरिभाषया त्रिशब्दस्य तिस्रादेशे पूर्वपदे स्त्रियाः पुंवदिति पुँवद्भावे समासार्थालौकिकवाक्ये ऋदन्तप्रकृतिकसुबन्तोत्तरपदत्वाभावात् नद्यृतश्चेति कप् तु नेति भावः । समासार्थालौकिक-वाक्ये इति । कृते बहुव्रीहौ तिस्रादेशे, विभक्तिनिरपेक्षत्वेनान्तरङ्गे कपि कर्तव्ये बहिरङ्गस्य तिस्रादेरसिद्धत्वेन न तत्र कपः प्रवृत्तिः । किन्तु अन्तरङ्गबहिरङ्गभावानाक्रान्ते अलौकिक-प्रक्रियावाक्ये ऋकारान्तोत्तरपदत्वे एवेति तदाशयः ।

प्रियतिसृणी इत्यादीति । प्रियाः तिस्रो यस्य तत् कुलं प्रियत्रि । स्वमोः लुका

लुप्तत्वेन न लुमतेति प्रत्ययलक्षणाभावात् विभक्तिपरकत्वाभावान्न तिस्रादेशः । न लुमतेति निषेधस्यानित्यत्वात् पक्षे प्रियतिसृ । पूर्वविप्रतिषेधेन रत्वं बाधित्वा नुमि प्रियतिसृणी प्रियतिसृणि । नन्वत्र नुमः परत्वात् तिस्रादेशे सकृद्गतिन्यायेन नुम् न स्यादत आह अत्रेति। ननु रादेशेन नुमो बाध इत्यत आह न तिसृ इतिं । न तिसृ इति निषेधेन पूर्वविप्रतिषेधेन रत्वं बाधित्वा नुमिति दीक्षितः । न तिसृ इति निषेधेन आगमविषये रादेशो नेति ज्ञाप्यत इति ग्रन्थकारः । ज्ञापकस्य सामान्यापेक्षत्वेन, बाध्यसामान्यचिन्तया रादेशस्य सर्वापवादत्वात् पुनः प्रसङ्गविज्ञानेन नुमः प्रवृत्तिः कथमिति शङ्का निरस्ता । ज्ञापकस्य सामान्यापेक्षत्वे मानमाह प्रत्ययोत्तरेति । एवञ्च रादेशस्यापवादत्वेऽपि न दोष इति भावः । इमौ = प्रियतिसृणी प्रियतिसृणि इत्येतौ ।

द्वेरत्वे इति । बहिरङ्गासिद्धत्वन्तु 'न यासयो'रिति निर्देशेनानित्यत्वान्न प्रवर्त्तते । विभक्ताविति । 'युवोरनाका'वित्यत्र भाष्ये पाठात् , ङ्याप्सूत्रे तत्परिभाषादोषेषु पाठाच्च । 'सख्यशिश्वी'ति ङीप् । 'यस्येति चे'तीकारलोपः ।

लक्ष्मीरिति । 'कृदिकारा'दिति ङीषि-लक्ष्मीत्यपि । स्त्यायतोऽस्यां शुक्रशोणिते इति स्त्री । स्त्यायतेर्ड्रट्, टिलोपयलोपौ, टित्वान्ङीप् । इयङिति । स्त्रीशब्दस्येकारान्तत्वादियङेवानुवर्तते इति भावः । गुणनेति । 'जसि चे'ति गुणः । 'आङो ना'अच्च घेः' 'ह्रस्वनद्याप'इत्येतैरित्यर्थः । बाध्यते इति । 'स्त्रीशब्दस्येयङ्' इत्यनेनान्वयः । नुम्- 'इकोची'ति । पूर्वकारिकोक्तैर्बाधे सति यत्फलितं तदाह-ओस्याविति । अजादौ य इयादेशो विहितः स उपसर्जने पुंसि विद्यमानस्य स्त्रियाः=स्त्रीशब्दस्यौसादिषु चतुर्ष्वेव, न त्वन्यत्र, गुणादिभिर्बाधादिति भावः । पुंवद्भावादिति । 'तृतीयादिषु भाषितपुंस्क'मित्यनेनेति भावः । ननु ह्रस्ववाक्येऽप्यस्त्रीत्यस्य सम्बन्धेन स्त्रीशब्दावयवभिन्नह्रस्वेवर्णान्तमित्यर्थेन कथमत्र प्राप्तिरत आह-अस्त्रीति । तत्र बीजमाह- तत्सम्बद्धस्यैवेति । प्रसज्यप्रतिषेधस्तु न, वाक्यभेदाद्यापत्तेः । नन्वियङुवङ्स्थानावित्यनेनापि ह्रस्वस्य निषेधः किं नेत्यत आह-दीर्घस्यायमिति । तत्र ह्रस्वपदाभावादिति भावः । श्रयन्त्येनामिति श्रीः । 'क्विब्वची'त्यादिना वागित्यत्रेव कर्मणि क्विब्दीर्घौ । अङ्यन्तत्वान्न सुलोपः ।

<u>**भावबोधिनी :**</u> अत्वे इतीति । त्यदाद्यत्वं टाब्विधेरित्यनित्योदाहरणपरिगणनेनात्र सन्निपातपरिभाषाप्रवृत्तिरिति बोध्यम् । बहिरङ्गसिद्धन्त्विति । टापि कर्तव्ये त्यदाद्यत्वतत्स्थानिकैकादेशस्याप्यसिद्धौ तदसङ्गतिः स्पष्टैव । बहिरङ्गतत्स्थानिकयो-रप्यन्तरङ्गे कर्तव्ये सिद्धत्वाङ्गीकारेण हि एतत् ज्ञापकोद्ग्रहणस्य स्वांशे चारितार्थ्यम् ।

अन्यथा पुगन्तलघूपधस्येत्यनेन गुणे कर्तव्ये संप्रसारणस्थानिकपूर्व-रूपस्यासिद्धत्वानापत्तेरिति भावः। ननु नेयङुवङित्यत्र अस्त्रीति प्रसज्यप्रतिषेधः। स्त्रीत्यस्य तदवयवे लक्षणया स्त्र्यवयवेकारान्तस्य न निषेध इत्यर्थः। तेन स्त्रीशब्दे परमस्त्रीशब्देपि न निषेधः। स्त्रीभिन्नावयवेकारोकारान्तस्य निषेध इत्यर्थस्तु न परमस्त्रीशब्दे निषेधापत्तेः। इत्थञ्च तत्सम्बन्धत्वाभावेन ङिति ह्रस्वश्चेत्यत्र वाक्यद्वयेपि सम्बन्धेन स्त्र्यवयवदीर्घेकारोकारान्तस्य स्त्र्यवयवह्रस्वेकारोकारान्तस्य च न विकल्प इत्यर्थेन ह्रस्वांशेपि निषेधो दुर्वार इत्यतआह प्रसज्येति। आपत्तेरिति। इत्थञ्च स्त्र्यवयवभिन्नेकारोकारान्तावित्येव नेयङित्यत्रार्थ इति तत्सम्बन्धत्वम्[illegible]येवेति न ह्रस्ववाक्ये सम्बन्ध इति भावः। इयङुवङ्स्थानावित्यनेनापि=तत्सम्बन्धास्[illegible]त्यनेनापि।

बालबोधिनी : द्वेरत्वे इति। द्विशब्दाद्विभक्तौ सत्यां त्यदाद्यत्वे अजाद्यतष्टाबित्यर्थः। ननु अन्तरङ्गे टापि कर्तव्ये विभक्तिसापेक्षत्वेन बहिरङ्गस्य त्यदाद्यत्वस्यासिद्धत्वेनादन्तत्वा-भावात् कथं टापः प्रवृत्तिरत आह बहिरङ्गेति। विभक्ताविति। सखिशब्दात् सख्यशिश्वीति भाषायामिति ङीषि यस्येति चेतीकारलोपे सखीशब्दः निष्पन्नः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् सखीशब्दस्य अनङ् सौ इत्यनङ्, सख्युरसंबुद्धाविति णिद्वद्-भावश्च कुतो नेति शङ्कायां विभक्तौ लिङ्गविशिष्टाग्रहणमिति समाहितम्। विभक्तिनिमित्तके कार्ये कर्तव्ये प्रातिपदिकग्रहणे लिङ्गविशिष्टस्य ग्रहणं नास्तीति तदर्थः। युवोरनाकौ इत्यत्र, ङ्याप्प्रातिपदिकादित्यत्र च भाष्ये इयं परिभाषा पठिता। तदाह भाष्ये पाठादिति। तत्परिभाषेति। लिङ्गविशिष्टपरिभाषेत्यर्थः। पाठाच्चेति। शक्तिलाङ्गल इति वार्तिके घटग्रहणेन सिद्धे घटघटीग्रहणेन लिङ्गविशिष्टपरिभाषाया अनित्यत्वज्ञापनात् तन्मूलिकैषा परिभाषा नापूर्वेति भावः।

लक्ष्मीरिति। लक्षेर्मुट् चेति लक्षधातोः ईप्रत्यये मुडागमे लक्ष्मीशब्दः। अङ्यन्त-त्वान्न सुलोपः। ङीषि तु विशेषमाह लक्ष्मीत्यपीति। हल्ङ्याबिति सुलोपः। ननु समस्तत्वात् स्त्रियाः इति सूत्रे कथमियङित्येकदेशानुवृत्तिरत आह स्त्रीशब्दस्येति। गुणनेति।

गुणनाभावौत्वनुड्भिः परत्वात् पुंसि बाध्यते।
क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम्॥

जस्, टा, ङे, ङसि, ङस्, आम्, ङि, इत्येतेषु अतिस्त्रीशब्दस्य इयङ् नेति श्लोकेन संगृह्यते। पुंसि गुणनाभावौत्वनुड्भिः, क्लीबे नुमा च परत्वात् स्त्रीशब्दस्य इयङ् बाध्यत

इत्यर्थः । जसि च इति घेर्ङिति चेति गुणः, आङो नास्त्रियामिति नात्वम् , अच्चघेः इत्यौत्वम्, ह्रस्वनद्याप इति नुट् , इकोऽचि विभक्ताविति नुम् । ओस्याविति ।

ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया ।
इयादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने ॥

उपसर्जनत्वदशायां पुंसि विद्यमानस्य स्त्रीशब्दस्य स्त्रियाः इति सूत्रविहितो य इयादेशः स ओसि = षष्ठीसप्तमीद्विवचने, औकारे = प्रथमाद्वितीयाद्विवचने च नित्यं स्यात् । अम्शसोस्तु विकल्पेन स्यात् । उक्तचतुर्भ्योऽन्यत्र अचि सर्वत्र इयादेशो न स्यादिति तदर्थः । नान्यत्रेत्यस्य बीजमाह गुणादिभिर्बाधादिति । पुंवद्भावादिति । स्त्रियमतिक्रान्तं कुलमतिस्त्रि । तस्य ङे, ङसि, ङस् , आम् , ङि, ओस् इत्येतेषु तृतीयादिषु भाषितपुंस्कमिति पुवद्भावपक्षे पुंलिङ्गातिस्त्रिशब्दवद्रूपम् । पुंवत्वाभावपक्षे नुमि वारिवद्रूपमिति भावः ।

स्त्रियमतिक्रान्ता अतिस्त्रिः । स्त्रियामतिस्त्रिशब्दस्य प्रायेण पुँलिङ्गातिस्त्रि-शब्दवद्रूपाणि । ङिति ह्रस्वश्चेति सूत्रस्थात् ह्रस्वाविवर्णोवर्णौ स्त्रियां नदीसंज्ञौ वा स्त इति द्वितीयवाक्यात् ङित्सु नदीत्वविकल्पः । ननु नेयङुवङ्स्थानावस्त्री इति सूत्रात् अस्त्रीत्यस्यानुवृत्त्या स्त्रीशब्दावयवभिन्नत्वाभावेन ह्रस्वश्चेति द्वितीयवाक्यात् कथं नदीत्वमिति शङ्कते नन्विति । स्त्रीशब्दावयवेति । स्त्रीशब्दस्य तदवयवे लक्षणेत्यर्थः । ह्रस्वेवर्णान्तमिति पाठः । पञ्चम्यन्तपाठस्तु लेखकप्रमादात् । समाधत्ते अस्त्रीति । ङिति ह्रस्वश्चेति सूत्रस्थवाक्यद्वये इयङुवङ्स्थानावित्यदिप्रथमवाक्यविहितनदीत्वस्यैव अस्त्रीति पर्युदासः, न तु ह्रस्वावित्यादिद्वितीयवाक्यविहितनदीत्वस्यापीत्यर्थः । तत्सम्बद्धेति । नेयङुवङ्स्थानावित्यतः अस्त्रीत्यस्यानुवृत्तिर्वक्तव्या । तथाच इयङुवङ्स्थानाविति यत्रान्वेति तत्रैव तत्सम्बद्धस्य अस्त्रीत्यस्यानुवृत्तिरुचितेति ह्रस्वश्चेति द्वितीयवाक्ये इयङुवङ्स्थानावित्यस्यानुवृत्त्यभावाद् अस्त्रीत्यस्यापि तत्र नानुवृत्तिरिति भावः । नेयङिति सूत्रे यू स्त्र्याख्याावित्यनुवर्तनात् इयङुवङ्स्थानाविति ईदूतोर्विशेषणम् । तेनेयङुवङ्स्थानौ ईदूतावेवास्त्रीति पर्युदस्तौ न तु ह्रस्वाविति बोध्यम् ।

नन्वस्त्रीत्यस्य प्रसज्यप्रतिषेधत्वे इयङुवङ्स्थानावित्येतत्सम्बद्धत्वमेव नास्तीति तदनुवृत्त्या ह्रस्ववाक्यप्राप्तस्यापि निषेधः स्यादेवेति कथं नदीत्वमिति शङ्कायामाह प्रसज्यप्रतिषेधस्त्विति । तदभावे बीजमाह वाक्यभेदादीति । आदिना असमर्थसमासः । ननु नेयङुवङ्स्थानावस्त्रीति ह्रस्वस्य निषेधः कुतो नेति शङ्कते नन्विति । दीर्घस्यायमिति । नेयङुवङिति निषेध इत्यर्थः । तत्र = नेयङुवङित्यत्र ।

श्रीरिति । क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं चेति क्विप् प्रकृतेः दीर्घश्च ।

नेयङु । ङद्वयोच्चारणं स्पष्टार्थम् । स्थानशब्दो भावल्युडन्तः । इयङुवङोः स्थानं स्थितिर्ययोरिति बहुव्रीहिः । सा च बाधकाविषये एव, तेन प्रकृष्टा धीः प्रधीः,- प्रद्ध्यै इत्यादौ न निषेधः । सा चोपलक्षणं-व्याख्यानात्, तेन 'हे श्री'रित्यादौ निषेधसिद्धिः, 'श्रिया'वित्यादौ तत्स्थितिसत्त्वात् । यत्र नदीकार्याश्रयेऽङ्गे बाधकाबाधितेयङादि-स्थितिः क्वचित् दृष्टा तस्य, तदवयवस्य च निषेध इति फलितम् । अत एव- प्रकृष्टा धीर्यस्याः, यस्य वा- 'प्रधी'रित्यत्रावयवधीशब्दस्य नदीत्वं भवत्येव । तदुक्तं भाष्ये - ''अवयव-स्त्रीविषयत्वात्सिद्ध'मिति चेत्-इयङुवङ्स्थानप्रतिषेधे यण्स्थानयोरपि य्वोः प्रतिषेधः प्राप्नोति, अवयवस्येयङुवङ्स्थानत्वात् आद्ध्यै-प्रद्ध्यै, 'सिद्धं त्वङ्गरूपग्रहणात्'यस्याङ्गस्येयुवौ भवतस्तस्येदं ग्रहणं, न चैतस्याङ्गस्येयङुवङौ भवतः-' इति । श्रियै इति । 'ङिति ह्रस्वश्चे'ति विकल्पः ।

<u>भावबोधिनी :</u> स्पष्टार्थमिति । तयोर्विधेयत्वाभावेन ङिच्चेत्यस्याप्रवृत्तेरिति भावः। यद्यपि इयुव् स्थानावित्युक्ते निमित्तकलोपोव्योरिति वारणाय उवङ् ङकार आवश्यकः तथापि एकसत्वेपि द्वयं नास्तीति प्रतीतिवत् एकस्य फलसत्वे उभयस्य फलाभावेन स्पष्टार्थताया वक्तुमशक्यत्वादिति बोध्यम्। वस्तुतस्तु उभयं निष्फलम् न च वस्य लोपापत्तिः। लोपोव्योरित्यत्र वकारप्रत्याख्यानात् । इयङुवङ्स्थितिश्च बाधकाविषय एव तादृशयणविषय एव संभवतीत्यर्थः। तेन= बाधकाबाधितेयङुवङस्थितिमत्वमित्यर्थेन। सा च बाधकाबाधितेयङुवङ्स्थितिश्च । तेन बाधकाबाधितेयङुवङ्स्थितिमत्वस्य उपलक्षणविधया निर्देशेन॥ सूत्राक्षरार्थस्तु ङिति ह्रस्वश्चेति सूत्रे इयङुवङ्स्थाना-वित्यनेनाङ्गाक्षेप इत्युक्तम् । स्त्र्याख्यावित्यस्य नित्यस्त्रीत्वार्थकस्य यू इत्यनेन क्लृप्तसम्बन्धत्वाच्चेत्यप्युक्तम् । यस्याङ्गस्य इयङुवङौ भवत इति भाष्यप्रामाण्यात् इयङुवङ्स्थानावित्येतदङ्गविशेषणम्। ततश्च बाधकाबाधितेयङुवङ्स्थितिमत्वोपलक्षितं यदङ्गं तदवयवौ स्त्र्यवयवभिन्नौ यौ ईदूतौ तदन्तौ यौ नित्यस्त्रीलिङ्गौ शब्दौ तावीदूतौ वा नदीसंज्ञकौ न स्त इति । तत्फलितमाह यत्र नदीकार्याश्रयेत्यादिना । अतएव बाधकाबाधितेत्युक्तार्थाङ्गीकारादेव। भाष्ये यूस्त्र्याख्याविति सूत्रभाष्ये । अवयवस्त्री-विषयत्वादित्यस्य बहुश्रेयसीत्यादीनामित्यादिः। सिद्धमिति चेत् प्रथमलिङ्गमित्यनेन सिद्धमिति चेत् । इयङुवङ्स्थानप्रतिषेधे क्रियमाणे इदंग्रहणमिति अत्रग्रहणमित्यर्थः।

इदमत्र बोध्यम् केवलधीशब्दे धियावित्यादौ स्वावयवादेशत्वसम्बन्धेन बाधकाबाधितेयङस्थितिमत्वोपलक्षिताङ्गत्वसत्वेन तस्य प्रधीशब्दघटकधीशब्दस्य चैकत्वेन तस्य च नित्यस्त्रीलिङ्गत्वेन नेयङिति निषेधो दुर्वारः। वारणप्रकारश्च विभावनीय इति ।

बालबोधिनी : नेयङुवङ् । तिष्ठतो ययोरिति स्थानौ अधिकरणे ल्युट् । इयङुवङोः स्थानाविति कर्तृषष्ठ्यन्तेन समासः । तथा व्याख्यानेऽरुचिं प्रदर्शयन्नाह स्थानशब्द इति । एवञ्च मूलोक्तार्थस्य भावल्युडन्तपरतया व्याख्यानेनैव साक्षात् सिद्धौ फलितार्थपरतया वर्णनमनावश्यकमिति सिद्धम् । बहुव्रीहिरिति । व्यधिकरणबहुव्रीहिरित्यर्थः । सा = इयङुवङोः स्थानं = स्थितिः । बाधकाविषये एवेति । स्थितिशब्दस्वारस्यादिति भावः । इयङुवङोरिति षष्ठ्यन्तस्य यू इत्येतद्विशेषणतयैवोपपत्तौ स्थानपदोपादानसामर्थ्यात् इयङुवङोः यत्र स्थितिस्तत्र प्रतिषेधः, यत्र त्वपवादेन बाधस्तत्र नेत्ययमर्थो लभ्यते । तत्प्रयोजनमाह तेनेति । स्थानपदोपदानसामर्थ्यात् तथाऽर्थलाभेनेत्यर्थः । न निषेध इति । प्रध्यै इत्यत्र एरनेकाच इति यणा इयङो बाधनात् , तस्य स्थितेरभावेन नेयङुवङिति नदीसंज्ञानिषेधो न भवतीति आण्नद्या इत्यदिकं सिध्यतीति भावः । एवञ्च स्थानग्रहणसामर्थ्येन बाधकाबाधितेयङादिस्थितिः ग्राह्येति सिद्धम् । यत्र इयङुवङौ निष्पद्येते तत्रैव नदीसंज्ञानिषेधः । यत्र त्वपवादेन बाध्येते तत्र न निषेध इति तदर्थः ।

स्थानग्रहणमियङादिस्थितेः उपलक्षणमित्याह सा चेति । व्याख्यानादिति । नेयङिति निषेधशास्त्रारम्भादित्यर्थः । उपलक्षणत्वेन इयङदिस्थितिः कुत्रचिददर्शनेऽपि यत्र कुत्रापि दृश्यते चेत् नेयङिति नदीसंज्ञानिषेधः प्रवर्तत एवेत्यर्थः सिध्यति । उपलक्षणमिति स्वीकारस्य फलमाह तेनेति । हे श्रीरिति । हे श्रीरित्यत्र इयङ्स्थितेरभावेऽपि श्रियावित्यादौ तत्स्थितिसत्वात् नदीसंज्ञानिषेधः सिध्यतीति भावः । स्थानग्रहणसामर्थ्येन बाधकाबाधितेयङादिस्थितेर्ग्रहणे, इयङादिस्थितेरुपलक्षणत्वे च फलितमर्थमाह यत्रेति । नदीकार्याश्रये इति । नदीसंज्ञाप्रयुक्तकार्यप्रवृत्तिप्रयोजकविभक्तिनिमित्तकलब्धाङ्गसंज्ञके इत्यर्थः । निरुक्तार्थस्वीकारस्य फलमाह अत एवेति । विभक्तिनिरूपिताङ्गस्य प्रधीशब्दस्य इयङादिस्थितेरदर्शनेन नदीसंज्ञानिषेधो न भवतीति भावः । दर्शितमर्थं प्रमाणयति तदुक्तमिति। यू स्त्याख्याविति सूत्रे इत्यर्थः ।

वामि। 'आमी'ति च्छेदः । प्रधीशब्दस्येति । प्रकृष्टं ध्यायतीत्यर्थकस्येत्यर्थः। वृत्तिकारादीनामिति । अयम्भावः- भाष्ये 'आद् ध्यै' 'प्रद् ध्यै' इत्यादावियङ्-

स्थानत्वान्निषेधमाशङ्क्य- 'यत्र नदीकार्याश्रयेऽङ्गे'-इत्युक्तरीत्या समाहितम् । तत्र न बहुव्रीहिः कबापत्तेः किन्तु प्रकृष्टं ध्यायतीत्याद्यर्थकं तत् । तत्र कैयटोक्तनित्यस्त्रीत्वाभावेन नदीत्वाप्राप्त्या भाष्यासङ्गतिः । अतः 'स्त्रीविषयावेव यौ यू नित्य'मित्यत्र भाष्ये एवकारो भिन्नक्रमः,नित्यमेव यौ स्त्रीविषयावित्यर्थः । 'नित्यमेवे'त्यस्य पदान्तरं विनापीत्यर्थः । खलपूकटप्रूग्रामणीत्यादीनां क्रियाशब्दतया पुंसि मुख्या वृत्तिः । पुंसः खल्वयमुचितो धर्मः, शक्तत्वाद्भयरहितत्वाच्च । अतस्तेषां न पदान्तरं विना स्त्रीवृत्तित्वम् । ध्यानादि तु स्त्रीपुंससाधारणमिति । अत्रारुचिबीजन्तु-सूत्रभाष्याद्यक्षरैरीदृशानित्यस्त्रीत्वालाभः, भाष्योदाहरणे बहुव्रीहिरेव । कप्तु न, ऋकारसाहचर्येण यस्य वृत्तेः प्राङ्नदीत्वं तदुत्तरपदके एव तत्प्रवृत्तेः । धीशब्दस्येयङ्स्थानत्वेन प्राङ्नदीत्वनिषेधात् । गतिपूर्वकत्वाद्यणपि सुलभः। ''- 'आद्ध्यै'इति चिन्त्येमेतत्, क्रियाशब्दत्वेन नित्यस्त्रीत्वाभावात्' -'' इति कैयटस्तु चिन्त्य एवेति दिक् । लक्ष्मीवदिति । 'स्त्रिया'मिति शेषः । पुंवद्रूपमिति । उक्तविग्रहे नित्यस्त्रीत्वाऽभावात्पुंसीव स्त्रियामप्यनदीत्वादिति भावः । प्रकृष्टा धीरिति विग्रहे इति । ईदृशपदघटितविग्रहे इत्यर्थः । तेन कर्मधारये बहुव्रीहौ च सर्वलिङ्गेऽपि मतद्वयेऽपि लक्ष्मीवत्। 'प्रथमलिङ्गग्रहणञ्चे'त्यवयवधीशब्दस्य नदीत्वात् 'नेयङि'ति निषेधस्योक्तरीत्या प्राप्त्यभावादिति भावः । विशेष इति । लक्ष्मीशब्दाऽपेक्षयेत्यर्थः । श्रीवदिति । 'स्त्रिया'मिति शेषः । विशिष्टस्यापीयङ्स्थानत्वेन ङिदामोर्विकल्पस्य, अन्यत्र निषेधस्य च प्राप्तेरिति भावः। पुंसि त्वीदृशबहुव्रीहावपि न नदीत्वम् । नेयङित्यवयवस्य निषेधात् समुदायस्याप्राप्तेश्च । पुँवदिति । सुष्ठु ध्यायतीति विग्रहे इति शेषः । तस्य नित्यस्त्रीत्वाभावेन पुँसीव स्त्रियामप्यनदीत्वादिति भावः । इति विग्रहे त्विति । ईदृशपदघटितविग्रहके स्त्रीलिङ्गबहुव्रीहौ, कर्मधारये चेत्यर्थः । तत्र बहुव्रीहाववयवस्य 'नेय'ङिति निषेधः, ङिति तु समुदायस्य विकल्प इति बोद्ध्यम् ।

भावबोधिनी : आमिति । अमि नदीकार्याभावादित्यर्थः । न बहुव्रीहिरिति । नापि प्रकृष्टा च सा धीश्चेति कर्मधारयः । तथा सति समुदायस्यैव नित्यस्त्रीत्वेन अवयवस्त्रीविषयत्वात् सिद्धमिति चेत्युपक्रमभाष्यासङ्गत्यापत्तेः । तत्र कैयटोक्तनित्यस्त्रीत्वसम्भवेन तत्र नित्यस्त्रीत्वाभावेनेत्युत्तरकैयटोक्तग्रन्थासङ्गतेश्च । कबिति। नद्यृतश्चेत्यनेन । भाष्ये इति । यौ तु नित्यस्त्रीविषयावेव तौ नित्यस्त्रीलिङ्गाविति स्त्र्याख्याविति पदस्यार्थकथनपरे भाष्ये इत्यर्थः। भिन्नक्रम इति । स्वाभिमतसिद्धये इति भावः । पुंस इत्यस्य यत इत्यादिः । अतः पुंसि मुख्य वृत्तिरित्यन्वयः । साधारणमिति

यो धर्मः स्त्रीपुंससाधारणः तद्धर्मावच्छिन्नवाचकस्य विशेष्यवाचकपदसमभि-व्याहारमन्तरापि स्त्रीबोधकत्वं संभवतीति भावः । कैयटस्त्विति । कैयटस्यायं भावः । भाष्योदाहरणे आध्यै इत्यादौ न कर्मधारयः उपक्रमभाष्यासङ्गतेः । यणनापत्तेश्च । नापि बहुव्रीहिः कबापत्तेः यणनापत्तेश्च । किन्तु आध्यायति प्रकृष्टं ध्यायतीत्येव विग्रहः। एवं सति स्वाभिमतनित्यस्त्रीत्वाभावात् तद्भाष्यं चिन्त्यमिति । चिन्त्य एवेति । बहुव्रीहिमङ्गीकृत्य कब्वारणेन यणश्च प्रतिपादनेनेति भावः । धीशब्दस्य ध्यानार्थत्वेन यणिति निरूपितं प्रागेव । शेष इति । वृत्तिकृता स्त्रियां वृत्तित्वं नित्यस्त्रीत्वमिति परिष्कारादिति भावः। प्रकृष्टं ध्यायतीत्यस्य पुंबोधतात्पर्यकत्वे तु वृत्तिमतेपि न नदीत्वमिति बोध्यम् । उक्तविग्रहे बहुव्रीहेरपि सङ्ग्रहायाह ईदृशेति । बहुव्रीहेरपि तद्घटितत्वादिति भावः। तेन वृत्तिद्वयसङ्ग्रहेण । सर्वलिङ्गेपीति । नपुंसके ह्रस्वान्तत्वेपि पाक्षिकपुंवद्भावेन क्लीबत्वप्रयुक्तकार्यनिवृत्या दीर्घान्तस्यापि संभवेन नदीत्वात् प्रध्यै इत्यादिरूपं भवत्येवेति भावः। प्रथमलिङ्गेति । अत्र चायं विवेकः कर्मधारये मतद्वयेपि यू स्त्र्याख्यावित्यनेन नदीत्वम् । वृत्तिमते स्त्रीलिङ्गबहुव्रीहौ उक्तसूत्रेण कैयटमते सर्वलिङ्गेपि प्रथमलिङ्गमित्यनेनेति मतद्वयसङ्कलनया यथाकथञ्चित् प्रधीशब्दस्य सर्वत्र नदीत्वमस्त्येव । प्रकृष्टं ध्यायति पुमानित्यर्थे तु मतद्वयेपि नदीत्वं नेति निर्गलितार्थः न विस्मर्तव्यः। शेष इति। वृत्तिकृता नित्यस्त्रीत्वपरिष्कारे स्त्रियां वृत्तित्वनिवेशादिति भावः। एतेन सुष्ठु ध्यायति कश्चनेत्यर्थे वृत्तिमतेपि न नदीत्वमिति सूचितम् । श्रीसादृश्यं निरूपयति विशिष्टस्येति । विकल्पस्य = ङिति ह्रस्वश्चेति नदीत्वविकल्पस्य = अन्यत्र। संबुद्धौ = निषेधस्य । नेयङुवङिति निषेधस्य । उक्तसूत्रयोर्मध्ये नेयङित्यत्र कैयटोक्त-नित्यस्त्रीत्वस्य ङिति ह्रस्वश्चेत्यत्र केवलस्त्रीत्वस्य निवेश इति शेखरकृन्मते सुष्ठु ध्यायतीत्युक्तविग्रहके शब्दे सम्बुद्धौ नेयङित्यस्यानवकाशः प्रतियोगिन एवाप्रवृत्तेः। ङिदामोस्तु विकल्पनदीत्वमस्त्येवेति बोध्यम् । पुंसि त्विति । वृत्तिमते कैयटमते चेत्यर्थः। बहुव्रीहेरपि सङ्ग्रहायाह ईदृशेति। स्त्रीलिङ्गबहुव्रीहाविति। अत्र च सुधीशब्दे सम्बुद्धौ प्रथमलिङ्गग्रहणञ्चेति प्राप्तनिषेधः ङिदामोरपि सर्वेषामपि विकल्प एव। एवं कर्मधारयसुधीशब्देपि सर्वेषां साम्यम् । तत्सकलमभिप्रेत्याह तत्र बहुव्रीहावित्यादिना ।

<u>**बालबोधिनी :**</u> वामि । द्वितीयैकवचने नदीकार्याभावात् अमीति न च्छेद इत्याशयेनाह आमीति । प्रधीशब्दस्येति । प्रकृष्टं ध्यायतीत्यर्थे इत्याशयः । प्रकृष्टा धीः इति विग्रहकस्य तु नित्यस्त्रीत्वात् लक्ष्मीवद्रूपमिति भावः । तदाह प्रकृष्टमिति । वृत्तिकारादीनामिति । पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति वृत्तिकारादीनां मतम् । प्रध्यायतीत्यर्थे

निष्पन्नस्य प्रधीशब्दस्य प्रकर्षेण ध्यातृत्वप्रवृत्तिनिमित्तकस्य लिङ्गत्रयसाधारणत्वेऽपि वृत्तिकारादिमतरीत्या पदान्तरं विनापि स्त्रियां वर्तमानत्वेन नदीत्वमिति भावः । तेषामाशयमाह अयं भावः इति । आध्यै इति । ब्राह्मण्याम् आधीशब्दस्य आध्यै इति रूपमास्थितं भाष्ये । क्रियाप्रवृत्तिनिमित्तकः सः लिङ्गत्रयसाधारणः । निषेध इति । नेयङिति नदीसंज्ञानिषेध इत्यर्थः । तत्र = प्रधीरित्यादौ । न बहुव्रीहिरिति । तत्र दोषमाह कबापत्तेरिति। नद्यृतश्चेति सूत्रेणेत्यर्थः । कैयटोक्तेति । तन्मते लिङ्गान्तरानभिधायकत्वं नित्यस्त्रीत्वम् । भाष्यासङ्गतिरिति । नद्यृतश्चेति कबापादनमसङ्गतं स्यादिति भावः । तेषाम् = खलपूकटप्रूग्रामणीत्यादीनाम् । पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति वदतां वृत्तिकारादीनां मतेऽस्वारस्यमाह अत्रेति । ईदृशनित्यस्त्रीत्वालाभ इति । स्वरसत इति शेषः । इदमुपलक्षणम् । प्रथमलिङ्गग्रहणं चेत्यस्य लुबन्तखरकुट्यै इति भाष्योक्त-फलासङ्गतेरपि । अन्यथा तस्य पदान्तरसमभिव्याहारं विना स्त्रियां वर्तमानत्वेन सूत्रेणैव सिध्या तदसङ्गतिरिति विषमादिषु स्पष्टम् । भाष्योदाहरणे = आध्यै, प्रध्यै इत्यत्र । बहुव्रीहिरिति । ध्यानं धीः । आ = प्रकृष्टा धीः यस्या इति विग्रह इति भावः । बहुव्रीहौ कप् कुतो नेत्यत आह ऋकारसाहचर्येणेति । प्रियाःतिस्रः यस्य सः प्रियतिसेत्यत्र समासार्थालौकिकवाक्ये ऋकारान्तोत्तरपदत्वाभावात् कपः न प्रवृत्तिः । विभक्ति-निरपेक्षत्वेनान्तरङ्गे कपि कर्तव्ये बहिरङ्गस्य तिस्रादेरसिद्धत्वेन अन्तरङ्गबहिरङ्गभावा-नाक्रान्तविषय एव कपः प्रवृत्त्या तदनाक्रान्तविषयश्चालौकिकवाक्ये ऋकारान्तोत्तरपदत्व एव सम्भवतीति प्रियतिसेत्यत्र न कपः प्राप्तिरिति ग्रन्थकृतोक्तम् । एवञ्च वृत्तेः प्राक् यः स्वतः ऋकारान्त इत्यर्थलाभेन तत्साहचर्यात् नद्यंशेऽपि तथात्वमिति भावः । धीशब्दस्येति। आधीः प्रधीरित्यत्रेत्यर्थः । प्रागिति । वृत्तेः प्रागित्यर्थः । गतिपूर्वकत्वादिति । गतिपूर्वेतरपदस्य यण् नेष्यत इति निषेधो न । प्रशब्दर्थस्य आङर्थस्य च धीशब्दोपात्त-धात्वर्थेऽन्वयेन तयोः गतित्वादिति भावः ।

कैयटवचनमनूद्य खण्डयति आद्ध्यै इति । चिन्त्य एवेति । भाष्योदाहरणे बहुव्रीहिरेवेति ग्रन्थकृतोक्तत्वेन नित्यस्त्रीत्वादिति भावः । लिङ्गान्तरानभिधायकत्वं नित्यस्त्रीत्वमिति कैयटः । अयं भावः । कुमारिमिच्छत्यात्मनः कुमारीयति । ततः कर्तरि क्विप् । कुमार्यै ब्राह्मणाय । खरकुटीवेतीवार्थे संज्ञायामिति कनो लुम्मनुष्य इति लुप् । खरकुट्यै ब्राह्मणाय । एवं तत्पुरुषे अतितन्त्र्यै ब्राह्मणायेत्यादौ नदीसंज्ञासम्पादनाय प्रथमलिङ्गग्रहणञ्चेति वक्तव्यमित्युक्तं वार्तिककृता । तदुत्तरम् अवयवस्त्रीविषयत्वात् सिद्धमित्युक्त्वा भाष्यकारः तत्प्रत्याख्यातवान् । कुमारीत्यादावपि विशेषणतया

नित्यस्त्रीलिङ्गरूपार्थबोधकत्वस्य सत्वेन नदीसंज्ञा भवतीति तदाशयः । प्राधान्येन तन्मात्र-बोधकत्वनिवेशे न मानम् । किन्तु विशेषणतया नित्यस्त्रीलिङ्गरूपार्थबोधकत्वमिति तत्रैवोद्योते नागेशः ।

ततो भाष्ये अवयवस्त्रीविषयत्वात् सिद्धमिति चेत् इयङुवङ्स्थानप्रतिषेधप्रसङ्गे यणूस्थानयोरपि य्वोः प्रतिषेधः प्रसज्येत । आध्यै ब्राह्मण्यै । किं कारणम् ? अवयवस्य इयङ्स्थानत्वादिति आक्षेपः कृतः । आध्यायतीति 'ध्यायतेः सम्प्रसारणं चे'ति क्विप् सम्प्रसारणञ्च । अत्रावयवो धीशब्द इयङ्स्थानः । समुदायस्य तु एरनेकाच इति यणा इयङ्स्थानत्वाभावः । एवञ्च समुदायस्येयङ्स्थानत्वाभावेऽपि अवयवस्य तत्त्वात् आध्यै इत्यादौ नेयङुवङिति नदीसंज्ञानिषेधः स्यादिति शङ्कितुराशयः ।

तदुत्तरं 'सिद्धं त्वङ्गरूपग्रहणाद् यस्याङ्गस्येयुवौ तत्प्रतिषेधात्' इति भाष्यकृता समाहितम् । अचि श्नुधात्वित्यनेन अङ्गस्येयङुवङ्विधानात् इयङुवङ्स्थानमङ्गमाक्षिप्यते। तेन यस्याङ्गस्येयङुवङौ निर्वर्त्येते तस्य नदीसंज्ञानिषेधः । आध्यै इत्यत्रावयवस्याङ्गत्वं नास्ति। अङ्गस्य तु एरनेकाच इति यण्विधानात् इयङुवङ्स्थानता नास्तीति निषेधाभाव इति तदर्थः।

आक्षेपवार्तिकव्याख्याने कैयटः आध्यायति, प्रध्यायतीति आधीप्रधीशब्दयोः क्रियाशब्दत्वात् त्रिलिङ्गत्वात् स्त्रीविषयौ न भवतः । यथा ग्रामणीसेनानीशब्दाविति नदीसंज्ञया न भाव्यमिति पूर्वापरव्याघातदर्शनात् चिन्त्यमेतदित्युक्तवान् । लिङ्गान्तरानभि-धायकत्वस्य नित्यस्त्रीत्वेन आध्यै प्रध्यै इत्यादौ तदभावात् चिन्त्योऽयं पूर्वपक्षग्रन्थ इति तदाशयः ।

प्रदीपोद्योते नागेशः 'आध्यायतीत्यादिविग्रह इत्यभिमानः । वस्तुतस्तु ध्यानं धीः। आ ईषत् प्रकृष्टा वा धीर्यस्या इति विग्रहः । एवञ्च गतिपूर्वत्वाद्यणपि सुलभः । अवयवस्येयङ्स्थानत्वमिति भाष्यं च रमणीयमेव । आध्यै इत्यादौ समुदायस्य नित्यस्त्रीत्वाभावात् नदीत्वाप्राप्तेरवयवस्य सा वाच्या सा च न प्राप्नोति तस्येयङ्स्थानत्वात्। वार्तिकारम्भे तु न दोषस्तेन हि नित्यस्त्रीत्वाभावेऽपि प्राक्तन नित्यस्त्रीत्वं गृहीत्वेदानीं सा प्रवर्तते । न चेदानीमसौ इयङ्स्थान इति निषेधाप्रवृत्तिः, प्राक्तनेयङ्स्थानत्वं गृहीत्वा निषेधस्य तु न प्रवृत्तिर्मानाभावादिति भाव इति व्याख्यातवान् । तेनेति । तथा व्याख्यानेनेत्यर्थः । कर्मधारये = प्रकृष्टा धीरित्यर्थे । बहुव्रीहाविति । प्रकृष्टा धीः यस्येत्यर्थे । मतद्वयेऽपि = वृत्तिकारस्य कैयटस्य च मते । लक्ष्मीवद्रूपे हेतुमाह प्रथमेति । उक्तरीत्या = नदीकार्याश्रये अङ्गे इत्युक्तरीत्या ।

विशेष इति । प्रध्यायतीति, प्रकृष्टा धीरिति विग्रहे च प्रधीशब्दात् अमि शसि च पूर्वरूपं पूर्वसवर्णदीर्घञ्च बाधित्वा एरनेकाच इति यणित्येतावान् विशेषो लक्ष्मीशब्दापेक्षयेति मूलग्रन्थस्याभिप्रायः । कस्माद्विशेष इत्याकाङ्क्षायामाह लक्ष्मीशब्दापेक्षयेति । श्रीवदिति। सुष्ठु धीर्यस्याः, सुष्ठु ध्यायति वेति विग्रहे स्त्रियामित्यर्थः । विशिष्टस्यापीयङ्स्थानत्वेनेति । न भूसुधियोरिति यण्निषेधात् विशिष्टस्यापि इयङ्स्थानत्वेन ङिति प्रत्यये ङिति ह्रस्वश्चेति, आमि वाऽऽमीति विकल्पः, अन्यत्र नेयङिति निषेध इति भावः । पुंवदिति । लिङ्गान्तरानभिधायकत्वं नित्यस्त्रीत्वमिति कैयटमते तु त्रिलिङ्गतया नदीत्वाभावात् पुंवत् रूपमित्यर्थः । इति विग्रहे इति । सुष्ठु धीः इति विग्रहे मतद्वयेऽपि नित्यस्त्रीलिङ्गत्वात् श्रीवदिति भावः । स्त्रीलिङ्गबहुव्रीहौ = सुष्ठु धीः यस्याः । विकल्प इति । सुष्ठु धीरिति कर्मधारये अवयवस्य नित्यस्त्रीत्वात् , अङ्गस्य स्त्रियां वृत्तेश्च ङिति ह्रस्वश्चेति विकल्प इत्यर्थः ।

स्त्रियाञ्च ।अत्र 'असम्बुद्धौ सर्वनामस्थाने' इति न सम्बद्ध्यते, आरम्भसामर्थ्यात्। ऋन्नेभ्य इति । तदन्तशब्दानां बहुत्वाद्बहुवचनम् । प्रातिपदिकविशेषणत्वात्तदन्तविधिः । 'स्त्रिया'मिति चाधिकारः । क्वासि हे सुभ्रु इति । रावणेन सीताऽपहारोत्तरं रामविलापोऽयम्। विधिना त्वया हापितस्त्याजितः सः-- 'हे सुभ्रु!क्वासि'इत्येवं बहु विललापेत्यर्थः । 'नेयङ्'इत्यनेनावयवस्य समुदायस्य च नदीत्वनिषेधात्प्रश्नः । प्रमाद इति । विरहपीडितत्वेनाऽनवधानलक्षणोऽत्र प्रमादः । स च विरहपोषकत्वात्काव्ये गुणः ।

<u>**भावबोधिनी :**</u> आरम्भसामर्थ्यादिति। न च सर्वनामस्थानसन्निपातमुपजीव्य तृज्वदिति तृज्वद्भावे कृते तद्विघातकङीपं प्रति अनिमित्तं स्यात् । प्रकृतसूत्रेण तृज्वद्भावविधाने तु ङीपं प्रति निमित्तं भवत्येवेति आरम्भस्य चरितार्थत्वेन सर्वनामस्थानाननुवृत्तौ न ज्ञापकमिति वाच्यम् । परिभाषाबाधकल्पनापेक्षया तदनुवृत्तावेव आरम्भस्य सार्थक्यकल्पनं युक्तमिति भावः। कवेः प्रमाद इत्यन्योक्तिं निरस्यति रावणेति। त्याजितः अहं त्वं क्वासीत्येवं रामःविललापेत्यन्वयः। अनवधानलक्षणः। अस्वास्थ्यलक्षणः। रामस्येति शेषः। पोषकत्वात् आधिक्यद्योतकत्वात् । गुण इति। रामोक्तशब्दानुवादेन कवेर्न प्रमाद इति भावः ।

137 <u>**बालबोधिनी :**</u> स्त्रियाञ्च । असर्वनामस्थानार्थमयमारम्भ इत्याह अत्रेति । अन्यथा तृज्वत् क्रोष्टुरित्यनेनैव सिद्धाविदं व्यर्थं स्यादिति भावः । तदन्तेति । ऋन्नान्तेत्यर्थः । सीतापहार इति । सीताया अपहार इति कर्मणः शेषत्वविवक्षया शेषषष्ठ्या समासः ।

प्रश्न इति । सुभ्रूशब्दे नदीकार्याप्राप्त्या कथं सम्बुद्धौ ह्रस्व इत्यक्षेपः । भट्टिकाव्ये षष्ठसर्गे एकादशं भट्टिपद्यम् । सुभ्रु इति प्रयोगः प्रमाद एवेति मूलग्रन्थः । अयं काव्यगुण इति शेखरकारः ।

एकाजुत्तर । एकोऽज्यस्मिन्, तादृशमुत्तरपदं यस्येति सूत्रे बहुव्रीहिगर्भो बहुव्रीहिः। 'उत्तरपदे' इत्यनेनास्य वाक्यस्य समासपदघटितवाक्यैकदेशत्वानुमानात्समासो विशेष्य इत्याह-तस्मिन्समासे इति । आरम्भेति । 'प्रातिपदिकान्ते'त्यनेन विकल्पेन णत्वे सिद्धे इत्यर्थः। पुनरिति । णग्रहणेऽनुवर्त्तमाने इत्यर्थः । यणमिति । 'दृन्करे'ति यणमित्यर्थः । भेकजाताविति । 'शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलि'रित्यमरादस्य बाह्वादित्वेन वा ङीषिति भावः। अन्ये त्वस्य गौरादिपाठान्नित्यमेव ङीष् । 'भेक्यां पुनर्नवायां स्त्री'ति यादवस्य 'सुतः पुत्रः स्त्रियान्त्वमी, आहुर्दुहितर'मितिवन्नित्यङ्यन्तत्वेऽप्युपपत्तेरित्याहुः । 'गौरादित्वकल्पने मानाभावादमरे 'वर्षाभूः कमठी डुलि'रित्येव पाठः- इति सुबोधिनीकार'इति माधवः' तदनुसारेण मूलं बोद्ध्यम् । टाप्ङीपौ न स्त इति । 'स्त्रियां यत्प्राप्नोति तन्ने'ति व्याख्यानादिति भावः । स्वस्रादिषु मातृशब्दस्य ननान्द्रादि-साहचर्यात्प्रसिद्धत्वाच्च ससम्बन्धिकजननीवाचकस्यैव ग्रहणम् । 'सन्निपातपरिभाषयैव तिसृचतस्रोर्ङीबभावे सिद्धे तदनित्यत्वज्ञापनार्थं तयोर्ग्रहण'-मिति केचित् । 'स्वस्रादिषु तिसृचतस्रोः पाठोऽनार्ष'इति कृन्मेजन्तसूत्रस्थभाष्यस्वरसः ।

इत्यजन्ताः स्त्रीलिङ्गाः

<u>भावबोधिनी :</u> अस्य वाक्यस्य घटितवाक्यन्तु एकाजुत्तरपदे समास इति बोध्यम्। मूले णग्रहणं स्पष्टार्थमिति । एतेन पुनर्णग्रहणसामर्थ्यात् नित्यत्ववादिनः परास्ताः । वा ङीषिति । भेके मण्डूकवर्षाभूश्शालूरेत्यमरेण पुंभेकवाचकवर्षाभूशब्दस्य शिलीगण्डूइत्यमरेण स्त्रीभेकवाचकवर्षाभ्वीशब्दस्य च उपलम्भेन स्त्रियां वर्षाभूशब्दस्य च उपलम्भेन स्त्रियां वर्षाभूशब्दसम्पत्तये वा ङीषित्यर्थः । अत्र च प्रमाणं यादवकोशः । तत्र स्त्रीभेक्या वर्षाभूशब्दस्याङ्गीकारात्। अत एवोक्तं भेकजातौ नित्यस्त्रीत्वाभावादिति। पुनर्नवायान्तु नित्यस्त्रीत्वमक्षतमेव। भावइति । मूलकृत इत्यर्थः । स्वमतमाह अन्ये त्विति ।

नन्वेवं यादवकोशविरोध इत्यतस्तस्यार्थमाह भेक्यामिति । सुत इति आत्मजस्तनयः सूनुरिति पूर्वभागः । अमी आत्मजादिशब्दाः स्त्रियां दुहितरं पुत्रीमाहुरित्यन्वयः । इतिवदिति । अमी आत्मजादिशब्दानां पुरुषव्यक्तौ स्त्रीव्यक्तौ च

शक्तिबोधनाय यथालाघवात् पुंलिङ्गत्वेन वर्षाभूशब्दस्य निर्देश इत्युपपत्तेरिति भावः । इत्येव पाठ इति यादवस्तु अनुकूल एवेति भावः । तदनुसारेण मूलमिति पूर्वं मूलकृद्भावस्योक्तत्वेन तदनुसारेण वा मूलमित्यर्थः । वाघटितपाठ एव साधुः। ननु टाबृचीति टाप एवाव्यवहितत्वेन तस्यैव निषेधो युक्त इत्यतआह स्त्रियामिति । षट्संज्ञकेषु स्वस्रादिषु च ङीपो निषेधात्पूर्वं टापः प्रसक्तिरेव नेति तन्निषेधे टापःप्रवृत्तौ सोप्युक्तव्याख्यानेन निषिध्यत इति भावः । अत्र प्रमाणम् अजाद्यतष्टाप्। ऋचि पादः अन्यतरस्यां ङीप् , ऋन्नेभ्यः, उगितश्च, वनो रच, न षट् स्वस्रादिभ्यः। एवञ्च सति एकं टाप्ग्रहणं न कर्तव्यमिति लाघवञ्चेत्येवं न्यासे कर्तव्ये विरुद्धन्यासकरणं स्त्रियामिति व्याख्यानेन परमपञ्चन् शब्दादौ डाबुभाभ्यामिति टापो निषेध इति अन्यदपीष्टं सङ्गृहीतं भवतीति भावः । जननीवाचकस्यैवेत्येवकारेण धान्यमातुर्व्यवच्छेदः। तस्य तु मात्रीत्येव सिद्धेति तिसृचतस्रोःविभक्तिसन्निपातनिमित्तकत्वादिति भावः ॥

इति शब्देन्दुशेखरव्याख्यायां भावबोधिन्याख्यायां अजन्तस्त्रीलिङ्गप्रकरणम् ॥

बालबोधिनी : एकाजुत्तरपदे णः । समासचरमावयवे रूढेन उत्तरपदशब्देन समास इति लभ्यते । स चान्यपदार्थ इत्याह उत्तरपदे इति । वाक्यैकदेशत्वानुमानादिति । एकाजुत्तरपदे समासे इति समासे गृहीता शक्तिः तदेकदेशे एकाजुत्तरपदेऽपि विश्राम्यतीति भावः ।

भेक्यां पुनर्नवायां स्त्री वर्षाभूर्ददुरे पुमान् इति यादवकोशात् वर्षाभूशब्दस्य बाह्वदित्वं कल्पयित्वा बाह्वादिभ्यश्चेति वा ङीषिति कल्पनमुचितमित्याह वा ङीषिति । मतान्तररीत्याहअन्ये त्विति । गौरादिपाठेन ङीषः नित्यत्वे वर्षाभूरिति यादवकोशस्योप-पत्तिमाह आहुरिति । अन्ये तु इति सूचितामरुचिं ध्वनयन् मूलतात्पर्यमाह गौरादिकल्पने इति । तदनुसारेण = माधवानुसारेण ।

ननु अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायेन ङीप एव निषेध उचित इति कथमुभयनिषेध इत्यत आह स्त्रियामिति । अन्यथा ऋन्नेभ्यो ङीबषट्स्वस्रादिभ्य इत्येकसूत्रं कृतं स्यादिति भावः । तदनित्येति । सन्निपातपरिभाषानित्यत्वेत्यर्थः । तयोः = स्वस्रादिषु तिसृचतस्रोः । केचित् = कौस्तुभकारादयः । तत्रारुचिमाह स्वस्रादिष्विति । कृन्मेजन्त-सूत्रस्थभाष्यप्रामाण्यात् तयोः स्वस्रादिपाठोऽप्रामाणिक इति सिध्यति । तत्र हि भाष्ये सन्निपातपरिभाषायाः, तिसृचतस्रोः ङीबभावं फलत्वेनोक्त्वा तदुत्तरं 'एतदपि नास्ति प्रयोजनम्, आचार्यप्रवृत्तिर्ज्ञापयति न तिसृचतसृभावे कृते ङीप् भवतीति । यदयं न

तिसृचतस्रिति नामीति दीर्घत्वस्य प्रतिषेधं शास्ति' इत्युक्तम् । यदि स्वस्रादिपाठः प्रामाणिकः स्यात्तर्हि तेनैव सिद्धौ ज्ञापकानुसरणं व्यर्थं स्यादिति भावः ।

इति शब्देन्दुशेखरव्याख्यायां बालबोधिन्याख्यायाम् अजन्तस्त्रीलिङ्गप्रकणम् ।

अथ अजन्तनपुँसकलिङ्गप्रकरणम्

अतोऽम्। 'अत' इत्येतत्-अधिकृतस्याङ्गस्य विशेषणम् । 'स्वमोर्नपुंसका'दिति चानुवर्तते । अम् लुग्बाधको 'येन नाप्राप्ते' इति न्यायात् । 'अम्' इति च्छेदो न तु 'म्-इति, 'ज्ञान'मित्यादौ 'सुपि चे'ति दीर्घापत्तेः। सन्निपातपरिभाषया दीर्घवारणे तु 'हे ज्ञाने'त्यादौ सम्बुद्धिलोपस्यानापत्तिः । मनिमित्तस्य प्रकृतिप्रत्ययसन्निपातस्य प्रत्ययलोपेन विनाशात् । अत एव 'एङ्ह्रस्वा'दिति सूत्रे 'ज्ञाने'त्यादौ मलोपाय, 'कतर'दित्यादौ लोपाभावाय चाङ्गाक्षेपव्यधिकरणान्वयहल्पदानुवृत्तय आस्थिता भाष्ये, न तु 'म्'-इति च्छेद उक्तः-इत्यलं भाष्यविरुद्धकल्पनयेति दिक् ।

<u>**भावबोधिनी :**</u> ननु अमोऽमादेशविधानं व्यर्थमतआह अमिति छेद इति । एतेन मात्रालाघवस्सूचितः। अमोऽकारस्य आदेः परस्येत्यादेशे संयोगान्तलोपे ज्ञानमिति रूपम्। न च यणः प्रत्याख्यानाय झल एव लोप इति सिद्धान्तात् कथमस्य लोप इति वाच्यम्। तत्र संयोगान्तलोप इत्येकं वाक्यम् । संयोगान्तस्य झलो लोप इति द्वितीयं वाक्यम् । पूर्वमसार्वत्रिकम् उत्तरं सार्वत्रिकमित्यङ्गीकारस्य गिरिवेडित्याद्यर्थमावश्यकत्वात् । इदञ्च संयोगान्तसूत्रे मनोरमायां स्पष्टम् ज्ञानमिति । इदञ्चापादनमुभयत्र बोध्यम् । सन्निपातेति । इयञ्च सामान्यतः सुपि चेति दीर्घविषये अनित्येति तु न यादेशः सुपि चेति दीर्घत्वस्येत्येव भाष्ये तदनित्यत्वपरिगणनादिति भावः । विनाशादिति । अमादेशविधाने तु न सन्निपातविरोधः । मस्य लोपेऽपि एकादेशस्य परादिवद्भावेन अमवयवस्य सत्वेन एङ्ह्रस्वादित्यस्य सन्निपातविघातकत्वाभावादिति भावः । वस्तुतस्तु मादेशेपि प्रत्ययलक्षणेन सन्निपातविघातकत्वाभावस्य समत्वेन इदमयुक्तम् । किञ्च परि-भाषायामातिदेशिकसन्निपातविघातकत्वाभावस्य अनङ्गीकाराच्चेत्यतआह अत एवेति । अमिति छेदादेवेत्यर्थः । न तु मिति । च्छेद उक्त इति । त्वद्रीत्यामिति छेदे ह्रस्वात्परस्य सम्बुद्धेर्लोप इत्युक्तेपि हे ज्ञानेत्यादौ ह्रस्वात्परसम्बुद्धिसत्वेन हे कतरदित्यादौ टिलोपेन ह्रस्वात्परसम्बुध्यभावेन चेष्टसिद्धौ अङ्गाक्षेपादीनां वैयर्थ्यं स्पष्टमेवेति भावः। भाष्यविरुद्धकल्पनयेति । एतेन मनोरमोक्तमयुक्तमिति भावः । भाष्यप्रामाण्याच्च अत्र विषये सन्निपातपरिभाषा नोपतिष्ठत इत्येव वक्तव्यमिति भावः ।

बालबोधिनी : अतोऽम् । अत इति पञ्चमी । तदनुरेधादनुवृत्तमङ्गस्येति पञ्चम्या विपरिणम्यते । अत इत्यङ्गविशेषणम् तदन्तविधिरित्याह अत इति । अमः स्वमोरिति लुग्बाधकतामाह येन नाप्राप्ते इति । येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायः । स्वमोर्नपुंसकादित्येतदप्राप्तियोग्ये चारितार्थ्याभावविशिष्टा कृते चारितार्थ्याभावविशिष्टा या स्वमोर्नपुंसकादित्येतत्प्रवृत्तिसंभावनाप्रयोज्याऽतोऽमिति शास्त्रवैयर्थ्यसम्भावना तद्रूपबाधबीजस्य अतोऽमित्यत्र सत्वादिति भावः ।

अतोऽमित्यत्र म् इति अमिति वा च्छेद इति संशये आह न तु म् इति । तथा छेदे दोषमाह ज्ञानमिति । दीर्घापत्तेरिति । कष्टाय क्रमणे इति निर्देशेन सुपि चेति दीर्घविषये सन्निपातपरिभाषाया अप्रवृत्तिकल्पनेन ज्ञान + म् इत्यत्र यञादिसुप्परत्वेन सुपि चेति दीर्घापत्तिरिति भावः । सन्निपातपरिभाषयेति । यदि कष्टायेति निर्देशेन चतुर्थ्येकवचने सन्निपातपरिभाषाया अप्रवृत्तिकल्पनेनान्यत्र तत्प्रवृत्त्या ज्ञानमित्यत्र सुपि चेति दीर्घापत्तिर्नेत्युच्यते तर्हि हे ज्ञान इत्यत्र सन्निपातपरिभाषाविरोधात् सम्बुद्धिलोपो न स्यादिति भावः । परिभाषाविरोधमाह मनिमित्तेति । मादेशनिमित्तेत्यर्थः । इदं चिन्त्यम् । सन्निपातपरिभाषाया उपजीव्यविरोधस्यान्याय्यमूलकत्वेन अतोमिति मादेशोपजीव्यस्यादन्तसन्निपातस्याविनाशेन प्रकृतपरिभाषाया अप्रवृत्तेः । प्रकृतिप्रत्ययसन्निपातं प्रयोगिणमादाय प्रकृतपरिभाषासञ्चारस्तु न, तस्य शैव इत्यादिसाधारण्येन अङ्गसंज्ञा तर्ह्यनिमित्तं स्यादिति भाष्यस्यैकदेश्युक्तित्वस्य वक्ष्यमाणत्वात् । भवतीत्यादाववादीनामप्यनापत्तौ दोषाः खल्वपि साकल्येनेति भाष्यासङ्गतेश्चेति विषमपदविवृतिकाराः । तन्न । बुद्धावित्यत्र टाब्वारणाय प्रकृतिप्रत्ययसन्निपातस्यापि परिभाषायां ग्रहणस्यावश्यकत्वात् । अत एव सन्निपातपरिभाषाव्याख्यानावसरे सर्वविधसन्निपातस्यापि ग्रहणमुक्तं ग्रन्थकृता । विशेषणविशेष्यभावरूपसन्निपातस्यापि परिभाषायां ग्रहणे 'वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्या'दिति कृन्मेजन्त इति सूत्रस्थं भाष्यं प्रमाणत्वेनोपन्यस्य तदुत्तरं पूर्वपरसन्निपातस्यैव परिभाषायां ग्रहणमित्याशयेन प्रवृत्तां न प्रत्ययः सन्निपातनिमित्तक इत्येकदेशिनः शङ्कामभ्युपेत्यैव प्रवृत्तस्याङ्गसंज्ञा तर्ह्यनिमित्तं स्यादिति भाष्यस्यैकदेश्युक्तित्वं ग्रन्थकृतोक्तमिति न तेन प्रकृतिप्रत्ययसन्निपातस्याग्रहणलाभः । वर्णाश्रय इत्यादिकात्यायनवचनस्य प्रत्ययसन्निपातप्रयुक्ताङ्गसंज्ञा प्रकृतिसंबन्धिवर्णनाशकं यस्येति लोपं प्रति निमित्तं न स्यादित्यशयकत्वे तस्य शैव इत्यादिसाधारण्येन प्रत्ययांशे वर्णाश्रयत्वविशेषणमनर्थकमित्येतादृशार्थापरिज्ञानेन प्रवृत्तत्वात् तद्भाष्यमेकदेशिन इत्याशयः । भवतीत्यादाववाद्यनापत्तिस्तु न, इतोऽन्यत्रेति भाष्यप्रयोगेण, एचोऽयवायाव इत्यादिसौत्रप्रयोगेण च सन्धिकार्यविषये

सन्निपातपरिभाषाया अप्रवृत्तेः । प्रकृतिप्रत्ययसन्निपातमनाश्रयद्भिः आचार्यैरपि एवंरीत्यैव तत्रावादेशः संपादनीयः । अन्यथा इगन्ताङ्गत्वमुपजीव्य प्रवृत्तस्य गुणस्य स्वातिरिक्त-तद्विघातकशास्त्रं प्रत्यनिमित्ततया तन्न स्यादित्यवधेयमिति गुरुप्रसादशेषव्याख्यातारः वेङ्कटेश्वरशास्त्रिपादाः ।

अन एव = औत्सर्गिकसन्निपातपरिभाषाप्रवृत्तेः दुर्वारत्वादेव । आस्थिता इति । न तु म् इति छेद इति । अन्यथा कष्टाय क्रमणे इति निर्देशेन सन्निपातपरिभाषाया अनित्यत्वात् तदप्रवृत्तिस्वीकारे म् इति छेदेऽपि दोषाभावेन लाघवात् तदाश्रयणेनेष्टसिद्धौ कतरदित्यादौ लोपाभावाय गुरुभूतकल्पनमसङ्गतं स्यादिति भावः । मनोरमाकाराः वस्तुतस्तु म् इत्येव पदच्छेदो लाघवात् । तत्र सोः म् कृते ज्ञानमिति सिद्धम् । द्वितीयैकवचने तु आदेः परस्य इत्यकारस्य मकारे कृतेऽन्त्यस्य मस्य संयोगान्तलोपे सिद्धमिष्टमित्याहुः । तच्च निरस्तमित्याह दिगिति । यद्यपि कष्टाय क्रमणे इति निर्देशेन सुपि चेति दीर्घेऽपि सन्निपातपरिभाषाया अनित्यत्वादप्रवृत्तिरिति लभ्यते तथापि अन्यत्रानित्यत्वे न मानमिति तात्पर्यम् । अत एव परिभाषेन्दुशेखरे यादेशः सुपि चेति दीर्घत्वस्येत्युक्तम् । वस्तुतस्तु एङ्ह्रस्वादिति सूत्रे हे कुल इत्यादेः साधनाय वैयधिकरण्येनान्वयरूपस्य प्रयासस्य भाष्ये कृतत्वेनास्मिन् पक्षे तस्य वैयर्थ्यापत्त्या म् इति छेदो भाष्यविरुद्ध इति बोध्यमिति मनोरमाशब्दरत्नव्याख्यातारः भैरवीकाराः । स्पष्टश्चायं विषयः शब्दरत्नभावप्रकाशयोः ।

'जसः शी' 'औङ आपः' इत्याभ्यां 'शी' 'औङ' इति चानुवर्त्तते तदाह-क्लीबादित्यादि । यस्येति च । इश्च अश्च यं, तस्येत्यर्थो व्याख्यानात् । भस्येत्यधिकारः, चेन 'नस्तद्धिते' इत्यतः 'तद्धिते' इत्यनुकृष्यते, तदाह-भस्येत्यादि । भस्येति किं? गर्गरूप्यम्। औङः श्यामिति । इत एव निर्देशादस्य नित्यस्त्रीत्वं बोद्ध्यम् । 'औङ' इति स्वरूपकथनं, 'सर्वे' इत्यस्य भाऽधिकारेण सिद्धेः ।

<u>भावबोधिनी :</u> व्याख्यानादिति सूर्यतिष्येत्युत्तरसूत्रे यग्रहणोपादान–मूलकादित्यर्थः। भस्येति किमिति । ईकारांशे रमेत्युक्तम् । भाधिकारेण सिद्धेरिति । भत्वाभावेन व्यावृत्तिसिद्धेरित्यर्थः ।

<u>बालबोधिनी :</u> नपुंसकाच्च । क्लीबात् परस्यौङः शी स्यादिति सूत्रार्थलाभप्रकारमाह अनुवर्तत इति ।

यस्येति च । इश्च अश्च तयोस्समाहारः यम् , तस्य , इवर्णस्य अवर्णस्य चेत्यर्थः ।

अत्र सूत्रे यस्येति यकारमात्रस्य ग्रहणं न । 'सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः' इत्युत्तरसूत्रे पुनर्यग्रहणादित्याह व्याख्यानादिति । पुनर्यग्रहणरूपाद् व्याख्यानादित्यर्थः । अन्यथाऽनुवृत्त्यैव तल्लाभे उत्तरसूत्रे यग्रहणं व्यर्थं स्यादिति भावः । गर्ग्यरूप्यमिति । गर्गेभ्य आगतम् । हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः । औङ : श्यामिति । औङ : श्यां प्रतिषेधो वाच्य इति यस्येति लोपप्रतिषेधकं वार्तिकम् । ननु औङ : श्यामिति शीत्यस्य शब्दस्वरूपपरत्वेन नपुंसकत्वात् कथं श्यामिति स्त्रीलिङ्गनिर्देश इति शङ्कायां विभक्तित्वापेक्षया श्यामिति स्त्रीलिङ्गनिर्देश इति मनोरमाकाराः । स्थानिवत्वेन शीगतविभक्तित्वाश्रयणेन विभक्ताविति विशेष्यापेक्षयेति तदर्थः तत्रारुचिं प्रदर्शयन्नाह इत एवेति । स्वरूपकथनमिति। न व्यावर्तकमिति शेषः । ननु सर्वे इत्यत्र जसः शी आदेशे तत्र प्राप्तस्य यस्येति लोपस्य व्यावृत्त्यर्थमौङ्ग्रहणमित्यत आह भाधिकारेणेति । तत्र भस्येत्यस्यानुवृत्त्या लोपस्य प्राप्तिरेव नेति भावः ।

जश्शसोः । शस्-अत्र सुबेव, व्याख्यानात् । नपुंसकस्य । 'इदितो नु' मित्यतो 'नु'मिति, 'सर्वनामस्थाने' इति चानुवर्त्तते, 'अङ्गस्ये'ति च प्रकृतं, तच्च झलज्भ्यां विशेष्यते। 'नपुंसकस्ये'ति गृह्यमाणस्याभावादङ्गस्यैव विशेषणम्, 'अस्थिदधी'त्यादौ तु गृह्यमाणस्यैव, प्रकरणाच्छ्रुतेर्बलवत्त्वात् । अत एव 'त्रिचतुरो'रित्यत्र 'स्त्रिया'मिति तयोरेव विशेषणमित्याकरः । उपधादीर्घ इति । 'सर्वनामस्थाने चासबुद्धौ'इत्यनेनेति भावः । शेषमिति कर्मणि घञ् । 'घञजपाः पुंसी'ति प्रायोवादः।

भावबोधिनी : गृह्यमाणस्यैवेति। अस्थिदधीत्यादिसूत्रे उपात्तविशेष्यसत्वादित्यर्थः। फलन्तु तत्सूत्रे स्फुटीभविष्यति । बलवत्वादिति॥

श्रुतिर्लिङ्गं समाख्या च वाक्यं प्रकरणं तथा ।
पूर्वं पूर्वं बलीयः स्यादेवमागमनिर्णयः ॥

इति न्यायादिति भावः । तयोरेव विशेषणमिति। फलन्तु तत्रैव सूत्रे उपपादितम् ।

बालबोधिनी : जश्शसोः । व्याख्यानादिति । जस्साहचर्यादिति भावः । नपुंसकस्य झलचः । बलवत्वादिति । श्रुतानुमितयोः श्रुतसंबन्धो बलीयानिति परिभाषा । प्रकरणादुपस्थितार्थापेक्षया श्रुतार्थस्य शीघ्रोपस्थितिकत्वेन बलवत्त्वमिति भावः । अत एव = प्रकरणात् श्रुतेर्बलवत्त्वादेव । तयोः = त्रिचतुरोः ।

शेषमिति । शेषं रामवदिति मूलम् । शिष्यत इति शेषमिति कर्मणि घञ् । भावे

घञि तु प्रकृतार्थासङ्गतिः । ननु शेषशब्दस्य घञन्तत्वे घञजपाः पुंसीत्यनुशासनात् नपुंसकत्वानुपपत्तिरत आह प्रायोवाद इति ।

अड्ड । द्ड्डेति पाठः । दस्य ष्टुत्वं, डस्य संयोगान्तलोपश्चाऽऽदेशस्वरूपभङ्गभिया न कृत इति कैयटः । 'पञ्चभ्य' इति-अधिकव्यवच्छेदाय, अस्य सर्वाद्यन्तर्गणत्वात् । परे तु 'डतरादिभ्य' इति विरुद्धविभक्तिपञ्चम्यन्तत्वादङ्गस्येत्यनेनान्वयानर्हमिति 'डतरादिभ्यो विहितयोः स्वमोरङ्गसञ्ज्ञानिमित्तयो'रित्यर्थ इति सर्वादिसूत्रे भाष्ये स्पष्टम् । एवञ्च 'परमकतरं कुल'मित्यादौ नाद्ड् । यत्तु कैयटेनार्थद्वारकं विधानमाश्रयितव्यं, तेन 'परमकतर' दित्युक्तम्, तन्न;तस्य यदि डतराद्यर्थगतसङ्ख्याभिधायिन इत्यर्थस्तदा पञ्चम्यन्तात्तादृशार्थ-प्रतीत्यसम्भवः; यदि षष्ठ्यर्थे पञ्चमी, तदा 'विरुद्धविभक्तित्वा'दिति भाष्यासङ्गतिः, विधानस्य सर्वथाऽनाश्रयणेनाऽर्थद्वारकं विधानमिति तद्ग्रन्थासङ्गतिश्च । न चैतदर्थे उपसर्जनप्रतिषेधारम्भो व्यर्थःस्यादिति वाच्यं, तत्प्रत्याख्यानायैवैतद्भाष्यप्रवृत्तेः । परमकतरादिव्यावृत्तये ऽवश्या-श्रयणीयविहितविशेषणेनैवातिकतरादिव्यावृत्तौ स व्यर्थ इति तदाशयः । 'त्यदादीनामः' इत्यत्र षष्ठ्यन्तत्वात्त्यदादीनामित्यर्थद्वारकं विभक्तिविशेषणम् । 'अस्थिदधि' इत्यादावङ्गं तथा तद्विशेषणं, व्याख्यानादित्यपि तत्रैव भाष्ये स्पष्टमित्याहुः ।

भावबोधिनी : विधानमिति । अर्थद्वारकं विधानमित्यस्य अर्थाद्विहितमित्यर्थः । तत्वञ्च अर्थगतसङ्ख्यभिधायकत्वरूपं गौणम् । इदञ्च षड्भ्यो लुगित्यत्र रत्नग्रन्थे स्पष्टम् । अस्ति च परमकतरशब्दे परमत्वाधिक्येपि कतरशब्दार्थत्वानपायात् उत्तरा-त्परत्वञ्चास्त्येव ।

बालबोधिनी : अद्ड्डतरादिभ्यः । अड्डतरादिभ्य इति पाठस्यासाङ्गत्यायाह पाठ इति । अत एवोक्तं प्रकृतसूत्रे भाष्ये द्विडकारको निर्देश इति । अत्र पाठे कैयटं प्रमाणयति दस्येति । दकारस्य ष्टुत्वं स्वरूपविनाशप्रसङ्गान्न कृतं नापि डकारस्य संयोगन्तलोप इति भाष्यप्रदीपे स्पष्टम् । सर्वादिषु अन्यड्डतरात् प्राक् पठित्वा अद्ड्न्यादिभ्य पञ्चभ्य इत्येव सूत्रयितुमुचितमिति विषम्यां स्पष्टम् ।

'अद्ड्डतरादिभ्यः पञ्चभ्य इति पञ्चमी । अङ्गस्येति षष्ठी । तत्राशक्यं विविभक्तित्वाड्डतरादिभ्य इति पञ्चम्याऽङ्गं विशेषयितुम् । तत्र किमन्यच्छक्यं विशेषयितुमन्यदतो विहितात् प्रत्ययात् । डतरादिभ्यो यो विहित इति ' इति सर्वादिसूत्रभाष्यस्य कैयटोत्प्रेक्षितमर्थं निराकरिष्यन् प्रथमतः सिद्धान्तार्थमाह परे त्विति । निरुक्तार्थस्वीकारस्य फलमाह परमकतरमिति ।

प्रागुक्तभाष्यस्य कैयटाशयमनूद्य खण्डयति यत्त्विति । अर्थद्वारकमिति । डतरादिभ्यो विहितो योऽर्थः तत्प्रतिपादकस्वमोरिति तदर्थः । तन्निरस्यति तन्नेति । डतरादिभ्यः परत्वेन कस्याप्यर्थस्य विधानासंभवात् अर्थद्वारकं विधानमिति कैयटवचनस्य यथाश्रुतार्थपरत्वं न सम्भवति । अन्यथाऽपि तदर्थं वक्तुं न शक्यत इत्याह तस्येति । कैयटस्येत्यर्थः । डतरादिभ्य इति पञ्चम्यन्तात् डतराद्यर्थगतसंख्याभिधायित्वरूपार्थप्रतीतिर्न संभवतीत्यर्थः । ननु डतरादिभ्य इति षष्ठ्यर्थे पञ्चमी । डतरादिसंबन्धिनोः स्वमोरित्यर्थो लभ्यते । तेन डतराद्यर्थगतसंख्याभिधायिनोः स्वमोरित्यर्थः फलतीत्यत आह यदीति । षष्ठ्यर्थे पञ्चम्यां विरोधमाह भाष्यासङ्गतिरिति । उभयत्र षष्ठ्यर्थत्वेन समानविभक्तित्वादिति भावः । किञ्च तथाऽङ्गीकारे कैयटग्रन्थासङ्गतिश्चेत्याह विधानस्येति । तद्ग्रन्थेति । कैयटग्रन्थेत्यर्थः ।

डतरादिभ्यो विहित इति भाष्यार्थे शङ्कते न चेति । एतदर्थे = डतरादिभ्यो विहितयोरित्यर्थे । व्यर्थः स्यादिति । विहितविशेषणेनैव अतिकतरमित्यादौ सर्वादिगणकार्यवारणसंभवे तदर्थमारब्ध उपसर्जनप्रतिषेधो व्यर्थः स्यादिति भावः । समाधत्ते तत्प्रत्याख्यानायैवेति । उपसर्जनप्रतिषेधो वक्तव्य इत्यस्य प्रत्याख्यानायैवेत्यर्थः। एतद्भाष्येति । डतरादिभ्यो विहित इति विहितपदाध्याहारेण संबन्धप्रतिपादनपरसर्वादिसूत्रभष्येत्यर्थः। परमकतरदिति । अनुपसर्जनस्थले इत्यर्थः । सः = उपसर्जनप्रतिषेधारम्भः ।

ननु उपसर्जनप्रतिषेधो वक्तव्य इत्यस्य प्रत्याख्याने त्यदादीनाम इत्यस्योपसर्जने प्रवृत्तिः स्यादित्यत आह त्यादीनाम इत्यत्रेति । अर्थद्वारकमिति । त्यदाद्यर्थगतसंख्याभिधायि विभक्तावित्यर्थ इति उपसर्जने प्रवृत्तिर्नेति भावः । तथा = अर्थद्वारकम् । तद्विशेषणम् । विभक्तिविशेषणम् । त्यदादीनाम इत्यत्र गृह्यमाणेन, अस्थिदधीत्यत्र अङ्गेन विभक्तेर्विशेष्यत्वे बीजमाह व्याख्यानादिति । लक्ष्यानुरोधादित्यर्थः । तत्रैव = सर्वादिसूत्रे एव ।

डित्वफलमाह - टेः । 'ति विंशते'रित्यतो 'डिती'ति वर्त्तते, 'भस्येति चाधिकृतम्। पञ्चम इति । डटो मटि भत्वाभाव इति भावः । अन्यतमस्येति । डतरादिष्वपाठादिति भावः। एकतरमिति । 'एकाच्च प्राचा'मिति डतरच् । एकतमस्य त्वेकतमदित्येव । परत्वादिति । 'नुमपेक्षये' ति शेषः । शब्दान्तरप्राप्त्या, झलन्ताजन्तलक्षणभेदाच्च नुमप्यनित्य इति भावः। के चित्तु शिभावात्परत्वाज्जरसि ततः शौ झलन्तत्वान्नुमित्यर्थमाहुः । अत्र यद्वक्तव्यं तन्निर्जरशब्दे उक्तम् ।

<u>**भावबोधिनी :**</u> डित्वफलमाहेति । अदित्येवास्त्विति तु न कतर अदित्यत्र

पूर्वसवर्णदीर्घापत्तेः तदुक्तं मूले टेर्लुप्तत्वादित्यादिना नभवतीत्यन्तेन । डटो मडिति डटि कार्यकालपक्षे यथोद्देशे अन्तरङ्गत्वान्मटि ततो मत्वं नेति भावः।।

नन्वेकस्यैव हि शब्दान्तरप्राप्त्या अनित्यमित्याह झलन्तेति । एवञ्च लक्षणभेदेनैव नित्यं नेति बोध्यम् । परत्वादिति । नित्यत्वमुभयोस्समं सन्निपातपरिभाषाविरोधाभावादिति भावः। उक्तमिति। स्वयमिति शेषः।

बालबोधिनी : अद्डो डित्करणस्य फलमाह टेरिति । भस्येति किम् ? पञ्चम इति। पञ्चानां पूरणः पञ्चमः । तस्य पूरणे डट् । नान्तादसंख्यादेर्मडिति डटो मडागमः । अन्यतमस्येति । अन्यतमशब्दस्य डतरादिष्वपाठात् अन्यतममित्येवेत्याह डतरादिष्विति। एकतरमिति । एकतरात् प्रतिषेधो वक्तव्य इति अद्डादेशप्रतिषेधः ।

अविद्यमाना जरा यस्य कुलस्य तत् अजरम् । जसि विशेषमाह परत्वादिति । विभक्त्यादेशेभ्यः परत्वाज्जरस् इति व्याख्यानमयुक्तमित्याशयेनाह नुमपेक्षयेति । नुमपीति। अपिना जरसिति भावः । विभक्त्यादेशेभ्यः परत्वाज्जरसिति मतानुसारेणाह केचित्त्विति । उभयमप्यसङ्गतमित्याह अत्रेति ।

सान्तमहतः । 'सान्ते'ति लुप्तषष्ठीकं पृथक्पदं 'संयोगस्ये'त्यनेन समानाधिकरणम्। 'नोपधायाः' 'सर्वनामस्थाने चासंबुद्धा'वित्यनुवर्त्तते, तदाह-सान्तसंयोगस्येत्यादि । उपधाग्रहणञ्च पूर्वत्वमात्रोपलक्षणं, पारिभाषिकार्थस्येहासम्भवात् । 'सर्वनामस्थाने' इति सान्तसंयोगस्य विशेषणम् । अत एव 'हंसशिरांसी'त्यादौ न दोषः । यद्वा 'अनन्त्यविकारेऽन्त्यसदेशस्ये'ति न दोषः । मांस्पचन्या इति । मांसस्य पचनीत्यर्थः । 'मांसस्य पचियुड्घञो' रित्यप्येतत्सिद्धार्थानुवाद एव । शब्दत्वेन च सादृश्यं, 'न लुमता' इत्यस्य च नित्यत्वमित्यभिमानः । वृत्ताविति । 'भाष्यस्वरसस्त्वननुवृत्ताविति भावः । मासश्छन्दसीति। मासस्तकारः स्याद्भादौ प्रत्यये छन्दसीत्यर्थः । 'माद्भिः शरद्भिर्दुरोदरं तवे'त्युदाहरणम् ।

भावबोधिनी : विशेषणमिति । अङ्गावयवो यः सान्तसंयोगः महच्छब्दावयवश्च यो नकारः तत्पूर्वस्य दीर्घः असम्बुद्धौ सर्वनामस्थाने इति सूत्रार्थः । न दोष इति । हंसशब्दे न दोष इत्यर्थः । अङ्गस्य प्रत्ययांशे उत्थिताकाङ्क्षत्वेन तत्रैव विशेषणं युक्तमित्यतआह यद्वेति अनन्त्यसदेशस्य अन्त्यसदेशस्य च विकारे अन्त्यसदेशस्येति परिभाषार्थः। अभिमान इति । अनित्यत्वेन भाष्योपपत्तेः नेदं प्रभृतिग्रहणं प्रकारार्थत्वे ज्ञापकमिति भावः।

बालबोधिनी : सान्तमहतः संयोगस्य । असंभवादिति । अत्र उपधाग्रहणं पूर्वत्वमात्रोपलक्षणम् । न तु पारिभाषिकम् । सान्तसंयोगावयवनकारस्यान्त्याल्त्वाभावेन तन्निरूपितोपधात्वासंभवादिति भावः । सान्तसंयोगस्य विशेषणमिति । सर्वनामस्थानपरो यस्सान्तसंयोगः तदवयवनकारपूर्वस्य दीर्घ इत्यर्थः । अत एव हंसशिरांसीत्यादौ हंसशब्दवयवाकारस्य दीर्घापत्तिर्न । सर्वनामस्थान इत्यस्यअङ्गविशेषणत्वे तु हंसशब्दावयवसान्तसंयोगमाश्रित्य हकाराकारस्य दीर्घः प्रसज्येतेति भावः । अत एव = सर्वनामस्थान इत्यस्य सान्तसंयोगविशेषणत्वादेव । प्रत्ययस्य अङ्गांशे उत्थिताकाङ्क्षत्वात् सर्वनामस्थाने इति तस्यैव विशेषणं न तु सान्तसंयोगस्येति चेदाह यद्वेति । अनन्त्येति । अन्त्यसदेशानन्त्यसदेशयोः एकप्रयोगे युगपत् प्राप्तावन्त्यसदेशस्यैवेति परिभाषाया अर्थः ।

पद्दन्नोमासिति सूत्रे प्रभृतिग्रहणस्य प्रकारार्थत्वे मूले भाष्यसम्मतिमाह अत एव भाष्ये मांस्पचन्या उखाया इत्युदाहृतमिति । पच्यते अस्यामुखायामिति पचनी । करणाधिकरणयोश्चेति ल्युट् । मांसस्य पचनी मांस्पचनी । शस्प्रभृतिष्वित्यत्र प्रत्यत्वेन सादृश्यग्रहणात् मांस्पचनीत्यत्र प्रत्ययलक्षणेन ङस्परत्वात् मांस् आदेशः । न च सोर्लुका लुप्तत्वेन न लुमतेति प्रत्ययलक्षणनिषेधात् कथं तत्परत्वमिति वाच्यम् । मांस्पचन्येति भाष्योदाहरणात् हृदाद्यादेशविधौ न लुमतेति निषेधस्यानित्यत्वमाश्रीयत इति भावः ।

मांसस्य पचीति । पृषोदरानि यथोपदिष्टम् । आकृतिगणोऽयम् । तेन -

लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि ।
समो वा हिततयोर्मांसस्य पचि युड्घञोः ॥

इत्यपि संगृह्यते । कृत्यान्ते उत्तरपदे अवश्यमः अन्तं लुम्पेत। अवश्यगन्तव्यः, अवश्यसेव्यः । तथा तुमः काममनसोः परतः अन्तं लुम्पेत् । गन्तुकामः, गन्तुमनाः । समो हिततयोः अन्तं वा लुम्पेत् । सहितः,संहितः। सततः, संततः । युट् घञ् च एतयोः परो यः पच् धातुः तस्मिन् परे मांसस्यान्तं लुम्पेत् । मांस्पचनी मांस्पाकः ।

ननु प्रागुक्तरीत्या न लुमतेति निषेधस्यानित्यत्वश्रयणेनैव प्रत्ययलक्षणेन मांस् आदेशे सिद्धे लुम्पेदवश्यम इत्यादिना मांसशब्दान्त्यस्य लोपविधानं निरर्थकं स्यादित्यत आह एतत्सिद्धार्थानुवाद इति । प्रभृतिग्रहणस्य प्रकारार्थत्वाश्रयणेन सिद्धो योऽर्थः तदनुवाद एव नापूर्व इत्यर्थः ।

केचित्तु शब्दत्वेन सादृश्यं, न लुमतेति निषेधस्य नित्यत्वञ्च वदन्ति । तन्निरस्यति

अभिमान इति । वृत्ताविति । पद्दन्नित्यत्र हि छन्दसीत्यनुवर्तितं वृत्तौ, तथापीत्यादि मूलम्। पद्दन्निति सूत्रे शीर्षन् छन्दसि इत्यतः छन्दसीत्यनुवर्तत इति वृत्तिकृतोक्तत्वेन वैदिके एव तेषां प्रयोग इति लभ्यते तथापि अपस्तकारः स्याद् भादौ प्रत्यये परे इत्यर्थके 'अपो भि' इति सूत्रस्थे मासश्छन्दसि (मास् इत्यस्य तकारः स्यात् भादिप्रत्यये परे छन्दसि) इति वार्तिके छन्दोग्रहणसामर्थ्यात् लाकोऽपि क्वचित् पदादीनां प्रयोगः । यदि पदादीनां छन्दोमात्रविषयत्वं स्यात्तर्हि मासश्छन्दसीति वार्तिके छन्दोग्रहणं व्यर्थं स्यादिति कैयटदीक्षितादयः । तत्रास्वारस्यमाह भाष्येति । पदादीनां प्रकृत्यन्तरत्वस्य पूर्वं सिद्धान्तितत्वेन लोकेऽपि तेषां प्रयोग इष्ट एवेति भावः ।

ह्रस्वो नपुंसके । क्लीबवदर्थे वर्त्तमानस्याऽजन्तस्येत्येव सामर्थ्यात्प्रातिपदिकलाभे 'प्रातिपदिकस्ये'त्येतत्सत्त्वप्रधानस्येत्यर्थकम् । तेन 'काण्डे' इत्यादौ अन्तवद्भावेन प्रातिपदिकत्वेऽपि न ह्रस्वः । विभक्त्यर्थस्य संसर्गत्वेऽपि प्रकृत्यर्थापेक्षया प्राधान्यमस्त्येव। 'प्रथमाया अपि अन्याभिहितशक्तिरर्थः' इति तत्रापि तत्संसर्गको बोध इति तस्याः प्राधान्यम्। 'काण्डे तिष्ठत' इत्यादावाख्यातार्थकर्त्तुः कर्तृक्रियाभावेन कियायामन्वये तदभिन्नप्रथमार्थस्यापि तेन सम्बन्धेनान्वयात्तस्य प्राधान्यम् । स्पष्टश्चेदं भाष्ये । ज्ञानवदिति। दीर्घान्तत्वप्रयुक्तो न कश्चिद्विशेष इति भावः । 'श्रीपाणी'त्यादौ 'एकाजुत्तरपदे'इति णत्वं भवत्येवेति बोद्ध्यम् ।

<u>**भावबोधिनी :**</u> सत्वप्रधानस्येति । लिङ्गाद्यन्वययोग्यार्थविशेष्यकबोधजनकस्येत्यर्थः । स्वमते विभक्त्यर्थस्य संसर्गत्वाङ्गीकारेण उक्तस्थले सत्वप्रधानकत्वमस्त्येवेत्यत आह विभक्त्यर्थस्य संसर्गत्वेपीति । प्राधान्यमिति । एतेन संसर्गस्य प्रकृत्यर्थं प्रति अप्राधान्यमुक्तम् भवति । काण्डे देवदत्तमित्यादौ अधिकरणतासम्बन्धेन काण्डविशिष्टो देवदत्त इति बोधे सति काण्डरूपसंसर्गताख्यविषयतानिरूपितप्रकारताश्रयत्वेन तं प्रति अप्राधान्यं स्पष्टमेव। एवञ्च प्रत्यासत्या ह्रस्वोद्देश्यकप्रातिपदिकबोधितार्थीय-विषयतानिरूपित प्रकारतानाश्रयक्लीबपदार्थे विद्यमानस्याजन्तप्रातिपदिकस्य ह्रस्व इति फलितम् । प्रकृते ह्रस्वोद्देश्यक प्रातिपदिकं काण्डे इत्येतत् । तद्बोधितसंसर्ग-रूपार्थीयविषतानिरूपितप्रकारताश्रयत्वात् काण्डस्य ह्रस्व इति भावः। नन्वेवं काण्ड औ काण्डे इत्यत्र पूर्वान्तत्वेन ह्रस्वो दुर्वार इत्याह प्रथमाया अपीति । अन्याभिहितेति तिङन्ताद्यभिहितेत्यर्थः । अभिहिते प्रथमेति वार्तिकेत्यर्थः । उक्तार्थमुपपादयति काण्ड इति । प्राधान्यमिति कर्तृक्रियाभावसम्बन्धेन कर्तृविशिष्टा स्थितिःकर्तृक्रियासम्बन्धेन

काण्डविशिष्टेति वा बोधे उक्तरीत्या प्रथमार्थसंसर्गीयविषयतानिरूपितप्रकारताश्रयत्वात् काण्डस्याप्राधान्यमेवेति भावः । ज्ञानवदित्युक्तेः । णत्वमपि नेति भ्रमवारणायाह णत्वं भवत्येवेति ।

बालबोधिनी : ह्रस्वो नपुंसके प्रातिपदिकस्य । क्लीबवदर्थे इति । नपुंसकशब्दस्य नपुंसकत्वविशिष्टोऽर्थः । सामर्थ्यात् = समर्थत्वात् । तेन = प्रातिपदिकग्रहणसामर्थ्येन सत्वप्रधानार्थकस्यैव ग्रहणमित्यर्थलाभेन । न ह्रस्व इति । विभक्त्यर्थाधिकरणशक्ति-प्रधानत्वादिति भावः । ननु सिद्धान्ते अधिकरणशक्तिरूपस्य तस्य संसर्गतयाऽन्वयात् सत्त्वप्राधान्यमस्त्येवेति दोषस्तदवस्थ एवेत्यत आह विभक्त्यर्थस्येति । सांसर्गिकविषयता-निरूपितप्रकारतायाः प्रकृत्यर्थे सत्वेन, प्रकृत्यर्थप्रकारकत्वमात्रेणैव विभक्त्यर्थस्य प्राधान्यमिति भावः । विशेष्यतानिरूपितत्ववत् सांसर्गिकविषयतानिरूपितत्वमपि प्रकारतायां स्वीक्रियत इति बोध्यम् । ननु सप्तम्यन्तस्थले काण्डे इत्यादौ निरुक्तरीत्या विभक्त्यर्थप्राधान्येन लिङ्गाद्यन्वय्यर्थबोधकाभावेन ह्रस्ववारणेऽपि काण्डे तिष्ठत इत्यादौ प्रथमान्ते प्रातिपदिकार्थस्य प्राधान्येन सत्वप्राधान्यात् कुतो न ह्रस्व इत्यत आह प्रथमाया इति ।

अभिहिते प्रथमेति सिद्धान्तवार्तिकानुरोधेनाह अन्याभिहितेति । तिङ्-कृत्तद्धितसमासैरभिहिते कर्त्रादौ प्रथमेत्यर्थकेनाभिहिते प्रथमेति वार्तिकेन कर्तृत्वादिशक्तीनां प्रथमावाच्यत्वं लभ्यत इति भावः । शक्तिः = कर्तृत्वादिशक्तिः । तत्रापि = प्रथमस्थलेऽपि। तत्संसर्गकः = कर्तृत्वादिशक्तिघटितसंसर्गकः । तस्याः = शक्तेः । प्राधान्यमिति । संसर्गस्य प्राधान्येन तद्घटकतयेत्यर्थः । प्रातिपदिकार्थे प्रथमेति यथान्यासेऽपि विभक्त्यर्थप्राधान्यमाह काण्डे तिष्ठत इति । एतच्च पूर्ववाक्येनापि सम्बध्यते । तदभिन्नेति । आख्यातार्थ-कर्त्रभिन्नेत्यर्थः । तेन सम्बन्धेन = कर्तृक्रियाभावेन । प्रथमार्थस्य = तत्प्रकृत्यर्थस्य । तस्य= प्रथमार्थस्य ।

ननु श्रीपं ज्ञानवदित्यनुपपन्नम् , श्रीपाणीत्यादौ एकाजुत्तरपदेति णत्वकृतविशेषस्य सत्वादत आह दीर्घान्तत्वप्रयुक्त इति ।

इकोऽचि । 'सुपी'ति वक्तव्ये विभक्ताविति चिन्त्यप्रयोजनम् । 'विभक्तौ किं ? मधुन इदं माधवम् । हे वारे हे वारीति । अत एव 'इकोऽची'तिसूत्रस्थम्-इह किञ्चित्रपो' इति, 'एङ्ह्रस्वादि' तिसूत्रस्थं- 'हे त्रपु' इति च भाष्यं सङ्गच्छते । वृद्ध्यौत्त्वेति । वृद्ध्यादीनां क्रमेण 'गावौ' 'हरौ,' 'क्रोष्टा' 'हरये' इत्यवकाशः, नुमो- 'वारिणी' इति ।

भावबोधिनी : चिन्त्यप्रयोजनमिति । नपुंसकइशब्दादाचारक्विपि लिटि अतुसि इ अतुसित्यत्र नुम्सिद्धये नुम् ग्रहणमावश्यकमिति तु न । एकाज्भ्योऽऽचारक्विपोऽनभिधानात्। न च वारिशब्दादाचारक्विबन्तणिजन्तात् कर्मणि आशीर्लिङि वारि इसीष्टेति स्थिते नुम् सिद्धये तदावश्यकमिति वाच्यम् । परत्वात् सार्वधातुकेति गुणप्रवृत्तेः। न च वृद्ध्यौत्वेति पूर्वविप्रतिषेधेन नुमेव स्यादिति वाच्यम् । तृज्वद्भावसाहचर्येण सुब्निमित्तकगुणस्यैव तत्र ग्रहणात् । केचित्तु प्रत्युत विभक्तावित्युक्ते इदम् शब्दादधुना प्रत्यये इदम् अधुना इत्यत्र नुमापत्या तत्प्रत्याख्यानमावश्यकमित्याहुः । तन्न सति च नुमि नस्तद्धित इति टिलोपेनेष्टसिद्धेः। यदि तु सन्निपातपरिभाषया न टिलोपः तदा तत् युक्तमिति भावः । अत एव न लुमतेति निषेधस्यानित्यत्वादेव । सूत्रस्थितमिति । तत्र ह्यज्ग्रहणं व्यर्थं भ्यामादौ नलोपेन सिद्धेः । न च सम्बुद्धौ न ङिसंबुध्योरिति सूत्रेण नस्य श्रवणापत्तिरिति वाच्यम् । लुका लुप्तत्वेन सम्बुद्धिपरकत्वाभावात् तर्हि उत्तरार्थमित्युक्त्वा इह करणस्य किञ्चित्प्रयोजनं वक्तव्यं हे त्रपो इत्युक्तम् । अयंभावः । इह व्यर्थं सत् न लुमतेत्यस्यानित्यत्वं ज्ञापयति इत्थञ्च सम्बुद्धौ प्रत्ययलक्षणेन नुमापत्या श्रवणं स्यादिति इह अज्ग्रहणं व्यर्थमित्युक्तम् । एवमपि पाक्षिकप्रवृत्तिर्नोक्तेत्यतआह एङ्ह्रस्वादिति ननु अज्ग्रहणं न ज्ञापकं वारिषुचर इत्यलुक् समासे नुमि तस्य लोपेपि रेफोत्तरेकारस्य संयोगे गुर्विति गुरुसंज्ञायां नलोपस्सुबिति नलोपासिध्या गुरुत्वेन वारिषुचर इत्यादौ गुरोरनृतइति रेफेकारस्य प्लुतार्थं तस्य चरितार्थत्वादिति चेन्न। ज्ञापकपरभाष्य–प्रामाण्येनास्यानभिधानात् । वृद्ध्यादीनामिति । वृद्ध्यौत्वेत्यादीनामित्यर्थः। न च वृद्धिग्रहणादेव औत्वस्यापि संग्रहणे पुनस्तद्ग्रहणं व्यर्थमिति शङ्क्यम् । तुल्ययुक्त्या गुणपदेनापि अतद्भावितस्यापि ग्रहणापत्या तानीत्यादौ त्यदादीनामित्यत्वात्पूर्वं झलन्तत्वात् नुमि पुनरत्वं न स्यात् । पुनरत्वेपि अनिष्टापत्तेः तदवस्थत्वात् । तस्माद्गुणपदेन तद्भावितस्यैव ग्रहणम् । तत्साहचर्यात् वृद्धिपदेपि तथैव युक्तम् ।

बालबोधिनी : इकोऽचि विभक्तौ । इकोऽचि सुपीत्येव सुवचमित्याह चिन्त्यप्रयोजन-मिति । माध्वमिति । इह नुमि सति टिलोपः स्यादिति भावः । न लुमतेति निषेधस्यानित्यत्वाद् पक्षे सम्बुद्धिनिमित्तो गुणः । हे वारे, हे वारि इति मूलोक्तार्थे भाष्य-सम्मतिमाह । अत एवेति । अनित्यस्य वचनस्य एकस्मिन्नेव लक्ष्ये पाक्षिकप्रवृत्तेरङ्गीकारादेव ।

तृतीयादिषु । भाषितः पुमान् येन शब्देनेत्यर्थे- पीलुशब्देऽतिप्रसङ्गस्तस्मात् 'भाषितः पुमान् यस्मिन् प्रवृत्तिनिमित्तरूपेऽर्थे' इति बहुव्रीहिः । भाषणक्रियया

स्वकरणतयाऽऽक्षिप्तशब्दश्च क्लीबेन समानानुपूर्वीकः, समानार्थश्च गृह्यते, प्रत्यासत्तेः । ततोऽर्शआद्यच्, तत्फलितमाह प्रवृत्तिनिमित्तैक्ये इति । 'इकोऽची'ति, 'नपुंसकस्ये'ति चानुवर्त्तते, ते च तत्र षष्ठ्यन्ते । अत्राऽर्थात्प्रथमान्ते । इक इति किं ? श्रीपेण । टादौ किम्? अनादिनी । अयञ्च ह्रस्वनुमोरभावातिदेशः, क्लीबत्वविशिष्टार्थवाचकस्य पुंस्त्वविशिष्टार्थ-वाचकरूपातिदेशे क्लीबत्वरूपार्थनिवृत्तेस्तत्प्रयुक्तसर्वकार्याप्रवृत्तेरित्यन्यत्र विस्तरः ।

भावबोधिनी : बहुव्रीहिरिति । यादृशप्रवृत्तिनिमित्तप्रयोज्यकिञ्चिच्छब्द-करणकबोधकर्मीभूतः पुमान् तादृशप्रवृत्तिनिमित्तवत्वं इगन्ते क्लीबे विवक्षणीयम् । एवञ्च पुंकर्मककिञ्चित्करणकबोधप्रयोजकप्रवृत्तिनिमित्तवदिगन्तं क्लीबमित्यर्थः । इगन्तक्लीबे तद्विशिष्टत्वञ्च तद्विशिष्टार्थवाचकत्वेन । प्रद्युशब्दे पुंवद्भाववारणायाह भाषणक्रिययेति । एवञ्च यस्य पुंवद्भाव अपेक्षितः तत्समानार्थकतत्समानानुपूर्व्यवच्छिन्न-शब्दकरणकपुंकर्मकबोधजनकप्रवृत्तिनिमित्त विशिष्ठार्थवाचकमिगन्तं क्लीबमित्यर्थपर्यव-सानेन प्रद्योशब्दे तादृशानुपूर्व्यभावेन प्रद्युशब्दस्य न पुंवत्वमिति भावः । न चैवं नपुंसकप्रधीशब्दस्य पुंलिङ्गप्रधीशब्देन समानानुपूर्व्यभावेन पुंवद्भावानापत्तेरिति वाच्यम्। इगन्तत्वेन सारूप्यात् समानानपूर्वीकेत्यस्यायं न्यासः अभावातिदेशक इत्यर्थः ।

बालबोधिनी : तृतीयादिषु भाषितपुस्कं पुंवद्गालवस्य । पीलुशब्देऽतिप्रसङ्ग इति। पीलुः वृक्षः, तत्फलं पीलु । अर्थभेदेऽपि शब्दैक्यमिति मते वृक्षफलवाचकयोरैक्यात् पीलुशब्देऽतिप्रसङ्ग इत्यर्थः । प्रवृत्तिनिमित्तभेदाच्छब्दभेद इति मते तु न दोष इति बोध्यम्। बहुव्रीहिरिति । अत्र पक्षे अर्थभेदाच्छब्दभेदमतेऽपि न दोष इत्याह भाषणक्रिययेति । ततः= भाषितपुंस्कशब्दात् । अर्शआद्यजिति । भाषितः पुमान् यस्मिन् तत् भाषितपुंस्कम्। तदस्यास्तीति अर्श आदित्वादच् । प्रवृत्तिनिमित्त इति ।यत् प्रवृत्तिनिमित्तं पुंस्त्वस्यान्वयितावच्छेदकं तदेव यत्र नपुंसकत्वस्यान्वयितावच्छेदकं भवति तद् भाषितपुंस्कमित्यर्थः । पीलुशब्दे च वृक्षत्वव्याप्यजातिरूपं पुंस्त्वस्यान्वयितावच्छेदकं, फलत्वव्याप्यजातिपरूपञ्च नपंसकत्वस्यान्वयितावच्छेदकमिति न तस्य भाषितपुंस्कत्वमिति भावः ।

ते = इक इति नपुंसकस्येति । तत्र = उक्तसूत्रद्वये । अत्र = प्रकृतसूत्रे । अर्थादिति। पुंवदित्यनेनान्वयानुरोधादित्यर्थः । पुंवद्भावेन ह्रस्वनुमोरभावातिदेश इत्याह अयञ्चेति अन्यत्र = उद्योते ।

अस्थिदधि । नकारादकार उच्चारणार्थः । अनङ उदात्तस्योच्चारणेन

सिद्धावुदात्तग्रहणम्- 'असति यत्ने उदात्तादिशब्दैरनुपात्तो गुणोऽविवक्षितः' इति ज्ञापनार्थम्। 'त्रिचतुरो'रिति सूत्रे 'तिसृचतस्त्रि'त्यत्र द्वन्द्वप्रयुक्तेऽन्तोदात्ते कर्त्तव्ये आद्युदात्तनिपातनं विवक्षार्थम् । निपातनं नाम अन्यादृशे प्रयोगे प्राप्तेऽन्यादृशप्रयोगकरणम् । वधादेशेऽपि हन्त्यनुरूपेऽन्तोदात्तेऽनुदात्ते वोच्चारणीये आद्युदात्तोच्चरणं विवक्षार्थम् । तदुक्तम् 'असति यत्ने' इति । परमास्थिशब्दादावन्तोदात्ते उदात्तगुणस्यापि स्थानित्वेनात्र तद्विवक्षायां न मानमिति भाष्ये स्पष्टम् । उदात्तत्वफलं 'दध्ने'त्यादावल्लोपे उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वं, 'दधनी'त्यादौ श्रवणञ्च । ज्ञापनफलन्तु तृन्तृजन्तानां भिन्नस्वरकान्तानाम् 'ऋदुशने'त्यनेन तत्स्वरकाऽनङ्सिद्धिरिति दिक् । तदन्तेति । आङ्गत्वादिति भावः । अत्रापि 'नपुंसकस्ये' ति सम्बद्ध्यते, तेन धात्र 'आदृगमहने'ति किप्रत्यये 'दधिने'त्यादौ न । एतच्च गृह्यमाणस्यैव विशेषणं, तेनातिदध्ना ब्राह्मणेनेत्यादि सिद्धम् । सुधियेति । शेभनज्ञानवत्त्वरूपैकप्रवृत्तिनिमित्तत्वात्पुंवत् । प्रधीशब्दे प्रकृष्टज्ञानवत्त्वमेकं तत् । मध्विति। मकरन्द मद्य माक्षिक वाचिनः पुं नपुंसकयोः सत्वात्पुंवत्त्वम् । मृद्वीकाविकारवाचिनो नित्यनपुंसकस्य तु न, स च 'माध्वीकं मधु न द्वयो'रित्यमरेणोक्तः । भाष्ये 'मधोस्तृप्ता' इत्यस्य लिङ्गव्यत्ययोदाहरणत्वन्तु 'माध्वीर्गावो भवन्तु नः' इति लिङ्गसिद्ध-क्षीरवाचिनपुंसकमधुशब्दाभिप्रायेणेति दिक् । स्नुर्वेति । 'मांस्पृत्स्नूनां पदादिषूपसङ्ख्यान'मिति वार्तिकेनेति भावः । पूर्वविप्रतिषेधेनेति । न च नित्यत्वादेव नुम्सिद्धेः किं पूर्वविप्रतिषेधेनेति वाच्यं, तदन्ते नुमि कृतेऽपि अङ्गाधिकारे तदन्तविधेः सत्त्वेन 'यदागमाः' इति न्यायेन नुम्विशिष्टस्य तद्ग्रहणेन ग्रहणात्सूत्रे षष्ठीनिर्देशाभावान्निर्दिश्यमानस्य नुमा व्यवधानमित्यस्याभावेन तृज्वत्त्वप्राप्तेः। सकृद्गतिन्यायान्न पुनस्तृज्वत्त्वम् । नन्वयं 'कृशक्रोष्टुने' इत्यस्यैव भाष्ये उदाहरणात्तृतीयादिष्वचीत्येतद्विषयक एव, अन्यथा प्रथमोपस्थितसर्वनामस्थानोदाहरणत्यागे बीजानापत्तिरिति चेन्न; उदाहरणस्य सङ्कोचकत्वे मानाभावात् । तदुक्तं 'न चोदाहणमादरणीय' मिति । 'उदाहृतातिरिक्तोदाहरणाभावः-' इत्येवम्परतया नादरणीयमिति तदर्थ इत्याहुः । सुल्वेति । अत्र शोभनलवनकर्त्तृत्वं प्रवृत्तिनिमित्तम् । पुंवत्त्वे ह्रस्वाभावेनाऽघित्वान्नाभावो न, नुमभावाच्च यण् । धातृ इति । अनङ् न, 'न लुमते' ति निषेधात् । धारणादिकर्त्तृत्वं चास्यैकं प्रवृत्तिनिमित्तम् । हे धातरिति। 'ह्रस्वस्य गुणः' इति गुणः ।

भावबोधिनी : अविवक्षित इति । सति यत्ने उदात्तादशब्दैरनुपात्तोपि विवक्षित एव । तदाह त्रिचतुरोरिति द्वन्द्वप्रयुक्तेइति । समासप्रयुक्ते इत्यर्थः । समासस्येत्य-न्तोदात्तविधानात् अन्यादृशे प्रयोगे प्राप्ते इत्यस्य लक्षणवशादित्यादिः। अनुदात्तेवेति।

सर्वानुदात्ते वा इत्यर्थः । लक्ष्ये क्वचित् हनधातोरन्तोदात्ततया क्वचित् सर्वानुदात्ततया श्रवणादिति भावः। एवञ्च विरुद्धस्वरकरणमेव यत्न इति भावः। तत्स्पष्टयति तदुक्तमिति। एतेन असति यत्ने गुणो न विवक्ष्यत इत्येव ज्ञाप्यांशः उदात्तादिशब्दैरनुपात्तो गुण इति दलन्तु स्पष्टप्रतिपत्तये। प्रकृते तु उदात्तादिशब्दोच्चारणस्यैव यत्नरूपत्वेन असति यत्ने गुणो न विवक्षित इति । एतावन्मात्रज्ञापनेपि इष्टसिद्धिरिति भावः। नब्विषयस्येत्यनेनास्थ्यादीनामाद्युदात्ततया तद्विरुद्धतया अनङः अन्तोदात्तकरणमेव यत्नो भविष्यतीति उदात्तग्रहणं ज्ञापनेपि व्यर्थमित्यत आह परमास्थीति । अत्रानङ् । एवञ्चोभयविधस्थानिसंभवेनानङोऽन्तोदात्तत्वं नान्तरीयकमेवेति यत्नरूपोदात्त-ग्रहणमावश्यकमेवेति भावः ।

नन्वेवमपि उदात्तग्रहणं व्यर्थम् । स्थान्यनुरूपगुणस्यैव यत्नत्वमिति तु न । तिसृचतस्रोः समासाननुगुणस्यापि स्वरस्य यत्नत्वाङ्गीकारात् । प्रकृते अनङः आद्युदात्तत्वमस्तु अनङः प्रातिपदिकत्वेन फिषोऽन्त उदात्त इत्यन्तोदात्तत्वे युक्ते तद्विरुद्धाद्युदात्तत्वस्य यत्नरूपत्वादिति चेन्न । अनङः प्रातिपदिकत्वेपि क्लीबत्वेन नब्विषयस्येत्यनेन फिट्स्वरबाधकेन आद्युदात्तत्वस्यैव युक्तत्वेन तस्य यत्नरूपत्वाभावात्। उदात्तनिवृत्तिस्वरेणेति । अनुदात्तस्य यत्र इति सूत्रविहितेनेत्यर्थः। यस्मिन्ननुदात्ते परे उदात्तो लुप्यते तस्यानुदात्तस्य उदात्तो भवतीत्यर्थः। अनुदात्तौ सुप्पिताविति विभक्त्याकारः पूर्वमनुदात्त इति भावः। दधिनेति। किकिनौ लिट्चेति द्वित्वे इदं रूपम्। गृह्यमाणस्यैवेति । प्रकरणश्रुतेः बलवत्वं प्रागुक्तम् । मृद्वीका द्राक्षाफलम् । दिगिति । केचित्तु मधुमद्ये पुष्परसेत्यमरेण मधुशब्दस्य नपुंसकत्वमेव कोशान्तरेष्वपि न क्वाप्यस्य पुलिङ्गत्वेनोपलब्धिः तस्मात्तस्य पुंवत्वमयुक्तम् ।

किञ्च भाष्ये त्वदुक्तमृद्वीकाविकारवाचकस्य मद्यादिवाचकमधुशब्दस्य वा लिङ्गव्यत्ययोदाहरणत्वं वक्तुं युक्तम्। क्षीरवाचकन्तु नास्त्येव न च गाव इति लिङ्गविरोधः। मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः इति प्रकरणे मधुमान् गीः अस्तु सूर्यः मधुद्यौरस्तु नः पिता इत्यादि तत्तत्पदसमभिव्याहारमित्याहुः। तृज्वद्भावोपि नित्य इति विप्रतिषेध आवश्यक इत्याह तदन्ते इति। क्रोष्टुशब्दान्तमङ्गं तृज्वद्रूपं लभत इत्यर्थेन प्रियक्रोष्टुस्थाने क्रोष्टुशब्दस्य प्रसङ्गापत्तिरिति वाच्यम् । तत्रापि शब्दस्वरूपाध्याहारेण तृजन्तान्त-वद्रूपमित्यर्थेन अर्थतआन्तर्येण प्रियक्रोष्टृ इत्यस्यैव प्रयोगात्। न चैवं केवलक्रोष्टुशब्दस्य

व्यपदेशिवद्भावेन तदन्ताङ्गत्वेन तत्स्थाने तृजन्तान्तस्य प्रयोगापत्तिरिति वाच्यम् । भाव्यमानोपि व्यपदेशिवद्भावेन अर्थत आन्तर्येण च केवलस्य प्रयोगसंभवादिति भावः। ननु नित्यत्वाङ्गीकारे उक्तयुक्त्या तृज्वद्भावापत्तिर्दुर्वारित्यत आह सकृदिति। एतद्विषय एवेति । वृद्ध्यात्वे इति । विप्रतिषेध इति शेषः। बीजानापत्तिरिति । बीजाभाव इति लेख उचितः ।

बालबोधिनी : अस्थिदधि । अनङ इति । नब्विषयस्यानिसन्तस्येति फिट्सूत्रेण अस्थ्यादय आद्युदात्ताः । असतीति । सति यत्ने उदात्तादिशब्दैरनुपात्तोऽपि विवक्ष्यत एवेति भावः । विवक्षाप्रयोजकयत्नविशेषस्थलमाह त्रिचतुरोरिति । चतसरि आद्युदात्तनिपातनमत्र यत्नविशेषः । त्रिचतुरोरिति स्थले चतुश्शब्दस्य द्वन्द्वसमासघटकत्वेन तत्प्रयुक्तेऽन्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थमिति भावः । असति यत्ने इति विशेषणस्यान्यत्रापि फलमाह वधादेशेऽपीति । स्थानिनो हन्तेः धातुस्वरेणान्तोदात्तत्वविधानात् अनुनासिक-लोपार्थमनुदात्तोपदेशत्वप्रतिज्ञानाच्च तदनुरूपे अन्तोदात्ते सर्वानुदात्ते वोच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थमिति भावः ।

नन्वेवमस्थ्यादीनाम् इसन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्तः स्यादित्यर्थकेन 'नब्विषयस्यानिसन्तस्य' इति फिट्सूत्रेणाद्युदात्ततया अन्तानुदात्तत्वेन, तदादेशस्यानङः आन्तरतम्यात् स्थान्यनुरूपतयाऽनुदात्त एवोच्चारणीये उदात्तोच्चारणं विवक्षार्थं भविष्यतीति ज्ञापनोत्तरमप्युदात्तग्रहणस्य स्वांशे चारितार्थ्यं नास्तीत्यत आह परमेति । अस्थिशब्दस्योक्त-रीत्याऽन्तानुदात्तत्वेऽपि परमास्थिशब्दस्य समासस्वरेण अन्तोदात्ततया, आदेशस्यानङः स्थान्यनुरूपतयोदात्तत्वेन तदुच्चारणं विवक्षार्थं न भविष्यतीति ज्ञापनोत्तरं स्वांशे चारितार्थ्यं सुस्थमेवेति भावः ।

अनङ उदात्तत्वफलमाह उदात्तत्वेति । दध्नेत्यादावल्लोपे अनुदात्तस्य च यत्रोदात्तलोप इति सूत्रविहितेन उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वं फलमिति बोध्यम् । लोपाभावपक्षे आह दधनीति । श्रवणं चेति । उदात्तत्वफलमित्यर्थः । भाषायां धाञ्कृसृगमिजनिनमिभ्य इति वार्तिकेन किप्रत्यये लिड्वद्भावे दधिरिति रूपम् । पुंसि दधिना, नपुंसके दध्ना । भिन्नस्वरकान्तानामिति । ञ्नित्यादिर्नित्यमिति सूत्रेण तृन्नन्तस्याद्युदात्तत्वम् , चित इति सूत्रेण तृजन्तस्यान्तोदात्तत्वमिति भावः । तत्स्वरकेति । भिन्नस्वरकेत्यर्थः । अस्थिदधीतिसूत्रस्थमुदात्तग्रहणम् असति यत्ने उदात्तादिशब्दैरनुपात्तो गुणो न विवक्ष्यत इति ज्ञापयति । तृन्नन्तस्याद्युदात्तत्वात् तृजन्तस्यान्तोदात्तत्वाच्च

भिन्नस्वरकान्तानां तेषाम् ऋदुशनेत्यनेनानङि भिन्नस्वरकानङ्सिद्धिः ज्ञापनफलं बोध्यम् । ऋदुशनेति सूत्रे अनङ् सौ इति सूत्रादनङिति अनुवर्तते । तत्रोदात्तादिशब्दैः कस्यापि गुणस्यानुपात्तत्वेनाविवक्षितत्वात् स्थान्यनुरोधेनैव तत्प्रवत्तिरिति भावः ।

अत्रापि = अस्थिदधीति सूत्रेऽपि । एतच्च = नपुंसकस्येति । गृह्यमाणस्यैवेति । शोभनज्ञानवत्त्वस्य प्रवृत्तिनिमित्तस्य पुंसि नपुंसके च एकत्वात् पुंवत्वविकल्प इति भावः । पुंवत्त्वमिति । मकरन्दादिवाचकस्योभयलिङ्गत्वे मधोस्तृप्ता इत्यस्य विनापि व्यत्ययमुपपत्तौ लिङ्गव्यत्ययस्योदाहरणत्वप्रदर्शनपरं भाष्यमसङ्गतं स्यादित्यत आह भाष्ये इति ।

पूर्वविप्रतिषेधेनेति । प्रियकोष्टुशब्दात् जश्शसोः शिभावे सति सर्वनामस्थानत्वात् नुमं बाधित्वा परत्वात् तृज्वत्वे प्राप्ते तृज्वद्भावात् पूर्वविप्रतिषेधेन नुमिति मूले उक्तम् । तत्र शङ्कते न चेति । तदन्ते = क्रोष्टुशब्दान्ते । नुमि कृतेऽपीति । अस्य तृज्वत्त्व-प्राप्तेरित्यनेनान्वयः । तत्प्राप्तौ हेतुमाह अङ्गाधिकार इति । तद्ग्रहणेन = क्रोष्टुशब्दान्त-ग्रहणेन । सूत्रे = तृज्वत्सूत्रे । स्थनषष्ठीनिर्देशाभावेन न निर्दिश्यमानस्येति परिभाषाप्रवृत्तिरिति भावः । नन्वेवं नित्यत्वात् नुमि कृते तृज्वत्वप्राप्तिरूपदोषः पूर्वविप्रतिषेधेऽपि तुल्य एवात आह सकृद्गतीति । पूर्वविप्रतिषेधारम्भसामर्थ्यादित्यर्थः ।

शङ्कते नन्विति । अयं पूर्वविप्रतिषेधः । तृतीयादीति । पूर्वविप्रतिषेधः विभाषा तृतीयादिष्वचीति सूत्रमात्रविषयक इत्यर्थः । अन्यथा = तृज्वद्भावमात्रविषयकत्वे । सङ्कोचकत्वे = पूर्वविप्रतिषेधस्य विभाषेति सूत्रमात्रविषयकत्वे । मानाभावादिति । तदेवाह तदुक्तमिति । ह्रस्वाभावेनेति । ह्रस्वो नपुंसकेत्यनेनेत्यर्थः । सुल्वा, सुलुना । प्रवृत्तिनिमित्तैक्यात् पुंवत्वविकल्पः । एवं धात्रा धातृणेति ।

एच इक् । 'आदेश' इति कर्मणि घञ् । ह्रस्वपदेन कर्मधारयः । निर्धारणे सप्तमी, सौत्रमेकवचनं, तदाह-आदिश्येत्यादि । 'मध्ये' इत्यपपाठः, तद्योगे षष्ठ्या एवौचित्यात् । एचां पूर्वभागोऽवर्णसदृशः, उत्तरस्तु इवर्णोवर्णसदृशः, तत्रोभयान्तरतमह्रस्वा-भावात्पर्यायेणावर्णादेः प्राप्ताववर्णाभावायेदं, तदाह इगेवेति । यथाप्राप्तमेव नियम्यते इति न यथासङ्ख्यम् । ह्रस्व एच्तु नास्त्येव, 'एओङ्' इत्यादौ दीर्घनिर्देशादिति स्पष्टं भाष्ये। न चार्द्धमात्राऽवर्णस्याऽद्ध्यर्द्धमात्रेवर्णोवर्णयोरिति उत्तरभूयस्त्वात्तत्सदृश इगेव भविष्यतीति नार्थः सूत्रेणेति वाच्यम्, 'अद्ध्यर्द्धमात्राऽवर्णस्याऽर्द्धमात्रेवर्णोयो' रित्यस्यापि पक्षस्य 'प्लुतावैच' इति सूत्रे विनिगमनाविरहेण भाष्ये उक्ततया समप्रविभागपक्षस्यैव भाष्यकृत्सम्म-तत्वादित्याहुः।

भावबोधिनी : कर्मधारय इति । ह्रस्वस्य पूर्वनिपातस्सौत्रः। सौत्रमेकवचनमिति । निर्धारणसप्तम्यादिप्रकृतेः उद्भूतावयवभेदविशिष्टसमुदायपरत्वेन बहुवचनस्यैव युक्तत्वादिति भावः । अपवाद इति । आदिश्यमानह्रस्वेषु इत्युक्तेपि आदिश्यमान ह्रस्वसमुदायघटकः इक् भवतीत्यर्थसंभवादिति भावः । बहुवचनादेव निर्धारणसप्तमीति सूचनसंभवादिति च भावः। षष्ठ्या एवेति । सम्बन्धसामान्यषष्ठ्या एवेत्यर्थः । अत एवाचां मध्ये इति पाठो न दूषितः। यथाप्राप्तमेव। सूत्रान्तरप्राप्तमेव । न यथासंख्यमिति । अपूर्वविधित्वाभावादिति भावः । ननु ह्रस्वैकारादीनां ह्रस्वो नपुंसक इत्यादिना प्राप्तौ अस्यारम्भेणापूर्वविधित्वं ह्रस्वादेश इति तु तत्सूत्रविषय एव इगिति बोधनद्वारा अतिप्रसङ्गवारणायास्तु एवञ्च यथासङ्ख्यं दुर्वारमतआह ह्रस्व इति ।

बालबोधिनी : एच इग्घ्रस्वादेशे । कर्मणि घञिति । आदिश्यत इत्यादेश इत्यर्थः । ह्रस्वादेश इति कर्मधारयः । अत एव निर्देशाद् विशेष्यस्य पूर्वनिपातः । आदेशे इति निर्धारणे सप्तमी । आदिश्यमानेष्वित्यर्थः । जातावेकवचनमिति तत्त्वबोधिनीकारादयः । तत्रारुचेराह सौत्रमिति । एच इग्घ्रस्वादेशे (1-1-48) इति सूत्रे भाष्ये एच इग्वचनं सवर्णाकारनिवृत्त्यर्थमिति सामान्यतः फलद्वयं वार्तिककृतोक्तम् । सवर्णनिवृत्त्यर्थं तावत् एङो ह्रस्वादेशशासनेषु अर्ध एकार अर्ध ओकारो वा मा भूदिति प्रथमं फलम् । अकारनिवृत्त्यर्थश्च । इमावैचौ समाहारवर्णौ मात्राऽवर्णस्य, मात्रेवर्णोवर्णयोः । तयोः ह्रस्वशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ । मा कदाचिदवर्णो भूदिति द्वितीयं फलम् । तत्र प्रथमं फलं तावत् सिद्धमेङः सस्थानत्वादिति वार्तिककृता प्रत्याख्यातम् । एङः सस्थानत्वादिकारोकारौ भविष्यतः । अर्ध एकारः, अर्ध ओकारो वा न भविष्यति । नैव लोके नान्यस्मिन् वेदे अर्ध एकारः, अर्ध ओकारे वास्तीति तदर्थः । एतत्सूचयन्नाह ह्रस्व एच्तु नास्त्येवेति । अकारनिवृत्त्यर्थमिति द्वितीयं फलम् । तदपि ऐचोश्चोत्तरभूयस्त्वादित्यादिना प्रत्याख्यातम् । एवं द्वितीयस्यापि फलस्य वार्तिककृता प्रत्याख्यानात् तदनुसारेण सूत्रमनावश्यकमिति शङ्कते न चेति । वस्तुतस्तु अकारनिवृत्त्यर्थं सूत्रमावश्यकमिति भाष्यकृत आशय इति समाधत्ते अद्ध्यर्थमात्रेति । प्लुतावैच इदुतौ (8-2-106) इति सूत्रे भाष्ये सिद्धं त्विदुतोर्दीर्घवचनात् । सिद्धमेतत् । यदि समः प्रविभागः मात्रावर्णस्य मात्रेवर्णोवर्णयोः । इत्युक्तम् । ततः अर्द्धमात्राऽवर्णस्य अद्ध्यर्थमात्रेवर्णोवर्णयोः। अथ ह्यध्यर्द्धमात्राऽवर्णस्य अर्धमात्रेवर्णोवर्णयोरिति पक्षद्वये विनिगमनाविरहेण समप्रविभागपक्ष एव भाष्यकृत्संमत इति ज्ञायते । एवञ्च तदनुसारेणाकारनिवृत्त्यर्थं सूत्रमावश्यकमिति फलति । भाष्यकारो वार्तिककारं पर्यनुयुङ्क्ते । ऐचोश्चोत्तरभूयस्त्वादिति

वदता वार्तिककारेण समप्रविभागत्वं नेष्टमिति भाव इति प्रदीपकारः । इति वदतेति । एवञ्च वार्तिककारस्य पूर्वापरविरोध इत्यर्थः । तत्रोत्तरस्य भूयस्त्वं पूर्वस्य वेत्यत्र विनिगमनाविरहस्य भाष्यकृतोक्ततया समप्रविभाग पक्ष एव भगवतो भाष्यकारस्य सम्मत इति बोध्यमिति प्रदीपोद्योतेस्पष्टम् । एवञ्च प्रकृतसूत्रप्रत्याख्यानपरम् ऐचोश्चोत्तर-भूयस्त्वादिति वार्तिकं प्लुतावैच इति सूत्रस्थेन सिद्धं त्विदुतोर्दीर्घवचनादिति वार्तिकेन विरुद्धत्वादुपेक्ष्यमिति भाष्यकृत आशय इति बोध्यम् । स्पष्टञ्च प्रदीपे तदेतमिति । भाष्यकारो वार्तिककारं पर्यनुयुङ्क्ते । ऐचोश्चोत्तरभूयस्त्वादिति वदता वार्तिककारेण समप्रविभागत्वं नेष्टमिति भाव इति ।

प्ररीणामिति । न च 'रायो हली'ति विषयसप्तमीति प्रागेवाऽऽत्वं ; निर्दिष्टपरिभाषाबाधे मानाभावात् । आत्वे कृते नुडनापत्त्या हलादिविषयाभावेन पूर्वमात्वाप्रवृत्तेश्च । केचित्तु-नुटो निमित्तस्य सन्निपातस्य दीर्घेण विनाशावश्यकत्वेन तद्विषये सन्निपात परिभाषाया विषय एव न । 'नामी'ति दीर्घस्तु 'सुपि चे'ति दीर्घं नित्यत्वाद्बाधते इति माधवाशयमाहुः । 'ग्रामणि कुल' मित्यादौ नपुंसकह्रस्वत्वे 'ह्रस्वस्य पिती'ति तुङ्न, समुदितप्रातिपदिकापेक्षह्रस्वस्य बहिरङ्गत्वेन वर्णमात्राश्रयेऽन्तरङ्गे तुकि असिद्धत्वात् । ये तु 'षत्वतुकोरसिद्धः' इति वचनात्, 'न लोप' इति सूत्रे कृतितुग्ग्रहणाच्च'ह्रस्वस्य पिती'ति सूत्रेऽन्तरङ्गपरिभाषाया अप्रवृत्तिं वदन्ति, तेषामुपजीव्यविरोधान्न तुक्, अजन्तत्वमुपजीव्य ह्रस्वप्रवृत्तेः । न चैवं सन्निपातपरिभाषा व्यर्था, तस्या अप्युपजीव्यविरोधमूलकत्वात्। किञ्च तस्या अपि स एवार्थः, अत एव सन्निपातपरिभाषादोषनिरूपणावसरे 'वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्या'दित्युक्तम् । न च 'न प्रत्ययः सन्निपातलक्षणः,अङ्गसञ्ज्ञा तर्ह्यनिमित्तं स्या'दित्यग्रिमभाष्यविरोध इति वाच्यं, तस्यैकदेश्युक्तित्वात् ।अन्यथा 'शैव' इत्यादावपि सा लोपनिमित्तं न स्यादित्यन्यत्र निरूपितम् । 'ग्रामणिपुत्रो' 'ग्रमणि कुल' मित्यादौ पूर्वोत्तरपदनिमित्ते ह्रस्वे बहिरङ्गपरिभाषयापि तुग्वारणं सिद्ध्यतीत्याशयेन 'कृन्मेजन्तः' इति सूत्रे 'ह्रस्वस्य पिती'त्यादौ तदुपन्यास एकदेशिन इति न तद्विरोध इत्यलम् ।

॥ इत्यजन्तनपुंसकलिङ्गाः ॥

<u>भावबोधिनी :</u> नुड्नापत्त्येत्यादि । यद्यपि पञ्चमीसमासेनात्वस्य स्थानिवत्वेन नुड्भावः सिध्यति तथापि सोऽनित्य इतिभावः। विषयत्वाभावेनेति । भावितदुच्चारणसत्ताकत्वरूपविषयत्वाभावेनेत्यर्थः । तद्विषये नुट्सन्निपातविनाशविषये विषय एव नेति । नामिदीर्घेण सामान्यतो ज्ञाप्यत इति भावः। ननु सामान्यज्ञापनेन

रामाणामित्यादौ परत्वात्सुपि चेति दीर्घ एवोदाहर्तव्यः कथं नामिदीर्घ इत्यत आह नामीति। वस्तुतःप्राणामित्येव युक्तम्। मूलोक्तरीत्या नामीति दीर्घोत्तरम् आत्वस्य निर्बाधत्वात्। प्रसङ्गात् शास्त्रार्थमाह ग्रामणीति । पृथक् पदम् । समुदित प्रातिपदिकेति । क्विबन्तरूपप्रातिपदिकापेक्षइत्यर्थः। तुक् तु तद्घटकेकारक्विप्तन्मात्रनिमित्तकत्वेनान्तरङ्ग इति भावः । यद्यपि प्रत्ययग्रहणपरिभाषोपस्थितौ पित् कृत् यस्माद्विहितः तदादेःह्रस्वान्तस्य तुगित्यर्थेन तुगपि क्विबन्तापेक्ष इति उभयोः साम्यमेव तथापि प्रत्ययग्रहण इत्यनियामकत्वपक्षेऽत्र नोपस्थितिः अनियमाभावात्। परिभाषाया अनियमे नियमकारित्वादिति भावः। असिद्धवचनादिति । अधीत्य प्रेत्य इत्यादौ अन्तरङ्गे तुकि एकादेशस्य पदद्वयसम्बन्धिवर्णद्वयाश्रितत्वेन बहिरङ्गत्वादसिद्धत्वेन कृद्विधानस्य वैयर्थ्यम्। कृतितुग्ग्रहणाच्चेति । वृत्तहभ्यामित्यादौ अन्तरङ्गतुक्दृष्ट्या बहिर्भूतभ्याम्निमित्तक नलोपासिद्ध्या तद्वैयर्थ्यम् । अप्रवृत्तिमिति । नाजानन्तर्यमिति परिभाषाज्ञापनेन वा तुग्विषये अन्तरङ्गपरिभाषा नेति विशेषापेक्षज्ञापकेन वा अप्रवृत्तिमित्यर्थः ।

ननु विशेषणविशेष्यभावात्मकसन्निपातविषये पौर्वापर्यात्मकसन्निपातविषये च उपजीव्यविरोधन्यायः सञ्चारयितुं शक्यः परिभाषा तु पौर्वापर्यात्मकसन्निपातविषय एवेति सोपि न्याय आवश्यकः इत्याशङ्कायामाह किञ्चेति । स एवार्थ इति । उपजीव्य-विरोधार्थ एवेत्यर्थः। एवञ्चोभयोरैक्यप्रतिपादनेन परिभाषस्थसन्निपातपदेन विशेषणविशेष्यभावसम्बन्धोपि गृह्यत इति भावः। तत्र भाष्यं प्रमाणयति अत एवेति परिभाषास्थसन्निपातपदेन विशेषणविशेष्यभावसंबन्धस्यापि ग्रहणादेवेत्यर्थः। वर्णाश्रयः अत इञ्। विचालस्य लोपस्य। अत्पदं तत्वमुपजीव्य प्रवत्ते इञ्प्रत्ययस्यानिमित्तत्व-प्रतिपादनेन विशेषणविशेष्यभावसम्बन्धोपि गृह्यत इति सूचितम् । न सन्निपातलक्षणः। न पौर्वापर्यात्मकसन्निपातलक्षणः। शैव इति शिवादित्वादण् प्रत्ययः। निरूपितमिति। अङ्गसंज्ञायाः स्वनिमित्तसन्निपातविघातकं प्रति अनित्यत्वस्वीकारे यस्येतिचेति शास्त्रस्यैव मूकतापत्या तन्नैव स्वीकर्तव्यमिति तद्भाष्यमेकदेशिन एवेति भावः ।

न च परिभाषाया अनित्यत्वात् शैव इत्यादि निर्वाहः । अनित्यत्वपरिगणनावसरे दाक्षिरित्यादीनामेव परिगणनात् इ कुलं नयतीति नपुंसकह्रस्वःइकुलमित्यादौ अन्तरङ्गपरिभाषायाः तुग्विधौ स्वीकारेपि न निर्वाहः ह्रस्वतुकोस्समाननिमित्तकत्वात् । अतस्सन्निपातपरिभाषयैव तुग्वारणं बोध्यम्।

ननु साम आकमित्यनेन भाविनः सुटो निवृत्यर्थं साम आकम् विधीयते। अमः

आकमादेशविधानेपि सन्निपातपरिभाषया सुडभावे तत् व्यर्थं सत् आगमस्य सन्निपाता-विघातकत्वं ज्ञापयति। तेन तेषां तानीत्यादौ विभक्तिसन्निपाते त्यदाद्यत्वेन सुट् नुक् च भवत्येव । एवञ्च प्रकृतेपि तुकः सन्निपातविघातकत्वेन तुक् दुर्वार इति चेन्न। धर्मिग्राहकप्रमाणेन आगमस्य पौर्वापर्यात्मकसन्निपातविघातकत्वाभाव एवाङ्गीक्रियते। प्रकृते तुकः ह्रस्वनिमित्तकविशेषणविशेष्यभावात्मकसन्निपातविघातकत्वेन तदभावस्य सुलभत्वादिति भावः। ह्रस्वे इति । इको ह्रस्वोऽङ्यो गालवस्येत्यादिना। एकादेशिन इति। तुग्विधावन्तरङ्गपरिभाषा नेत्युपपादितत्वादिति भावः ।

इतिलघुशब्देन्दुशेखरव्याख्यायां भावबोधिन्याम् अजन्तनपुंसकाः ।

बालबोधिनी : प्रीणामिति । प्रकृष्टो राः धनं यस्येति बहुव्रीहौ प्रैशब्दः । आमि पूर्वविप्रतिषेधात् नुमं बाधित्वा नुटि रायो हलि इत्यात्वे प्राणामिति माधवः । वस्तुतस्तु ह्रस्वान्तत्वमुपजीव्य प्रवृत्तस्य नुटस्तद्विघातकमात्वं प्रति निमित्ततत्वासंभवात् नुट्यात्वं न । नामीति दीर्घस्त्वारम्भसामर्थ्यात् संनिपातपरिभाषां बाधत इति दीर्घस्य निर्बाधतया प्रीणामिति मूलकारः ।

ननु रायो हलीति सूत्रे हलीति विषयसप्तमी । तथा च पूर्वमात्वे तदुत्तरं ह्रस्वान्तत्वाभावान्नुटोऽप्रवृत्त्या नुड्घटितं रूपमसङ्गतमिति शङ्कायामाह न चेति । प्रागेवात्वमिति । नेत्यन्वयः । तत्र हेतुमाह निर्दिष्टेति । तस्मिन्निति निर्दिष्टेत्यर्थः । मानाभावादिति । तथा चौपश्लेषिकाधिकरणसप्तम्यन्तत्वमेव न्याय्यमिति भावः । विषयसप्तम्याश्रयणेऽपि न नुटः प्रागात्वमित्याह आत्वे कृते इति ।

कैश्चिदुक्तं माधवाशयमाह केचित्त्विति । नुटो निमित्तस्य सन्निपातस्य = ह्रस्वान्तत्वस्य । दीर्घेण = नामीति दीर्घेण । तद्विषये = नुड्विषये । विषय एव नेति । नामीति सूत्रारम्भसामथ्यात् सामान्यतो नुड्विषये सन्निपातपरिभाषाया अप्रवृत्ति-ज्ञापनादित्यर्थः । ननूक्तरीत्या सामान्यज्ञापनेन रामाणामित्यादौ सुपि चेति दीर्घस्य न्याय्यत्वात् नामीति दीर्घ इति ग्रन्थासङ्गतिरित्यत आह नामीति । आहुरिति । अनेनारुचिः सूच्यते । तथा हि - सामान्यतो नुड्विषये सन्निपातपरिभाषाया अप्रवृत्तिज्ञापने श्नान्नलोप इति सूत्रस्थभाष्यासङ्गतिः । रुधादिभ्यः श्नम्, श्नान्नलोप इत्यादौ शकाराकरणे नान्नलोप इति न्यासे नन्दतीत्यादौ नकारात्परस्य नुमो नकारस्य लोपमाशङ्क्य अनिदितामित्यपकृष्य इदिद्भिन्नस्य धातोर्नस्य लोप इत्यर्थेन परिहृतो दोषः । ततः यत्नानां यज्ञानामित्यत्र नलोपापत्तिरिति शङ्किते नामीति दीर्घे जाते नास्ति नलोपप्राप्तिरिति पूर्वपक्षिणा उत्तरिते ततः

सिद्धान्तिना यज्ञानामित्यादौ दीर्घनलोपयोः प्राप्तौ परत्वाद्दीर्घं बाधित्वा नलोपः प्रवर्तत इत्युक्तम् । अतत्र परत्वादित्युक्त्या नामीति दीर्घस्यैव प्राप्तिस्सूचिता, न तु सुपि चेत्यस्य । सर्वत्र दीर्घे सन्निपातपरिभाषाया अप्रवृत्तौ तु नलोपात् परत्वात् सुपि चेति दीर्घस्यैव प्राप्त्या परत्वान्नलोप इति भाष्यासङ्गतिः स्पष्टैव ।

प्रसङ्गवशात् नपुंसकह्रस्वविषये अन्यत्र प्रसक्तं दोषं वारयितुमाह ग्रामणि कुलमिति पदद्वयमिदम् । समुदितप्रातिपदिकेति । प्रातिपदिकरूपसमुदायेत्यर्थः । कृन्मेजन्तः (1-1-39) इति सूत्रभाष्ये सन्निपातपरिभाषायाः प्रयोजननिरूपणावसरे -प्रयोजनं ह्रस्वत्वं तुग्विधेः ग्रामणिकुलम् । ग्रामणिकुलम् सेनानिकुलमित्यत्र ह्रस्वत्वे कृते ह्रस्वस्य पितीति तुक् प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवतीत्युक्त्वा तदुत्तरं नैतदस्ति प्रयोजनम् । बहिरङ्गं ह्रस्वत्वमन्तरङ्गस्तुक् । असिद्धं बहिरङ्गमन्तरङ्गे इति बहिरङ्गपरिभाषया दोषो वारितः । तत्र प्रदीपे कैयटः ग्रमणिकुलमिति प्रतीकमुद्धृत्य 'इको ह्रस्व इति पूर्वोत्तरपदसन्निपातनिमित्तं ह्रस्वत्वं तुको न निमित्तम् । तुकि हि सति पूर्वोत्तरपदयोरान्तर्यविघातः । यदा तु ह्रस्वमात्रस्य तुगागमो न तदन्तस्य, अवयवावयवश्च समुदायावयवो न भवति तदैतत्प्रयोजनं, न त्वन्यथेति' व्याख्यातवान् । तत्रैव प्रदीपोद्योते 'पूर्वोत्तरेति । अधिकृतेनोत्तरपदेन पूर्वपदस्याक्षेपादिति भावः । अवयवेति । तथाऽप्रतीते-रित्यभिमानः । वस्तुतस्तु इगन्तपूर्वपदस्योत्तरपदसन्निपातविघातः, पूर्वपदस्येगन्तत्व-सन्निपातविघातश्चेति भाष्याशयः । लोके पाण्याद्यवयवाङ्गुल्यादेः भुजपुरुषाद्यवयवत्व-व्यवहारात् कैयटोक्तं चिन्त्यम् । किञ्च भवितेत्यादौ तासवयवेटो लघूपधाङ्गावयवत्वेन प्राप्तस्य गुणस्य दीधीवेवीटामिति निधेषो व्यर्थः स्यात् । एतेनावयवावयवस्य समुदायावयवत्वे अवयवावयवेऽपि अवयविनः समवेतत्वापत्तौ घटस्यापि परमाणुषु समवेतत्वेनाप्रत्यक्षसमवेततया वासुवृक्षसंयोगवदप्रत्यक्षत्वं स्यादिति परास्तम् । भूयोऽवयवसंनिकर्षस्यैव फलबलात् कारणत्वेनातेः । संयोगप्रत्यक्षे तु यावदाश्रयप्रत्यक्षमेव हेतुः फलबलादिति दिगिति' ग्रन्थकारः ।

'बहिरङ्गं ह्रस्वत्वमन्तरङ्गस्तुक्' इति भाष्यव्याख्याने प्रदीपे 'यदपि ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं तदपि अर्थाश्रयत्वाद्बहिरङ्गम्, तुक्तु वर्णाश्रयत्वादन्तरङ्ग' इति कैयटः । अर्थाश्रयत्वादिति प्रतीकमादाय' उद्योतकारः 'इदं त्रयादेशे स्रन्तस्य प्रतिषेधो वक्तव्य इति स्थानिवत्सूत्रस्थेन वार्तिकेन, तत्प्रत्याख्यानपरभाष्येण च विरुद्धम् । प्रातिपदिकरूपसमुदायाश्रयत्वादिति वक्तुं युक्त'मित्याह । प्रकृतमनुसरामः ।

कृन्मेजन्तभाष्यमनुसृत्य मूले ग्रामणि कुलमित्यादौ बहिरङ्गपारभाषया तुग्वारणं प्रदर्श्य, वस्तुतस्तु नाजानन्तर्य इति निषेधेन बहिरङ्गपरिभाषया निर्वाहो न भवतीति 'ग्रामणि कुलम्' इत्यादौ तुग्वारणं सन्निपातपरिभाषायाः फलमित्याशयेनाह ये त्विति । अन्तरङ्गपरिभाषाया अप्रवृत्तौ तुग्वारणोपायमाह उपजीव्यविरोधादिति । एवम् = उक्तरीत्या दोषवारणे । न च व्यर्थेत्यन्वयः । तस्याः = सन्निपातपरिभाषायाः । स एवार्थ इति । निमित्तनिमित्तिनोस्सम्बन्धवद्विशेषणविशेष्ययोः सम्बन्धोऽप्यत्र सन्निपातशब्देन गृह्यते । एवं चोपजीव्यविरोधन्यायादस्या अर्थतोऽपि भेदाभावेनोभयोरैक्यमेवेत्याशय इत्यन्यत्र स्पष्टम्। अत एव = उपजीव्यन्यायसन्निपातपरिभाषयोरेकार्थत्वादेव । विचालः = नाशः, सन्निपात-पदेन न केवलं पौर्वापर्यलक्षणो निमित्तनिमित्तिनोः सम्बन्ध एव ग्राह्यः किन्तु विशेषण-विशेष्ययोस्सम्बन्धोऽपीति परिभाषेन्दौ स्पष्टम् । इत्युक्तमिति । सन्निपातपदेन निमित्तनिमित्तिनोः सम्बन्ध एव यदि गृह्यते तर्हि दाक्षिरित्यत्र इञ्प्रत्ययस्य निरुक्तसन्निपात-निमित्तकत्वाभावेन परिभाषाया अविषयत्वेन सन्निपातपरिभाषादोषनिरूपणावसरे वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यादिति कात्यायनवचनमसङ्गतं स्यादिति भावः । सर्वविधसन्निपातग्रहणे विरोधमाशङ्कते न चेति । तस्य भाष्यस्यैकदेश्युक्तित्वं साधयति अन्यथेति । एकदेश्युक्तित्वाभावे इत्यर्थः । इत्यादावपीति । अपिना दाक्षिरित्यादिसंग्रहः । सा = अङ्गसंज्ञा । अन्यत्र = उद्योतादौ । ननु नाजानन्तर्य इति निषेधादनित्यत्वाद्वा तुग्विषये बहिरङ्गपरिभाषाया अप्रवृत्तिस्वीकारे तया परिभाषया ग्रामणि कुलमित्यादौ तुग्वारणपरं कृन्मेजन्तसूत्रभाष्यं विरुद्ध्येत अत आह ग्रामणि पुत्र इति । तद्विरोधः = कृन्मेजन्त-सूत्रस्थभाष्यविरोधः ।

अयं भावः । द्वयोः सम्बन्धं निमित्तीकृत्य जायमानं कार्यं तद्विघातकस्य कार्यान्तरस्य निमित्तं न भवतीति संनिपातपरिभाषाया अर्थः । उपजीव्यविरोधमूलिकैषा परिभाषा । उपजीव्यम् = उपकारकम् । अस्याः परिभाषाया न्यायमूलकत्वादेव न केवलमत्र पौर्वापर्यलक्षणसंबन्धः, किन्तु विशेषणविशेष्यभावोऽपि गृह्यते । अत एव ग्रामणि कुलमित्यादौ प्रत्ययलक्षणमाश्रित्य पिति कृति प्राप्तः तुगागमो न । ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वो न पौर्वापर्यलक्षणसंबन्धवान् । किन्तु प्रातिपदिकस्याजन्तत्वं विशेषणम् । एवञ्च प्रातिपदिकस्याजन्तविशेषणरूपो यस्संबन्धः तेन जातस्य ह्रस्वस्य तादृशसंनिपातविघातकतुग्निमित्तकत्वं नास्ति । कृन्मेजन्तसूत्रभाष्ये निरुक्तरीत्या ग्रामणि कुलमित्यादेः संनिपातपरिभाषाफलत्वमुक्त्वा ततो नैतदस्ति प्रयोजनं, बहिरङ्ग

ह्रस्वत्वमन्तरङ्गस्तुगिति अन्तरङ्गपरिभाषामाश्रित्य तत्प्रयोजनं निराकृतम् । ह्रस्वस्य नपुंसकत्वरूपार्थाश्रयत्वेन बहिरङ्गत्वात् तुकि कार्ये तस्यासिद्धत्वमिति कैयटः । वस्तुतस्तु अर्थकृतबहिरङ्गत्वस्यानाश्रयणेन प्रातिपदिकरूपसमुदायाश्रयत्वादिति वक्तुं युक्तमिति नागेशः ।

वस्तुतस्तु नाजानन्तर्य इति निषेधानाश्रयणेन प्रवृत्तत्वात् कृन्मेजन्तसूत्रस्थं भाष्यमेकदेशिन एव । ग्रामणि कुलमित्यस्य वार्तिककृदुक्तं सन्निपातपरिभाषाफलत्वमेव युक्तम् । नाजानन्तर्य इति निषेधेन, अनित्यत्वाद्वा तुग्विषये बहिरङ्गपरिभाषाया अप्रवृत्तिर्वक्तव्या । यदि तत्रापीयं प्रवर्तेत तर्हि अधीत्येत्यादावन्तरङ्गे तुकि कर्तव्ये पदान्तपदाद्योरेकादेशस्य बहिरङ्गत्वेनासिद्धत्वे सिद्धे षत्वतुकोरसिद्ध इति सूत्रे तुग्ग्रहणं व्यर्थं स्यात् । एवं वृत्रहभ्यामित्यादौ तुकि कर्तव्ये बहिरङ्गस्य नलोपस्यासिद्धत्वे सिद्धे तदर्थं कृतं नलोपः सुप्स्वरेति सूत्रस्थं कृति तुग्ग्रहणं व्यर्थं स्यात् ।

कृन्मेजन्तसूत्रे भाष्ये संनिपातपरिभाषादोषनिरूपणप्रकरणे 'तस्यैतस्य लक्षणस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात् । क्व ? अत इञ् । दाक्षिः, प्लाक्षिः' इत्युक्तं वार्तिककृता । संनिपातपरिभाषाश्रयणे वर्णाश्रयः प्रत्ययः = प्रातिपदिक-गतादन्तत्वरूपसंबन्धनिमित्तक इञ्प्रत्ययः, वर्णविचारस्य = यस्येति चेत्यकारलोपस्य निमित्तं न स्यात् । तत्रादन्तत्वप्रातिपदिकयोः विशेष्यविशेषणभावस्सम्बन्धः, न तु पौर्वापर्यलक्षणः । तस्यैवात्र संनिपातशब्देन ग्रहणे तादृशसंबन्धस्य तयोरसत्वात् परिभाषायाः प्रसक्त्यभावेन तद्दोषपरिगणनप्रकरणे तद्वचनमसङ्गतं स्यादिति भावः ।

ननु वार्तिककृता दाक्षिरित्यादौ वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यादिति संनिपातपरिभाषाया दोषे उक्ते सति तदुत्तरं संनिपातशब्देन पौर्वापर्यलक्षण एव ग्राह्य इत्यभिप्रायेण 'न प्रत्ययः संनिपातलक्षणः' इति शङ्का कृता । अत इञ् इतीञ्प्रत्ययो न पूर्वपरलक्षणसंनिपातनिमित्तक इति नात्र दोष इति शङ्कितुराशयः । ततः पौर्वापर्य-लक्षणसंनिपात एवात्र गृह्यत इत्यङ्गीकृत्य 'अङ्गसंज्ञा तर्ह्यनिमित्तं स्या'दित्युक्तं भाष्यकृता । यस्मात् प्रत्ययविधिरित्यस्य प्रत्ययविधावुद्देश्यतावच्छेदकावच्छिन्नादित्यर्थेऽवर्णान्तादिञि तदङ्गसंज्ञं भवतीति सूत्रार्थः । सत्यामङ्गसंज्ञायामकारलोप इत्यानन्तर्यविघात इति तदाशयः । प्रत्ययसंनिपातप्रयुक्ता अङ्गसंज्ञा प्रकृतिसंबन्धि-वर्णविनाशक यस्येति चेति लोपं प्रति निमित्तं न भवतीति वार्तिकाराशय इति तत्तात्पर्यम् । सन्निपातपदेन सर्वविधसन्निपातग्रहणे प्रागुक्तभाष्यविरोध इति चेन्न । प्रागुक्तयोः

शङ्कासमाधानयोरेकदेश्युक्तित्वेन विरोधाभावात् । तथा हि - वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यादिति वार्तिकस्य प्रत्ययसन्निपातप्रयुक्ताङ्गसंज्ञा प्रकृति-संबन्धिवर्णविनाशकं यस्येति लोपं प्रति निमित्तं न स्यादित्याशयकत्वे दाक्षिः, प्लाक्षिः इत्यादौ 'अत इञ्' इति वर्णाश्रयप्रत्ययस्थलेऽङ्गसंज्ञाया लोपानिमित्तकत्वं तथा शैवः, गार्ग्यः, वैनतेय इत्यादौ शिवादिभ्योऽण्, गर्गादिभ्यो यञ्, स्त्रीभ्यो ढक् इति शिवादिरूप-समुदायाश्रयप्रत्ययस्थलेऽपि, अङ्गसंज्ञाया लोपनिमित्तकत्वानापत्त्या समुदायाश्रयप्रत्यय-विषयेऽपि तद्दोषसंभवेन प्रत्यये वर्णाश्रयत्वविशेषणमनर्थकं स्यात् । तथा च सामान्यतः प्रत्ययो वर्णविचालस्यानिमित्तमिति वक्तव्ये तद्विशेषणदानात् तस्य वार्तिकस्य तादृशाशयवर्णनपरं भाष्यमेकदेशिवचनमिति भावः । ग्रामणिकुलमिति समस्ते यथा-कथञ्चिद्बहिरङ्गपरिभाषया तुग्वारणसंभवेऽपि ग्रामणि कुलमित्यसमस्ते तया परिभाषया तद्वारणं न संभवतीति बोध्यम् । अधिकं तावत् परिभाषेन्दुबालबोधिनीतो ग्राह्यम् ।

इति लघुशब्देन्दुशेखरव्याख्यायां बालबोधिन्यामजन्त-नपुँसकलिङ्गप्रकरणं समाप्तम् ।